TEXT FLY WITHIN THE BOOK ONLY

UNIVERSAL
LIBRARY
OU_184465
UNIVERSAL
LIBRARY

OUP—43—30-1-71—5,000

OSMANIA UNIVERSITY LIBRARY

Call No S722-4 K15K P. G. Accession No. 52282

Author काश्यपमहर्षि -

Title काश्यपशिल्पम् . 1926 .

This book should be returned on or before the date last marked below.

आनन्दाश्रमसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ९५

महर्षिकश्यपप्रणीतं

काश्यपशिल्पम् ।

एतत्पुस्तकम्

रा० रा० नाशिकक्षेत्रनिवासिभिः वझे इत्युपाभिधकृष्णरायैः संशोधितम् ।

तच्च

बी. ए. इत्युपपदधारिभिः

विनायक गणेश आपटे

इत्येतैः

पुण्याख्यपत्तने

आनन्दाश्रममुद्रणालये

आयसाक्षरैर्मुद्रयित्वा

प्रकाशितम् ।


शालिवाहनशकाब्दाः १८४७

खिस्ताब्दाः १९२६

(अस्य सर्वेऽधिकारा राजशासनानुसारेण स्वायत्तीकृताः ।)

मूल्यमेकाणकाधिक रूपकत्रयम् (३।१) ।

भारतवर्षम्


पूर्व
समुद्रः
तामसो देश
कृतयुगे जात (पद्मस)
राजसो देश
त्रेतायुगेजात (भृगुस)
सात्त्विको देश
द्वापरोत्पन्न (काश्यपस)
पश्चिम
समुद्रः

काश्यपशिल्पसंबन्धि निवेदनम् ।

अयि भो गीर्वाणवाणीरसिकाः प्राचीनविद्यारहस्याभिज्ञा अत एव तत्र दृढबद्धादराः प्राच्यार्वाचीनविद्याविशारदा आनन्दाश्रमसंस्कृतग्रन्थावलीप्रकाशितग्रन्थग्राहकमहाशयाः शृणुतेदानीं निवेदनीयमस्ति किंचित् । अतोऽवधानं दीयमानमाशासे । काश्यपशिल्पनामा शिल्पशास्त्रीयग्रन्थोऽद्यावधि देवनागर्यां लिपौ क्वाप्यमुद्रितोऽत्र मुद्रणालये मुद्रणायोपक्रान्तः । उपक्रान्तस्य च तस्य दश द्वादश वा मासाः संवृत्ताः । संप्रति परिसमाप्तमुद्रणोऽयं ग्रन्थो विदुषां दृष्टिपथमवतरतीति प्रमोदावहमेतत् । काश्यकशिल्पेति नाम्नैवास्य ग्रन्थस्य विषयः कर्ता चावगतो भवति । कलाकौशल्यादिकं कर्म शिल्पमित्युच्यते । तदुक्तममरसिंहेनामरकोशे द्वितीयकाण्डे शूद्रवर्गे—शिल्पं कर्म कलादिकमिति । आदिशब्देन सुवर्णकारगृहकारादीना कर्म ग्राह्यमिति तट्टीकायामुक्तम् । तादृशं शिल्पमधिकृत्य प्रणीतं शास्त्रमपि लक्षणया शिल्पशब्देनोच्यते । यथा वासवदत्तामधिकृत्य कृताऽऽख्यायिकाऽप्यभेदोपचारद्वासवदत्तेत्युच्यते तद्वत् । तच्च शिल्पं तक्षणं वास्तुविज्ञानमलंकारघटनं तन्तूना वयनं माल्यग्रन्थनं काचवलयादिकरणमालेख्यकरणं ताम्रघट्टनं गीतं नृत्तं चेत्याद्यनेकभेदभिन्नम् । तथा तत्प्रतिपादकं शास्त्रमप्यनेकभेदभिन्नम् । तत्र शिवविष्णुब्रह्मस्कन्दगणेशपार्वतीलक्ष्मीसरस्वत्यादिमूर्तिनिर्माणसहिततत्तद्देवतालयप्रासादहर्म्यगृहशालाद्यनेकप्रकारकवास्तुनिर्माणप्रकारप्रतिपादकमिदं शास्त्रम् । अर्थाद्वास्तुशास्त्रमिति विशेषनामास्य फलति। वसन्ति प्राणिनोऽत्रेति वास्तुशब्दव्युत्पत्तिः । प्रासादहर्म्यादिकं गृहं तदर्थः । गृहं च सर्वसुखोपभोगस्य मुख्य साधनम् । तदुक्तम्—

स्त्रीपुत्रादिकभोगसौख्यजनकं धर्मार्थकामप्रदम् ।
जन्तूनां लयनं सुखास्पदमिदं शीताम्बुघर्मापहम् ॥
ऋषीदेवगृहादिपुण्यमखिलं गेहात्समुत्पद्यते ।
गेहं पूर्वमुशन्ति तेन विबुधाः श्रीविश्वकर्मादयः ॥ इति ।

अस्य च कर्ता कश्यप ऋषिः । तत्र काश्यपेति विशेषणात् । कश्यपेन प्रोक्तं काश्यपं तच्च तच्छिल्पं चेति । अयं चर्षिर्विष्णोर्नाभिकमलात्समुद्भूतस्य

ब्रह्मणो नप्ता यज्ञे सोमरसपानात्कश्यपेत्यभिधानं प्राप्तवान् । तदुक्तं मार्कण्डेय-पुराणे —

ब्रह्मणस्तनयो योऽभून्मरीचिरिति विश्रुतः ।
कश्यपस्तस्य पुत्रोऽभूत्कश्यपानात्स कश्यपः ॥ इति ।

कश्यं सोमादिरसं पिबतीति कश्यप इति तद्व्युत्पत्तिः । कर्ता च यः खलु यं कंचिदर्थविशेषं प्रतिपादयितुं स्वातन्त्र्येण पदवाक्यसंदर्भमारचयति स उच्यते लोके । एवं च व्यासेन प्रोक्तं वैयासिकं भारतमित्यादौ भारतस्य व्यास इवास्य शिल्पशास्त्रस्य कश्यपेन प्रोक्तत्वात्कश्यपः कर्ता सिध्यति । नन्वयं शिल्पशास्त्रार्थः किं कश्यपस्य तपःप्रभावादिना स्वयंभातः किमुत केनाचिदुपदिष्टः स्यात् । स्वयंभातश्चेद्युज्यते कश्यपस्यैतच्छिल्पशास्त्रकर्तृत्वम् । अन्येन केनापि उपदिष्टश्चेद्य एवोपदेष्टा स एवास्य शास्त्रस्य कर्ता भवेन्न कश्यपः । यतो यादृशानुपूर्वीघटितवाक्यसंदर्भोऽन्येनोच्चारितस्तं तथैवाहमुच्चारयामीति मनसि कृत्वा यः किलोच्चारयति नासौ कर्ता लोके प्रोच्यते, किं त्वनुवादकः स भवति । तत्र स्वयंभात इत्येतद्विषये न किंचित्प्रमाणमुपलभ्यते । उपलभ्यते त्वन्येनोपदिष्ट इत्यर्थे प्रमाणम् । यतः किल ग्रन्थोपक्रम एव श्रूयते—

प्रणम्य देवचरणमेवं ब्रूयात्स कश्यपः ।
महार्थमल्पग्रन्थं च कर्षणाद्यर्चनान्तकम् ॥
अंशुमन्तमहातन्त्राद्यत्त्वयोक्तं पुरार्थकम् ।
तन्त्रं तद्वद देवानां रुद्राणामधिकारिणाम् ॥
अल्पायुष्याधिधर्माणां नराणां त्वधिकारिणाम् ।
अनुग्रहार्थं त्वेतेषां संक्षेपाद्वद मे प्रभो ॥ इति ।

एवं च सर्वप्राणिसुखसाधनमेतद्वास्तुशास्त्रं कश्यपेन महर्षिणा लोकोपकारार्थं देवाधिदेवाय श्रीशंकराय पृष्टं ततश्च चराचरगुरुणा परमेश्वरेण पार्वतीरमणेन सर्वविद्यानामीशानेन जिज्ञासवे कश्यपनाम्ने महर्षय उपदिष्टमिति गम्यते । ततश्च महेश्वर एवास्य कर्ता कश्यपस्तु केवलं प्रकाशक इति कथं कश्यपस्यैतद्वास्तुशास्त्रकर्तृत्वं साध्यत इति चेदुच्यते । यद्वद्भगवता श्रीकृष्णेन शिष्योत्तमाय पार्थाय गीताशास्त्रमुप-

दिष्टमपि न तावता गीतायाः कर्ता श्रीकृष्ण उच्यते किंतु वेदव्यास. एव तत्कर्ता स्मर्यते लोके । अत एवोक्तं भगवद्गीताशांकरभाष्य आचार्यचरणैः-तं धर्मं भगवता यथोपदिष्टं वेदव्यासः सर्वज्ञो भगवान्गीताख्यैः सप्तभिः श्लोकशतैरुपनिबबन्धेति । तद्वदेतच्छिल्पशास्त्रार्थो भगवता महेश्वरेणोदीरितोऽपि न तावताऽस्य शिल्पशास्त्रस्य महेश्वरः कर्ता भवितुमर्हति किंतु लोकप्रसिद्धचा कश्यप एव कर्तेत्युच्यते । प्रतिपटलसमाप्तौ च काश्यपशिल्पे, इत्युल्लेखदर्शनेनापि तथैवानुमीयते । अत एवास्य शास्त्रस्य काश्यपसंहिता काश्यपशिल्पमिति च व्यवहरन्ति तज्ज्ञाः । किंच योऽयं शिल्पशास्त्रार्थो महेश्वरेण कश्यपायोदीरितः सोऽतिसंक्षिप्तयैव गीर्वाणवाण्योपदिष्ट इति मन्ये । संक्षिप्तत्वं च बहुलार्थवत्त्वविशिष्टसंकुचितपदवाक्यघटितत्वम् । वचनार्थकशब्दसमभिव्याहारे संक्षेपशब्दस्य तादृशार्थकत्वस्यैव बहुशो दृष्टत्वात् । तादृशी च वाणी सूत्ररूपा । तथाच श्रूयते—

अल्पाक्षरमसंदिग्धं सारवद्विश्वतोमुखम् ।
अस्तोभमनवद्य च सूत्रं सूत्रविदो विदुः ॥ इति ।

एवं च सूत्रीभूतभाषया शिल्पशास्त्रार्थो महेश्वरेणोदीरितः । युज्यते चैषा कल्पना । यतः—महार्थमल्पग्रन्थं च संक्षेपाद्वद मे प्रभो, इति ग्रन्थारम्भे ग्रन्थकारेण स्वयमेवोक्तत्वात् । ततश्च संक्षिप्तपदवाक्यघटितात्सूत्रौघात्कुशाग्रधिषणानां बोद्धुं यद्यपि निःसंदिग्धतया सुलभतया च यथावदर्थावबोधः संजायेत तथाऽपि मन्दमतीनां तेषा तस्मात्तथाऽर्थावबोधो न स्यादित्यनुसंधाय लोकोपकृतये कश्यपमहर्षिणा तादृशार्थानुसंहिता सुबोधपदवाक्यघटिता सुविस्तृताऽनुष्टुप्छन्दोमयी गीर्वाणवाणी व्यरचीत्यमुष्य शिल्पशास्त्रस्य कर्तृत्वं कश्यपे स्थिरी भवति ।

अथेदमिदानी चिन्त्यते कदाऽस्य शिल्पशास्त्रस्यास्मिञ्जगति प्रवृत्तिरभूदिति । तत्र अल्पायुष्यादिधर्माणां नराणामित्युक्तत्वान्मुख्यतो मनुष्यप्राणिनां सुखसाधनमिदं शास्त्रम् । अनुभवश्चात्र साक्षीति न कश्चिद्विवादः । यद्यप्येतच्छास्त्रप्रतिपाद्यो वास्तुरूपोऽर्थः पशुपक्ष्यादीनां तिरश्चामपि सुखसाधनं भवितुमर्हति तथाऽपि न तेषां सुखसाधनत्वेन नियतः । यतस्तेऽयत्नसिद्धतरुगुल्मवृक्षजालगिरिकन्दर्यादि-

संश्रयणेनापि वर्षातपौ निवारयन्ति । न चैते शास्त्रार्थावगमक्षमबुद्धयः । नैव वा तादृशशिल्पकरणे कदाऽपि शक्ताः । तस्मान्मनुष्यप्राणिसृष्ट्युत्तरकालमस्य शास्त्रस्य जगति प्रवृत्तिः सिध्यति ।

अथ मनुष्यप्राणिसृष्टिः सृष्टिक्रमेण कदाऽभूत्किं तिर्यक्प्राणिसृष्ट्युत्तरं मनुष्यप्राणिसृष्टिरथवा मनुष्यप्राणिसृष्ट्युत्तरं तिर्यक्प्राणिसृष्टिरिति विचार्यते । तत्र कार्यकरणसंघातस्य देहस्य भौतिकत्वान्महाभूतोत्पत्त्यनन्तरं प्राणिसृष्टिरिति तावन्निर्विवादम् । यद्यपि सृष्टिप्रतिपादकश्रुतिषु पञ्चमहाभूतोत्पत्तिविषये—आत्मन आकाशः संभूतः । आकाशाद्वायुः । वायोरग्निः. इत्यादिना क्रमः श्रूयते तथाऽपि भौतिकसृष्टिविषये विशेषतः प्राणिसृष्टिविषये न श्रुतौ क्रमः स्पष्टं प्रतीयत इति ब्रुवाणास्तूष्णीमासते । नवीनास्तु युक्तिमालम्ब्य तिर्यक्सृष्ट्युत्तरं तत्रापि वानरसृष्ट्युत्तरं मनुष्यसृष्टिं प्रतिपादयन्ति । तदित्थम्—प्राणिषु गण्डूपदमारभ्योत्तरोत्तरं क्रमेण महत्सु अधिकाधिकं बुद्धितारतम्यमनुभूयते । तारतम्यस्य परा काष्ठा च मनुष्येषु । यद्यपि केचित्पशव. सिंहव्याघ्रगजादयो मनुष्यापेक्षयाऽपि स्थूलाः संलक्ष्यन्ते तथाऽपि तदपेक्षया मनुष्या एव महान्तः । यतस्ते सिंहव्याघ्रादीन्पराक्रमशालिनोऽपि युक्तिप्रयुक्त्यादिभिः स्ववशमानयन्तीति लोके दृश्यते । एवं स्थिते यदा भगवतः परमेश्वरस्य बहु स्यां प्रजायेयेति सिसृक्षा समजनि तदा स्वनाभिकमलात्स्रष्टारमुद्भाव्य तमाज्ञापितवान्प्रभुः प्रजाः सृजेति । स च विधाता सर्वास्वपि दिक्षु दृष्टि दत्त्वा सर्जनोपायमन्विष्यमाणो गिरिनदीसमुद्रादिका सुविशाला पञ्चमहाभूतसृष्टि विलोक्य बभ्राम । यदा तु न लेभे सर्जनोपायमथ शोकाकुलो भूत्वा भगवन्तं शरणमुपगम्य सर्वथा मूढोऽहं बालकस्ते त्रायस्व मां भ्रान्तमिति प्रणिपत्य व्यजिज्ञपदज्ञोऽहं न जाने सर्जनमार्गं कथं प्रजाः सृजेय तत्प्रसीदतु मह्यं भगवानिति । संतुष्टः परमेश्वरस्तस्मै साङ्गोपाङ्गं वेदराशिं समर्पितवान् । ततस्तदर्थमनुसंधाय सृष्टिं विरचयितुं प्रथमत एव प्रवृत्तः स्रष्टा न साधीयसी सृष्टि निर्मातुं शशाक । लोकेऽपि पटादीन्निर्मातुं प्रवृत्तः कुविन्दादिरभ्यासपाटवाभावान्न प्रथमतः साधीयसः पटानुत्पादयितुं शक्नोतीति दृश्यते । क्रमेण चाभ्यासपाटवातिशयवशात्तत्तत्कार्यविशेषकरणसमर्थान्पटान्महार्हान्निर्मिमीते । तथाऽयमपि विधातोत्तरोत्तरमभ्यासपाटवातिशयवशाद्वेदशास्त्रेतिहासार्थानुसंधानेन तत्प्रतिपाद्यार्थभूतशिल्पाद्यनुष्ठानसमर्थां मनुष्यसृष्टिं

चकारेत्यवगम्यते। तत्राभ्यासापाटवावस्थायां या प्राणिसृष्टिः सृष्टा सा न समीचीना। यतः प्रथमत एवानुष्ठितं किंचिदसमीचीनमिव भवति। सा च सृष्टिः गण्डूपदादिवानरपर्यन्ता शिल्पशास्त्रार्थज्ञानानुष्ठानाक्षमेति मे मतिः। कथमन्यथा तां सृष्टिं तिर्यगिति व्यवहरेयुर्लोका विचारशीलाः। एवं क्रमेणेयं सृष्टिरुत्क्रान्ता। तदुत्तरं च तत्तच्छिल्पविशेषप्रयोगपटीयसी मनुष्यप्राणिसृष्टिरित्यर्थाद्वानरसृष्ट्युत्तरभावित्वं मनुष्यसृष्टेर्वदन्ति। अत एव वानरजातीयेषु नरसादृश्यं दरीदृश्यमानमुपपद्यते। वानरशब्दोऽपि अमुमेवार्थमभिधत्ते। तत्र नरशब्दो मनुष्यवाची। वाशब्दश्च सादृश्यार्थकः। नर इव वानरः। तथा च मनुष्येषु यादृशो हस्तपादाद्यवयवरचनाकारो दृश्यते तादृश आकारो यत्र स वानरशब्दभाक्। स च वानरो मनुष्यत्वावस्थायाः पूर्वावस्थेति च वदन्ति। अत्र युक्तायुक्तं त एव जानन्ति।

मनुष्यप्राणिजातिषु मुख्यतश्चत्वारो भेदाः श्रूयन्ते ब्राह्मणक्षत्रियवैश्यशूद्रा इति। तत्र ब्राह्मणाख्यवर्णेन वेदशास्त्राध्यापनादिकर्मोपजीविकानिर्वाहकत्वेनोररीकृतम्। क्षत्रियैः शौर्यादिना दुष्टनिग्रहसृष्टानुग्रहरूपपृथ्वीपरिपालनादि। वैश्यैः क्रयविक्रयादि कर्म। शूद्रैः पूर्वोक्तवर्णत्रयशुश्रूषा कारुकर्म च जीविकासाधनत्वेनाङ्गीकृतम्। तदुक्तं भगवद्गीतायाम्—

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः, इति।

तत्र यैः कारुकर्मोपजीविकासाधनत्वेन परिगृहीतं ते शिल्पिन इत्युच्यन्ते। ते च शिल्पानामनेकविधत्वादनेकविधाः। तत्र केचित्तत्तच्छिल्पविशेषस्य नियतमङ्गीकरणात्स्थपतिसुवर्णकारकुलालकुविन्दादितत्तज्जातीयत्वेन व्यवह्रियन्ते। तेषां केषांचिल्लक्षणमुत्पत्तिश्च यथा श्रूयते—

वास्तुविद्याविधानज्ञो लघुहस्तो जितश्रमः।
दीर्घदर्शी च शूरश्च स्थपतिः परिकीर्तितः॥ इति।

स्थपतिर्मुख्यतक्षा। तथा—


विश्वकर्मा च शूद्रायां वीर्याधानं चकार सः।
ततो बभूवुः पुत्राश्च नवैते शिल्पकारिणः॥
मालाकारः कर्मकारः शङ्खकारः कुविन्दकः।

कुम्भकारः कंसकारः षडेते शिल्पिनां वराः ॥
सूत्रधारश्चित्रकरः स्वर्णकारस्तथैव च । इति ।

स्थपतिकुविन्दकंसकारादिनाम्ना प्रसिद्धैस्तैस्तैः शिल्पिभिस्तत्तच्छिल्पविशेषस्य जीविकानिर्वाहकत्वेनाङ्गीकरणात्तत्प्रतिपादकेषु शिल्पशास्त्रीयग्रन्थेषु ब्राह्मणैरुदासितम् । अतः कारणाद्ब्राह्मणजातीयेषु शिल्पशास्त्राध्ययनाध्यापनप्रचारो लुप्तप्रायोऽभूदिति शिल्पग्रन्था अपि शिल्पिहस्तगता अभवन् । स्थपत्यादयस्ते च शिल्पिनः स्वस्वशिल्पानुष्ठाने यद्यपि कुशलाः संलक्ष्यन्ते तथाऽपि प्रायस्ते गीर्वाणवाणीपराङ्मुखाः । नैतावदेव किंतु स्वनामोल्लेखनपर्याप्ताक्षराणामप्यनभिज्ञाः । प्रयत्नेन कतिपयाक्षराणि ग्राहितास्तदपि स्वयमपि लिखितं स्वयं न वाचयतीत्याभाणकस्योदाहरणभूता भवन्ति । तत्र तादृशाक्षरार्थाकलनस्य कैव वार्ता । न च ग्रन्थार्थज्ञानेन तेषां किंचित्प्रयोजनम् । तदन्तरेणैव शिल्पप्रयोगकरणे समर्थास्ते । स समय एव तादृश आसीत् । यत्र शिल्पग्रन्थानां पठनपरम्परा तज्जातीयेष्वपि विलयं गताऽभूत् । परंतु एतावति कालेऽद्यावत्तद्धस्तगतानां शिल्पग्रन्थानां कीदृशी दुरवस्था संजाता स्यादिति तत्रभवद्भिर्भवद्भिरेव कल्पनीयम् । संप्रत्युपलब्धस्य काश्यपशिल्पग्रन्थस्यैकमपि प्रत्यन्तरं महाराष्ट्रदेशे नोपलभ्यते । सौराष्ट्रादिदेशे स्थपतिनामकानां शिल्पिनां समीपे क्वचिदस्तीति श्रूयते । तद्देशादेव एकं वा द्वे वा प्रत्यन्तरे वह्नेकुलोत्पन्नैः शिल्पकलानिधिकृष्णरायैः संपाद्य नागरलिप्यां विलेख्य मुद्रणार्थमेतन्मुद्रणालये समर्पितम् । तच्चाशुद्धिप्रचुरं स्थले स्थले त्रुटितं वर्णविपर्यासस्य तु परा काष्ठामापन्नम् । तत्रापि विदेशीयलिपौ येन केनापि अक्षरस्याप्यनभिज्ञेन हस्तेन लिखितम् । किं वक्तव्यं प्रभाते नक्षत्रसंततिरिव लिङ्गवचनसंगतिरपि दुर्दर्शा । अत्र सर्वत्र संकुलीकरणे लेखकपरम्परयाऽपि प्रभूतं साहाय्यमाचरित दृश्यते । संशये तादृशो लेखकः शैशवे शालां प्रविश्य स्थूलाक्षराणि शिक्षितो वा न वेति । मन्ये चैतादृशस्य बहुलाशुद्धिस्थलसंकीर्णस्य सर्वात्मना विपर्यासं गतस्यास्य संशोधनं वर्षाकालीनात्यन्तकलुषपयःपूरपतितार्थस्येव दुष्करम् । तर्कयामि यः कोऽपि ग्रन्थः सहायभूतानि त्रिचतुराणि प्रत्यन्तराण्यन्तरा नार्हति संशोधनं यथा तथाऽयमपि सहायभूतांस्त्रिचतुरांस्तज्ज्ञान्संशोधकान्विना न क्षमः परिशोधितुमिति । एवं च मुद्रणपथाद्विगलितोऽपि यद्ययं मुद्रणाय नोपक्रम्येत चेदुत्तरोत्तरं लेखकपरम्परयाऽधिका-

धिकमेव विपार्यासभावं गतः स्यात् । तथा च महर्षिकश्यपप्रणीतस्यास्य लोकोपयुक्तस्य शिल्पग्रन्थस्य विलय एव जायेत । इत्यालोच्य प्राचीनसंस्कृतग्रन्थोद्धारबद्धपरिकरैरेतत्संस्थाध्यक्षैस्तदुद्धरार्थोऽयं प्रयत्नोऽङ्गीकृतः । स्थपतिसंज्ञकैश्च कर्मकरैरप्युपकृतं मन्ये यैर्यादृशतादृशाक्षैररुलिख्यायं मनोरञ्जकः शिल्पशास्त्रीयग्रन्थः संगृहीतः । येनैतादृग्दुरवस्थो ग्रन्थो विदुषामग्रे संस्थाधिपतिभिः प्रस्थापितोऽभूत् । तदेनं ग्रन्थमुद्दिधीर्षवः प्राच्यार्वाचीनशिल्पशास्त्रविशारदाः पण्डिताः सादरं विलोक्य त्रिचतुराद्यशुद्धिस्थलपरिमार्जनसंसूचनेनाशंतोऽप्येतद्ग्रन्थोद्धारजनितश्रेयोभागिनो भवन्त्विति प्रार्थयते श्रीसच्चिदानन्दचरणकमलयोः—

आनन्दाश्रमस्थप्रधानसंस्कृतग्रन्थावलीसंशोधनकर्ता—
मारूलकरोपाह्वः शंकरशास्त्री ।



कदम्बसंहितामनुसृत्यावस्थितं नासिकक्षेत्रस्थं नागेश्वरीयं सदाशिवस्य मन्दिरम् ।

उपोद्घातः ।

—x+x—

अस्ति मानवजातेरुत्पत्तिक्षणादेव शिल्पस्य जन्म । विविधपरिस्थितिषु नानाविधयोजनाभिर्दुःखपरिहारपूर्वकं सुखोत्पादनप्रयत्न एव मनुष्यत्वपशुत्वयोर्विशेषः । न केवलं जगतो भिन्नभागेषु परमेकस्मिन्भागेऽपि विभिन्नकालेषु, तथा चैकस्मिन्कालेऽपि पारिस्थितिभेदेषु मनुष्येषु यथा भोगवैचित्र्यं दृश्यते न तथा पशुषु । पूर्वकाले काकवृकादयो यथाऽवर्तन्त तथैव सद्यःकालेऽपि वर्तन्ते । आङ्ग्लदेशस्थिताः काकवृका भरतभूमिस्थितेभ्यः काकवृकेभ्योऽसदृशवेषभोगाः । भरतभूमावपि षट्सु ऋतुषु काकवृकानामेका स्थितिः । तथा कृतयुगकालीनमनुष्याणां स्थितिः कलियुगकालीनमनुष्याणां स्थितेर्भिन्ना । आङ्ग्लेदशस्थिताना मनुष्याणां भोगवेषादयो भरतभूमिस्थितानां मनुष्याणां भोगवेषेभ्यो विसदृशाः । भरतभूमावपि ग्रीष्मशरद्धेमन्तऋतुषु मनुष्याणां भोगवेषा भिन्नाः । एकस्थाने निवसत्सु चैककालीनेषु मनुष्येषु संपन्नविपन्नाना भोगवेषा नैकरूपाः । एष सर्वः शिल्पस्य प्रभावः । अत एव पराशरादयो महर्षयो मनुष्यसृष्टिं पशुसृष्टेर्भिन्नरूपां मन्यन्ते । स्मर्यते च भृगुसंहितायाम्—

आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् ।
अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः ॥
तस्मिन्विकारः संभूतस्त्वधोगमननामकः ।
यस्मात्सर्वं च संजातं चराचरमिदं जगत् ॥ इति ।

पराशरीयकृषौ—

कालद्रव्यगुणैस्तस्मात्त्रिविधः प्रतिसंक्रमः ।
आद्यस्तु महतः सर्गो गुणवैषम्यमात्मनः ॥
द्वितीयस्त्वहमः सर्गो ज्ञानद्रव्यक्रियात्मकः ।
भूतसर्गस्तृतीयश्च तन्मात्रो द्रव्यशक्तिमान् ॥
चतुर्थ ऐन्द्रियः सर्गो यस्तु ज्ञानक्रियात्मकः ।
वैकारिको देवसर्गः पञ्चमो मन्मयं मनः ॥
षष्ठस्तु तमसः सर्गो यस्त्वबुद्धिकृतः सदा ।
ऊर्ध्वस्रोतः सप्तमस्तु षड्विधस्तथुषां चयः ॥
तिरश्चामष्टमः सर्गो योऽष्टाविंशतिधा स्मृतः ।
अर्वाक्स्रोतस्तु नवमः केवलैकविधो नृणाम् ॥ इति ।

अस्य जगत उत्पतेः प्रागिदं विश्वं तमःप्रायमप्रज्ञातमलक्षणं सर्वतः प्रसुप्तमिव शान्तमासीत् । तस्मिन्विकारः संभूतः । अस्य विकारस्य चाधोगमनं (गुरुत्वं) नाम । अस्याऽऽकर्षणात्सर्वं वस्तुजातमधो गच्छति तस्मात्सोऽधोगमननाम्ना ज्ञायते । पदार्थानामधःपतनकारणत्वात्स गुरुत्वमित्यप्यभिधीयते ।

अस्य विकारस्य प्रादुर्भावक्षणादेव कालो गण्यते । विष्णोराज्ञया प्रवर्तमानस्याद्य ब्रह्मण इति । दिगपि तदनुसारेण ज्ञायते । श्रूयते च—

दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वाः, इति । एवं सर्वा दिशोपदिशस्त्वधोबिन्दुसापेक्षतयैव ज्ञायन्ते । महदल्पादिगुणा अपि तस्याऽऽकर्षणाद्धनीभूतस्य तत्त्वस्याधिकन्यूनपरिमाणतया मीयन्ते । तारतम्येनानुभूयन्ते च । द्रव्यज्ञानक्रियासु चैकैकाधिकतया पञ्च महाभूतानि, पञ्च ज्ञानेन्द्रियाणि, पञ्चगुणग्रहणसमर्थं मनश्च प्रादुर्भूतम् । भूतानि द्रव्यविशेषात्, इन्द्रियाणि क्रियाविशेषात्, मनश्च ज्ञानविशेषात्, इति । भूतादीनां संमिश्रणेन साशनानशना सृष्टिर्जाता । तथा च श्रूयते पुरुषसूक्ते—

तस्माद्विश्वं व्य(तो विष्वङ्व्य)क्रामत्साशनानशने अभि, इति । तयोः साशनपदार्थाः स्रोतोभेदतस्त्रिविधाः । ऊर्ध्वस्रोतसस्तिर्यक्स्रोतसश्चार्वाक्स्रोतस इति । ऊर्ध्वस्रोतसां वनस्पत्योषधिलतादयः षट्प्रकारा भवन्ति । तिर्यक्स्रोतसां च पशुपक्षिमत्स्यादयोऽष्टाविंशतिप्रकाराः । अर्वाक्स्रोतसस्तु केवल एक एव प्रकारो नृसंज्ञकः । अर्वाक्स्रोतस एव क्वचिदूर्ध्वमूला इत्यपि कथ्यन्ते । इत्थं विकारप्रादुर्भावात्परम्परया चराचरात्मिकाऽखिला सृष्टिरुत्क्रान्ता । मनुष्याणामुत्क्रान्तेरनुसारेण शिल्पस्याप्युत्क्रान्तिरीरिति ।

मनुष्यशब्दो मनसः—विचारशक्तेः—उप्यं—वसतियोग्यं स्थानमिति निरुच्यते । शिल्पशब्दस्तु पुनः शील समाधौ, इति धातोर्मनसः समाधानकारक वस्तुजातमिति उत्पद्यते । स्मर्यते च भृगुसंहितायाम्—

नानाविधानां वस्तूनां यन्त्राणा कल्पसंपदाम् ।
धातूनां साधनानां च वास्तूना शिल्पसंज्ञितम्, इति ।

शिल्पे नानाविधान्नपानादिग्रामगृहाच्छादनादिसर्वस्य वस्तुजातस्य संग्रहो भवतीति भृगुसंहितायाम् । श्रूयते च—

यत्ते शिल्पं कश्यप रोचनावद् ।
इन्द्रियावत्पुष्कलं चित्रभानु ॥
यस्मिन्त्सूर्या अर्पिताः सप्त साकम् ।
तस्मिन्राजानमधिविश्रयैनम् ॥

इति तैत्तिरीयसंहितायां कश्यपस्य प्राकारे राज्ञ आश्रयो याचितः । एवं शिल्पं जगतः प्रारम्भत उत्पन्नं दृश्यते । विद्यमानग्रन्थास्तु कदा केन वा ग्रथिता इति स्पष्टं न ज्ञायते । कश्यपसंहिता तु भगवता कश्यपेन स्वपुत्राय नैध्रुवय उपदिष्टा भवति ।

भारतवर्षीयाणां धर्मादयः सर्वे पुरुषार्थाः श्रुतिस्मृतिपुराणोक्ताः । श्रुतिषु सर्वेषां शास्त्राणां मूलम् । स्मृतिषु तस्य विस्तारः । पुराणेषु कथोपकथादृष्टान्तैस्तस्य विशदीकरणं भवति । उक्तं च—

' इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ' इति ।

वैदिकमेकं सूक्तं स्मृतिषु प्रकरणरूपमेति । तच्च पुराणेषु ग्रन्थतामायाति । नद्याः प्रवाह इव शास्त्रं विस्तरमुपैति ज्ञानसागरे च लीयते । शिल्पसंहितायां दश शास्त्राणि द्वात्रिंशद्विधाश्चतुष्षष्टिश्च कला भवन्ति । तेषां शास्त्राणां श्रुतिस्मृतिपुराणोक्तत्वं स्वल्पेन स्पष्टी क्रियते । तद्यथा सौरसूक्ते—

१ कृषिशास्त्रम्—शुकेषु मे हारिमाणं रोपणाकासु दध्मसि ।
अतो(थो) हारिद्रवेषु मे हारिमाणं निदध्मसि ॥ इति ।

हे सूर्य मम निः श्वासतो निःसृतं हारिमाणसंज्ञकं वायुं त्वं शुकेषु (वृक्षेषु) च रोपणाकासु (लतासु) च दध्मसि (निदधासि) । इत्थं मम हारिमाणेन त्वं वनस्पतीन हारितद्रवयुक्तान्करोषि । वनस्पतिषु यद्धारितं द्रव्यं दृश्यते तत्सूर्यप्रकाशेन हारिमाणवायुतः संभवति । हारितद्रव्यस्योत्पत्तिसामर्थ्यात्स वायुर्हारिमाण(हरितीकुर्वाणः) इति उच्यते—

(२) शुनं नः फाला विकृषन्तु भूमिम् ।
शुनं किनाशा अभियन्तु वाहैः ॥
शुनं पर्जन्यो मधुना पयोभिः ।
शुनासीराः शुनमस्मासु धत्तम् ॥ (ऋ० ४ । ९७ । ८) ।

यजुर्वेदे चाथर्ववेदे च समानार्थको मन्त्रो लभ्यते । फाला अस्माकं भूमिं सुकर्षन्तु, कृषीवला बलीवर्दाननुयान्तु, मेघा मधुराणि पयांसि वर्षन्तु, अस्मासु धनधान्यसमृद्धिर्भवतु ।

(३) अग्निश्रियो मरुतो विश्वकृष्टयः ।
आ त्वेषमुग्र अव ईमहे वयम् ॥

ते स्वानिनो रुद्रिया वर्षनिर्णिजः ।
सिंहा न हेषक्रतवः सुदानवः ॥ (ऋ० ३ । २६ । ५) ।

ग्रीष्मे सूर्यस्य प्रखरकिरणैस्तप्ता वायवः सर्वं लघुवस्तु हिमालयादिशीतं प्रदेशं नयन्ति। ते मेघा भयंकरं गर्जन्तो भीषणा जलवर्षावसमर्था वायुभिरुत्क्षिप्यन्ते । वयं च तन्मेघवृष्टितः पुष्पफलजलसमृद्धिं प्राप्नुवाम। इत्यादिषु श्रुतिवाक्येषु कृषिर्ण्याख्याता भवति। एवमन्येषामपि शास्त्राणां ज्ञातव्यम् ।

२ जलशास्त्रम्—वातत्विषो मरुतो वर्षनिर्णिजो यमा इव सुसदृशः सुपेशसः ।
पिशङ्गाश्वा अरुणाश्वा अरेपसः प्रत्वक्षसो महिना द्यौरिवोरवः ॥
(ऋ० ५ । ५७ । ४) ।

जलवर्षणसमर्थाः कृष्णवर्णा वायुना नीयमानाः केचन पिशङ्गरङ्गाः केचनारुणरङ्गा अश्वारूढा इव द्यौरिव दानशूरा भवन्ति । यथा द्यौः सर्वत्र प्रकाशं ददाति तथा मेघाः सर्वत्र जलमिति ।

(२) या आपो दिव्या उत वा स्रवन्तीः खनित्रिमा उत वा याः स्वयंजाः ।
समुद्रार्था याः शुचयः पावकास्ता आपो देवीरिह मामवन्तु ॥
(ऋ० ७ । ४९ । २)

या आपो दिव्या दिवश्च्युता वा या भूमौ स्वतः स्रवन्त्यो याः खनिषु लब्धा वा भूपृष्ठे निःसरन्त्यस्ताः सर्वाः समुद्रमेव गच्छन्ति । ता आपः स्वयंशुद्धा अन्यपदार्थाञ्शुद्धान्कुर्वन्ति । ता मां स्तोतार रक्षन्तु ।

(३) शं न आपो धन्वन्याः शमु सन्त्वनूप्याः ।
शं नः खनित्रिमा आपः शमु याः कुम्भ आभृताः ॥
शिवा नः सन्तु वार्षिकीः ॥ अथर्व (१ । ६ । ४) ।

मरुदेशस्थिता बहुजलदेशस्था वा कूपेषु स्थिता वा कुम्भेषु गृहमानीता वा वृष्टिषु नभस्तः पतिता वा सर्वा आपो नः कल्याणाय भवन्तु ।

३ खनिशास्त्रम्—अगस्त्यः खनमानः खनित्रैः प्रजामपत्यं बलमिच्छमानः ।
उभावर्णावृषिरुग्रः पुपोष सत्या देवेष्वाशिष आजगाम ॥
(ऋ० १ । १७९ । ६)

धनधान्यपुत्रादिकमिच्छन्नगस्त्यो वसुधां खनित्रैश्चखान हारिद्द्रवान्वनस्पतीन्रक्तद्रवान्पशुपक्ष्यादीन्वपुपोष । तेजःसंपन्नेषु स्थिरां कीर्तिं च प्राप । खनिभ्यो विविधं वस्तुजातं कीर्तिं च संपादितवानिति ।

(२) मह्यं त्वष्टा वज्रमतक्षदायसम् । (ऋ० १० । ४८ । ३)

इन्द्रः कथयति- मदर्थं त्वष्टाऽयोलोहस्य वज्रं चकारेति । 'पहार' इति ख्यातमृजुलोहितं वज्रं भवेत् । तेनेन्द्रेण गिरयो विदीर्णास्तेषामुदरे स्थिता आपः स्रोतोरूपेण मुक्ताश्च ।

४ नौकाशास्त्रम्- यमेन ततं परिधिं वयन्तोऽप्सरस उपसेदुर्वसिष्ठाः (ऋ०७।३।३।९)

कर्णधारस्य वशे स्थिता अप्सु संचरन्त्यो नौका धीवरेण स्थापितं जालमाजग्मुः । मत्स्यान्भीषयन्त्य इतस्ततो भ्रमन्त्यो नौका जालमुपससर्पुः (सृपुः)।

(२) सुत्रामाणं पृथिवी द्यामनेहसं सुशर्माणमदितिं सुप्रणीतिम् ।
दैवी नावं स्वरित्रामनागसमस्रवन्तीमारुहेमा स्वस्तये ॥
ऋ० १० । ६३ । १०

वातापी (शिड इति महाराष्ट्रीयभाषायां ख्यातं) युक्तामाकाशामिव मनोहरां, विस्तारवती, आरित्रैः (वल्हे इति महाराष्ट्रभाषायां ख्यातं) प्रचोदितां, जलमस्रवन्तीं नौकां वयं स्वकल्याणार्थमारोहाम ।

५ रथशास्त्रम्–(१) स्थिरा वः सन्तु नेमयो रथा अश्वास एषाम् ।
सुसंस्कृता अभीशवः ॥ ऋ० १ । ३८ । १२ ॥

युष्माकं रथानामश्वाश्चक्राणां नेमयश्च स्थिराः सन्तु । अभीशवो वाजिरश्मयश्चोत्तमाः संस्कारयुक्ता भवन्तु ।

(२) रथं ये चक्रुः सुवृतं सुचेतसो विह्वरन्तं मनसस्परिष्यया ॥
ऋ० ३ । ७ । २ । २८

यावश्विनीकुमारौ स्वबुद्धिसामर्थ्यात्सुन्दरं यथेष्टगमनसमर्थं रथं चक्रतुः । तस्मै रथाय वलयाकृतीनि चक्राणि युयुजतुः ।

६ विमानशास्त्रम्- मित्रं हुवे पूतं दक्षं वरुणं च रिषादसम् । धियं घृताचीं साधन्ताम् ।
(ऋग्वेद)

घृताच्यां-घृतसंग्रहणयोग्ये कुम्भे मित्रश्च वरुणश्च द्वौ देवौ तेजोयुक्तौ पदार्थौ जायेते । तयोर्मित्रः पूतो दक्षश्च भवति वरुणस्तु रिषादा नीचधातुभक्षणकर्ता भवति । विद्युतो धनऋणसंज्ञकौ द्वौ प्रकारौ । तयोर्धनसंज्ञको मित्र इति ऋणसंज्ञको वरुण इति प्रकीर्त्यते । मित्रावरुणाभ्यां जलस्य प्राणोदानवायुषु पृथक्करणं भवति ।

ते स्वानिनो रुद्रिया वर्षनिर्णिजः ।
सिंहा न हेषक्रतवः सुदानवः ॥ (ऋ० ३ । २६ । ५) ।

ग्रीष्मे सूर्यस्य प्रखरकिरणैस्तप्ता वायवः सर्वं लघुवस्तु हिमालयादिशीतं प्रदेशं नयन्ति। ते मेघा भयंकरं गर्जन्तो भीषणा जलवर्षावसमर्था वायुभिरुत्क्षिप्यन्ते । वयं च तन्मेघवृष्टितः पुष्पफलजलसमृद्धिं प्राप्नुवाम। इत्यादिषु श्रुतिवाक्येषु कृषिर्व्याख्याता भवति। एवमन्येषामपि शास्त्राणां ज्ञातव्यम् ।

२ जलशास्त्रम्—वातत्विषो मरुतो वर्षनिर्णिजो यमा इव सुसदृशः सुपेशसः ।
पिशङ्गाश्वा अरुणाश्वा अरेपसः प्रत्वक्षसो महिना द्यौरिवोरवः ॥
(ऋ० ५ । ५७ । ४) ।

जलवर्षणसमर्थाः कृष्णवर्णा वायुना नीयमानाः केचन पिशङ्गरङ्गाः केचनारुणरङ्गा अश्वारूढा इव द्यौरिव दानशूरा भवन्ति । यथा द्यौः सर्वत्र प्रकाशं ददाति तथा मेघाः सर्वत्र जलमिति ।

(२) या आपो दिव्या उत वा स्रवन्तीः खनित्रिमा उत वा याः स्वयंजाः ।
समुद्रार्था याः शुचयः पावकास्ता आपो देवीरिह मामवन्तु ॥
(ऋ० ७ । ४९ । २)

या आपो दिव्या दिवश्च्युता वा या भूमौ स्वतः स्रवन्त्यो याः खनिषु लब्धा वा भूपृष्ठे निःसरन्त्यस्ताः सर्वाः समुद्रमेव गच्छन्ति । ता आपः स्वयंशुद्धा अन्यपदार्थाञ्शुद्धान्कुर्वन्ति । ता मां स्तोतार रक्षन्तु ।

(३) शं न आपो धन्वन्याः शमु सन्त्वनूप्याः ।
शं नः खनित्रिमा आपः शमु याः कुम्भ आभृताः ॥
शिवा नः सन्तु वार्षिकीः ॥ अथर्व (१ । ६ । ४) ।

मरुदेशस्थिता बहुजलदेशस्था वा कूपेषु स्थिता वा कुम्भेषु गृहमानीता वा वृष्टिषु नभस्तः पतिता वा सर्वा आपो नः कल्याणाय भवन्तु ।

३ खनिशास्त्रम्—अगस्त्यः खनमानः खनित्रैः प्रजामपत्यं बलमिच्छमानः ।
उभावर्णावृषिरुग्रः पुपोष सत्या देवेष्वाशिष आजगाम ॥
(ऋ० १ । १७९ । ६)

धनधान्यपुत्रादिकमिच्छन्नगस्त्यो वसुधां खनित्रैश्चखान हारिद्द्रवान्वनस्पतीन्रक्तद्रवान्पशुपक्ष्यादीन्वपुपोष । तेजःसंपन्नेषु स्थिरां कीर्तिं च प्राप । खनिभ्यो विविधं वस्तुजातं कीर्तिं च संपादितवानिति ।

(२) मह्यं त्वष्टा वज्रमतक्षदायसम् । (ऋ० १० । ४८ । ३)

इन्द्रः कथयति- मदर्थं त्वष्टाऽयोलोहस्य वज्रं चकारेति । 'पहार' इति ख्यातमृजुलोहितं वज्रं भवेत् । तेनेन्द्रेण गिरयो विदीर्णास्तेषामुदरे स्थिता आपः स्रोतोरूपेण मुक्ताश्च ।

४ नौकाशास्त्रम्- यमेन ततं परिधिं वयन्तोऽप्सरस उपसेदुर्वसिष्ठाः (ऋ०७।३।३।९)

कर्णधारस्य वशे स्थिता अप्सु संचरन्त्यो नौका धीवरेण स्थापितं जालमाजग्मुः । मत्स्यान्भीषयन्त्य इतस्ततो भ्रमन्त्यो नौका जालमुपससर्पुः (सृपुः)।

(२) सुत्रामाणं पृथिवी द्यामनेहसं सुशर्माणमदितिं सुप्रणीतिम् ।
दैवीं नावं स्वरित्रामनागसमस्रवन्तीमारुहेमा स्वस्तये ॥
ऋ० १० । ६३ । १०

वातापी (शिड इति महाराष्ट्रीयभाषायां ख्यातं) युक्तामाकाशामिव मनोहरां, विस्तारवती, आरित्रैः (वल्हे इति महाराष्ट्रभाषायां ख्यातं) प्रचोदितां, जलमस्रवन्तीं नौकां वयं स्वकल्याणार्थमारोहाम ।

५ रथशास्त्रम्–(१) स्थिरा वः सन्तु नेमयो रथा अश्वास एषाम् ।
सुसंस्कृता अभीशवः ॥ ऋ० १ । ३८ । १२ ॥

युष्माकं रथानामश्वाश्चक्राणां नेमयश्च स्थिराः सन्तु । अभीशवो वाजिरश्मयश्चोत्तमाः संस्कारयुक्ता भवन्तु ।

(२) रथं ये चक्रुः सुवृतं सुचेतसो विह्वरन्तं मनसस्परिष्यया ॥
ऋ० ३ । ७ । २ । २८

यावश्विनीकुमारौ स्वबुद्धिसामर्थ्यात्सुन्दरं यथेष्टगमनसमर्थं रथं चक्रतुः । तस्मै रथाय वलयाकृतीनि चक्राणि युयुजतुः ।

६ विमानशास्त्रम्- मित्रं हुवे पूतं दक्षं वरुणं च रिषादसम् । धियं घृताचीं साधन्ताम् ।
(ऋग्वेद)

घृताच्यां-घृतसंग्रहणयोग्ये कुम्भे मित्रश्च वरुणश्च द्वौ देवौ तेजोयुक्तौ पदार्थौ जायेते । तयोर्मित्रः पूतो दक्षश्च भवति वरुणस्तु रिषादा नीचधातुभक्षणकर्ता भवति । विद्युतो धनऋणसंज्ञकौ द्वौ प्रकारौ । तयोर्धनसंज्ञको मित्र इति ऋणसंज्ञको वरुण इति प्रकीर्त्यते । मित्रावरुणाभ्यां जलस्य प्राणोदानवायुषु पृथक्करणं भवति ।

(२) आविद्युन्मद्भिर्मरुतः स्वर्कैरथेभिर्यात वृष्टिमद्भिरश्वपर्णैः ॥ ऋ०

विद्युता संपादितेन 'उदान' नाम्ना वायुना पूरितैरर्कफलाकृतिभिर्भोजनैः कृतेषु रथेषु स्थित्वा यूयं पर्णरूपैरश्वैरधऊर्ध्वगामिभिरायात ।

७ वास्तुशास्त्रम्- इहैव ध्रुवां निमिनोमि शालाम् । क्षेमे तिष्ठतु घृतमुक्षमाणा ।
अश्वावती गोमती सूनृतावती । उच्छ्रयस्व महते सौभगाय ।

अस्मिन्स्थले स्वीयां शालां करोमि । सा मम कल्याणं ददातु । तस्यामश्वा गावो बालकाश्च महदैश्वर्याय भवन्तु ।

८ प्राकारशास्त्रम्–यत्ते शिल्पं कश्यप रोचनावद् । इन्द्रियावत्पुष्कलं चित्रभानु ॥
यस्मिन्त्सूर्या अर्पिताः सप्त साकम् । तस्मिन्राजानमधिविश्रयैनम् ॥
तैत्तिरीयसंहिता ।

हे कश्यप यत्त्वया निर्मितं सुन्दरं बलिष्ठं विस्तृतं तेजोयुक्तं च शिल्पं प्राकारः स्तस्मिन्नमुं राजानमाश्रयं यच्छेति ।

कश्यपेन निर्मिते दुर्गे कवचे वा राजाऽऽश्रयमिच्छति । तस्य मन्त्रिण इयं प्रार्थना ।

९ नगररचनाशास्त्रम्–ये पन्थानो बहवो देवयाना अन्तरा द्यावापृथिवीं संचरन्ति ।
ते मा जुषन्तां पयसा घृतेन यथा क्रीत्वा धनमाहराणि ॥
अथर्व ३ । १५ । २

पृथ्वीजलवायुषु त्रिषु भुवनेषु ये रथगमनयोग्याः पन्थानः सन्ति ते मां तर्पयन्तु । क्रयविक्रययोग्यान्घृतपयआदिपदार्थान्क्रीत्वाऽहं धनं संपादयामि ।

(२) समानीव आकूतिः समाना हृदयानि वः ।
समानमस्तु वो मनो यथा वः सुसहासति ॥

युष्माकं हृदयानि, शरीराणि, मनांसि चैकरूपाणि सन्तु । तेन यूयं परस्परं भावयन्तः क्षेममवाप्स्यथ । आचारविचारव्यवहारेषु ये समाः सन्ति तेषां संगतिः सुखाय भवतीति ।

१० यन्त्रशास्त्रम्–तक्षन्धेनुं कामदुघाम् । ऋग्वेद०

शिल्पज्ञा यद्यदिष्टं तत्तत्साधयितुं समर्थां धेनुं निर्ममुः । अनेन कामधेनुनाम्ना प्रसिद्धं किंचिन्महायन्त्रं भवतीति तर्कयामि । विशेषतस्तक्षधातोः प्रयोगात्कृत्रिमत्वं लक्ष्यते ।

(२) पुनर्ये चक्रुः पितरो युवानः सनायूपेव जरणा शयानाः ।

ये शिल्पनो जरया जर्जरीकृतान्स्वपितॄन्पुनर्यौवनसंपन्नांश्चक्रुः । विकलस्थितिं प्राप्ता नीन्द्रियाणि कृत्रिमसाधनैः पुनः कर्मक्षमाणि कृतानीत्यर्थः ।

(३) त्वष्टा दुहित्रे वहतु कृणोति । इतीदं विश्वं भुवनं समेति ।

त्वष्टा स्वदुहितरं तापं ददानं सूर्यं तक्षित्वा लघीयांसमकरोत् । तथाऽपि सूर्यः सकलं विश्वं स्ववशं वर्तयति ।

श्रुतिषु त्वष्टा, ऋभु, नासत्यादीनां तत्पूर्वकालीनानां शिल्पिनां कर्माणि तु अनद्यतनप्रयोगेण वर्णितानि भवन्ति । कश्यप, अगस्त्य, वसिष्ठप्रभृतयस्तत्कालीनशिल्पज्ञानां कार्याणि वर्तमानप्रयोगेण वर्णितानि सन्ति । यथा धर्मशास्त्रे मनुयाज्ञवल्क्यादयो धर्मस्मृतिकाराः सन्ति तथा शिल्पशास्त्रे भृग्वादयोऽष्टादश शिल्पस्मृतिकारा भवन्ति । उक्तं च—

भृगुरत्रिर्वसिष्ठश्च विश्वकर्मा मयस्तथा ।
नारदो नग्नजिच्चैव विशालाक्षः पुरंदरः ॥
ब्रह्मा कुमारो नन्दीशः शौनको गर्ग एव च ।
वासुदेवोऽनिरुद्धश्च तथा शुक्रबृहस्पती ॥
अष्टादशैते विख्याताः शिल्पशास्त्रोपदेशकाः ॥

(मत्स्यपुराण अ० २५२)

भरतवासीयानामध्ययनपद्धतिषु कण्ठज्ञानस्य प्राधान्यम् । तेषामनेका ग्रन्था मुखोद्गता भवन्ति । अध्ययनकाले किमपि ज्ञानस्यापूर्वं मनोहारि वाक्यादि शिष्यैः सूत्ररूपेण संगृहीतम् । तैश्च पुनरध्यापनप्रसङ्गेन स्वसूत्राणा भाष्यरूपेण शिष्याणां ग्रहणसामर्थ्यानुरूपो विस्तारः कृतः । एवं प्रायशोऽखिलं शास्त्रजातं सूत्रभाष्यरूपेण सांप्रत लभ्यते । तत्तद्देशोत्पन्नान्धनवान्यधातुपाषाणादिपदार्थानुपयुञ्जानाः शिल्पज्ञाः स्वप्रचारानष्टादशभिः संहिताभिः संकुलीकृतवन्तः । भरतखण्डस्याष्टादशभागानां परिस्थितिः शिल्पग्रन्थानुसारेणात्र कोष्ठे संगृहीता जिज्ञासूना परिचयार्थं विद्यते । अष्टादशसु मयाऽद्यतावत्तिस्रः संहिता उपलब्धाः । तास्तु कश्यपभृगुमयविरचिताः एतच्छिल्पसंहितात्रयानुसारेण बद्धानां नाशिकक्षेत्रस्थानां त्रयाणां देवालयानां छायाचित्राणि संनिहितानि सन्ति । कश्यपसंहिता हिमाद्रिविन्ध्ययोरन्तर उपयुज्यते । भृगुसंहिता विन्ध्याद्दक्षिणतः कृष्णातुङ्गभद्रापर्यन्तम् । तुङ्गभद्रादक्षिणत आसेतु मयसंहिताया: प्रचारः । भरतखण्डस्यैते त्रयो मुख्या विभागा एतास्तिस्रः प्रमुखाः संहिताश्च । इतरासां संहितानामपि एतादृश एव

संबन्धः स्याद् । एते त्रयो भागाः सात्त्विकराजसतामसनाभिः प्रसिद्धाः । शिल्परत्न-काराणामपि संमतये तत् । यथा च—

हिमाद्रिकन्ययोरन्तर्गतो देशस्तु भारतः ।
सोऽपि देशास्त्रिधा भिन्नस्तत्तद्देशभवैर्गुणैः ॥
यथैव देहिना देहो वातपित्तकफात्मकः ।
तथैवेदं जगत्सर्वं विज्ञेयं त्रिगुणात्मकम् ॥
त्रियुगं तत्त्रिवर्णं च त्रिचक्रं च क्रमात्स्मृतम् ।
हिमवद्विन्ध्ययोर्मध्यं सात्त्विकं भूतलं स्मृतम् ॥
विन्ध्यशैलादिकृष्णान्तं राजसं परिकीर्तितम् ।
पुनः कृष्णादिकन्यान्तं तामसं भूतलं भवेत् ॥
नागरः सात्त्विको देशो द्राविडो राजसो भवेत् ।
वेसरस्तामसो देशः क्रमेण परिकीर्तिताः ॥ (शिल्परत्न अ० १६)
कलिः शयानो भवति संजहानस्तु द्वापरः ।
उत्तिष्ठंस्त्रेता भवति कृतः संपद्यते चरन् ॥ (ऐतरेयब्राह्मणम्)

भरतवर्षं कृतत्रेताद्वापरेषु त्रिषु युगेषु समुत्पन्नम् । कृतयुगे तु प्रथमं कृष्णाया दक्षिणभागो धरास्वरूपता गत । नूतनो घनीभूतोऽयं भूभागोऽतीव चञ्चल आसीत् । प्रथममेव घनीभूतत्वाच्छायायुक्तोऽयं भूभागः । तस्मात्स ' वेसरः ' सरणशीलः ' तामसः तमःसंपन्न इति कथ्यते । त्रेतायुगे च बहुभ्यो ज्वालामुखिभ्यो निःसृताद्द्रवरूपपाषाणादिरसाद्विन्ध्यात्कृष्णापर्यन्तो भूभागः संजातः । अस्मिन्भागे रजोरूपद्रव्यस्य च समृद्धिः । तस्मादेष भूभागो द्रवीभूतत्वाद्द्राविड इति रजोधारणाद्राजस इति च स्मर्यते। अनन्तरं द्वापरयुगे विन्ध्यहिमालययोर्मध्यगतो भूप्रदेशः समुद्रतलादुत्थितः । अस्मिन्प्रदेशे शिलासु सत्त्वानामवशेषा लभ्यन्ते । सत्त्वावशेषादयं भागः सात्त्विकः, नगरस्थापनायोग्यत्वान्नागरः, गुडोत्पादककृषिसंभवाद्गौड इति च कीर्त्यते । अनन्तरं कलौ युगे भरतभूमिः सुप्ता भवति । एतेषा चतुर्णां युगानां पुनरपि त्रीणि त्रीणि चक्राणि भवन्ति। एषां भूभागानां सामान्यवर्णा अपि भिन्नाः सन्ति । सात्त्विकप्रदेशः श्वेतप्रायः, राजसो लोहितकृष्णः, तामसस्तु पीतश्वेतो भवति । कृतयुगे रत्नचक्रं, धातुचक्रं, पाषाणचक्रं चेति त्रीणि चक्राणि । त्रेतायां स्फटिकचक्रं, तीक्ष्णचक्रं मृदुचक्रं चेति त्रीणि चक्राणि । द्वापरे शङ्खचक्रं, वृक्षचक्रं, पशुचक्रं चेति, संनिहितो वर्णचक्रयुगदर्शकश्चित्रलेपे भरतखण्डस्य स्थितिं दर्शयति । एवं भरतवर्षस्य पृथग्विधानां भागानां भूरचना, ओषधिवनस्पतिलाभः, पशुपक्षिणां जातिगुणविशिष्टत्वं, मनुष्याणामाचारव्यवहाराश्च भिन्ना भवन्ति।

तस्मात्तत्तद्देशयोग्या शिल्परचनाऽपि भिन्ना भवितुमर्हति । परिस्थितिभिन्नत्वानुसारेण भारतीयसंस्कृतेः सर्वेषां भागानामष्टादशधा विभागः ।

संहितीकरणादनन्तर शिल्पविषये ये ग्रन्था जातास्ते शिल्पस्य पुराणग्रन्थाः । तेषां मुख्यानां नामान्यधो लिखितानि सन्ति ।

१ खिस्ताब्दस्यैकादशे शतके भोजनृपतेः संनिधौ वसता समरङ्गणनाम्ना सूत्रधारेण रचितः ' समरङ्गणसूत्रधारः ' ।

२ खिस्ताब्दस्य द्वादशे शतके पैठणस्थितेन सुखानन्दयतिवर्येण विरचितो ' वास्तुशास्त्र ' नामा ग्रन्थः ।

३ खिस्ताब्दस्य द्वादशे शतके कोऽपि ' सूत्रधारः ' शिल्पदीपकनामानं ग्रन्थं लिखितवान् ।

४ खिस्ताब्दस्य पञ्चदशे शतके मेवाडदेशे कुम्भे राज्यं शासितरि मण्डनाख्यः सूत्रधारः ' राजवल्लभ, प्रासादमण्डन, वास्तुमण्डन, रूपमण्डन, कोदण्डमण्डनादीन्ग्रन्थान्ग्रथितवान् ।

५ खिस्ताब्दस्य षोडशे शतके ' कुमार ' नामकेन शिल्पज्ञेन शिल्परत्नाख्यो ग्रन्थः कृतः ।

६ अन्येऽपि बहवश्चतुःशतसंख्यादेशीया ग्रन्था अस्मिन्विषये लिखिता ज्ञायन्ते इमे ग्रन्थाः शिल्पि, सूत्रधार, गजधर,स्थपतिनामधारिणा कर्मकाराणां समीपे सर्वत्र विकीर्णा लभ्यन्ते । कर्मकाराणां गीर्वाणभाषानैपुण्याभावात्पठनपाठनपरम्परालोपाच्च विद्यमानेषु शिल्पग्रन्थेषु बहवोऽशुद्धप्रचारा दृश्यन्ते । पद्यरचनानियमबन्धनादपि केचिद्दोषा जाताः । केचित्तु पुनर्लेखकप्रमादादपि संभवन्ति ।

अयं कश्यपसंहिताग्रन्थो नन्दभूपतीना कालादनन्तरं जातो दृश्यते नन्दशब्दस्य नववाचकप्रयोगेण ! भृगुसंहितायां नन्दानामुल्लेखो नास्ति तथाऽपि तस्या भगवतः कश्यपस्य सन्मानपुरःसरेणोल्लेखेन भृगुसंहिता कश्यपादनन्तरं जातेति मे मतिः । भगवतः कश्यपस्य शिल्पप्रभावेणेयं वसुधा ' काश्यपी ' इति स्मर्यते । कश्यपस्य श्रुतिष्वपि शिल्पज्ञ इति ख्यातिः । तस्मात्कश्यपः प्राचीनतमः शिल्पज्ञ इति तर्कयामि ।


कश्यपसंहिताया ग्रन्थो मद्राससंस्कृतपुस्तकालये लभ्यते । गुर्जर, सौराष्ट्र, मालवदेशेष्वपि कर्मकाराणां समीपेऽस्य खण्डा लब्धाः । अस्मिन्मुद्रणे तेषां सर्वेषामुपयोगः कृतः । तस्मात्कचिद्द्विरुक्तिरपि संजाता । भारतवासीयानां ग्रन्थानां कालस्थलनिर्णयो

दुष्करः । स्वविषये यद्यदुपलब्धं तत्सर्वमेकत्र संगृह्य लिख्यते कर्मसौकर्यार्थम् । कालान्तरेण पुनर्लेखनप्रसङ्गे तत्सर्वं तस्मिन्ग्रन्थे समाविष्टं भविष्यति । एवं बहुशोऽनेकमतमतान्तराणां संग्रह एकस्मिन्ग्रन्थे लभ्यते । क्वचित्स्थले जीर्णो मूलग्रन्थः पुनर्लिखिता द्वितीयावृत्तिः । सद्यो लिखिता तृतीयावृत्तिरपि वा अन्यस्माद्ग्रन्थादुद्धृतं पत्रस्यैकपार्श्वे लिखितं तद्द्वितीयलेखने ग्रन्थे समाविष्टं, तृतीयलेखने त्वन्यदपि नूतनं मिश्रितं दृष्टम् । इतरेषामपि ग्रन्थानामेवं स्याद्वा न वा । इति कालस्थलनिर्णये दुस्तरापत्तिः ।।

आनन्दाश्रमसंस्थायाश्चालकानामाश्रयमन्तरेणायं ग्रन्थो मुद्रितुं दुष्करः । मुद्रणं तु केवलं द्रव्यसाध्यम् । श्रीसरस्वत्योः संयोगो दुर्लभः । भगवतो महेश्वरस्य कृपाप्रसादादयमाश्रयो लब्ध इति । अन्येऽपि शिल्पग्रन्था एवमेव मुद्रिता सन्तु भारतवासीयानां शिल्परचनाकौशलं प्रकटी कुर्वन्तु इति प्रार्थये ।

नाशीक
माघ व ॥ १४ गुरुवासरे
शालिवाहनशकाब्दाः १८४७

वह्नेकुलोत्पनो विनायकसूनुः
कृष्णशर्मा शिल्पकलानिधिः ।



मयसंहितामनुसृत्यावस्थितं नाशिकक्षेत्रस्थं श्यामलरामस्य (काळ्या रामाचें) मन्दिरम् ।

ॐ तत्सद्ब्रह्मणे नमः ।

काश्यपशिल्पम् ।

प्रथमः पटलः ।

महादेवं शशिधरं सर्वलोकैकनायकम् ।
माहेन्द्रमध्यगं शान्तं पार्वतीसहितं परम् ॥ १ ॥
देवदानवसिद्धाद्यैः सेवितं सुरपूजितम् ।
प्रणम्य देवचरणमेवं ब्रूयात्स काश्यपः ॥ २ ॥
शुचेत्परमसद्भावं प्रसन्ना(ङ्गा)त्सृष्टिकारणम् ।
जगतामभिवृद्ध्यर्थं योगिनामुपकारकम् ॥ ३ ॥
देवानां च हितार्थाय शिवज्ञानं परं महत् ।
महार्थमल्पग्रन्थं च कर्षणाद्यर्चनान्तकम् ॥ ४ ॥
अंशुमन्तमहातन्त्रात्त्वयोक्तं हि पुरार्थकम् ।
तन्त्रं तद्वच(द) देवानां रुद्राणामधिकारिणाम् ॥ ५ ॥
अल्पायुष्यादिधर्माणां नराणां त्वधिकारिणाम् ।
अनुग्रहार्थं त्वेतेषां संक्षेपाद्वद मे प्रभो ॥ ६ ॥
साधु साधु महाविप्र यत्त्वया परिचोदितम् ।
दुर्लभं तदहं वक्ष्ये शृणु चैकाग्रमानसः ॥ ७ ॥
पुष्यमासादिषण्मासा माघमासेतरे शुभाः ।
दक्षिणे चाश्वयुङ्मासः श्रावणः कार्तिकस्तथा ॥ ८ ॥
पूजिताः कर्षणादीनां शेषमासा विवर्जिताः ।
पौष्णादित्यमघास्वातीसावित्रत्वाष्ट्रपैत्रकम् । ॥ ९ ॥
श्रवणेनाप्रजाशस्तशस्तिष्याश्वि च कर्तृयुक् ।
(स)दने पूजिताः सतार्षं (तास्तारा:) प्रतिपत्षष्ठि सप्तमी ॥१०॥
तृतीया पञ्चमी चैव द्वितीया च त्रयोदशी ।
दशमी तिथयः शस्ताः शुक्लपक्षे विशेषतः ॥ ११ ॥
प्रतिपत्पौर्णमासी च द्वितीया पञ्चमी तथा ।
द्वितीया मध्यमा ख्याता कृष्णपक्षे विशेषतः ॥ १२ ॥

षष्ठी च दशमी कृष्णे कनिष्ठाऽऽद्या निगद्यते ।
सितसौम्यौ शशी जीवः परं श्रेष्ठतमाः स्मृताः ॥ १३ ॥
तोषामंशोदयो होरा द्रेक्काणश्चैव दर्शिताः ।
शुभदा इति विज्ञेयास्तत्र राश्युदयं विना ॥ १४ ॥
मेषकर्कटकं तौलिं मकरं धनुषीति(च धनुर्वि)ना ।
शेषराश्युदयाः शस्ताः सर्वसंपत्समृद्धिदाः ॥ १५ ॥
उच्चस्थानगतश्चन्द्रः सौख्यो वित्तगतस्तथा ।
शत्रुक्षेत्रगतश्चन्द्रो नीचस्थोऽपि धनक्षयम् ॥ १६ ॥
भौमादित्याविन्दुराहू शौरिर्वा लग्नसंस्थिताः ।
आयुष्यं धनधान्यं च कर्तुर्नश्येन्न संशयः ॥ १७ ॥
धनस्थानगताः क्रूरा धनधान्यविनाशनाः ।
तत्रैव चन्द्रसंयुक्ता धनधान्यविवर्धनाः ॥ १८ ॥
भ्रातृस्थानगताः सर्वे सर्वसंपत्समृद्धिदाः ।
बन्धुस्थानगताः पापाः सर्वदुःखभयावहाः ॥ १९ ॥
पुत्रस्थानगताः क्रूरा मृत्युपीडा भविष्यति ।
शत्रुस्थानगताः सर्वे सर्वदुःखभयावहाः ॥ २० ॥
भार्यास्थानगतो जीवश्चन्द्रभावयुतस्तथा ।
आयुष्यं धनधान्यं च सर्ववृद्धिप्रदः सदा ॥ २१ ॥
निधनस्थानगाः सर्वे कर्तुर्निधनमादिशेत् ।
शुभग्रहा न्वम (नव)स्थाने सर्वसौख्यधनावहाः ॥ २२ ॥
कर्मस्थानगताः क्रूराः सवित्तायुःक्षयावहाः ।
शुभग्रहस्तु कर्मस्थः सर्ववित्तविवर्धनः ॥ २३ ॥
अशुभश्च शुभश्चैव लाभस्थानगताः शुभाः ।
द्वादशस्थो बुधो जीवो वित्तवृद्धिं समारभेत् ॥ २४ ॥
नक्षत्रान्ते च मासान्ते पक्षान्ते चेति दक्षिणे ।
व्यतीपाते च शूले च धृतौ वा कालकण्टके ॥ २५ ॥
क(ग)ण्डके च तथा स्तूर्णे(सूर्ये) परिवेषे च दुर्दिने ।
उल्कापाते प्रवेशे च विष्यं(ष्टयां) च विषनाडिके ॥ २६ ॥
षडशीतिमुखे चैव मासशून्ये तथैव च ।
कर्षणादिप्रतिष्ठान्तं सर्वकर्म वि(हि)नाऽऽचरेत् ॥ २७ ॥

मर्त्यानामायुषं कर्तुं कृष्णपक्षे सुचन्द्रवत् ।
तस्मात्सैर्यत्नतः शीघ्रं कर्तव्यो धर्मसंग्रहः ॥ २८ ॥
अल्पदोषं गुणाधिक्यं दिनं लग्नं च संग्रहेत् ।
अनेककोटिदोषाढ्यं दिनं वा लग्नमेव वा ॥ २९ ॥
दोषहीनतमं याति जीवदृष्ट्या द्विजोत्तम ।
अनेककोटिदोषस्तु जीवैकेन विनातथा(विनश्यति) ॥ ३० ॥
तमोऽपरिमितं रात्रौ रविर्नैकेन नश्यति ।
तथैव जीवदृष्ट्या तु सर्वदोषसमुद्भवाः ॥ ३१ ॥
एवं परीक्ष्य बहुधा कर्षणादि समाचरेत् ।
तत्रैवं सदनं कुर्यात्तदेवां(शे) कर्षणं कुरु ॥ ३२ ॥
अष्टदिक्षु च कर्तव्यं ग्रामादिषु शिवालयम् ।
पैशाचिकपदे कुर्यादालयं तु पराङ्मुखम् ॥ ३३ ॥
परिवास्तु त्रिदण्ड्यादि यावता त्रिंशता(द)न्तकम् ।
तावद्वेष्ट्यादिदिशि(देशे)षु कर्तव्यं शिवमन्दिरम् ॥ ३४ ॥
परिखाऽस्यान्तरे वाऽपि पैशाचिकपदे कुरु ।
मानुषे तु पदे वाऽथ कर्तव्यं शिवमन्दिरम् ॥ ३५ ॥
विप्रक्षत्रियविट्शूद्राश्चानुलोमस्तथैव च ।
समासान्मजि(नु)कर्तारः सर्वप्राणिहिताय वै ॥ ३६ ॥
हस्तमात्रं ततः खात्वा खात्वा तद्भूमिमध्यमे ।
पूरिते तु मृदा ख्या(खा)ते ह्यधिका चोत्तमाद्रिभिः(मही) ॥३७॥
समा ता(सा)मध्यमा ख्याता हीना सा कन्यका स्तृ(स्मृ)ता ।
अग्रताच्छो(तश्चो)त्तमा मध्या मार्गहीनाऽन्यसद्मनि ॥ ३८ ॥
श्वेतरक्ता च पीता च कृष्णा पप्रदथा(च कपिशा)क्रमात् ।
चतुर्विधमपि ख्याता तत्तज्जात्या हृता शुभा ॥ ३९ ॥
परेषामपरा शस्ताश्चपरेषु परा विना ।
तत्तदोभ्यामभिग्राह्या मर्त्यानामालयं कुरु ॥ ४० ॥
सर्वामभिप्रशस्ते तु देवानां तु विशेषतः ।
भूतप्रेतपिशाचेभ्यो दनलं वा बलिं ददेत् ॥ ४१ ॥
अस्त्रेणोच्चाटनादेतत्पश्चात्करणमाचरेत् ।
श्वेतरक्ता च पीता च कृष्णा जान्युडुकौ क्रमात् ॥ ४२ ॥

यौव(युवा)नौ कर्षणापूर्वौ गङ्गाहीनौ बलान्वितौ ।
हेमशृङ्गक(खु)रोपेतकण्ठान्तरन(भरण)संस्पृशौ ॥ ४३ ॥
संपूज्य ऋषिगायत्रीगन्धपुष्पाक्षतैर्बुधैः ।
पूर्वं निवेदनं कृत्वा प्राङ्मुखौ संस्थितौ वृषौ ॥ ४४ ॥
याज्ञाग्नीगैस्पारवृक्षे लक्षणेन युगं हलम् ।
सीतायामतिहस्ताढ्यां नाहं सप्ताङ्गुलं भवेत् ॥ ४५ ॥
वृत्तकुन्दमशेषे तु मूले वंशाश्रमश्रकम् ।
मेखलोच्चत्रितालं स्याच्त्रिमात्रं तत्खनं भवेत् ॥ ४६ ॥
मूलादग्रान्क्षमाक्षीणं किंचित्क्षीणं न मध्यमम् ।
मेखलावरतुमूले तु तुर्यग्वेशनवाङ्गुलम् ॥ ४७ ॥
देवांप्यं(शं द)शांगुलायामं घनमन्त्यार्धमातृकम् ।
चतुर्विंशाङ्गुलायामं घ्राणदीर्घं तु काश्यपः ॥ ४८ ॥
सीसोर्ध्वे घ्राणतुङ्गं तु पञ्चाङ्गुलमुदाहृतम् ।
घ्राणाङ्गुष्ठमुखं कुर्यान्मनुमात्रं तदायतम् ॥ ४९ ॥
शेषं चन्द्रमिति ख्यातं सीसमेखलसंधितौ ।
षण्मात्रं घ्राणविस्तारं घनदेवाङ्गुलं भवेत् ॥ ५० ॥
अग्रसूचिमिवाकारं मनुपूर्वं कृशं भवेत् ।
त्रिपञ्चमात्रमित्युक्तं सीसघ्राणाग्रयोस्तरम् ॥ ५१ ॥
अयसा हलजिह्वा तु घ्राणाग्रे योजयेद्बुधः ।
सीसायामसमानं च युगं चन्द्रयुगान्वितम् ॥ ५२ ॥
कनिष्ठाङ्गुलिपरी(सं)नाहं गोचर्माद्विकरान्वितम् ।
हृदयं मन्त्रमुच्चार्य बुधा युगश्रियौ वृषौ ॥ ५३ ॥
युगमध्ये हलं बद्ध्वा किंचिद्दक्षिणमाश्रितम् ।
शिवमन्त्रं समुच्चार्य प्राङ्मुखो वाऽप्युदङ्मुखः ॥ ५४ ॥
कर्षयेन्मतिमान्विप्रत्ती(स्त्री)ण्यादीनि व्यपोह्य च ।
तिलसर्षपमुद्गांश्च नेत्रमन्त्रेण वापयेत् ॥ ५५ ॥
आचार्यान्पूजयेत्तस्मै द्विद्विगाहहलौषधौ ।
त्रिरात्रिमङ्कुरश्रेष्ठं वेदरात्रं तु मध्यमम् ॥ ५६ ॥
अधमं भूतरात्रं तु अधमं परिवर्जयेत् ।
अपूफलफलागाक्ष्या गोधनानि निवेदयेत् ॥ ५७ ॥

एकरात्रं द्विरात्रं वा वस्त्रं तत्रैव पूजयेत् ।
गोतन्त्रगोत्रभेनेश्वात् गोमये प्रश्नवैरपि ॥ ५८ ॥
प्रस्तरं भूतलं पश्चान्मध्यमेऽस्मृ(इम)तलं कुरु ।
गोमयालेपनं कृत्वा दिक्परिच्छेदनं कुरु ॥ ५९ ॥

दिक्परिच्छेदनम्—

शङ्कुं कलाङ्गुलायामं नाहं तत्समुच्यते ।
मूलतारांशभागैकं हीनमग्रं ति(वि)शालकम् ॥ ६० ॥
सुवृत्तमर्जयेश(च्छ)ङ्कुं सारवृक्षं विशेषतः ।
शङ्कुद्विगुणमानेन तन्मध्ये मण्डलं लिखेत् ॥ ६१ ॥
तन्मध्ये स्थापयेच्छङ्कुं चतुर्दिक्षु विशेषतः ।
पूर्वापराह्नयोश्छाय यदि तौ मण्डलान्तकौ ॥ ६२ ॥
छायाग्रमध्यं संलक्ष्यं तथैव त्वपराह्नके ।
बिन्दुद्वयान्तरं सूत्रं पूर्वापारदिगिष्यते ॥ ६३ ॥
तयोर्विद्वान्तरग्राह्याच्चपराननपुच्छकम् ।
दक्षिणोत्तरगं सूत्रं तन्मध्ये तु प्रसारयेत् ॥ ६४ ॥
ये मध्यमध्यमार्धांतु अपच्छायाङ्गुलं व्रजेत् ।
मण्डलं कुब्जतालेन अङ्गुलं तु विभाजयेत् ॥ ६५ ॥
भानुर्मीनाष्टविंशांशं सप्तविंशांशयोत्तरे ।
गते त्वर्जवनत्युक्ता कन्यायां च तथैव हि ॥ ६६ ॥
मीनेऽष्टविंशदेशं हि भागं प्रत्यर्धमातृकम् ।
वर्धयेन्मिथुने सप्तविंशदेशावसानके ॥ ६७ ॥
ततोत्रि(ति)मात्रं क्षीणं स्याद्भागं प्रति विशेषतः ।
कन्यायां छान्दविंशाशं तद्धारांशं विवर्धनात् ॥ ६८ ॥
छायोऽष्टविंशदं शान्तं ततो ह्रासं तथैव हि ।
छायावृद्धिं क्षयं चैव कृत्तिकांशं खु(कु)प्रध्यमम् ॥ ६९ ॥
छायामानं व्रजेन्मध्ये ब्रह्मसूत्रं प्रसारयेत् ।
पूर्वापराह्नयोच्छाया मध्ये मानं च वर्जयेत् ॥ ७० ॥
प्रागादिपरिदं सूत्रमिष्टमाने तु विन्यसेत् ।
पुण्याहं वाचयेत्पश्चात्खात्वा प्रासादमानतम् ॥ ७१ ॥
स्यात्प्रासादं सविस्तारं एकाशीतिपदं कुरु ।
तत्पदे वास्तुदेवांश्च पूजयित्वा समानतः ॥ ७२ ॥

मध्वाज्यगुडसंमिश्रं देवानां तु बलिं ददेत् ।
प्रणवार्द्धिस्तु मध्ये तु स्वाहान्तं बलिमाचरेत् ॥ ७३ ॥
वास्तुहोमं तथा कृत्वा मध्ये रा(वा) चोत्तरेऽपि वा ।
वास्तुहोमं विना कृत्वा तद्वा स तु विनश्यति ॥ ७४ ॥
पर्यग्निकरणं कृत्वा प्रोक्षयेत्पञ्चगव्यकैः ।
कर्षणं ह्येवमाख्यातं शृणु चाष्टकवास्तुकम् ॥ ७५ ॥

इति काश्यपशिल्पे प्रथमः कर्षणपटलः ।

अथ द्वितीय पटलः ।

अथ वक्ष्ये विशेषेण प्रासादं तु विलक्षणम् ।
प्रासादस्य विशालं तु (लत्वं) नवभागविभाजिते(तम्) ॥ १ ॥
प्रागग्रादेशसूत्रं स्यादुदगग्रं तथैव हि ।
एतन्नवनवांशे तु ब्रह्ममध्ये नवांशयुक् ॥ २ ॥
समरी पूर्वभागे तु विवस्वान्दक्षिणे तथा ।
मित्रः पश्चिमभागे तु भुत्तरे पृथिवीधरः ॥ ३ ॥
ब्रह्माणं तु निरीक्षेतास्थितषट्पदभागिनः ।
आश्चैवापवन्साश्च (ईश ईशादयश्चैव वै)शान्यां दिशिसंस्थितौ ॥४॥
सावित्रश्चैव सावित्रावाग्नेय्यां दिसह(श्यव)स्थितौ ।
इन्द्र इन्द्रादयश्चैव नैर्ऋत्यां दिशिवं(श्यव)स्थितौ ॥ ५ ॥
रुद्रो रुद्राज(द)यश्चैव वायव्यां दिशि संस्थितौ ।
एते द्विःदभोक्तारो ह्यंशमर्धद्वयं तथा ॥ ६ ॥
ऐशान्यां चैव पर्जन्यो जयन्तश्च महेन्द्रकः ।
आदित्यः सत्यकश्चोवा भ्रमश्चैवान्तरिक्षकाः ॥ ७ ॥
अग्निः पूषा च विधतो (निर्ऋती) राक्षसश्च यमस्तथा ।
गन्धर्वो भृङ्गराजश्च मृषश्चैव तु दक्षिणे ॥ ८ ॥
निर्ऋतिर्दौवारिकश्चैव सुग्रीवः पुष्पदन्तकः ।
वरुणोऽसुरेषरोगाश्च पापक्षयविपश्चिमे ॥ ९ ॥
वायुर्नागास्तथा मुख्यो भल्लाटः सोम एव च ।
ऋगदित्यदितिश्चैव बाह्यस्थैकांशभोगिनः ॥ १० ॥

चक(क्र)वीदा(रा) विदारी च पूतना पापराक्षसी।
ईशानादिषु कोणेषु बाह्यस्थपदवर्जिताः ॥ ११ ॥
एताश्चैकोनपञ्चाशद्देवताः परिकीर्तिताः।
विंशत्सूत्रेण ते सर्वे बद्ध्वा वै वास्तुमूर्तिनाम् ॥ १२ ॥
अधोमुखं शयित्वा तु नासामपिसितस्थिता।
वास्तुमूर्तिं त्वया देव बद्ध्वान्तं शाययेत्कथम् ॥ १३ ॥
देवासुरमहायुद्धं वर्जयन्तु यथा तथा।
असुराणां हि तत्कार्या उग्रः कुर्यान्महंततः ॥ १४ ॥
ततस्तु संभृताकारं भूताकारं महाजलः।
अब्रवीच्च तु संभूता देवैर्युद्धं प्रवर्तयेत् ॥ १५ ॥
सर्वदेवायुधैर्देवैर्वर्धनं तु न शक्यते।
सर्वदेवाश्च तद्भूतं शाययेयुरधोमुखम् ॥ १६ ॥
विंशत्सूत्रैश्च तद्भूतं बद्ध्वा संस्तभ्य संस्थितः।
स एव वास्तुपुरुषो वास्तुमूर्तिस्तदुच्यते ॥ १७ ॥
तद्व्यधोमुखो हीनः सर्वेषां दुःखमावहेत्।
यत्र वास्तुनि विन(न्य)स्यात्तत्सर्वं वास्तुमूर्तिवत् ॥ १८ ॥
तदुद्धृत्य निवृत्त्यर्थं सर्वदुःखनिवारणम्।
सर्वसिद्धिकरं तं तु वास्तुहोमं बलिं कुरु ॥ १९ ॥
ब्रह्मादिदेवतानां तु तृप्तिहोमबलिं द्विज।
तासां तृप्तिकृतं वास्तु पुरुषो स(वा)थ नश्यति ॥ २० ॥
तस्मात्सर्वप्रयत्ने दद्याद्ब्रह्मादिनां बलिः।
वास्तुहोमस्तु कर्तव्यो ब्रह्मादीनां स्वनामतः ॥ २१ ॥
ऐशान्यां तु शिरो न स्याद्वरदोनिरुचिगोचिरे।
आग्नेयं वायुदिग्भागे कूर्परौ जानुशायिनौ।
मूर्तिदेवास्थिता देवास्त्वीशाने शिरसि स्थिताः।
नेत्रस्थानादिपर्जन्यो जयन्तादितिकर्णकौ ॥ २३ ॥
आपः कुक्षाटिकाध्वे तु आपवस्तप्रथैव च।
नाभिसूत्रे परौ ब्रह्माबीजाविन्द्रजयन्तिनी ॥ २४ ॥
लिङ्गः इन्द्रजयश्चैव पादयोर्निर्ऋतिस्थितिः।
समरी पृथिवी चैव स्तनसूत्रोपरि स्थितौ ॥ २५ ॥

विवस्वास्व(न्स)तु मित्रश्च कुक्षिपार्श्वोपरि स्थितौ ।
उरुहस्ते तलं चैव सावित्रे तु प्रकल्पयेत् ॥ २६ ॥
उरुमकोष्ठमध्ये च सावित्रं तु निधापयेत् ।
रुद्रो रुद्रजयश्चैव वामपार्श्वे तु पूर्ववत् ॥ २७ ॥
माहेन्द्रस्यान्तरिक्षान्ताः सव्यश्चा(स्था)भुवि संस्थिताः ।
तज्जानुकूर्परे विप्रा अग्निमूर्ती निधापयेत् ॥ २८ ॥
पूर्वाणि नृपपर्यन्तं जङ्घायां दक्षिणे न्यसेत् ।
दौवारीवापयक्ष्मान्ता जङ्घायां दक्षिणेतरे ॥ २९ ॥
वामकूर्परजानुध्वे (नूर्ध्वे) वायुमूर्ती निधापयेत् ।
नागादिगजपर्यन्तं वामभागे विसंस्थिता ॥ ३० ॥
चरद्विद्याश्चतुष्कर्णे कर्ण्यसूत्राग्रकौ स्थितौ ।
श्वेते न्वधोमुखं वास्तु मूर्तिरेव द्विजोत्तमाः ॥ ३१ ॥
प्रागीपै(गिवै)त्र बलिं दत्त्वा वास्तु संकल्पयेद्द्विजाः ।
प्रासादवास्तुरेवं हि वास्तुहोमं ततः परम् ॥ ३२ ॥

इति काश्यपशिल्पे द्वितीयः प्रासादवास्तु पटलः ।

अथ तृतीयः पटलः ।

हर्म्ये वाद्यष्टकाकाले लिङ्गं संस्थापयेत्तदा ।
सकलं स्थापने चैव संप्रोक्षं तु तथैव च ॥ १ ॥
बाणलिङ्गप्रतिष्ठायां मण्डपे नृत्तरङ्गके ।
सभायां यागशालायां वास्तुहोमं समाचरेत् ॥ २ ॥
आचार्यो लक्षणोपेतं स्वाचार्यो होममाचरेत् ।
समरीप्राक्प्रदेवेशा(शे वा)सौम्ये वा ब्राह्मकीपदे ॥ ३ ॥
स्थण्डिलं सिकतैः कुर्याद्धस्तमात्रं प्रविस्तरम् ।
उत्सेधं द्व्यङ्गुलं ज्ञेयं चतुरश्रं समं कुरु ॥ ४ ॥
जेलारत्तक्य(जलवन्तं न्य)सेदैन्द्रे शालिमध्ये द्विजोत्तमाः ।
गन्धतोयेन संपूज्य हेमतन्त्रे च निक्षिपेत् ॥ ५ ॥
पालाशपत्रपर्वा च तज्जलेषु निधापयेत् ।
गन्धपुष्पादिना पूज्या तज्जले द्वारदेवता ॥ ६ ॥

अग्नि(ग्न्या)धानादिकं सर्वमग्निकार्योक्तमाचरेत् ।
ब्रह्मादिवास्तुदेवांश्च अग्निमध्ये तु मा(आ)वहेत् ॥ ७ ॥
गन्धैः पुष्पैश्च धूपैश्च पूजयेत्स्वस्वनामतः ।
प्रणवादीनां (।दस्वनाम्नां) तु स्वाहान्तं होममाचरेत् ॥ ८ ॥
स्याद्ब्रह्मप्रसमीहेतुः प्रत्येकं होममाचरेत् ।
शतमर्धं तदर्धं वा होमयेद्घृतेन तु ॥ ९ ॥
पायसेनैव चरुणा प्रत्येकं तु शताहुतीः ।
जयादिरभ्यातानं च राष्ट्रेभ्यश्च क्रमायु(द्धु)ते ॥ १० ॥
मिन्दाहुतिं च कूष्माण्डं प्रायश्चित्ताहुतिं चरेत् ।
हव्यवाहेति मन्त्रेण रिवष्टमग्नेति होमयेत् ॥ ११ ॥
यदस्येति च मन्त्रेण होमयेत्तु घृतेन तु ।
परिषेचनं (कं) ततः कृत्वा प्रासादे ननु मन्त्रतः ॥ १२ ॥
परिस्तरणं विधाय आज्येत्तोत्तपथे (ज्यस्योत्पवने) क्रमात् ।
ब्राह्मणं तु परे दद्याद्दर्शनौ सूर्यमण्डले ॥ १३ ॥
प्रणीतायेन (द्भिश्च) संप्रोक्ष्य आत्मार्थं पावमानकैः ।
एवं समाप्य होमं तु प्रणिपत्य क्षमापयेत् ॥ १४ ॥
दर्भैः पालाशपत्रैश्च शोषितेवन्ययेत्क्रमात् ।
तदग्नौ दीपयित्वा तु तथा प्रासादमण्डपे ॥ १५ ॥
प्राकारे गोपुरस्थाने पर्यग्निकरणं कुरु ।
ब्राह्मे तदग्निमुद्वास्य स्थापिते तु जले बुधः ॥ १६ ॥
सर्वत्र प्रोक्षयेद्विद्वान्चापि(शुची) वो हव्यमन्त्रतः ।
वासुदेवोद्भवार्थं तु पर्यग्निकरणं कुरु ॥ १७ ॥
वास्तुहोमः समाख्यातः प्रथमे(तोऽथे)ष्टकाया विधिं शृणु ॥१८ ॥

इति काश्यपशिल्पे वास्तुहोमस्तृतीयः पटलः ।

अथ चतुर्थः पटलः ।

प्रथमेष्टकाविधानम्—

अथ वक्ष्ये विशेषेण शृणु [त्वं] प्रथमेष्टकाम् ।
प्रासादे मण्डपे साले गोपुरे च तथैव च ॥ १ ॥

सदने परिवाराणां विन्यसेत्प्रथमेष्टकाम् ।
स्निग्धं चैव तथाऽस्निग्धं द्विविधं भूमिलक्षणम् ॥ २ ॥
चिक्कणं शर्कराढ्यं च अशक्यं (क्य) घ(ख)ननं(न) क्रियः(यम्) ।
सुस्निग्धमिति विख्यातं तनुवालुकसंयुतम् ॥ ३ ॥
पुरुषाञ्जलिमात्रं तु दृष्ट्वा तोयसमन्वितम् ।
अशेषं(शक्य) खननं यत्तत्(द) स्निग्धाख्यात(ख्यं) महीतथा(लम्)
प्रासादस्य तु विस्तारो द्विद्विहस्तोऽथ विस्तृतः ।
हस्तमात्रं खनेद्विप्र सुस्निग्धं तु महीतलम् ॥ ५ ॥
यावत्तत्र जलं दृष्टं खनेत्तावत्तु भूतले ।
अवटं वालुकैः स्थूलैः पूरयित्वा जलान्वितम् ॥ ६ ॥
पूरयित्वा जलं पश्चाज्जलेन समतां कुरु ।
श्वसलेहस्तिपादैश्च स्निग्धं कृत्वा बृहच्छिरैः ॥ ७ ॥
एवमाधारमानं तु अधिकं म(त्व)वटं(टं) कुरु ।
मानसूत्रादिसूत्रं तु पातयेत्तत्र देशिकः ॥ ८ ॥
प्रथमं मानसूत्रं तु विन्यसेत्तु द्वितीयकम् ।
तृतीया(यम)धिष्ठानसीमा(ना)न्तं तथोपपीठसीमकम् ॥ ९ ॥
पञ्चमं होमसूत्रं तु षष्ठं तु प्रतिसूत्रकम् ।
एवं क्रमेण कर्तव्यं सूत्रषट्कं द्विजोत्तमाः ॥ १० ॥
तस्योत्तरे प्रपां कृत्वा नवहस्तप्रमाणतः ।
षोडशस्तम्भसंयुक्तं विधान(य) द्विजभूषितम् ॥ ११ ॥
तोरणैर्दर्भमालैश्च मुक्तादामैरलंकृतम् ।
मण्डपस्य त्रिभागैकं वेदिकायास्तु विस्तरम् ॥ १२ ॥
हस्तमात्रसमुत्सेधं दर्पणोदरसंनिभम् ।
परितस्त्वग्निकुण्डानि महाशालं प्रकल्पयेत् ॥ १३ ॥
वेदाश्रं च सुवृत्तं च अब्जमिन्द्रादितः क्रमात् ।
हस्तमात्रं च विस्तारं खातं चैवातिमेखलम् ॥ १४ ॥
गोमयालेपनं कृत्वा प्रोक्षयेत्पञ्चगव्यकैः ।
पिष्टचूर्णैरलंकृत्य ततो वै त्रिप्रभोजनम् ॥ १५ ॥
कृत्वोच्छिष्टं समुद्वास्य वास्तुहोमं ततः कुरु ।
पर्यग्निकरणं कृत्वा प्रोक्षयेद्वा कुशान्न्यसेत् ॥ १६ ॥

स्थण्डिलं वेदिकायां तु अष्टद्रोणैश्च शालिभिः ।
तदर्धैस्तण्डुलैश्चैव तदर्धैश्च तिलैरपि ॥ १७ ॥
स्थण्डिलं कल्पयेद्धीमान्दर्भैः पुष्पैः परिस्तरैः ।
शिलाभिस्ते(त्तौ) शिलाभिस्तु तरुभिस्तरुहर्म्यके ॥ १८ ॥
आद्येष्टकान्तं कर्तव्यं विपरीतं विनाऽऽचरेत् ।
पुंलिङ्गाभिः शिलाभिस्तु कारयेत्प्रथमेष्टकैः (काः)॥ १९ ॥
द्वारबन्धस्तु कर्तव्यः श्रीकलाभिर्विशेषतः ।
नपुंसकोपलैर्नैव मूर्ध्नेषीकद्विजोत्तम ॥ २० ॥
यथालाभशिलाभिर्वा भित्तिस्तम्भोदयो भवेत् ।
नवाङ्गुलं समारभ्य द्विद्व्यङ्गुलविवर्धनात् ॥ २१ ॥
एकोनचत्वारिंशान्तं वेदमेवाङ्गुलेन तु ।
विस्तारं च घनं प्राग्वत्तत्संख्या हैव षोडश ॥ २२ ॥
एकादिषोडशान्तं भूभिनामक्रम उच्यते ।
मृतेष्टि(दिष्ट)कादिपुंसादि रेखाभिस्तु परीक्षयेत् ॥ २३ ॥
अयुग्मऋजुरेखा च पुंलिङ्गा संप्रकीर्तिता ।
युग्मरेखा च युग्मत्वाळ(त्क)ण्ठाभा सा नपुंसका ॥ २४ ॥
भिन्नबिन्दुकलादीनि लोकपालसमन्वितम् ।
वर्जितानि प्रयत्नेन दोषहीनांस्तु संग्रहेत् ॥ २५ ॥
ईषदुन्नतमग्रं स्यान्नतमग्रमुदाहृतम् ।
ऊर्ध्वभागमुखं ख्यातमपरं भूतदांशकम् ॥ २६ ॥
अग्रानामग्रतां चाग्रा ऊर्ध्वकं ह्यापरमुच्यते ।
प्रागुदस्तं तु वैश्यानां शीर्षाणां परिकीर्तितम् ॥ २७ ॥
मूलान्तादितरत्खगातं प्रमाणमिष्टया परम् ।
गव्यैर्गन्धोदकैः स्था(स्ना)प्य पूर्वरात्रेऽधिवासयेत् ॥ २८ ॥
शिवद्विजकुलोद्भूतं शिवदीक्षासमन्वितम् ।
सर्वलक्षणसंपन्नो वेदाध्यायव्र(र)तः शुचिः ॥ २९ ॥
आपोवगाहनं स्नानं भस्मस्नानं समाचरेत् ।
नवाम्बरधरोष्णीषं सासोक्तिर्या(सतिर्यग)नुलेपनम् ॥ ३० ॥
गण्य(न्ध)माल्यैरलंकृत्य सकलीकृतविग्रहम् ।
पचाङ्गभ्रूषणैर्भूष्य क्षालयेद्वर्मनेष्टकाः ॥ ३१ ॥

हैमैः कार्पाससूत्रैर्वा प्रतिसंबन्धयेत्सदा ।
स्थण्डिले कर्णिकाबाह्ये महासामुधि(नि)धापयेत् ॥ ३२ ॥
लकारं प्रति भागे तु लकारं याम्यगोचरेत् ।
लकारं वारुणश्चेतु यकारं सौम्यगोचरे ३३ ॥
शालिपिष्टेन संलिख्य प्रत्येकं वस्त्रवेष्टितम् ।
पूर्वाग्रं सौम्ययाम्ये तु शेषौ द्वौ चोत्तराग्रकौ ॥ ३४ ॥
स्थापयेत्सममभ्यर्च्य पृथिव्याद्या नकः(व) क्रमात् ।
नवसंख्यान्नवान्कुम्भान्सूत्रवस्त्रविभूषितान् ॥ ३५ ॥
सकूर्चस(र्चान्स)विधानानास्त्रा(तानांश्च स्ना)नगन्धसुपूजितान् ।
हेमकम्प(पङ्क)जसा(सं)युक्तान्मध्यमान्क्रमशो ज्ञ(न्य)सेत् ॥३६॥
मध्यकुम्भे तु सादाख्यं परितो लोकपालकान् ।
तत्तन्मन्त्रैर्न्यसेत्कुम्भं ध्यात्वा गन्धादि पूजयेत् ॥ ३७ ॥
नैवेद्यान्नपयो धीमांस्ततो होमं समाचरेत् ।
अग्निध्यानादिकं सर्वमग्निकार्योक्तमाचरेत् ॥ ३८ ॥
पालाशोदुम्बरैश्चैव अश्वत्थवटमिन्दुषु ।
समिधः सम्यमन्त्रेण मूलेनान्यत्तु होमयेत् ॥ ३९ ॥
चरुहोममघोरेण नेत्रेणैव तिलांस्तथा ।
सर्पपं कवचेनैव प्रत्येकाष्टशताहुतीः ॥ ४० ॥
द्रव्यं प्रति विशेषेण व्याहृत्याऽऽहुतिमाचरेत् ।
एवं जागरणं यातौ (रात्रौ) प्रभाते देशिकोत्तमः ॥ ४१ ॥
आपोवगाहनादीनि प्राणिनैव समाचरेत् ।
इष्टकाकलशाग्निं च पूरयेत्तु विशेषतः ॥ ४२ ॥
जलादिरम्यदानैश्च राष्ट्रं चैव तु होमयेत् ।
शिष्टमग्नेति मन्त्रेण पूर्णाहुतिं समाचरेत् ॥ ४३ ॥
स्थापकः स्थपतिः पूज्यो वस्त्रहेमाङ्गुलीयकैः ।
मुहूर्ते समनुप्राप्ते द्वारं निश्चित्य नेसभा ॥ ४४ ॥
द्वारस्य दक्षिणे बाङ्घ्रिमूले भक्त्यन्तराङ्घ्रिके ।
इष्टकां वा शिलायां तु स्थापयेत्स्थपतिः क्रमात् ॥ ४५ ॥

प्रासादमण्डपानां च निर्गमस्य प्रदक्षिणम् ।
सालानां गोपुराणां च प्रवेशस्यापदक्षिणे ॥ ४६ ॥
अभ्यन्तरे तु भित्तेस्तु गोपुराणां निधापयेत् ।
अग्रमग्रं तथैशान्यां मूले मूले तथाऽङ्गुले ॥ ४७ ॥
अग्नौ मूले समायुक्त्या अग्नौ च वायुगोचरे ।
पञ्च ब्रह्म समुच्चार्य पूर्वादिक्रमशो न्यसेत् ॥ ४८ ॥
तन्मध्ये विन्यसेत्प्रीतां हेमपङ्कजसंयुताम् ।
पञ्चमृद्भिः समालिख्य कुम्भस्थाद्भिस्तु पूरयेत् ॥ ४९ ॥
शोभनं दक्षिणावर्तं वामावर्तमशोभनम् ।
वामावर्तं भवेत्सम्यक्शान्तिहोमं तु कारयेत् ॥ ५० ॥
यागोपकरणं सर्जामध्याच्छिल्पी प्रकारयेत् ॥ ५१ ॥

इति काश्यपशिल्पे प्रथमेष्टकाविधिश्चतुर्थः पटलः ।

अथ पञ्चमः पटलः ।

उपपीठप्रमाणम् —

अथ वक्ष्ये विशेषेण उपपीठविधिं परम् ।
स्वाधिष्ठानसमोच्चं वा त्रिपादं सार्धमेव वा ॥ १ ॥
पञ्चभागेऽग्निभागं वा सपादं सार्धमेव वा ।
पादोनादिगुणं वाऽथ द्विगुणं वा विशेषतः ॥ २ ॥
एवमष्टविधः ख्यात उपपीठोदयो द्विज ।
दशधा भज्याधिष्ठानमेकाद्वित्रिचतुष्टयम् ॥ ३ ॥
पञ्चांशं वाऽथ निष्क्रान्तमधिष्ठानस्य पादुकम् ।
उपपीठस्य नीव्रं तु पञ्चस्थं (ञ्चांशं) परिकीर्तितम् ॥ ४ ॥
तन्नि(न्नी)व्रमुपपीठं तु पाद्वाह्ये परिकल्पयेत् ।
अथ वान्नी(थान्नि) पादसदृशं द्विगुणं त्रिगुणं तु वा ॥ ५ ॥
जगती नीव्रतुल्यं वा उपानसदृशं तु वा ।
एवं हि पञ्चभेदं स्यादुपपीठस्य निर्गमः ॥ ६ ॥

उपपीठस्य निष्क्रान्तं सभादीनामथोच्यते ।
सभादीनां तु पाद्मानं निष्क्रान्तं दण्डमु(ण्ड उ)च्यते ॥ ७ ॥
समं तु दण्डमारभ्य नवदण्डावसानकम् ।
उपानं तव (च त) थानीत्रं प्रथमादित्रयत्रयम् ॥ ८ ॥
तदुच्चैर्द्वादशांशे तु उपानोपद्विभागया ।
पद्ममंशेन कर्तव्यं मध्यांशं कम्पमुच्यते ॥ ९ ॥
भूतांशं कण्ठतुङ्गं तु कम्पमब्जं तु पूर्ववत् ।
एकेन वाजनं कुर्यात् कम्पमेकेन कारयेत् ॥ १० ॥
अष्टाङ्गमेवमारुह्यातं षडङ्गं तद्विनाऽम्बुजम् ।
कम्पेनाम्बुजमानं तु योग्यं भद्रोपपीठकम् ॥ ११ ॥
ऊर्ध्वं कम्पं विना वाऽपि पञ्चाङ्गमुपपीठकम् ।
उपपीठस्य चोत्सेधं सप्तविंशतिभाजिते ॥ १२ ॥
द्विभागं पादुकोत्सेधं पङ्कजं तत्समं भवेत् ।
कम्पमेकांशमित्युक्तं द्वादशांशं गलोदयम् ॥ १३ ॥
उत्तरं चैकभाग्यं स्यात् तत्समं चोर्ध्वमम्बुजम् ।
अग्निभागं कपोतोच्चं क(कु)शमालिङ्गमुच्यते ॥ १४ ॥
त्रैयश्रमेकभागेन प्रतिमानद्विभागया ।
पानं चैकविभागेन नानं तत्प्रतिभद्रकम् ॥ १५ ॥
द्विभागं पादुकोत्सेधं द्विभागं पाक(पङ्क)जोद्व(द)यम् ।
कम्पमेकेन कर्तव्यमेकेनान्तरितं भवेत् ॥ १६ ॥
द्विभागं प्रतितुङ्गं तु एकेनैव तु वाजनम् ।
अष्टांशं गलमानं तु कम्पमेकेन कारयेत् ॥ १७ ॥
अब्जमेकेन कर्तव्यं कपोतोच्चं गुणांशकम् ।
एकेन लिङ्गमेकेनान्तरितं तु प्रकल्पयेत् ॥ १८ ॥
प्रतितुङ्गं द्विभागेन वाजनं चैकभागया ।
सप्तविंशतिभागे तु नान्मतःप्र(नं तत्प्र)तिसुन्दरम् ॥ १९ ॥
उपपीठस्य चोत्सेधमेकविंशतिभाजिते ।
उपानं तु द्विभागेन तत्समं त्वम्बुजोदयम् ॥ २० ॥

कण्ठमंशेन कर्तव्यं पद्ममंशेन कारयेत् ।
महापदि द्विभागेन पद्ममंशेन कारयेत् ॥ २१ ॥
कम्पमंशेन कर्तव्यं कण्ठोच्चवसुधारया ।
भागेनाङ्कप(न कम्प)मन्येन पद्मं कम्पोऽथ कर्तृभिः ॥ २२ ॥
कम्पमंशेन कर्तव्यमेतत्सौभद्रमुच्यते ।
उपानाद्विगमन्यांशः, अम्बुजांशेन कंधरम् ॥ २३ ॥
द्विभागेनाब्जं कर्तव्य पट्टिका तत्समं(मा) भवेत् ।
वर्तं तु (तुलं) सव(म)भागेन कम्पमंशेन कारयेत् ॥ २४ ॥
सप्तभागं गलोत्सेधं कम्पमंशेन कारयेत् ।
अम्बुजं समभागानां महापट्टी द्विभागया ॥ २५ ॥
अब्जमर्थांशभागेन कम्पमंशेन कारयेत् ।
पञ्चपञ्चोपपीठैश्च समभागविभाजिते ॥ २६ ॥
कल्याणिका निकट्टन्ना सर्वधान्नस्तु पूजिता ।
एवं विधिः समाख्यात उपपीठे द्विजोत्तम ॥ २७ ॥
अङ्गनिष्क्रान्तवेशं च अधिष्ठानविधानवत् ।
भूतैश्च व्यालसिंहैश्च मकरैः पत्रजातिभिः ॥ २८ ॥
उपपीठं गलोमि(न्मि)श्रं भूषयन्तु सलक्षणम् ।
प्रत्यङ्गं मकरस्थान्तं(न) मबाहं(ब्जाहयं)रुद्धमस्तकम् ॥ २९ ॥
अम्बले(म्बुजे)नैव कर्तव्यमधिष्ठानोक्तमाचरेत् ।
उपपीठं समाख्यातमधिष्ठानविधिं शृणु ॥ ३० ॥

इति काश्यपशिल्प उपपीठविधानं पञ्चमः पटलः ।

अथ षष्ठः पटलः ।

अधिष्ठानम्—

अथ वक्ष्ये विशेषेण अधिष्ठानविधिं शृणु ।
धरातलमधिष्ठानमाधारं धरणी तथा ॥ १ ॥

भुवनं पृथिवी भूमिः पर्यायवचनादिभिः ।
हर्म्य(म्ये)धारं तु कूटादिनीव्राधिष्ठाननीव्रकम् ॥ २ ॥
तस्मादुपरि पीठस्थं नी(नी)व्रहोमाग्निनिर्गमम् ।
तस्मात्प्रकृतिनीव्रं च सूत्रपातं तु कारयेत् ॥ ३ ॥
यत्रैनाद्येष्टकानां स मानं तत्रैव लक्षयेत् ।
तस्मात्तु घनभित्त्यैव प्रकृत्यान्तं प्रकल्पयेत् ॥ ४ ॥
सुभावं प्रकृतेरुर्ध्वे प्रकृत्येच्छ(तावे)कहस्तकम् ।
द्विहस्तं वा प्रकृत्युच्चं त्रिहस्तं वा विनाऽऽकृतिम् ॥ ५ ॥
षडङ्गुलं समुत्सेधं षड्षडङ्गुलवर्धनात् ।
उत्तमं मध्यमं चैव अधमं त्वात्तिधाव(तस्त्रिधा अ)पि ॥ ६ ॥
प्रकृत्यं च स्थलं ख्यातमन्तमण्डलकस्य तु ।
एवं कृत्वा प्रकृत्यूर्ध्वे होमवाक्पलदेशिका ॥ ७ ॥
भित्तिपादस्य विष्कम्भं द्विगुणं त्रिगुणं तु वा ।
होमनीव्रमिति ख्यातं तदर्धं वा बलाञ्चितम् ॥ ८ ॥
तद्धोमप्रकृतीनीव्रैर्द्वित्रिदण्डैरथापि वा ।
आयानि प्रत्यवाहन्ति प्रादुपापिङ्गलं तु वा ॥ ९ ॥
होमनीव्रं समं प्रोक्तं द्विगर्धं द्विजसंनिभम् ।
होमं तु गन्धमानेन होमोर्ध्वेऽब्जं प्रकल्पयेत् ॥ १० ॥
अब्जस्योच्चसमं वेश मब्जार्धोवपानवम् ।
तस्योपरि अधिष्ठानं सोपपीठान्वितं तु वा ॥ ११ ॥
अन्यद्धोमं प्रकृत्यूर्ध्वे पोपवा(सोपाना)नां प्रकल्पयेत् ।
तदूर्ध्वे तरतालं वा सोपपीठमथापि वा ॥ १२ ॥
दलापानं विनाऽऽधारं होमोर्ध्वे वा प्रकल्पयेत् ।
प्रकृतिं समसूत्रं तु कल्पयेद्देशिकोत्तमः ॥ १३ ॥
होपमाने उपानादि हर्म्यनिष्क्रान्तवेशनम् ।
आर्तो(अर्धो)त्सेधं समानेनाधिष्ठानस्योच्चयं विदुः ॥ १४ ॥
पादोदयोर्ध्वमानं वा षडष्टांशोनमेव वा ।
अग्रपादविशालं तु दण्डमित्यभिधीयते ॥ १५ ॥

एकदण्डं समारभ्य अर्धदण्डविवर्धनात् ।
या(स)पादा पञ्चसङ्ख्या तु अग्रिदण्डावसानकम् (का)॥ १६ ॥
पद्मान्ते पादनिष्क्रान्तं तन्निभागविभाजिते ।
उपानं व्यासमेकांशं शेषं जगति विस्म(स्त)रम् ॥ १७ ॥
आमुदावंशमेकांशं तन्नीव्रं जगतीसमम् ।
कुमुदे षट्कांशेन तत्समं कर्णवेशनम् ॥ १८ ॥
सर्वेषामम्बुजानां तु नीव्रं तुङ्गसमं भवेत् ।
कम्पानामपिका(पि वा)शेषं चतुर्भागैकनिर्गमम् ॥ १९ ॥
महावाजननिष्क्रान्तं तुङ्गं तुल्याक्षि एव वा ।
त्रिपादं वाऽथ निष्क्रान्तं यथाबलवशान्न्यसेत् ॥ २० ॥
जन्मादिपञ्चवर्गेषु तत्तदङ्गावसानके ।
द्वारार्थं वा स्थलार्थं वा चोदयेत्तद्धरातले ॥ २१ ॥
उपानं जगतीकूपं खण्डं चा(च)पट्टिका तथा ।
पञ्चवर्गमिति ख्यातं जयादद्धं(र्धं)तदा बुधः ॥ २२ ॥
द्वारं च जलधारं च स्थलं चाप्रतिबन्धकैः ।
मेन(प्रतेरू)ऊर्ध्वे तु कर्तव्यमङ्गं चैतन्न कारयेत् ॥ २३ ॥
प्रत्यं चेतु धनं चेतु पिपा(विप)दाम(मा)स्पदं सदा ।
तस्मात्सर्वप्रयत्नेन प्रत्यङ्गच्छेदनं विना ॥ २४ ॥
अधिष्ठानं द्विधा ज्ञेयं प्रतिबद्धाङ्घ्रिबन्धनम् ।
प्रत्येकानां तु भेदेन प्रोच्यते द्विजसत्तमाः ॥ २५ ॥
सर्वेषा प्रतिपन्था(बन्धा)नां कुमुदं वृत्तमुच्यते ।
पादपन्थ(बन्ध)तलानां तु वस्वश्रृङ्ग(श्रं कु)मुदं भवेत् ॥ २६ ॥
तथो(योः)शंकरमेतस्मिन्भवेत्तत्कर्तृनाशनम् ।
प्रासादं प्रतिबद्धं चेत्तद्भेदानेकशंकरम् ॥ २७ ॥
कूटकोष्ठादिकानां तु कर्तव्यं तच्छुभावहम् ।
तदेवाङ्घ्रिप्रबन्धे(बन्धे)न क(त)स्मिञ्शंकरमुत्तमम् ॥ २८ ॥
अशुभं विपरीतं च वास्तु राष्ट्रनृपस्य च ।
तस्मात्सर्वप्रयत्नेन वर्मवर्गेण शंकरम् ॥ २९ ॥

अधिष्ठानस्य चोत्सेधमेकोनविंशदंशिते ।
उपानं चेतुभागेन सप्तांशे जगती भवेत् ॥ ३० ॥
षडंशं कुमुदोत्सेधमालिङ्गं त्वेकभागया ।
त्रिपट्टं त्वेकभागेन प्रत्युत्सेधं द्विभागया ॥ ३१ ॥
वाजिनं चैव भागेन प्रतिबन्धमिदं जगत् ।
उपानरहितं शेषं पूर्ववन्नैकधाऽपि वा ॥ ३२ ॥
अधिष्ठानस्य चोत्सेधं पञ्चविंशतिभाजिते ।
शिवांशं पादुकोत्सेधं जगती वसुभागया ॥ ३३ ॥
धात्वंशं कुमुदोत्सेधं व्योमांशं कम्पमानकम् ।
अतलांशं गलोतु(त्तु)ङ्गं शस्यां(श्यं)शे चोर्ध्वकम्पकम् ॥ ३४ ॥
महापट्टिगणांशं तु तदूर्ध्वांशेन कम्पकम् ।
पादपन्थ(बन्ध)मिति ख्यतमुपानरहितं तथा ॥ ३५ ॥
एतच्च पादपन्थं(बन्धं) च नानाभेदैश्च कीर्तितम् ।
त्रिसप्तांशे तलोत्सेधे कृतांशैनैकपादुका ॥ ३६ ॥
अम्बुजं सार्धभागेन कम्पमर्धांशमुच्यते ।
सप्तांशं जगतीतूर्णं रसांशं कुमुदोदयम् ॥ ३७ ॥
आलिङ्गमेकभागेन त्रिपट्टं त्वेकभागया ।
द्विभागं प्रतितुङ्गं स्याद्भागमेकेन वाजनम् ॥ ३८ ॥
प्रतिवक्त्रमिदं नाम प्रतिबद्धे तु भेदिनम् ।
तदेवं पक्षभागे तु उपानं परिकीर्तितम् ॥ ३९ ॥
आलिङ्गं च द्विभागेन शेषं पूर्ववदेव हि ।
उपानोपरि पद्मं च कम्पं चैकं परित्यजेत् ॥ ४० ॥
तच्च प्रतिक्रमं ख्यातं सर्वदेवालया(ये) हिक(त)म् ।
षड्विंशद्विज(भ)जेदुश्च(च्चं)समु(मं) वा चैकभागया ॥ ४१ ॥
द्विभागेन दलं कुर्यात् कम्पमेकेन कारयेत् ।
षडंशं जगतीरुच्चमेकांशं दलमानकम् ॥ ४२ ॥
खण्डमेकेन कर्तव्यमेकेनाब्जं तु कारयेत् ।
कुमुदोच्चं गुणांशेन पद्ममेकेन कारयेत् ॥ ४३ ॥

कम्पमेकेन कर्तव्यं कण्ठोच्चं तु विभागया ।
एकांशं कण्ठतुङ्गं तु तत्समं तु दलोदयम् ॥ ४४ ॥
महापट्टी द्विभागेन दलमेकांशमानतः ।
कम्पमेकेन कर्तव्यमष्टाश्रं कुमुदं कुरु ॥ ४५ ॥
अम्भोजकेसरं ख्यातं पादपूज्यं तु भेदिनम् ।
एकोनविंशदंशं तु तलोत्सेधं विभाजिते ॥ ४६ ॥
उपानमेकभागेन अब्जोच्चमनलांशकम् ।
कम्पोच्चं मध्यभागेन जगत्युच्चं युगांशकम् ॥ ४७ ॥
अम्बुजं त्वर्धभागेन दलमर्धांशमानतः ।
अर्धांशं पद्मतुङ्गं तु ग(गु)णांशं पट्टमानतः ॥ ४८ ॥
पद्मं मध्यां(ऽमर्धां)शमानेन तत्समं कम्पमुच्यते ।
अत्यर्धांशं तु खण्डोच्चं कम्पमन्येन कारयेत् ॥ ४९ ॥
पद्ममन्येन कर्तव्यं पट्टिकासार्धभागया(तः) ।
अम्बुजं सार्धभागेन कम्पमर्धेन कारयेत् ॥ ५० ॥
पुष्पपुष्कलमाख्यातं पादबन्धे तु भेदिनम् ।
द्वात्रिंशद्विभजेदायमुपोपानद्विभागया(तः) ॥ ५१ ॥
उपानं त्वेति (क) भागं स्यात्सप्तांशं कमलोदयम् ।
कण्ठमेकेन कर्तव्यं पद्ममेकेन कारयेत् ॥ ५२ ॥
कुमुदोच्चं चतुर्भागमेकांशं दलमुच्यते ।
कम्पमेकेन कर्तव्यं गुणांश गलमानतः ॥ ५३ ॥
कम्पमेकेन कर्तव्यमूर्ध्वकम्पं प्रकल्पयेत् ।
कपोतोच्चं युगांशेन आलिङ्गं त्वेकभागिना(गतः) ॥ ५४ ॥
एकेनान्तरितं कुर्यात्प्रतितुङ्गं द्विभागया (तः) ।
वर्ज(वाज)नं तु द्विभागेन कल्पयेत्तु क्रमेण तु ॥ ५५ ॥
प्रतिबन्धे तु भेदं स्यात् श्रीबद्धान्तमुदाहृतम् ।
अष्टका(को)नस्य चोत्सेधमष्टाविंशतिभाजिते ॥ ५६ ॥
उपानं त्वेकभागेन जगत्युच्चं रसांशकम् ।
कुमुदं पञ्चभागेन कम्पमेकेन कारयेत् ॥ ५७ ॥

गुणांशं गलमानं तु कम्पमेकेन कल्पयेत् ।
पद्ममेकेन कर्तव्यं कपोतोच्चं गुणांशकम् ॥ ५८ ॥
आलिङ्गं त्वेकभागेन त्वरितं तु प्रकल्पयेत् ।
प्रतीतं य(प,द्विभागेन शतांशं वाजनोदयम् ॥ ५९ ॥
प्रतिबन्धस्य घर्गं स्यान्मञ्चमन्थमुदाहृतम् ।
तदेवाऽऽलिङ्गकादूर्ध्वं विज्यंया(विभज्यं)विंशदंशकैः ॥ ६० ॥
कल्प्यं श्रीकान्तवन्मं(नाम्ना) तु पादबन्धेऽतिभेदितम् ।
तुङ्गं षड्विंशदंशं तु एकांशं पादुकं भवेत् ॥ ६१ ॥
द्विभागं दलमानं तु कम्पोच्चं शशिभागिना(गतः) ।
षण्डां(डं) शं तु जगत्युच्चं चतुर्भागं घटोदयम् ॥ ६२ ॥
कम्पमेकेन कर्तव्यं पद्मोच्चं तु द्विभागया(तः) ।
ऊर्ध्वकम्पमर्धैकांशं गलमानं द्विभागया ॥ ६३ ॥
वाजनं त्वेकभागेन सार्धांशं कमलोदयम् ।
कम्पमेकेन कर्तव्यं श्रेणीबद्धमिदं भवेत् ॥ ६४ ॥
पादबन्धे तु भेदं स्यात्सिंहभाद्यैर्विभूषितम् ।
त्रिपञ्चांशतलोत्सेधं कृत्वा सार्धांशपादुकम् ॥ ६५ ॥
कम्पमर्धांशमित्युक्तं भूतांशं पङ्क्तिमोदयम् ।
गलमन्येन कर्तव्यं पद्ममेकेन कारयेत् ॥ ६६ ॥
कुमुदोच्चं त्रिभागैकं दलमेकेन कारयेत् ।
आलिङ्गमेकभागेन त्वरितं तत्समं भवेत् ॥ ६७ ॥
वृत्ते(प्रते)रुच्चं द्विभागेन वाजनं त्वेकभागया ।
अब्जबन्धमिदं नाम्ना भेदे तत्प्रतिबन्धके ॥ ६८ ॥
तलं द्वाविंशदंशे तु द्विभागं पादुकोन्नतम् ।
अब्जमेकेन कम्पं तु एकांशेन प्रकल्पयेत् ॥ ६९ ॥
जगतीपञ्चभागे तु कुमुदं चतुरंशकम् ।
पद्ममेकेन कर्तव्यं कम्पमेकेन कारयेत् ॥ ७० ॥
कण्ठतुङ्गंद्विभागेन कम्पमेकेन कारयेत् ।
शिरां(वां)शं दलतुङ्गं तु महापट्टी द्विभागया(तः)॥ ७१ ॥

कम्पमेकेन कर्तव्यं वप्रबन्धमिति स्मृतम् ।
पादबन्धस्य वर्गं स्यात्सर्वधामसु पूजयेत् ॥ ७२ ॥
तन्महापट्टिकामानं कपोतं वो(वा)तबन्धकम् ।
कपोतोपरि कम्पोर्ध्वे त्रिपट्टं त्वेकभागया ॥ ७३ ॥
प्रत्युत्सेधं द्विभागेन वाजनं त्वेकभागया ।
तुङ्गे षड्विंशदंशे तु कल्पयेत्प्रतिसुन्दरम् ॥ ७४ ॥
अधीनस्यादि(धिष्ठानस्य) चोत्सेधं त्रयोविंशतिभाजिते ।
उपानमेकभागेन पद्ममेकेन कम्पकम् ॥ ७५ ॥
रं(अं)शेन पट्टिकां विद्यात् कम्पमेकेन कल्पयेत् ।
पद्ममेकेन कण्ठान्तमेकांशेनैव कल्पयेत् ॥ ७६ ॥
एकांशेनाम्बुजं कुर्याद्गुणांशं कुमुदोदयम् ।
पद्ममेकेन कर्तव्यमालिङ्गं त्वेकभागया(तः) ॥ ७७ ॥
त्रिपट्टं शिवभागं तु द्विभागं प्रतिमानकम् ।
वाजनं त्वेकभागेन कल्पयेत्तु यथाक्रमम् ॥ ७८ ॥
प्रतिबन्धे तु भेदं स्याच्छ्रीकण्ठान्तमुदाहृतम् ।
उपानमेकभागेन पद्ममेकेन कम्पकम् ॥ ७९ ॥
तृर्यंशेन पट्टिकाकम्पमेकांशेन प्रकल्पयेत् ।
गलमेकेन कर्तव्यं पद्ममेकेन कारयेत् ॥ ८० ॥
कुमुदं तु त्र्यंशेन पद्ममेकांशमानतः ।
आलिङ्गं त्वेकभागेन त्वरितं शशिभागया ॥ ८१ ॥
अधिष्ठानस्य चोत्सेधं द्वाविंशतिविभाजिते ।
एतत्कीरबन्धं स्यात्प्रतिबन्धे तु भेदितम् ॥ ८२ ॥
पादुकं चैकभागेन भागेनाब्जं तु कम्पकम् ।
कम्पमेकेन कर्तव्यं कण्ठमानं द्विभागया ॥ ८३ ॥
कम्पमेकेन भागेन पट्टिकांशेन कम्पकम् ।
द्विभागं दलमागन्तु(नं तु)गलमेकांशमानतः ॥ ८४ ॥
अम्बुजं त्वेकभागेन कुम्भमानं गुणांशकम् ।
एकांशं दलमानं स्याद्वंशेनालिन्दमुच्यते ॥ ८५ ॥

त्रिपट्टं त्वेकभागेन प्रतिमानं द्विभागया ।
वाजनं त्वेकभागेन भानुद्विगुणितांशके ॥ ८६ ॥
एतच्च प्रतिबन्धं स्याद्भेदं कलशबन्धनम् ।
अधिष्ठानस्य चोत्सेधं चतुर्विंशतिभाजिते ॥ ८७ ॥
पादुकं तु विभागेन तत्समं पङ्कजोदयम् ।
आर(अब्ज)मेकेन कर्तव्यं जग(त्यु)च्चं रसांशल(क)म् ॥ ८८ ॥
पद्ममेकेन भागेन कण्ठपद्मं तु भागया ।
बे(ई)शांशं कलशोत्सेधं कमलं त्वेकभागया ॥ ८९ ॥
प्रतिबन्धे तु भेदं स्याच्छ्रीकारं नाम म्यु(तू)च्यते ।
भानुद्व्यंशे तलोत्सेधं द्विभागं पादुकोदयम् ॥ ९० ॥
उपोवा(पा)नं शिवांसं(शं) स्यात्षडशं दलमानकम् ।
कण्ठमंशेन कर्तव्यमंशेनार्जि(ब्जं) प्रकल्पयेत् ॥ ९१ ॥
गुणांशं खण्डमानं तु दलमेकेन वृत्तकम् ।
कम्पमेकेन कण्ठं तु गुणांशं दलमानकम् ॥ ९२ ॥
व्योमांशं दलमानं तु द्विभागं पट्टिका भवेत् ।
एकांशं दलमानं तु कम्पमेकेन कारयेत् ॥ ९३ ॥
सुन्दराणां बु(त्व्यम्बु)जानां पादबन्धे तु भेदितम् ।
चतुःसप्तद्विभागं तु तलमानविभाजिते ॥ ९४ ॥
द्विभागं पादुकं ख्यातं दलमानं युगांशकम् ।
गलमेकेन कर्तव्यमम्बुजं तु विभागया ॥ ९५ ॥
द्विभागं पट्टिकामानमंशं पादुकमुच्यते ।
जगतीचतुरश्रं तु पद्ममंशं द्विजोत्तम ॥ ९६ ॥
कण्ठमंशेन पत्रं तु शस्यं(श्यं)शं प्रविधीयते ।
गुणांशं कुमुदोत्सेधं पद्ममंशेन कल्पयेत् ॥ ९७ ॥
कम्पमंशेन कर्तव्यं त्रिपद्मं त्वेकभागया ।
प्रतिमानं भवेद्वं(द्व्यं)शं वाजनं तु शिवांशकम् ॥ ९८ ॥
एवं नलिनकान्तं स्यात्सर्वदेवप्रियावहम् ।
त्रयोविंशतिभागे तु तु(त)लोच्चं तु विभाजिते ॥ ९९ ॥

सार्धांशं पादुकोत्सेधमुपोपानं शतांशकम् ।
अथो (धः) पद्मं विभागं स्यादेकांशं कण्ठमुच्यते ॥ १०० ॥
तदुद्वेपनमेकांशं कुमुदोच्चं गुणांशकम् ।
तदूर्ध्वं पद्ममेकांशमेकांशमपमानकम् ॥ १०१ ॥
कण्ठं द्व्यंशेन कर्तव्यमेकांशं चाथ पट्टिका ।
एकांशं पद्मतुङ्गं (तु आ)लिङ्गं त्वेकविभागया ॥ १०२ ॥
त्रिपट्टं तु यथांशं तु प्रतिमानं विभागया ।
एकानापू (कोनं वा) जनं कुर्यात्तच्छ्रीसौन्दर्यमुच्यते ॥ १०३ ॥
प्रतिबद्धस्य भेदं स्यादतं(न्तं) चापुनराश्रया ।
चतुर्विंशतिभागं तु तलोच्चं तु विभाजिते ॥ १०४ ॥
उपानं त्वेकभागेन द्विभागं तु दलोदयम् ।
तदूर्ध्वं कम्पमेकांशं जगत्युच्चं रसांशकम् ॥ १०५ ॥
वेदांशं कुमुदोत्सेधं पद्ममंशेन कल्पयेत् ।
कण्ठमेकांशमित्युक्तमूर्ध्वपद्मं शिवांशकम् ॥ १०६ ॥
राजनोच्चं द्विभागेन एकांशं पद्मतुङ्गकम् ।
आलिङ्गं त्वेकभागेन त्रिपट्टं तत्समं भवेत् ॥ १०७ ॥
प्रतिमानं द्विभागं स्याद्राजनं त्वेकभागया ।
स्कन्दस्कन्दमिदं नाम्ना प्रतिबन्धस्य भेदकम् ॥ १०८ ॥
धरातलोच्चं विभजेन्नयविंशतिभागया ।
उपानोदयमेकांशं षडंशं त्वम्बुजोदयम् ॥ १०९ ॥
एकांशं कण्ठमानं तु ऊर्ध्वे पद्मं शिवांशकम् ।
युगांशं तु घटोत्सेधमेकांशं पद्मकम्पकम् ॥ ११० ॥
कम्पमेकेन कर्तव्यं द्विभागं कंधरोदयम् ।
एकांशं कम्पमानं तु ऊर्ध्वे पद्मं तु तत्समम् ॥ १११ ॥
कपोतोच्चं गुणांशं तु आलिन्द्रं त्वेकभागया ।
एतच्चाम्बुजकान्तं स्यादुपादबन्धे तु भेदितम् ॥ ११२ ॥
एवं त्वनेकभेदेन प्रोच्यते तु धरातलम् ।
तलोत्सेधमिवात्र स्याद्धीमाधिक्ययाक्(क्यं न) दोषभाक् ॥ ११३ ॥

अंशं वाऽर्धत्रिपादं वा बलाङ्गावबलान्वितम् ।
त्रिपट्टस्य विशालं तु द्विविधं प्रविधीयते ॥ ११४ ॥
मूलपादसमं व्यासं पादमूले त्रिपट्टकम् ।
पादान्तरे त्रिपट्टानां व्यासं त्री(त्रि)पाददण्डकम् ॥ ११५ ॥
पादबाह्ये समावेशं निर्व्यं चैव समं भवेत् ।
अयुग्मं युग्मसंख्या वा पादान्तरे प्रकल्पयेत् ॥ ११६ ॥
हंसै वा(हंसैर्वा) मकरैर्यो(र्वा ऽ)लिभूतहंसैर्विभूषितम् ।
प्रत्यग्रमकरैर्व्यालैर्विद्याधरविनिर्मितम् ॥ ११७ ॥
त्रिपट्टोर्ध्वे प्रतिह्येवं सर्वत्र परिकल्पयेत् ।
ऊर्ध्वाधस्त्वम्बुजोपेतं कुमुदं वृत्तमाचरेत् ॥ ११८ ॥
अन्ये वै कुमुदं सर्वे प्रतिबन्धाङ्घ्रिबन्धयोः ।
वृत्तं च वसुकोणं च क्रमेणैव तु कल्पयेत् ॥ ११९ ॥

इति काश्यपशिल्पेऽधिष्ठानविधिः षष्ठः पटलः ।

अथ सप्तमः पटलः ।

नालप्रतिष्ठा ।

अथ वक्ष्ये विशेषेण निर्मालयद्वारलक्षणम् ।
प्रतिपन्थे(घन्थे) प्रतेरन्ते दनन्ये(लान्ते) पट्टिकान्तके ॥ १ ॥
गलान्ते कुमुदं चैव वि(व)प्रान्ते पादुकान्तके ।
छिद्रं कुर्यात्तथा चोर्ध्वे गलं तस्मात्सुयोजयेत् ॥ २ ॥
भान्वङ्गुलं समारभ्य गुणाङ्गुलविवर्ध(र्ध)नात् ।
चतुर्विंशाङ्गुलं यावत्तावत्पञ्चविधा(धं)तथा ॥ ३ ॥
भित्तिबाह्यगतं ह्येव तस्यार्धं गर्भगेहके ।
वेशयित्वाऽथ वा भित्तेर्बाह्यन्तरसमं तु वा ॥ ४ ॥
वस्वङ्गुलं समारभ्य द्विद्व्यङ्गुलविवर्धनात् ।
कराङ्गुलावसानं तु विस्तारं पञ्चधाक्रमम् ॥ ५ ॥

तन्मूलं तारपञ्चांशं त्रयांशं त्वग्रविस्तृतम्।
तद्विस्तारसमं पाया(दा)ङ्घ्रिपादं वाऽथ तद्घनम् ॥ ६ ॥
विस्तारस्य त्रिभागैकं छिद्रतारोन्नतं तथा।
नालमध्ये तु कर्तव्यं निम्नोन्नतविवर्जितम् ॥ ७ ॥
मूलादग्रोन्नतं किंचिन्मूलं हंसस्य चान्वितम्।
गजोष्ट्र(ष्ठ)सदृशालम्ब्यं(म्बी) यथासुन्दरमाचरेत् ॥ ८ ॥
व्यालो वा सिंहभूतो वा नालं धृत्वा तु संस्थितः।
नालमेवं प्रकर्तव्यं सौम्यं प्रासादमध्यगम् ॥ ९ ॥
स्थापयित्वा विशेषेण अनेन विधिना तथा।
नालं गन्धोदकैर्दिव्यैः स्थापयित्वा हृ(मु)दा बुधः ॥ १० ॥
शान्तिहोमं तु कुर्वीत वारुणं सूक्तमुच्चरन्।
स्थापकः सुप्रसन्नात्मा सुमुहूर्ते सुलग्नके ॥ ११ ॥
नालं तु स्थापयेद्धीमान्स्थपतिः स्थापकान्वितः।
सर्वालंकारसंयुक्तं सर्वतोयसमन्वितम् ॥ १२ ॥
मुधया गुडतोयैश्च बन्धयेत्सुदृढं यथा।
पुंशिलायां तु कर्तव्यं नालं तु द्विदलान्वितम् ॥ १३ ॥
नालस्थापनमेवं तु स्तम्भलक्षणमुच्यते ॥ १४ ॥

इति काश्यपशिल्पे नाललक्षणं सप्तमः पटलः।

अथाष्टमः पटलः।

पदवर्गः।

अथ वक्ष्ये विशेषेण चरणायामविस्तरम्।
आकारं भूषणं चैव संक्षेपाच्छृणु सुव्रत ॥ १ ॥
स्तम्भं च तलिपं चैव चरं जङ्गममेव वा।
स्थाणुः स्थूणश्च पादश्च पर्यायवचनानि च ॥ २ ॥
उक्तोत्सेधांशमानेन पादायामो विधीयते।
उक्ताधिष्ठानतुङ्गस्य द्विगुणं वाऽङ्घ्रितुङ्गकम् ॥ ३ ॥

तस्मात्तारन(त)लोच्चं तु षष्ठांशं त्वधिकं तु वा ।
पदोच्चं पङ्क्तिनन्दाष्ट भागैकं वाऽङ्घ्रिविस्तरम् ॥ ४ ॥
दारुपादतलं ह्येतत्कुडयपादमथोच्यते ।
तदर्धं वा त्रिभागैकं चतुर्भागोनमेव वा ॥ ५ ॥
आढ्यस्तम्भविशालं स्यादेतत्सर्वं सुधर्मसु ।
मतेरुत्तरसीमान्ते विशालस्तम्भ उच्यते ॥ ६ ॥
उपानाद्युत्तरान्तस्थो निखाताङ्घ्रिस्तदुच्यते ।
तुङ्गं सप्तांशमथवा नवधर्मांश एव वा ॥ ७ ॥
रुद्रभान्वंशकं वाऽथ कृत्वैथां(कां)शाङ्घ्रिविस्तरम् ।
तन्मूलतारमाख्यातं तत्तारं तु तथा भजेत् ॥ ८ ॥
एकभागविहीनं तु शेषमग्रविशालकम् ॥
एकादिषोडशान्तं च तलं प्रत्येवमाचरेत् ॥ ९ ॥
मूलादग्रं युगास्रं तु कुम्भमन्थादिसंयुतम् ।
ब्रह्मकान्तमिति ख्यातं वस्वस्रं विष्णुकान्तकम् ॥ १० ॥
रसास्रमिन्द्रकान्तं स्याच्चन्द्रकान्तं तलास्रकम् ।
कण्ठमानेन तन्मूलं तथैवाग्रं तु प्रकल्पयेत् ॥ ११ ॥
स्तम्भाग्रे चैव तन्माने चतुरश्रं समन्वितम् ।
तयोर्मध्येऽपि वस्वश्रं षोडशाश्रमथापि वा ॥ १२ ॥
वृत्ताकारं तु वा वि(व)प्रं कुम्भमण्डादिसंयुतम् ।
कुम्भमण्डादिहीनं यत्तद्दारू रुद्रकान्तकम् ॥ १३ ॥
मूलादग्रविशालं तु मध्येऽष्टाश्रं द्विमण्डकम् ।
रुद्रकान्तामिति ख्यातं मूलादग्रं तु वर्तुलम् ॥ १४ ॥
कुम्भमण्डादि तन्मध्ये अष्टाश्रं तावदुच्यते ।
चतुरश्रमधोभागे अष्टाश्रं मध्यमं तथा ॥ १५ ॥
तदुद्वे (दूर्ध्वे)वृत्तमेवं स्यात्त्रिभागं तुङ्गसदृशम् ।
शिवच्छंदमिति ख्यातं शिवहर्म्ये प्रसंस्थितम् ॥ १६ ॥
दण्डं सार्धद्विदण्डं वा मूलपद्मासनोदयम् ।
द्विगुणं पत्रविस्तारं पद्माकारं तु कारयेत् ॥ १७ ॥
तन्मध्ये कर्णिकायां तु चरणस्थापनं कुरु ।
यथेष्टाकृतिसंयुक्तं कुम्भमण्डादिसंयुतम् ॥ १८ ॥

चक्रवाकतलं मध्ये भूषितं पद्मपादुकम् ।
पत्रमूलाङ्घ्रिमध्ये तु व्यालेन व्यालपादुकम् ॥ १९ ॥
मूलेभपादमानेन गजपादमुदाहृतम् ।
मूले बिम्बादिभिः कुर्याद्यथेष्टाकृतिसंयुतम् ॥ २० ॥
कुम्भमण्डादिसंयुक्तं तत्तन्नाम्ना प्रकीर्तितम् ।
वृत्ताकारे तदायामे शूण्डुभेदैः समन्वितम् ॥ २१ ॥
कुम्भमण्डादिसंयुक्तं शूण्डुपादमुदाहृतम् ।
मुक्तादामैरलंकृत्य पिण्डिपादमुदाहृतम् ॥ २२ ॥
विष्कम्भकर्णमानेन स्तम्भाग्रे चतुरश्रकम् ।
तदधस्त्वर्धदण्डानामब्जमष्टाश्रसंयुतम् ॥ २३ ॥
मण्डमानेन तस्याधो वस्वश्रं परिकल्पयेत् ।
तदधः पूर्ववत्पद्मं तस्याधो दण्डमानतः ॥ २४ ॥
चतुरश्रसमायुक्तं तस्य छत्रं तु पूर्ववत् ।
मूले वा वेदशेषाश्रं छत्रखण्डं तदुच्यते ॥ २५ ॥
मध्यपट्टं तु वस्वश्रं श्रीकण्ठं तदुदाहृतम् ।
मध्ये पट्टं कलास्रं चेच्छ्रीविक्रं स्तम्भमुच्यते ॥ २६ ॥
मूलादग्रं युगाग्रं स्यान्त्रिपट्टं क्षेपणान्वितम् ।
क्षेपणस्तम्भमाख्यातं पट्टपत्रादिशोभितम् ॥ २७ ॥
स्तम्भाकारत्रिभागैकचतुर्भागैकमेव वा ।
स्तम्भमध्ये शिखां कुर्यादेतत्स्तम्भविशेषतः ॥ २८ ॥
स्तम्भमूले तु पद्मानि स्तम्भमाने तु(न) कल्पयेत् ।
स्थ(स्त)म्भलक्षणमाख्यातं बोधिकालक्षणं शृणु ॥ २९ ॥

इति काश्यपशिल्पे स्तम्भलक्षणेऽष्टमः पटलः ।

अथ नवमः पटलः ।

बोधिका

अथ वक्ष्ये विशेषेण बोधिकालक्षणं परम् ।
मूलपादस्य पादेन श्रेष्ठे(ष्ठं) मध्ये तु मध्यमम् ॥ १ ॥

अग्रपादविशालं स्यात्समं कन्यासबोधिका ।
विस्तारसदृशोत्सेधं पञ्चदण्डायतान्वितम् ॥ २ ॥
उत्तमा बोधिका ख्याता तारद्वित्र्यंशमुच्यना ।
चतुर्दण्डायतोपेता मध्यमा सा प्रकीर्तिता ॥ ३ ॥
विस्तारस्यार्धतुङ्गं तु गुणदण्डायुतान्वितम् ॥
कन्यासबोधिकाख्यातं त्वङ्घ्रयोर्बोधिकान्वितम् ॥ ४ ॥
बोधिकाश्च त्रि(यास्रि)भागे तु एकांशेनार्धपट्टिकम् ।
मध्यांशेन तरङ्गं स्याल्लताद्यैर्भूषितं तु वा ॥ ५ ॥
तदधस्त्वेकभागेन मुष्टिबन्धं च कारयेत् ।
दण्डत्रिपादमर्धं वा छायामानं तदंशके ॥ ६ ॥
ऊर्ध्वाधः पट्टिकाधस्ताच्छायाकारं प्रकल्पयेत् ।
अधस्ताद्बोधिकाकारमलंकारं वदाम्यहम् ॥ ७ ॥
मध्ये पट्टत्रिभागैकं विस्तारार्धमथापि वा ।
पार्श्वयोरुभयोः शेषं तरङ्गस्थानमुच्यते ॥ ८ ॥
सक्षुद्रक्षेपणं मध्यात्पट्टपत्राद्यलंकृतम् ।
पार्श्वयोस्तु तरङ्गं स्यात्समाच्चान्योन्यहानकम् ॥ ९ ॥
बोधिविस्ताररन्ध्रं वा त्रिपादं वाऽग्रनीलकम् ।
तन्मूलसदृशं व्यासं बोधिकायाः प्रकल्पयेत् ॥ १० ॥
अन्यच्चदो(द्वो)र्धं षडंशांशं कृत्वोर्ध्वं पट्टिकान्वितम् ।
ऊर्ध्वपद्मप्रधासे(थांशे)न कण्ठमध्येन कारयेत् ॥ ११ ॥
अधोपद्मं द्विभागेन चोर्ध्वं पट्टांशमुच्यते ।
अधस्त्वम्बुजमध्यांशं कल्पयेत्तु क्रमेण तु ॥ १२ ॥
पद्मस्य मुकुलाकारमग्रादधो गतं कुरु ।
अग्रनिष्क्रामयुक्तं वा छायाकारमथापि वा ॥ १३ ॥
पार्श्वयोर्मुष्टिबन्धाग्रं व्याल आप.(या)दिकल्पितम् ।
भुजे वा मकरैर्व्यालैः पट्टकाद्यैर्विभूषितम् ॥ १४ ॥
रत्नबन्धक्रियावल्लिचित्रवाग्रस्तपट्टिका ।
बोधिका या स्त(त)रङ्गाढ्या तन्मध्ये दण्डमानतः ॥ १५ ॥
युगाग्रं पट्टसंयुक्तं तारोच्छ्रायं तु वृत्तकम् ।
नानाचित्रैरलंकृत्य बोधिकाचित्रबोधिका ॥ १६ ॥

पत्रैर्विचित्रिता पत्रबोधिका तु प्रकीर्तिता।
महार्णवतरङ्गाभस्तरङ्गस्तु प्रकल्पयेत्(ल्प्यताम्) ॥ १७ ॥
पादमर्धत्रिपादं वा भित्त्यै स्तम्भस्य निर्गतम्।
चतुरष्टाश्रवृत्तानां क्रमात्साधारणं तु वा ॥ १८ ॥
बोधिकायास्तथाग्रं तु वीरकण्ठयुगाग्रकम्।
अग्रपादसमं तच्च त्रिपादं तुङ्गमुच्यते ॥ १९ ॥
सर्वेषामपि पादानां वीरकण्ठयुगाश्रकम्।
अधस्ताद्वीरकण्ठं स्यात्फलिकालक्षणं शृणु ॥ २० ॥

फलिका।

अथ वक्ष्ये विशेषेण फलिकानां तु लक्षणम्।
त्रिदण्डं फलिकाव्यासं कन्यासार्धाधिकं समम् ॥ २१ ॥
चतुर्दण्डविशालं तु उत्तमा लम्भका भवेत्।
अथवा फलकाव्यासं कुम्भकर्णं समं भवेत् ॥ २२ ॥
सर्वेषां फलकानां तु तुङ्गं पादोनदण्डकम्।
तदुत्सेधं त्रिधा भज्य ऊर्ध्वे सो(तत्सं)न्धिरुच्यते ॥ २३ ॥
तथाधो(ऽधो)पेतमेकांशं तस्याधस्त्वम्बुजांशकम्।
नागपत्रसमाकारमपेतोपादरूपकम् ॥ २४ ॥
सर्वेषां फलकानां तु उत्सेधार्धं युगांशकम्।
फलकमेव कर्तव्यं तस्याधस्तात्खटं(घटं) कुरु ॥ २५ ॥
द्विदण्डं पादहीनं वा सार्धदण्डमथापि वा।
सपाददण्डतुङ्गं वा घटोच्चं तु चतुर्विधम् ॥ २६ ॥
प्रियदर्शनं सौम्यं च चन्द्रकान्तं च श्रीकरम्।
यथा क्रमेण नामानि कलशानां क्रमादितः ॥ २७ ॥
घटोच्चं पे(वै)नवांशेन हृद्भागे परिकल्पयेत्।
वेदांशं कलशोत्सेधं कण्ठमेकांशमानतः ॥ २८ ॥
आस्योच्चमेकभागेन पद्ममेकेन कारयेत्।
अधोऽनावृत्तमन्धेन हीनौ संकल्पयेद्बुधः ॥ २९ ॥
ऊर्ध्वोदयगतं कुर्यादनेन विधिना क्रमात्।
एवमुच्चं समाख्यातं विष्कम्भमधुना शृणु ॥ ३० ॥

विष्कम्भः ।

पादव्याससमौ हीनौ तत्कण्ठस्यास्य विस्मृ(स्तृ)तम् ।
अस्य कण्ठविशेषेण कुम्भस्योपरि विस्मृ(स्तृ)तम् ॥ ३१ ॥
स्तम्भे व्याससमं प्रोक्तं विस्तारे तच्च कर्णयोः ।
तस्याधो लम्बनं मूलात्कल्पयेत्कल्पवित्तमः ॥ ३२ ॥
अथवा बोधिकादीनामुदयं तु वदाम्यहम् ।
ऊर्णा(र्ना)शशरणोत्सेधं कृत्वाऽधो व्यंशकं व्रजेत् ॥ ३३ ॥
ऊर्ध्वभागं तु संग्राह्यं द्वात्रिंशत्यंशकं व्रजेत् ।
युगांशं बोधिकोत्सेधं वीरकण्ठं च तत्समम् ॥ ३४ ॥
भूतांशं फलकोत्सेधं मध्यमूलं शिवांशकम् ।
सोभे(समो)त्सेधं तु वेदांशं शिवांशं कण्ठमानकम् ॥ ३५ ॥
तदास्योदयमेकांशं पद्ममेकेन कारयेत् ।
वृतमन्धे(र्धे)न कर्तव्यं हीनं तत्समसुच्यते ॥ ३६ ॥
लम्बनाऽब्जलतामुक्तं मालामानादि पूर्ववत् ।
स्तम्भभूषणमेवं स्याद्वेदिकालक्षणं ततः ॥ ३७ ॥

काश्यपशिल्पे फलकलक्षणविधानो नवमः पटलः ।

अथ दशमः पटलः ।

वेदिकालक्षणम् ।

अथ वक्ष्ये विशेषेण वेदिकालक्षणं परम् ।
अधिष्ठानोपरिष्टात्तु स्तम्भमूले च कल्पयेत् ॥ १ ॥
प्रस्तारं सो(रस्यो)परिष्टात्तु कर्तव्या वेदिका द्विज ।
अध्यर्धदण्डमानं तु कन्यसा वेदिका मता ॥ २ ॥
द्विदण्डोदयमध्यं स्याच्छेष्ठं तुङ्गं त्रिदण्डकम् ।
अथवाऽन्यप्रकारेण वेदिकोत्सेधमुच्यते ॥ ३ ॥
चरणोदयं तु षट्सप्तवसुभागविभाजते ।
एकांशं वेदिकामानं कार्यं श्रेष्ठमधोऽधमम् ॥ ४ ॥

एवं हि चरणानां तु मूले तु वेदिकोदयम् ।
ऊर्ध्वमभ्यङ्घ्रितुङ्गे तु सप्तभागविभाजिते ॥ ५ ॥
एकांशखण्डहर्म्याणां वेदिकोदयमिष्यते ।
त्रिचतुष्पञ्चभागं तु गलोत्सेधं द्विभाजिते ॥ ६ ॥
गलमुच्चतमेकांशं श्रेष्ठमध्याधमं तथा ।
अर्धोत्सेधांशमानं वा दण्डमूले तु वेदिका ॥ ७ ॥
षडंशे वेदिकोत्सेधं गुणांशं गलमानकम् ।
गलोर्ध्वे कम्पमेकांशमेकेनाब्जं प्रकल्पयेत् ॥ ८ ॥
तदूर्ध्वं कम्पमेकांशं कर्तव्यं द्विजसत्तम ।
सप्ताष्टांशे तु वेशुच्चैर्वेदभूतं क्रमाद्वलम् ॥ ९ ॥
कबं(ण्ठं) पद्मं च कम्पं च प्रागिवैव प्रकल्पयेत् ।
कण्ठमानेन तन्मूले कम्पमेकेन कल्पयेत् ॥ १० ॥
शेषं कण्ठोदयं प्रोक्तं तत्कम्परहितं तु वा ।
अत्यर्धांशं तु वा पद्मं तुङ्गं द्व्यंशमथापि वा ॥ ११ ॥
पद्मशैलसुपत्राभा चित्रांशा वेदिकाऽथवा ।
सर्वेषां वेदिकानां तु गलमङ्घ्रिविभूषितम् ॥ १२ ॥
कुड्यस्तम्भसमव्यासान्नीव्रं वा वेदिकाङ्घ्रिका ।
प्ररोपरित(स्तरोपरि)वेदीनां वेशनं शृणु सुव्रत ॥ १३ ॥
गर्भभित्तित्रिभागैकमङ्घ्रिवेद्यङ्घ्रिवेशनम् ।
चतुर्भागैकभागं वा पञ्चभागैकरा(मा)भजेत् ॥ १४ ॥
एकांशं रहितं शेषं वेदिकायास्तु विस्तृतम् ।
युगांशं वेदिकाकारं नागरे प्रस्तरोपरि ॥ १५ ॥
द्राविडे वैसरैर्हर्म्यैर्वर्स्वग्रं वेदिकाकृति ।
अथवा वेसराहर्म्यवेदिकाग्रत एव वा ॥ १६ ॥
अनेकाश्रयताश्चे च गलाग्रं वेदिकाश्रया ।
वेदिकालक्षणं प्रोक्तं ततो जालकलक्षणम् ॥ १७ ॥

इति श्रीकाश्यपशिल्पे वेदिकालक्षणो दशमः पटलः ।

अथैकादशः पटलः ।

जालकलक्षणम् ।

अथ वक्ष्ये विशेषेण शृणु जालकलक्षणम् ।
पादवर्गगले चैव जालकस्थानमुच्यते ॥ १ ॥
प्रासादेषु महावास्तु अन्तरालेव मध्यमम् ।
पादात्पदं न कर्तव्यमनेन विधिना बुधः ॥ २ ॥
योजयेद्वेदिकोर्ध्वे तु जालकं तु द्विजोत्तमाः ।
वेदिका जालकार्थं न च्छेद्या सर्वविनाशनम् ॥ ३ ॥
तद्यथा वेदिका जालं कार्यं न च्छेदयेत्तथा ।
द्विदण्डं कन्यसं व्यासं त्रिदण्डं मध्यमं भवेत् ॥ ४ ॥
चतुर्दण्डविशालं तु ज्येष्ठमं परिकीर्तितम् ।
विस्तारसदृशोत्सेधमेकदण्डादिवर्धनात् ॥ ५ ॥
विस्तारद्विगुणं वाऽथ तावद्वैजालकोत्तमम् ।
येषु तुङ्गविशाले तु यदिष्टं तु परिग्रहेत् ॥ ६ ॥
स्तम्भव्यासार्धमानं तु घनं व्यासाङ्घ्रिकम्पयोः ।
विस्तारार्धा(र्धा)यनं(तं)रा(वा)तश्चतुर्थांशमेव वा ॥ ७ ॥
मध्यस्थं च[र] रन्ध्रं च वर्ज्यं जालकमाचरेत् ।
युग्मपादसमायुक्तमयुग्मं कम्पमुच्यते ॥ ८ ॥
गोनेत्रं हस्तिनेत्रं च नन्द्यावर्तं ऋजुक्रियम् ।
पुष्पकर्णं सकर्णं च जालकं षड्विधं भवेत् ॥ ९ ॥
दीर्घाश्रं कण्ठकच्छिद्रं गोनेत्रमिति संज्ञितम् ।
युगांशं कर्णकच्छिद्रं हस्तिनेत्रमुदाहृतम् ॥ १० ॥
पञ्चसूनं तु यच्छिद्रं प्रदक्षिणवशात्कृति ।
नन्द्यावर्तस्य पुष्पाभं नन्द्यावर्तमिति स्मृतम् ॥ ११ ॥
भार्ङ्गकालौ स्तम्भकम्पौ द्वौ जालं तदृजुक्रियम् ।
पुष्पकर्णं सकर्णाभं नन्द्यावर्तमिवाऽऽकृति ॥ १२ ॥

स्तम्भयोगं कवाटं च भित्तिमध्यबहिःस्थितम् ।
युग्मायुग्मं कवाटं(टे)वा घाटनोद्घाटनक्षमम् ॥ १३ ॥
जालकं तु सभादीनां पदतोर्धे(ऽर्धे)न कल्पयेत् ।
लोहदुमफलैर्दिव्यैर्वेष्टकाभित्तिजालकम् ॥ १४ ॥
यत्रोचितं तु यद्द्रव्यं तेन तत्रैव योजयेत् ।
जालकं खेवमाख्यातं ततस्तोरणलक्षणम् ॥ १५ ॥

इति काश्यपशिल्पे जालकविधानमेकादशः पटलः ।

अथ द्वादशः पटलः ।

तोरणलक्षणम् ।

अथ वक्ष्ये विशेषेण तोरणानां च लक्षणम् ।
पादोदये दशांशे तु सप्तांशं चरणोदयम् ॥ १ ॥
शेषं त्वनलभागं तु ऋषमाः मुदाहृतम् ।
ननांशे पादतुङ्गं तु षडंशं चरणोदयम् ॥ २ ॥
शेषं ऋषोदयं ख्यातमष्टांशे चाङ्घ्रितुङ्गके ।
पञ्चांशं चरणोत्सेधं गुणांशं कम्पतुङ्गकम् ॥ ३ ॥
तुङ्गं वा विपुलं वाऽपि देवभूतरसाङ्घ्रिकम् ।
तोरणस्य तु पाद्मादैर्घ्यसमेवं चतुर्विधम् ॥ ४ ॥
प्रासादमण्डपादीनां मध्यभागे तु तोरणम् ।
अनेन विधिना विप्र कर्तव्यं क्षुद्रयक्षके ॥ ५ ॥
पत्राख्यं तोरणमेकं द्वितीयं करतोरणम् ।
तृतीयं चित्रसंज्ञं तु त्रिविधा तोरणाकृतिः ॥ ६ ॥
अर्धचन्द्रमिवाऽऽकारं पत्रराजिविराजितम् ।
पत्रतोरणमाख्यातं ततो मकरमुच्यते ॥ ७ ॥
पञ्चवक्त्रसमायुक्तं पार्श्वयोर्मकरास्यकम् ।
मध्ये पूरणसंयुक्तं नानाफललतान्वितम् ॥ ८ ॥

नानालंकारसंयुक्तं वृत्तं मकरतोरणम् ।
तदेव पार्श्वयोर्मध्ये पुरीमस्य द्वयोरपि ॥ ९ ॥
नक्रतुण्डं प्रकर्तव्यं भूतविद्याधरास्तथा ।
सिंहव्यालकहंसाद्यैर्बलाग्रन्मुक्तमादकैः ॥ १० ॥
अन्यैश्च विविधैश्छत्रै रत्नसंघैश्च भूषयेत् ।
चित्रतोरणमेवं स्यात्प्रोच्यते तोरणत्रयम् ॥ ११ ॥
तोरणं चा(णान्य)न्तराऽधस्तात्त्रयोज्यानि विचक्षणैः ।
... . पार्श्वयोर्विकरण्डसमन्वितम् ॥ १२ ॥
बोधिकारहितं यत्तत् स्तम्भं तु गलता स्मृता ।
स्तम्भतोरणवन्मूर्ध्नि कर्तव्यं तोरणद्वयम् ।
एवं तान्निविधं नीत्वा द्विज कुम्भलतोच्यते ॥ १३ ॥

इति काश्यपशिल्पे तोरणकुम्भलता (लक्षणं) द्वादशः पटलः ।

अथ त्रयोदशः पटलः ।

वृत्तस्फाटितलक्षणम् ।

अथ वक्ष्ये विशेषेण वृत्तस्फाटितलक्षणम् ।
षडङ्गुलं समारभ्य द्विद्व्यङ्गुलविवर्धनात् ॥ १ ॥
कलाङ्गु(ङ्गु)लावधिर्या(धिं या)वत् तावद्व्यासं तु षड्विधम् ।
विस्तारार्धं तु तन्नीव्रं द्वात्रिंशद्द्वित्रिभागकम् ॥ २ ॥
वृत्ताकारसमं तच्च तोरणाङ्घ्रितु(व)दायु(य)तम् ।
सकंधरं तदूर्ध्वे तु शुकनासान्वितं तु वा ॥ ३ ॥
कर्णकूटाकृतिं वाऽथ वृत्ताकारं प्रकल्पयेत् ।
स्तम्भोत्सेधयुगांशे तु द्विभागं चरणोदयम् ॥ ४ ॥
प्रस्तरोदयमेकांशं शुकनास्युदयांशकम् ।
तदेव कूटमानं तु तत्तदुक्तवशान्नयेत् ॥ ५ ॥
अथवा तरमंच स्य प्रोक्तमार्गेण वा कुरु ।
वृत्तस्फाटितमेवं हि लतामण्डलमण्डितम् ॥ ६ ॥

स्तम्भाग्रं तोरणं चैव तथा कुम्भलता द्विज ।
वृत्ताख्यं स्फाटितं चैव हारं तारेषु कल्पयेत् ॥ ७ ॥
स्तम्भान्तरेव कर्तव्यं हर्म्यादीनां विशेषतः ॥ ८ ॥
इति काश्यपशिल्पे वृत्तस्फाटितलक्षणं त्रयोदशः पटलः ।

अथ चतुर्दशः पटलः ।

स्तंभतोरणम् ।

अथ वक्ष्ये विशेषेण स्तंभतोरणलक्षणम् ।
पादोच्चं दश्यरा(शधा)भज्य शुद्धद्वारं नवांशकम् ॥ १ ॥
चरणं नवधा भज्य अष्टांशं द्वारमानकम् ।
अथवाऽङ्घ्रिस्तु तुङ्गं तु वसुभागविभाजिते ॥ २ ॥
सप्तमं द्वारमानं तु रसभागविभाजिते ।
सार्धपञ्चांशमूर्ध्वे तु भवंगस्योच्च(द)यं भवेत् ॥ ३ ॥
पदं गच्छ(तुङ्गोच्चा)मल(ध)स्तात्तु सार्धद्विभागमुच्यते ।
शुद्धद्वारे तारार्धांशं शुद्धद्वारस्य विस्तृतम् ॥ ४ ॥
एकद्वित्रिचतुष्पञ्चषट्सप्ताष्टनवाङ्गुलम् ।
तुङ्गार्धादधिकं हीनं तारमेकोनविंशतिः ॥ ५ ॥
भेदमेवं समाख्यातं द्वारतुङ्गत्रयं भवेत् ।
सर्वेषामपि हर्म्याणां द्वारं मध्ये तु योजयेत् ॥ ६ ॥
पादविष्कम्भमानं वा सपादं सार्धमेव वा ।
द्वारयोगस्य विस्तारं तस्यार्धं ख(घ)नमुच्यते ॥ ७ ॥
सार्द्ध(ष्ट)सार्धख(घ)नं वाऽथ त्रिपादं वाऽथ तद्घनम् ।
योगतुङ्गं तु वेदांशमेकाग्रांशमथोत्तमम् ॥ ८ ॥
गुणांशमूर्ध्वगं ख्यातं बाह्याब्जक्षेपणाञ्चितम् ।
बाह्येऽब्जक्षेपणोपेतं भूतारं तदधो भवेत् ॥ ९ ॥
पतङ्गतारयोगस्य तुल्यमब्जविहीनकम् ।
भुवनं च पतङ्गं च मध्यस्थवलयान्वितम् ॥ १० ॥

ताम्रजौ वाऽऽज्यसौ वाऽथ वकयौ कीलबद्धितौ ।
तद्विस्तारत्रिभागैकं शिखायोगप्रवेशितौ ॥ ११ ॥
शैलजं वेदभुवंगादियोगभूये शिखान्वितौ ।
भुवङ्गपतङ्गयोरग्रौ छिद्रयोर्वेशनान्वितौ ॥ १२ ॥
एवं दृढीकृतौ पश्चाद्योगावस्थानमाचरेत् ।
सुनक्षत्रे शुभे वारे शुभहोरामुहूर्तके ॥ १३ ॥
योगे संस्थापयेद्विप्र शान्तिहोमं परं चरेत् ।
भित्तिव्यासे तु भान्वंशे बाह्यात्पञ्चावसानकम् ॥ १४ ॥
अभ्यन्तरं तु सप्तांशं सीमा योगस्य मध्यमम् ।
तद्बाह्येऽभ्यन्तरं चैव योगव्यासोभयाश्रितम् ॥ १५ ॥
सर्वालंकारसंयुक्तं ... ... ।
योगं वा पञ्चषट्सप्तभागे द्वौ तोरणाग्रकम् ॥ १६ ॥
शेषं पादोदयं ख्यातमेवं वै त्रिविधं भवेत् ।
युगाश्रं वसुकोणं वा वृत्तं वा तोरणद्वयम् ॥ १७ ॥
कुम्भमण्डादिकव्य(संयुक्तं) पोतिकासहितं तथा ।
पोतिकारहितं वाऽथ वीरकाण्डसमन्वितम् ॥ १८ ॥
कुड्यस्तम्भविशालार्धं त्रिपादं वा समं तु वा ।
तोरणाङ्घ्रिविशालं तु प्रोच्यते द्विजसत्तम ॥ १९ ॥
उत्तरं वाजनं साम्न(ब्ज)क्षेपणं क्षुद्रवाजनम् ।
यथा क्रमेण संकल्प्य अनेन विधिना बुध ॥ २० ॥
तोरणाङ्घ्रिविशालं वा त्रिपादं वोत्तरोदयम् ।
तदर्धं वाजनोच्चं तु तस्यार्धं गलनामकम् ॥ २१ ॥
गलार्धक्षेपणं ख्यातं तस्यार्धं क्षुद्रवाजनम् ।
उत्तरं पोतिकोर्ध्वं च वीरकाण्डं तु वा भवेत् ॥ २२ ॥
उत्संधितानताग्रं तु कुर्यान्मकरविष्टरम् ।
तोरणाग्रविशालं तु कुड्यस्तम्भोऽथ आर्धकम् ॥ २३ ॥
कुड्यस्तम्भस्य तारान्तर्व्यासं वा तोरणाग्रकम् ।
स्वाङ्घ्रिवेदावसानं वा तस्माद्बाण्डाधिकं तु वा ॥ २४ ॥
एवं चतुर्विधं ख्यातं तोरणाग्रविशालकम् ।

कुड्यतोरणमाख्यातं द्वारतोरणमुच्यते ॥ २५ ॥
द्वारतुल्योन्नतव्यासं तोरणाङ्घ्रितरं समम् ।
उत्तरं वाजनं वाऽज्जक्षेपणं वाष्टमङ्गलम् ॥ २६ ॥
फलकं पद्मवल्लयाढ्यं प्रागुक्तविधिना कुरु ।
पद्मत्राख्यं मकराख्यं वा चित्रतोरणमेव वा ॥ २७ ॥
मध्यमीर्ध्वे शूलसंयुक्तं पार्श्वयोश्च समन्वितम् ।
दर्पणं पूर्णकुम्भं च वृषभं युग्मचामरम् ॥ २८ ॥
श्रीवत्सं स्वस्तिकं शङ्खं दीपं द्वेवाष्टमङ्गलम् ।
श्रीवत्सं मध्यमे कुर्यात्शेषांशं तस्य पार्श्वयोः ॥ २९ ॥
लोहैर्दारुशिलान्तर्वा कर्तव्यं द्वारतोरणम् ।
द्वारतोरणमेवं हि स्तम्भतोरणमुच्यते ॥ ३० ॥
पादोच्चं तु त्रिधा भज्य द्विभागं चरणोदयम् ।
पादं सर्वाङ्गसंयुक्तं पोतिकारहितं कुरु ॥ ३१ ॥
उत्तरं वाजनाज्जं च क्षेपणं निम्नवाजनम् ।
तदूर्ध्वं च(ञ्च)पकर्णं तु नानापत्रैर्विचित्रितम् ॥ ३२ ॥
तोरणं मकरात्यं(ख्यं)तु मृणाख्यादि(ऽन्वि)तकंधरम् ।
सर्वालंकारसंयुक्तमेतत्स्यात्स्तम्भतोरणम् ॥ ३३ ॥
पादान्तरे हरायां वा कर्णप्रासादमध्यमे ।
शालामध्यान्तराले वा कर्तव्यं सर्वधामसु ॥ ३४ ॥
स्तम्भतोरणमाख्यातं शृणु कुम्भलतांविधिम् ॥ ३५ ॥

इति काश्यपशिल्पे स्तम्भतोरणविधिश्चतुर्दशः पटलः ।

अथ पञ्चदशः पटलः ।

कुम्भस्थललक्षणम् ।

स्तम्भमूले तु वेद्यूर्ध्वे पद्मासनं प्रकल्पयेत् ।
पादव्यापि समं लुङ्गं सपादं पद्मविस्तृतम् ॥ १ ॥

पद्मोच्चं वसुधा भज्य कम्पमेकांशमेव वा ।
अथो पद्मं गुणांशं तु एकांशं गलमुच्यते ॥ २ ॥
ऊर्ध्वमन्द्विभागे तु कम्पमेकेन कारयेत् ।
तदूर्ध्वे कुम्भतुङ्गं तु पद्मस्योच्चं समन्वियात् ॥ ३ ॥
तत्तुङ्गद्विगुणं कुम्भव्यासमित्यभिधीयते ।
कुम्भास्ये स्तम्भनिर्यूहं वलिमण्डलसंयुतम् ॥ ४ ॥
कुम्भमण्डादिसंयुक्तं वीरकाण्डविहीनकम् ।
फलकोपरि पद्मं तु कुम्भमानेन कल्पयेत् ॥ ५ ॥
कुम्भकुम्भलता ह्येता ह्यन्यथा वक्ष्यते पुनः ।
तदेवोत्संधिकोर्ध्वे तु वीरकाण्डसमन्वितम् ॥ ६ ॥
पोतिकारहितं यत्नात्स्तम्भकुम्भलता स्मृता ।
स्तम्भतोरणवन्मूर्ध्नि कर्तव्यं तोरणालयम् ॥ ७ ॥
एवं त्रिविधं चित्वा तूच्यते लुम्भलता द्विज ॥ ८ ॥

इति काश्यपशिल्पे कुम्भस्थललक्षणं पञ्चदशः पटलः ।

अथ षोडशः पटलः ।

वृत्तस्फुटितम् ।

अथ वक्ष्ये विशेषेण वृत्तस्फुटितलक्षणम् ।
षडङ्गुलं समारभ्य द्विद्व्यङ्गुलविवर्धनात् ॥ १ ॥
कलाङ्गुलविधिर्या(धिं या)वत्तावद्व्यासं तु षड्विधम् ।
विस्तारार्धं तु तन्नीत्रं द्वित्र्यांशं च भागिकम् ॥ २ ॥
वृत्ताकारसमं चान्तस्तोरणाङ्घ्रिवदायतम् ।
कन्धरं तु तदूर्ध्वे तु क्षु(शू)करास्यान्वितं तु वा ॥ ३ ॥
कर्णकूटाकृतिर्वाऽथ वृत्ताकारं प्रकल्पयेत् ।
स्तम्भोत्सेधयुगांशे तु द्विभागं चरणोदयम् ॥ ४ ॥
प्रस्तरोदयमेकांशं शुकनास्युदयांशकम् ।
तदेव कूटमानं तु तत्तदुक्तवशान्नयेत् ॥ ५ ॥

अथवा तरमश्चस्य प्रोक्तमार्गेण वा कुरु ।
वृत्तस्फुटितमेवं हि लतामण्डलमण्डितम् ॥ ६ ॥
स्तम्भाख्यतोरणं चैव तथा कुम्भलता द्विज ।
वृत्ताख्यं स्फुटितं चैव हारं तारेषु कल्पयेत् ॥ ७ ॥
स्तम्भान्तरेव कर्तव्यं हर्म्यादीनां विशेषतः ॥ ८ ॥

इति काश्यपशिल्पे वृत्तस्फुटितलक्षणं षोडशः पटलः ।

अथ सप्तदशः पटलः ।

द्वारविन्यासः ।

अथ वक्ष्ये विशेषेण द्वारविन्यासलक्षणम् ।
पादोच्चं दशधा भज्य शुद्धद्वारनवांशकम् ॥ १ ॥
चरणांशनवाङ्घ्रे तु तुङ्गं तु वसुभाजिते ।
सप्तांशं द्वारमानं तु रसभागविभाजिते ॥ २ ॥
सार्धहर्म्यांशदू(मू)र्ध्वे तु भवङ्गस्योच्छ्रयं भवेत् ।
स्तम्भोगश्च(ल)मधस्तात्तु सार्धद्विभागमुच्यते ॥ ३ ॥
शुद्धद्वारे तु[तु]ङ्गार्थं शुद्धद्वारस्य विस्तृतम् ।
एकद्वित्रिचतुष्पञ्चषट्सप्तपाष्टनवाङ्गुलम् ॥ ४ ॥
तुङ्गार्धादधिकं हीनं तारमेकोनविंशतिः ।
भेदमेवं समाख्यातं द्वारतुङ्गं त्रिधा भवेत् ॥ ५ ॥
सर्वेषामपि हर्म्याणां द्वारमध्ये तु योजयेत् ।
पादाधिष्क्रम्भमानं वा सपादं साधमेव वा ॥ ६ ॥
द्वारयोगस्य विस्तारं तस्यार्थं घनमुच्यते ।
साष्टसार्धघनं वाऽथ त्रिपादं वाऽथ तद्घनम् ॥ ७ ॥
योगतुङ्गं तु वेदांशे त्वेकांशाश्रमयोगतः ।
गुणांशादूर्ध्वगं ख्यातं बाह्यान्जक्षेपणान्वितम् ॥ ८ ॥
बाह्यान्जक्षेपणोपेतं भुवहातंचयो भवेत् ।
पतङ्गतारयोगस्य तुल्याब्जं च विहीनकम् ॥ ९ ॥

भुवङ्गं च पतङ्गं च मध्यस्थवलयान्वितम् ।
ताम्रजौ वाऽऽयसौ वाऽथ वलयौ कीलबन्धितौ ॥ १० ॥
तद्विस्तारत्रिभागैकं शिखायोगप्रवेशिकौ ।
शैलजं चेद्भुवङ्गादि योगाभूये शिखान्वितौ ॥ ११ ॥
भुवङ्गपतयोरग्रौ छिद्रयोर्वेशनान्वितौ ।
एवं दृढीकृतौ पश्चाद्योगावस्थानमाचरेत् ॥ १२ ॥
सुनक्षत्रे शुभे वारे शुभहोरामुहूर्तके ।
योगे संस्थापयेद्विप्र शान्तिहोमपुरःसरम् ॥ १३ ॥
मिश्रिव्यासे तु भान्वंशे बाह्यालयं चा(त्पञ्चा)वसानकम् ।
अभ्यन्तरं तु सप्तांशं सीमायोगस्य मध्यमम् ॥ १४ ॥
वि(त)द्वाहेऽभ्यन्तरं चैव योगव्यासोभयाश्रितम् ।
सर्वालंकारसंयुक्तं योगसाप्य(सीमा)दृढीकृतम् ॥ १५ ॥
दक्षिणे तु कवाटे तु योजयेद्द्वारपट्टिकाम् ।
त्रिचतुष्पञ्चमात्रं वा द्वारपट्टिकविस्तृतम् ॥ १६ ॥
तत्त्रिभागैकभागं तु तस्य नीव्रमुदाहृतम् ।
तन्नीव्रा(द्वि)द्विगुणं ख्यातं नीव्रं वैतरकवाटयोः ॥ १७ ॥
नीव्रभायां च मध्ये तु द्वारपट्टिकपार्श्वयोः ।
लोहजं वलयोपेतं एतानिकीलबन्धनम् ॥ १८ ॥
लोहजं दारुजं वाऽथ बाह्याभ्यन्तरगं तथा ।
तासां त्रिमङ्गलं तावं(नीव्रं)तारार्धघनसंयुतम् ॥ १९ ॥
षड्ध्वा कवाटे योगौद्धौ दारुलोहैर्दृढीकृतम् ।
अर्गलादिसमोपेतं घटनोद्घाटनक्षमम् ॥ २० ॥
परेषां घटयन्त्रमप्यत्र विमाचरेत् ।
प्रासादे मण्डपे चैव गोपुरे चैवमाचरेत् ॥ २१ ॥
द्वारमेवं समाख्यातं कम्पद्वारमय(तः)शृणु ॥ २२ ॥

इति काश्यपशिल्पे द्वारविन्यासलक्षणं सप्तदशः पटलः ॥

अथाष्टादशः पटलः ।

कम्पद्वारलक्षणम् ।

अथ वक्ष्ये विशेषेण कम्पद्वारविधिं परम् ।
प्रासादमण्डपादीनां चतुर्दिक्षु विदिक्षु वा ॥ १ ॥
तयोर्मध्यान्तराले वा व्योमाभीष्टं तु यत्र वै ।
तत्रैव कल्पयेत्सम्यक्कम्पद्वारं द्विजोत्तम ॥ २ ॥
वस्त्रद्वीतकृतं पत्तिव्यासयुक्तं विशालकम् ।
स्थलादुत्तरसीमान्तं कम्पद्वारोदयं भवेत् ॥ ३ ॥
भुवङ्गं च पतङ्गं च योगं प्रागुक्तनं(क्तकं)घनम् ।
कृत्वा दृढीकृतं बद्ध्वा योजयेदन्तरा पुरा ॥ ४ ॥
योगव्यासघनं दीर्घं य(र्घमा)यामाङ्घ्रिस्त(ङ्घ्रि-त)था कुरु ।
मूलाग्रयोजिकोपेतं तरङ्गाङ्घ्रि प्रकल्पयेत् ॥ ५ ॥
भुवङ्गं च पतङ्गं च छिद्रे युञ्जाद्दृढीकृतम् ।
चतुष्पडष्टसंख्यं वा दश द्वादश एव वा ॥ ६ ॥
मनुषोडशसंख्या वा कल्पयेदन्तराङ्घ्रिया ।
अन्तरार्द्धान्तरा प्रत्यग्गमागमाक्षमं विना ॥ ७ ॥
अन्तराङ्घ्रीन्प्रयुञ्जीयात्स्थापयेद्द्वारयोगवत् ।
योजयेत्तु कवाटादि योमा(व्योमे)प्रत्येकमेव तु ॥ ८ ॥
कवाटे द्विव्योमग्रासत्रिव्योमग्रास एव वा ।
कल्पयेत्सुदृढं द्वारं स्वचलं हस्तिनाऽपि वा ॥ ९ ॥
कम्पद्वारं समाख्यातं प्रस्तरं तु ततः शृणु ॥ १० ॥

इति काश्यपशिल्पे कम्पद्वारलक्षणमष्टादशः पटलः ।

अथैकोनविंशः पटलः ।

प्रस्तरलक्षणम् ।

अथ वक्ष्ये विशेषेण प्रस्तरस्य तु लक्षणम् ।
स्तम्भार्धमञ्चमानं तु आर्धो(अर्धो)त्सेधांशमेव वा ॥ १ ॥

तदुच्चक्येव(स्यैक)विंशांशे कृत्वा गुणांशमुत्तमम् ।
वाजनक्ये(स्यै)कभागेन भूतमालोन्नतं त्रिभिः ॥ २ ॥
भूतमालोपरिष्टात्तु वाजनक्ये(स्यै)कभागया ॥
सप्तांशं तु कपोतोच्चमालिङ्गस्यैकभागया ॥ ३ ॥
अंशेनान्तरितं कुर्यात्प्रत्युत्सेधं गुणांशकम् ।
वाजनत्येक(स्यै)कभागेन कुर्याद्वै चान्यभेदतः ॥ ४ ॥
तुङ्गमेकोनविंशांशं कृत्वोत्तारार्श्रि(त्रि)भागया ।
भागेन वाजनं कुर्यादभ्यंशे वलभी भवेत् ॥ ५ ॥
वाजनत्ये(स्यै)कभागेन कपोतोच्चं रसांशकम् ।
आलिङ्गमंशमंशेनान्तरितं तु प्रकल्पयेत् ॥ ६ ॥
प्रत्युत्सेधद्विभागेन वाजनत्ये(स्यै)कभागिना ।
उत्सेधश्चैवमाख्यातस्त्वङ्गजातमथोच्यते ॥ ७ ॥
स्तम्भात्तु पोतिकानीव्रं बोधिकादुत्तरं तथा ।
वाजनस्य तु निष्क्रान्तमुत्तरं द्वा(वा)जनोन्नतम् ॥ ८ ॥
वाजनाद्वलभीनीव्रं वलभीतुङ्गसदृशम् ।
त्रिपादं वा तदर्धं वा प्राग्वाजनातिविस्तृतम्॥ ९ ॥
वाजनानां कपोतस्य नीव्रं हो(व्यो)मसमानकम् ।
उपानसीवसानं वा जगदन्तमथापि वा ॥ १० ॥
वाजनादर्धदण्डं वा दण्डं सार्धद्विदण्डकम् ।
वाजनात्तु कपोत्तस्य नीव्रं चालम्बनं समम् ॥ ११ ॥
कपोतं गोपानसहितं गोपानरहितं तु वा ।
पादवाजसमं प्रोक्तं कुलिङ्गप्रतिरुच्यते ॥ १२ ॥
आलिङ्गान्तरितं वेशं नीव्रं चोत्सेधसदृशम् ।
वाजनोश्र(च्च)समं प्रोक्तं वाजनस्य तु निर्गमम् ॥ १३
दण्डत्रिपादमर्धं वा चोत्तराग्रस्य नीव्रकम् ।
उत्तरस्यानुकूलं तु वाजने नीव्रवेशनम् ॥ १४ ॥
वलभीवृतसं(हं)साग्रैर्भूषयेदुत्तरोपरि ।
नानापत्रलताग्रैस्तु कपोतो(तं)कर्णपालिकम् ॥ १५ ॥

प्रत्यग्रमकरीबन्धप्रतिसिंहादिभूषितम् ।
एवं प्रस्तरवर्गं तु प्रोच्यते तद्द्विजोत्तम ॥ १६ ॥

इति काश्यपशिल्पे प्रस्तरलक्षणमेकोनविंशः पटलः ।

अथ विंशः पटलः ।

गलभूषणम् ।

अथ वक्ष्ये विशेषेण गलभूषणलक्षणम् ।
ऊर्ध्वभागोश्च(गोच्च)तुङ्गं तु गलमानमुदाहृतम् ॥ १ ॥
आर्तो(अर्धो)त्सेधांशमानं वा गलमानमुदाहृतम् ।
तदुच्चत्रिचतुष्पञ्च शेषं वा वेदिकोदयम् ॥ २ ॥
शेषं गलोदयं ख्यातं तमशेषं गलोदयम् ।
वेदिकायास्तु विस्तारं चतुष्पञ्चषडंशके ॥ ३ ॥
त्रिचतुष्पञ्चभागं तु गलव्यासं यथाक्रमम् ।
अङ्घ्रेर्वेध्यङ्घ्रिवेशं स्यात्तद्वेध्यं गलवेशनम् ॥ ४ ॥
त्रिपादं वा तदर्धं वा वेध्य(ध्य)ङ्घ्रेर्गलवेशनम् ।
एवं त्वनेकभेदेषु कर्तुरिच्छावशान्नयेत् ॥ ५ ॥
वेदाश्रं नागरे कण्ठं वस्वश्रं द्राविडे गलम् ।
वृत्तं तु वेसरे हर्म्ये गलमानकुलं नयेत् ॥ ६ ॥
दिशि भद्रसमायुक्तं नासिकानकुलाङ्घ्रिकम् ।
भानुद्वयंशे गलोत्सेधैः कलांशं तु गलोदयम् ॥ ७ ॥
उत्तरोच्चं गुणांशं तु वाजनं गलभागया ।
आद्यंशं बहुभिर्मानं व्योमांशं वाजनोदयम् ॥ ८ ॥
उत्तरार्धगलाग्रीव्रं वाजनादीनि पूर्ववत् ।
अथवा भानुभागे तु गलोदयमुदाहृतम् ॥ ९ ॥
उत्तरोच्चं गुणांशं तु शिवांशं वाजनोदयम् ।
तदर्धं मुष्टिबन्धांश्च मध्यध्यांशमुदाहृतम् ॥ १० ॥

मृणालयुच्चं गुणांशं तु एकांशं पट्टिका भवेत् ।
सार्धांशं दण्डकोच्चं तु व्योमांशं वर्णपट्टिका ॥ ११ ॥
गोपानं कल्पयेदूर्ध्वं उपारोहणमेव वा ।
वाजनादीनि निष्क्रान्तं तत्तदुच्चसमं भवेत् ॥ १२ ॥
एवं गलोन्नतव्यासम(सं सा)लंकारं च कीर्तितम् ॥ १३ ॥

इति काश्यपशिल्पे गलविधानं विंशः पटलः ।

अथैकविंशः पटलः ।

शिखरलक्षणम् ।

अथ वक्ष्ये विशेषेण शिखरस्य तु लक्षणम् ।
ऊर्ध्वभूस्तम्भतुङ्गस्य सदृशं शिखरोदयम् ॥ १ ॥
आर्तो(अर्धो)न्सेधांशमानं वा तुङ्गं वै शिखरस्य तु ।
यदि विस्तारतुल्यं वा शिखरे प्रो(वो)तनीव्रकम् ॥ २ ॥
वलभीवाजनानीव्रं दण्डं वाध्याध्य(ऽध्यर्ध)एव वा ।
द्विदण्डंव....नीव्रं चाऽऽलम्बनं समम् ॥ ३ ॥
तन्नीव्रसदृशं तुङ्गं कपोतं वलभीजनात् ।
शिरस्तारं कपोतोर्ध्वं वलभीवाजनैः समम् ॥ ४ ॥
शिखरे मध्यविस्तारं कम्पो(म्प)निष्क्रान्तवा(म)दृशम् ।
समं त्रिपादमर्धं वा तारमेवं चतुर्विधम् ॥ ५ ॥
तत्र तारं च पञ्चांशे सं(ऽयं)शं फलिकविस्तृतम् ।
शिखरे बलिकस्थानं भूतांशेषु शिरोदयम् ॥ ६ ॥
वेदभागावसाने तु फलिकामण्डलाकृतिम् ।
त्रिचतुष्पञ्चमात्रं वा बलिकं मण्डलं तथा ॥ ७ ॥
तत्तारे तु चतुर्थांशे तर्ज(शैंऽन्तर्म)ण्डलघनं भवेत् ।
युग्मं वा युग्मसंख्या वा परितः कल्पयेत्समम् ॥ ८ ॥
वलिकानामधश्चोर्ध्वे वेत्रे तदध(स्यार्ध)मानतः ।
बालिकव्यासभूतांशे युग्मांशं पद्मविस्तृतम् ॥ ९ ॥

शिखरस्य तु मानान्तं पद्मतुङ्गमुदाहृतम् ।
पद्मनाभित्रिभागैकं कुम्भस्याधोऽवलग्नकम् ॥ १० ॥
वलग्नस्य त्रिभागैकं कुम्भस्योपरि कन्धरम् ।
कन्धरं त्रिगुणं पालि तत्त्रिभागे तु कूश्मलम् ॥ ११ ॥
पालिनालविशालं तु कंधरादिषु बृंहितम् ।
वलिकान्तं शिरोमध्यादानुपूर्व्यं कृशं कुरु ॥ १२ ॥
मध्यांद्वाजनतुल्यान्तं क्रमेण कृशतां कुरु ।
तस्मात्कपोतनीव्रान्तं क्रमेणैव बृहद्धनम् ॥ १३ ॥
शिखरस्य तु तुङ्गार्धं पद्मार्धे स्तूपि तुङ्गकम् ।
द्वाविंशति भवेदुच्चं पद्ममन्यन्ध(ग्रमध्यर्ध)भागया ॥ १४ ॥
कम्पमर्धांशमित्युक्तं गलमर्धांशमानतः ।
तत्समं चोर्ध्वकम्पं तु पद्मभंशेन कल्पयेत् ॥ १५ ॥
भूतभागं घटोत्सेधं कम्पमर्धांशमानतः ।
पद्मभंशेन कर्तव्यं कम्पमध्यांशमानतः ॥ १६ ॥
पञ्चांशं पालिकानां तु द्वयंशं कम्पं तु मु(ग्र)च्यते ।
पद्मभंशेन कर्तव्यं पालिकोच्चं तु भागया ॥ १७ ॥
अर्धेन पद्मभर्धेन पद्मशेषं तु कूश्मक(ल)म् ।
शिखराकृतिवत्कुम्भं फलिकाकूश्मलं तथा ॥ १८ ॥
नागरे चतुरश्रं तद्वस्वश्रं द्राविडे शिरः ।
वृत्तं वेसरहर्म्ये तु शिरसो वर्तनं क्रमात् ॥ १९ ॥
नानाप(त्रि)लताभिस्तु शिखरं तु सुभूषयेत् ।
लक्षणं शिखरस्यैवं नासिकालक्षणं शृणु ॥ २० ॥

इति काश्यपशिल्पे शिखरलक्षणमेकविंशः पटलः ।

अथ द्वाविंशः पटलः ।

नासिकालक्षणम् ।

अथ वक्ष्ये विशेषेण नासिकालक्षणं परम् ।
ललाटनासिकाख्यातं शिखरे तारसदृशम् ॥ १ ॥

शिखरस्य तु विस्तारं त्रिचतुष्पञ्चभागया ।
क्रमान्नासाविशालांशमुत्तमाधममध्यया ॥ २ ॥
महानासी तु विख्याता त्रिविधा क्रय(सा)प्रकीर्तिता ।
समं त्रिपादमर्धं वा शिखरे नासिनीत्रकम् ॥ ३ ॥
तत्तारत्रिचतुर्थांशहीनं शेषोदयं भवेत् ।
नासिकातुङ्गमाख्यातं तत्त्व(द)र्धोच्चमथापि वा ॥ ४ ॥
शक्तिध्वजतदूर्ध्वेन असितुङ्गार्ध एव वा ।
त्रिपादं वा त्रिभागैकं भागं वाऽथ तदुन्नतम् ॥ ५ ॥
तच्छक्तिध्वजतुङ्गं तु गुणभागविभाजिते ।
द्विभागं किंनरीवृत्तं तच्छेषं गलमानकम् ॥ ६ ॥
दण्डं तद्बलसारं स्याद्द्विगुणं किंनरीमुखम् ।
शक्तिध्वजोपरिष्ठं तु पत्रं बाधससूकलम् ॥ ७ ॥
किंनरीवक्त्रतुङ्गं स्यात्समं शूलोदयं भवेत् ।
पत्रं चोक्तेन मानेन तथा सौन्दर्यमाचरेत् ॥ ८ ॥
विस्तारमुखपट्टयस्तु दण्डं वाक्यर्थं (नास्यर्धं) एव वा ।
वल्लिमण्डलछत्राद्यैर्भूषयेमुन्मुखपट्टिकाम् ॥ ९ ॥
मुखपट्टयवशेषान्तं तद्वा गाढमुदाहृतम् ।
शतस्थिततपट्टया(ट्टी)भ्यां त्रिनाल्यप्रतिभूषितम् ॥ १० ॥
शूलाभं वा स्थलाभं वा सव्यालं वा सनाटकम् ।
मालिकाकूटकोष्ठादिमण्डितं वा विमानयेत् ॥ ११ ॥
चित्रचित्राख्यमकरैस्तोरणाख्यमथापि वा ।
तोरणाभ्यन्तरे लक्ष्मीः साभिषेकाम्बुनासिका ॥ १२ ॥
नानाविधैस्तथाऽन्यैर्वा नासिकार्धं तु मण्डयेत् ।
सभद्रं तु महानासिपादं सर्वाङ्गसंयुक्तम् ॥ १३ ॥
उत्तरं वाजनाब्जं च क्षेपणं नासिका तथा ।
कल्पयित्वा विशेषेण कण्ठो ता(ण्ठस्ता)रादिमानतः ॥ १४ ॥
ऊर्ध्वस्तम्भविशालं वा विशालं वाऽर्ध एव वा ।
नासिकास्तम्भविस्तारं कर्णोच्चं तु तदुन्नतम् ॥ १५ ॥
स्वस्वश्रं वाऽथ वृत्तं वा युगाश्रं वा तदाकृति ।
नासिकायास्तु विस्तारं द्विदण्डं वा त्रिदण्डकम् ॥ १६ ॥

हितं शेषविशालं स्यान्नास्याङ्घ्रि बाह्यसीमकम्।
नासिकाङ्घ्रिद्वये मध्ये तन्मूर्तिस्थापनं कुरु ॥ १७ ॥
महानासमिदं प्रोक्तं क्षुद्रनासविधिं शृणु।
सार्धदण्डं द्विदण्डं वा त्रिदण्डं वाऽथ विस्तृतम् ॥ १८ ॥
तत्तत्रिचतुर्थांशं हीनं शेषोदयं भवेत्।
कपोतालम्बनात्क्षुद्रनागोच्चं तु स कल्पयेत् ॥ १९ ॥
प्रतिव्राजनसीमान्तं तस्य शक्तिध्वजोन्नतम्।
तदुच्चं तु त्रिधा भज्य एकांशं कण्ठमानकम् ॥ २० ॥
शेषं किंनरीवक्त्राद्वै तारं युक्तिवशान्नयेत्।
नासितारार्धगाढं स्याद्गाढार्धमुखपट्टिका ॥ २१ ॥
व्यासं तालादिभिर्भूष्य नानालंकारसंयुतम्।
पादं प्रतिकपोतेषु कल्पयेत्स्वस्तिकाकृतिम् ॥ २२ ॥
मध्ये च कूटशालानां पञ्जरोचालपनासिकम्।
कल्पयेत्तु विशेषेण शिखरे भद्रनासिकम् ॥ २३ ॥
शालाग्रयोस्तु कर्तव्या ललाटाख्या तु नासिका ॥ २४ ॥
नासिकालक्षणं प्रोक्तं ततः प्रासादमानकम् ॥ २५ ॥

इति काश्यपशिल्पे नासिकालक्षणं द्वाविंशः पटलः।

अथ त्रयोविंशः पटलः।

प्रासादमानम्।

अथ वक्ष्ये विशेषेण प्रासाद(दे)मानलक्षणम्।
प्रासादः सदनं सद्म हर्म्य(धर्म)धान्मा(म) निकेतनम् ॥ १ ॥
मन्दिरं भवनं वासो गेहं दिव्यविमानकम्।
आश्रयं चाऽऽस्पदं चैव आधारं च क्रमेण तु ॥ २ ॥
आधारप्रतिमि(धि)ष्ण्यं च हर्म्यपर्यायवाचकाः।
तस्मादत्र परो नास्ति परिमाणं समुच्यते ॥ ३ ॥

यवाष्टौ सधरेण स्याद्धरेवेष्टकपिंपि च।
पिशुनामष्टकं प्रोक्तं केशानाग्रं तु संज्ञिका ॥ ४ ॥
बालानां मूर्ध्नि केशः स्यादग्रं तस्योपमानकम्।
तत्केशाग्रं च सायं यल्लक्षमाणमुदाहृतम् ॥ ५ ॥
सप्तसंख्ययवं तारं मध्यमङ्गुलमुच्यते।
काराग्राग्रान्धमाख्यातं षट्संख्यं यवविस्तरम् ॥ ६ ॥
शाल्या वामचतुष्कं तु उत्तमाङ्गुलिसंज्ञकम्।
शाल्यायत्रिगुणं मानमधमं तदुदाहृतम् ॥ ७ ॥
श्वेतशाली महाशाली रक्तशाली तथैव च।
सौगन्धी हेमशाली च शाली पञ्चविधा स्मृता ॥ ८ ॥
रक्तशाल्यायतं तेषु अङ्गुलार्धं तु संग्रहे।
एवं तु षड्विधं प्रोक्तं मानाङ्गुलं द्विजोत्तम ॥ ९ ॥
चन्द्रजीवशिवांशं च व्योममेकाङ्गुलाख्यकम्।
वृक्षपक्षाश्विनी चैव द्वितीयाङ्गुलसंज्ञकम् ॥ १० ॥
कालं चानलरुद्राक्षशूलं चालेखनं गुणकम्।
तृतीयं गुणसंज्ञाकं वेदाब्धी युगकोलकम् ॥ ११ ॥
चत्वा(तु)रङ्गुलसंज्ञस्ते बाणभूतेन्द्रियास्तृतम्।
पञ्चाङ्गुलस्यसंज्ञीका..... ॥ १२ ॥
सारं चारमकं चैवर्तुकौशिकषडङ्गुलम्।
पातालं ऋषिघातं वा..... ॥ १३ ॥
मात्रे लेकं स्मरं चैव सप्ताङ्गुलविधानतः।
हस्तिपर्वतमानं च वसवो मूर्तयस्तथा ॥ १४ ॥
अष्टाङ्गुलस्य संज्ञाः स्युः शक्तिद्वारगृहस्य वा।
सूत्रानन्तघनं ताद्यं द्विजाश्चैव नवाङ्गुला ॥ १५ ॥
नाडिकाष्टायुतं धर्मं दशाङ्गुलस्य सञ्जिता।
कंशातं चैवरोरुद्रमेकादशाङ्गुलाख्यया ॥ १६ ॥
अब्दं भास्क[र]भानुश्च (नू च)द्वादशाङ्गुलसंज्ञितम्।
चन्द्रादित्यशिवांशं च त्रयोदशाङ्गुला स्तृ(स्मृ)ता ॥ १७ ॥
पक्ष्यास्यैकतिथि(क्षश्च तिथय)श्चैव पञ्चदशाङ्गुलास्तृ(स्मृ)ता।
कलामूर्तिद्वयं चैव षोडशाङ्गुलसंज्ञितम् ॥ १८ ॥

पञ्चविंशतिस्त्रिंशच्च चत्वारिंशत्तथैव च ।
पञ्चाशत्षष्टिसप्तत्या अशीतिर्नवतिः शतम् ॥ १९ ॥
प्रत्ययस्त्रीषु पञ्चाशज्जगतीसुगतिस्तथा ।
सत्वरिश्च सशक्रश्च तुष्टिः पुष्टिर्धृतिस्तथा ॥२० ॥
सुधि श्च दशाद्यादि शतानामभिधानकम् ।
एकादशं शतं चैव सहस्रमयुतं तथा ॥ २१ ॥
नियुतं प्रयुतं कोटिरर्बुदं ब्रूत खर्वटम् ।
निखर्वं शङ्खं पद्मं च समुद्रं मध्यमन्तरम् ॥ २२ ॥
आद्यं परं परार्धं च देशवृद्ध्या प्रकीर्तिताः ।
श्रेष्ठं मात्रान्तरैः (रं) स्तम्भ(म्भानां) द्वादशाङ्गुलं भवेत् ॥ २३ ॥
भानुद्व्याङ्गुलं कृष्णं हस्तमित्युच्यते बुधैः ।
श्रेष्ठमध्यान्तरैर्मात्रैः कल्प्यहस्तं तथोदितम् ॥ २४ ॥
तच्चतुष्कं भवेद्दण्डं तेन वस्त्राणि मापयेत् ।
पञ्चविंशतिमात्रं स्यात्प्राजापत्यं करं बुधः ॥ २५ ॥
षड्विंशतिर्धनुर्मुष्टिः सप्तविंशद्धनुर्ग्रहम् ।
अष्टाविंशाङ्गुलं प्राच्यं वैदेहं नवविंशतिः ॥ २६ ॥
वैवेल ॥(पुल्यं)त्रिंशदङ्गुल्यमेकत्रिंशत्प्रकीर्णकम् ।
एवमष्टविधं हस्तं प्रत्येकं द्विजसत्तम ॥ २७ ॥
अधमं मध्यमोत्कृष्टं भेदैर्नैव त्रिद्वयम् ।
धनुर्ग्रहं प्रकीर्णाख्यं द्विजानां गृहमारभेत् ॥ २८ ॥
वैपुल्यं धनुर्मुष्टिभ्यां क्षत्रियाणां म(गृ)हे कुरु ।
प्राजापत्यं करं चैव शूद्रजात्या गृहे भवेत् ॥ २९ ॥
अधिकं जात्यकं हस्तं हीनानां तु विवर्जयेत् ।
हीनाधिकारविप्राणामधिकं च शुभावहम् ॥ ३० ॥
सर्वेषामुदितं हस्तमेवं सद्मनि पूजितम् ।
अन्यं च सर्वदेवानां योग्यं सद्म विभाजयेत् ॥ ३१ ॥
अधिकं कृष्णहस्तं तु सर्वजात्यर्हकं भवेत् ।
यानादिशयनान्तं च कृष्णहस्तेन मापयेत् ॥ ३२ ॥
आरामोद्यानकादीनि प्राजापत्यकरेण तु ।
धनुर्मुष्टिकया चैव ग्रामादि यो(वा)स्तु मापयेत् ॥ ३३ ॥

धनुर्ग्रहेण वाप्यादि नद्यवा(द्युद्या)नं च मापयेत् ।
अथवा कृष्णहस्तेन सर्ववास्तुनि वा द्विज ॥ ३४ ॥

इति काश्यपे प्रासादमानलक्षणं त्रयोविंशः पटलः ।

अथ चतुर्विंशः पटलः ।

मानसूत्रादयः ।

अथ वक्ष्ये विशेषेण मानसूत्रस्य लक्षणम् ।
त्रिचतुर्हस्तमारभ्य द्विद्विहस्तविवर्धनात् ॥ १ ॥
नवपङ्क्तिकरान्तं तु आस्तेनर्तुक(हस्तेनार्कक)रं भवेत् ।
एवमष्टविधं मानं युग्मायुग्मं चतुश्चतुः ॥ २ ॥
पञ्चषड्ढस्तमारभ्य द्विद्विहस्तविवर्धनात् ।
तिथिद्विरष्टकारान्तमाभासं त्रितलस्य तु ॥ ३ ॥
गृह्य धर्मकराद्यावत्सप्ताष्टाधिकतः क्रमः(कराः) ।
चतुष्पञ्चतलं वाऽथ युग्मायुग्मं च ते दश ॥ ४ ॥
विस्तारं सप्तषट्पञ्चभागं कृत्वा द्विजोत्तम ।
रसभूतगुणांशं तु विस्ताराद्रोपयेत्क्रमात् ॥ ५ ॥
विस्तारादिगुणं चैव तस्मादष्टांशमाधिकम् ।
पञ्चायाथर्दितं तुङ्गमाभासे सदने द्विज ॥ ६ ॥
शान्तिकं पौष्टिकं चैव जयतं चाद्भुतं तथा ।
सर्वकामिकमित्येते अभिधानं यथाक्रमम् ॥ ७ ॥
हस्तद्वैधप्रवृत्त्याऽ(द्ध्याऽ)थ व्यासात्संपूर्णमाचरेत् ।
आभासहर्म्यमाख्यातं विकल्पमधुना शृणु ॥ ८ ॥
नवपङ्क्तिकरात्पञ्चषट्पञ्चाशत्करांशकम् ।
द्विद्विहस्तविवृद्ध्या तु चतुर्विंशतिसंख्यया ॥ ९ ॥
पञ्चभूमिं समारभ्य यावदर्कतलान्तकम् ।
अधमं मध्यमोत्कृष्टं विकल्पं च यथाक्रमम् ॥ १० ॥

षट्त्रिंशद्धस्तविस्तारे सप्तपञ्चाशदुच्छ्राये।
त्रयोदशतलं कुर्यान्मम प्रीतिकरं भवेत् ॥ ११ ॥
विस्तारे सप्तपञ्चांशं नवभिर्हस्तमञ्चत(क)म्।
तलं षोडशभिर्युक्तं शिवहर्म्यं शिवप्रियम् ॥ १२ ॥
एवं विकल्पमाख्यातं छि(छ)न्दमार्गमथो शृणु।
त्रिचतुर्दशहस्तादि द्विद्विहस्तविवर्धनात् ॥ १३ ॥
पञ्चषट्षष्टिहस्तान्तं व्यासे वै सप्तविंशतिः।
वेदभूमिं समारभ्य भानुभूमि(म्य)वसानतु(क)म् ॥ १४ ॥
अधमं मध्यमोत्कृष्टं मानं वेदतलं प्रति।
सप्ताष्टादशहस्तादि त्रित्रिहस्तविवर्धनात्। १५ ॥
पञ्चषण्णवतिर्यावदुच्चं प्रागिव संख्यया।
अधमं मध्यमोत्कृष्टं तुङ्गभेदतलं प्रति ॥ १६ ॥
छिन्दमेवंतलाख्यातं जातिहर्म्यधमं(मथो) शृणु।
सप्ताष्टादशहस्तादि द्विद्विहस्तविवर्धनात् ॥ १७ ॥
सप्ताशीतीति हस्तान्तं सप्तविंशतिसंख्यया।
चतुर्भूमिं समारभ्य यावदर्कतलं प्रति ॥ १८ ॥
तावद्विस्तारमाख्यातमुत्सेधं शृणु संहृतः(सुव्रत)।
त्रिसप्तविंशद्धस्तादित्रित्रिहस्तविवर्धनात् ॥ १९ ॥
यावदाशतहस्तान्तमुच्चं प्रागिव संख्यया।
अधमं मध्यमोत्कृष्टं व्यासोच्चं च क्रमोदितम् ॥ २० ॥
एवं जातिविमानं तु सप्तविंशतिधोदितम्।
जातिछन्दविकल्पं च आभासास्ते द्विजोत्तम ॥ २१ ॥
महतीद्वयन्तरालं च क्षुद्रनानाप्रचोदितम्।
युगाग्रे भूतमाने तु मानसूत्रं च विन्यसेत् ॥ २२ ॥
तदन्याकृतिहर्म्याणां वेदं शृङ्गान्तपूरणम्।
यत्रैव भज्यते तत्र मानसूत्रं विधीयते ॥ २३ ॥
प्रासादानां तु विस्तारं भित्तिपाद्वाह्यमेव वा।
तत्पादाभ्यन्तरं वाऽथ तत्पादमध्यमं तु वा ॥ २४ ॥
उत्सेधं तदुपानादि स्तुप्यन्तं वा शिरोन्नतम्।
सभामण्डपशालानां भित्तिमध्यावसानकम् ॥ २५ ॥

भित्तिमध्येऽङ्घ्रिबाह्ये वा मध्ये वाऽभ्यन्तरेऽपि वा ।
भित्तिबाह्यगतं सौतु बाह्ये वाऽभ्यन्तरेऽपि वा ॥ २६ ॥
तदङ्घ्रिमध्यावसानं मानसूत्रं द्विजोत्तम ।
भित्तिमध्येऽङ्घ्रिविस्तारं चाङ्घ्रिस्थानेषु चोच्यते ॥ २७ ॥
भित्तिबाह्यगतं पादं प्रागेव प्रोच्यते तदा ।
सालानां भित्तिमध्ये वा बाह्ये वाऽभ्यन्तरेऽपि वा ॥ २८ ॥
यानानां शयनानां च स्यान्मध्ये मानसूत्रकम् ।
मानसूत्रं समाख्यातं सर्वेषां सदनादिनाम् ॥ २९ ॥
मानसूत्रं तु बाह्ये स्यात्कूटशालादिनीव्रकम् ।
कूटाद्यात्तवि(वट्टि)शालं वा त्रिपादं वाऽर्धमेव वा ॥ ३० ॥
पादं सार्धं सपादं वा मानसूत्राच्च हीग(निर्ग)तिम् ।
अथवा दण्डमानेन तुङ्गादीनां तु निर्गतिम् ॥ ३१ ॥
दण्डं वा ह्यर्धदण्डं वा द्विदण्डं सार्धदण्डकम् ।
त्रिदण्डं वाऽथ निष्क्रान्तं मानसूत्रात्तु बाह्यतः ॥ ३२ ॥
मानस्याभ्यन्तरे वेशं पिपा(विप)क्षामास्पदं सदा ।
तस्मात्सर्वप्रयत्नेन मानसूत्राद्बहिर्गतम् ॥ ३३ ॥
एतद्विन्याससूत्रं स्यात्समसूत्रात्समं तु वा ।
होमावागतसूत्रं वा अवसानमुदाहृतम् ॥ ३४ ॥
मानविन्याससूत्रं च अवसानं च ते त्रयम् ।
ख्यातं संक्षेपतो विप्र शृणुष्वाऽऽयादिलक्षणम् ॥ ३५ ॥

इति काश्यपशिल्पे मानसूत्रादिलक्षणं चतुर्विंशः पटलः ।

अथ पञ्चविंशः पटलः ।

आयादिलक्षणम् ।

अथ वक्ष्ये विशेषेण आयादिलक्षणं परम् ।
हर्म्यषड्भागमानं तु गुणाढ्यं वसुभिर्हरेत् ॥ १ ॥

शेषं द्विजातियोनिः स्यात्तत्संख्यकरं बुधः।
वर्जयेद्वसुभिश्चैव ऋक्षे भूतं हयादिकम् ॥ २ ॥
नवधा परितो हस्तं पातलैर्ह्रासयेद्बुधः।
शेषमर्कादिपारं स्याद्व्यासायामकरं गुणैः ॥ ३ ॥
त्रिंशद्भिर्वर्धयेभित्तिं शेषं प्रतिपदादयः।
तिथयस्तु समाख्यातं तुङ्गं हस्ताष्टवृद्धिदम् ॥ ४ ॥
नाभिस्तु निर्विशेषमायामिन्युच्यते बुधैः।
तुङ्गं नवं तु मध्यात्तु प्राम(क्रमा)द्वै नाडिभिर्हरेत् ॥ ५ ॥
शेषं व्ययमिति ख्यातं आयाधिका(क्यं) व्ययक्षयम्।
केतुः सिंहो वृषो हस्ती गुरुः शुक्रो बुधः शशी ॥ ६ ॥
यजमानस्य जन्मर्क्षादविरोधे दिनं तथा।
वास्तुजन्मविरोधं च त्रसा(तथा) ह्यात्मकुलं शुभम् ॥ ७ ॥
एवं परीक्ष्य बहुधा शुभमानं तु संग्रहेत्।
अथवा विस्तृतायामहस्तमष्टगुणीकृते ॥ ८ ॥
भानुव्यये विशेषं तु आयमित्युच्यते बुधैः।
नवद्वादशभिर्हृसैः शेषं व्ययमुदाहृतम् ॥ ९ ॥
वसुभिर्गुणिते ऋक्षे हृते शेषादिकं दिनम्।
गुणवृद्ध्याऽष्टभिर्ह्रासे शेषं ध्वजादियोनरः(यः)॥ १० ॥
नवऋद्ध्यापरीतोऽस्तं सप्तसंख्या तु ह्रासयेत्।
शेषमर्कादिवारः स्यात्त्रिंशद्भासे तिथिर्भवेत् ॥ ११ ॥
प्राग्वच्छुभाशुभं वक्ष्ये शुभमानं तु संग्रहेत्।
त्रिपञ्चयुग्मं वेदषडष्टनव भाति वै ॥ १२ ॥
सदेष्टसिद्धिदाः प्रोक्ताः शेषास्तुः परिवर्जिताः।
नृपकर्तुश्च जन्मर्क्षाद्देहऋक्षावसानकम् ॥ १३ ॥
गणयेन्मतिमान्विप्रः शुभमानं तु गृह्यताम्।
लग्नाष्टमविनाशं च दुष्टयोगं च वर्जयेत् ॥ १४ ॥
शूर्पा(ला)दियोगदोषाढ्ये दुष्टयोग उदाहृतः।
आयादिरेवमाख्यातं नागरादिविधिं शृणु ॥ १५ ॥

नागरादिविमानम्।

नागरादिविमानानां लक्षणं वक्ष्यतेऽधुना।
हिमाद्रिकन्ययोरन्तर्गतो देश उदाहृतः॥ १६॥
सोऽपि देशस्त्रिधा भिन्नस्तत्तद्देशोद्भवैर्गुणैः।
यथैव देहिनां देहो वातपित्तकफात्मकः॥ १७॥
तथा ह्येतज्जगत्सर्वं विज्ञेयं त्रिगुणात्मकम्।
सात्त्वि(त्वि)कं तामसं चैव राजसं च त्रिधा स्मृतम्॥ १८॥
हिमाद्रिविन्ध्ययोरन्तर्गता सत्त्वा वसुंधरा।
विन्ध्यादिकृष्णवेण्यन्ता राजसाख्या मही मता॥ १९॥
कृष्णवेण्यादिकन्यान्तं तामसं भूतलं भवेत्।
नागरं सात्त्विके देशे तामसे पे(वे)सरं भवेत्॥ २०॥
राजसं द्राविडे देशे कामदेवं हि भावहे(ये)त्।
सात्त्विके नागरे हर्म्ये तामसे वेसरालयौ॥ २१॥
राजसैर्द्राविडैर्हर्म्यं क्रमात्पुण्डशियोषितः।
विष्णुर्महेश्वरो धाता क्रमाद्धर्म्यादिदेवताः॥ २२॥
नागरं भूसुरं विद्याद्वेसरं वैश्यमुच्यते।
द्राविडं तन्नृपं ज्ञेयं मात्रतो(नतः)शृणु सुव्रत॥ २३॥
कूटकोष्ठादिनिष्क्रान्तं मानसूत्रे तु सुस्थितम्।
उन्नतावनतोपेतौ कूटकोष्ठौ यथाक्रमम्॥ २४॥
एकाकारतलस्तम्भपत्रतोरणसंयुतम्।
क्षुद्रकोष्ठसमायुक्तं महानास्यपरे द्विज॥ २५॥
वेदिकाजालकोपेतं कूटवेदाश्रशीर्षकम्।
एकानेकतलं वाऽपि सालीन्द्रं वाऽपि हीनकम्॥ २६॥
वेदाश्रं शीर्षं कण्ठं स्यात्सालाकारमथापि वा।
नागरं भवनं ख्यातं तत्तद्देशे प्रकल्पितम्॥ २७॥
प्राग्वत्कूटविनिष्क्रान्तं कोष्ठकूटोद्गतं तु वा।
मानसूत्राद्बहिष्कूटं नीव्रकूटं तु कोष्ठकम्॥ २८॥

मध्यकोष्ठं सभद्रं वा द्विभद्रं वा द्विजोत्तम ।
पञ्जरं मानसूत्रेण कूटनिष्क्रान्तसागरम् ॥ २९ ॥
उन्नतावनतो वेला सौष्ठीकोपयथाक्रमम् ।
उन्नतं सान्तरं मञ्चं तं तं प्रस्तरहीनकम् ॥ ३० ॥
चतुरश्राष्टवृत्ताभं कूटं क्रमात्तले तले ।
नानामसूरकस्तम्भवेदिकालकतोरणैः ॥ ३१ ॥
वृत्ताख्यस्फाटितैर्हस्तितुण्डैः कुम्भलतादिभिः ।
हारान्तरेषु मञ्चोर्ध्वे क्षुद्रकोष्ठयुतं तु वा ॥ ३२ ॥
तत्रैव हस्तितुण्डं वा भद्रनास्यल्पमेव वा ।
साधारं वा निराधारमेकानेकतलं तु वा ॥ ३३ ॥
शिरसो वर्तनं कण्ठं वृत्तं वाष्टाश्रमेव वा ।
युगाश्रं वा शिरद्वीहं विमानं द्राविडं भवेत् ॥ ३४ ॥
तदेव चरणाधारमेकाकारं तु कल्पयेत् ।
आ(हा)रान्तरे विशेषेण कल्पवृत्तस्फुटोदयम् ॥ ३५ ॥
समं तु कूटकोष्ठाद्यौ सान्तरप्रस्तरान्वितौ ।
हीनोवान्तरमन्तोर्ध्वे निष्पञ्चसमसूत्रकम् ॥ ३६ ॥
हारान्तरे तु कर्तव्यं भद्रं वा भद्रपञ्जरम् ।
कपोतपञ्जराढ्यं वा सान्तरप्रस्तरान्वितम् ॥ ३७ ॥
सर्वेषां कण्ठकूटानामाशीर्षं तु युगाश्रकम् ।
षडश्रं वेदिकोपेतं मण्डलं शीर्षकं गलम् ॥ ३८ ॥
षडश्रं वा शिरः कण्ठं युगाश्रं वा प्रकल्पयेत् ।
एतच्च द्राविडं ख्यातं होमाद्याकुञ्जलान्तरम् ॥ ३९ ॥
षडश्रं वा षडश्रं वा तच्च द्राविडमुच्यते ।
एवं त्रिविधं नित्यं तु प्रोच्यते द्राविडालयम् ॥ ४० ॥
वेसराकूटकोष्ठादिनीव्राः स्युः समसूत्रणाः ।
वृत्ताकारशिरोपेतान्कण्ठकूटान्प्रकल्पयेत् ॥ ४१ ॥
वृत्तगर्भगृहाकारं बाह्यवृत्ताभमेव वा ।
वृत्तग्रीवशिरोपेतं यथेष्टं शिखरेण वा ॥ ४२ ॥
सालिन्द्रं वा सभद्रं वाऽप्येकानेकतलं तु वा ।
समाग्रं वाऽऽयताग्रं वा वृत्तं वृत्तायतं तु वा ॥ ४३ ॥

द्व्यश्रवृत्ताथवा(यतं)हर्म्यं कूटकोष्ठादिभिर्युतम् ।
उन्नतावननोपेतौ कूटकोष्ठौ यथाक्रमम् ॥ ४४ ॥
समौ वा कूटकोष्ठौ द्वौ बाहू भूम्येकमेव वा ।
वेसरं भवनं ख्यातमथवाऽन्यप्रकारतः ॥ ४५ ॥
जन्मादिस्तूपिपर्यन्तं युगाश्रं नागरं भवेत् ।
वस्वश्रं शीर्षि कण्ठं वा द्राविडं भवनं भवेत् ॥ ४६ ॥
वृत्तग्रीवाशिरोपेतं वेसरं हर्म्यमीरितम् ।
कूटकोष्ठविहीनानां हर्म्यकं कथितास्तिमे(तं त्विदम्) ॥ ४७ ॥
नानाधिष्ठानसंयुक्तं गलं प्रत्यङ्घ्रि भेदितम् ।
सर्वत्र वृत्तपादं वा वेसरे भवने कुरु ॥ ४८ ॥
लिङ्गं च पिण्डिकां चैव प्रासादं चैव जातिकाम् ।
सर्वसंपत्समृद्धिः स्यान्नृपतेर्वास्तु मज्जनम् ॥ ४९ ॥
परिते विपरीते वा राजराष्ट्रभयंकरम् ।
तस्मात्सर्वप्रयत्नेन एकजात्यैवमाचरेत् ॥ ५० ॥
नागरे सकलं शान्तं वेसरे यानपत्तिनम् ।
भोगं वीरं च नृत्तं च द्राविडे भवने भवेत् ॥ ५१ ॥
अन्यथा चेद्विपत्त्यै च कर्तुर्भर्तुश्च देहिनाम् ।
नागरादिविधिः प्रोक्तो गर्भन्यासविधिं शृणु ॥ ५२ ॥

इति काश्यपशिल्पे नागरादिविधिः पञ्चविंशः पटलः ।

अथ षड्विंशः पटलः ।

गर्भविन्यासः ।

अथ वक्ष्ये विशेषेण गर्भन्यासविधिं परम् ।
प्रासादे(गे)हमित्युक्तं तस्य प्रकारो वास्तुगर्भकम् ॥ १ ॥
गुरुहीने गृहे विप्र सकृत्कालं नवास्यकम् ।
अहमन्यश्च वेदाश्च न वसेयुश्च(र)गर्भकम् ॥ २ ॥

तस्मात्सर्वप्रयत्नेन गर्भन्यासं तु कारयेत् ।
श्रीप्रणं(दं) भा(प्रा)णिनां गर्भमितरे श्रीकरं भवेत् ॥ ३ ॥
अधिष्ठानप्रतेरुर्ध्वे भूसुराणां हिताय वै ।
कुमुदूर्ध्वे नृपाणां तु जगत्यूर्ध्वे विशां वरम् ॥ ४ ॥
होमोर्ध्वे गर्भविन्यासं शूद्राणामभिवृद्धिदम् ।
सर्वजात्यन्तं हं(सं)प्रोक्तं भूमौ त्वाद्येष्टकोपरि ॥ ५ ॥
प्रासादमण्डपे चैव प्रागुद्वारे गोपुरे तथा ।
परिवारालये चैव गर्भन्यासं तु कारयेत् ॥ ६ ॥
यत्रैऽऽद्येष्टकान्यासं तत्र गर्भं निधापयेत् ।
सौवर्णं राजतं ताम्रं श्रेष्ठमध्याधमं क्रमात् ॥ ७ ॥
कांस्येनैवाथवा विप्र कर्तव्यं गर्भभाजनम् ।
पञ्चाङ्गुलं समारभ्य यावद्वै विंशदङ्गुलम् ॥ ८ ॥
एकैकाङ्गुलवृद्ध्या तु कलासंख्या तु भाजनम् ।
एकादिषोडशान्तानां भूमीनां तु यथाक्रमम् ॥ ९ ॥
गर्भभाजनतारास्ते त्वङ्घ्रिमूलतरं तु वा ।
गर्भभाजनविस्तारं विस्तारस्तदशोन्नतम् ॥ १० ॥
भाजनोच्चस्य भागैकं विधानस्योच्छ्रयं भवेत् ।
भाजने द्वित्रिभागान्तं विधानालम्बनं द्विज ॥ ११ ॥
यवैकव्यासमारभ्य यवार्धैः कोष्ठविस्तृतम् ।
फलोच्चं त्रिचतुर्भागं कोष्ठभित्त्युदयं भवेत् ॥ १२ ॥
मध्यकोष्ठे न्यसेत्कूटमिन्द्रनाभसमन्वितम् ।
तत्पूर्व ह्यष्टकोष्ठेषु परितो द्विजसत्तम ॥ १३ ॥
अनन्तादिशिखण्ड्यान्तं मूलमन्त्रं निधापयेत् ।
तद्बाह्ये षोडशे कोष्ठे पूर्वादिक्रमयोगतः ॥ १४ ॥
अकारादिविसर्गान्तस्प(स्व)रान्न्यस्वात्र(स्यात्क्र)मेन(ण)तु ।
रत्नलोभा(हेमा)नि धात्रा(न्या)नि फलाभ्य(न्य)न्तवच(रके)न्यसेत् ॥ १५ ॥
मृत्कन्दधान्यपत्राणि गर्भगर्ते तु विन्यसेत् ।
फलशुद्धिं ततः कृत्वा गव्यदस्त्रेत्युदाहरन् ॥ १६ ॥
माणिक्यं विन्यसेत्कूटे कूटाक्षरमुदाहरन् ।
अनन्ते विन्यसेद्वज्रं सूक्ष्मे सौ(मौ)क्तिकविन्यसेत् ॥ १७ ॥

शिलोत्तमैरिन्द्रनीलं स्यात्स्फाटिकैकनेत्रके ।
एकरुद्रे तु शङ्खं स्यान्त्रिमूर्ते पुष्करागकम् ॥ १८ ॥
श्रीकण्ठे सूर्यकान्तं स्याच्छिखण्डौ तु विसूरकम् ।
स्वर्णेनैव जगत्कृत्वा अकारे विन्यसेद्बुधः ॥ १९ ॥
कपालं रजतेनैव इकारे तु निधापयेत् ।
तन्त्रेणैव तु तं कुम्भमुकारे द्विजसत्तम ॥ २० ॥
आरकूटेन तद्द्वारं गकारे तु निधापयेत् ।
कांसे(स्ये)नैव वि(पि)नाकं तु अकारे विन्यसेद्बुधः ॥ २१ ॥
सीसेन परशुं कृत्वा एकारे तु निधापयेत् ।
त्रपुणा हरणं कृत्वा औकारे तु निधापयेत् ॥ २२ ॥
त्रिशूलमायसेनैव अंकारे तु निधापयेत् ।
स्वर्णेन वृषभं कृत्वा कूटाक्षरे निधापयेत् ॥ २३ ॥
आकारे विन्यसेच्छम्यामीकारे तु मतङ्गि(नःशि)लाम् ।
उकारे जातिलिङ्गं तु ऊकारे गैरिकां न्यसेत् ॥ २४ ॥
सौराष्ट्रं चैव ऌकार एकारे त्वञ्जनं न्यसेत् ।
गोरोचने तथाकारे विसर्ज्ये नीलधारकम् ॥ २५ ॥
तद्बीजं समनुस्मृत्य विन्यसेत्तत्क्रमेण तु ।
यवा नीवारशाली च प्रियङ्गुतिलसर्षपम् ॥ २६ ॥
मुद्गानि सप्त बीजानि पूरयेद्धर्मभाजने ।
विधाय च विधानेन सुस्निग्धं सुदृढं कुरु ॥ २७ ॥
प्रासादस्योत्तरे चाग्रे पञ्चषट्सप्तहस्तकाम् ।
षोडशस्तम्भसंयुक्तां प्रपां कृत्वाऽतिसुन्दराम् ॥ २८ ॥
विधानेनोर्ध्वमाच्छाद्य तरङ्गैः स्तम्भवेष्टनैः ।
द्वारतोरणसंयुक्तं दर्भमालादिभूषितम् ॥ २९ ॥
मण्डपस्य त्रिभागैकं मध्ये वेदिं प्रकल्पयेत् ।
हस्तमात्रसमुत्सेधं तालमात्रमथापि वा ॥ ३० ॥
परितस्त्वग्निकुण्डानि महाशालं द्विजोत्तम ।
चतुरश्रं धनुर्वृत्तं पद्मं प्रागादिषु क्रमात् ॥ ३१ ॥
त्रिमेखलसमायुक्तं नाभियोनिसमन्वितम् ।
दर्पणोदरसंकाशं कुण्डवेदिस्थलं कुरु ॥ ३२ ॥

तच्छिल्पिवतमुद्वास्य गोमयालेपनं कुरु ।
पिष्टचूर्णैरलंकृत्य पुण्याहं मोक्षयेत्कु(णं कु)रु ॥ ३३ ॥
वेदी द्वे स्थण्डिले कुर्याच्चतुर्द्रोणैस्तु शालिभिः ।
तिलतण्डुललाजैश्च दर्भैः पुष्पैः परिस्तरेत् ॥ ३४ ॥
गन्धपुष्पादिभिः पूज्या दिग्देवा नाममन्त्रकैः ।
गव्याभिषेच्य फलं तु स्नापयेद्गन्धतोयकैः ॥ ३५ ॥
तन्तुना कौतुकं बद्ध्वा नववस्त्रेण वेष्टयेत् ।
स्थण्डिले तु निधातव्यं कूटाक्षरमुदाहृतम् ॥ ३६ ॥
परितोऽष्टौ घटान्यस्त्वा(स्य) समूत्रान्सविधानकान् ।
सकूर्चान्वस्त्रसंछन्नान्स(सगन्धान्परितः क्रमात् ॥ ३७ ॥
विश्वे[श्व]रादिकुम्भस्थे स्तोत्राभ्यर्च स्वमन्त्रतः ।
कुण्डानां पञ्चसंस्कारं कृत्वा होमं समाचरेत् ॥ ३८ ॥
अग्न्याधानादिकं सर्वमग्निकार्योक्तमाचरेत् ।
समि[दा]ज्यचरूल्लाँजतिलतण्डुलसर्षपान् ॥ ३९ ॥
हृदयादिषु सङ्गैश्च ईशानेन क्रमेण तु ।
होमं कृत्वा विशेषेण प्रत्येकाष्टशताहुतीः ॥ ४० ॥
द्रव्यान्ते व्याहृतीर्हुत्वा मूलेनैव शताहुतीः ।
जयादिरभ्यातानैश्च राष्ट्रं[भृच्चैव]होमयेत् ॥ ४१ ॥
एवं जागरणं रात्रौ प्रभाते सुमुहूर्तके ।
सुनक्षत्रे सुलग्ने तु सुतिथौ च सुवारके ॥ ४२ ॥
शिवद्विजकुले जातः स्वाचार्यः शिवदीक्षितः ।
स्नानद्वयसमायुक्तः सकलत्रः सविग्रहः ॥ ४३ ॥
सितवस्त्रोत्तरीयश्च सितमाल्यानुलेपितः ।
आचार्यान्पूजयेत्तत्र वस्त्रहेमाङ्गुलीयकैः ॥ ४४ ॥
शिल्पिनः पूजयेत्तत्र वस्त्रैराभरणादिभिः ।
गर्भस्थानं प्रविश्याथ कर्ता कूर्चा(चाऽऽचा)र्यशिल्पि च ॥ ४५ ॥
अष्टधा विभजेद्भित्तिं बाह्यतश्चतुरस्त्यजेत् ।
त्रीणि चाभ्यन्तरे वर्ज्य शेषांशे भाजनं न्यसेत् ॥ ४६ ॥
हृन्नदीसस्यवल्मीकं हलस्तेऽङ्गुलिरातटे ।
नागावृषभशृङ्गे च अष्टमुद्रा(मृद्ग्रा)ह्य देशिकः ॥ ४७ ॥

गर्भगर्ते नमोच्चार्य कन्दान्न्यसेत्ततोपरि ।
मध्यमे त्वम्बुजं न्यस्यात्पूर्वे कुमुदकन्दकम् ॥ ४८ ॥
दक्षिणे चोत्पलं कन्दं सौगन्धि पश्चिमे न्यसेत् ।
सौम्य उशीरकन्दः स्याद्बीजं तदुपरि न्यसेत् ॥ ४९ ॥
पूर्वे तु विन्यसेच्छालिं व्रीहिं वै दक्षिणे न्यसेत् ।
पश्चिमे गो(को)द्रवं विद्यान्माषमुत्तरतो न्यसेत् ॥ ५० ॥
पाके विन्यसेन्माषान्नैर्ऋत्यां कुरु पूजकैः ।
प्रियंगु वायुदिग्भाग ऐशान्ये त्म(तु)कुलस्थ(लित्थ)कम् ॥ ५१ ॥
एवं न्यस्य हृदं मन्त्रांस्तथा वै गर्भभाजनम् ।
सर्ववाद्यसमायुक्तं नृत्तगेयसमन्वितम् ॥ ५२ ॥
जयशब्दसमायुक्तं ब्रह्मघोषसमन्वितम् ।
प्रासादबीजमुच्चार्य स्थापयेद्गर्भभाजनम् ॥ ५३ ॥
शैलैर्वा इष्टिकाभिर्वा सुधया सुदृढं कुरु ।
गन्धपुष्पादिभिः पूज्य प्रसादं .. .. ।
गर्भन्यासविधिः ख्यातस्तस्त्वेकविधिं शृणु ॥ ५४ ॥

इति काश्यपशिल्पे गर्भन्यासविधिः षड्विंशः पटलः ।

अथ सप्तविंशः पटलः ।

एकतलम् ।

अथ वक्ष्ये विशेषेण हर्म्यमेकतलं शृणु ।
तस्य विस्तारतुङ्गं च प्रोक्तं प्रासादमानके ॥ १ ॥
युगास्रं वृत्तमायाश्रं(तं) वस्वश्रं च षडश्रकम् ।
अष्टाश्रमाकृतिस्त्वेषां शिखरेऽपि तथैव च ॥ २ ॥
हर्म्यतारार्धमानं तु कन्यसं मुखमण्डपम् ।
हर्म्यतारसमं श्रेष्ठं तयोर्मध्येऽष्टभाजिते ॥ ३ ॥
मुखमण्डपदीर्घं (दैर्घ्यं) तु नवधा कथितं मया ।
प्रासादसदृशं व्यासमुत्तमत्रयमण्डपम् ॥ ४ ॥

प्रासादावेशनं श्लेषा(श्रेष्ठं) दण्डं वाऽर्धार्धदण्डकम ।
द्विदण्डं वा प्रवेशं तु मानसूत्रं द्विजोत्तम ॥ ५ ॥
अन्तरालसमायुक्तं युक्तसर्वाङ्गसंयुतम् ।
सावकाशान्तरालं च दीर्घं द्वित्रिचतुष्टयम् ॥ ६ ॥
सोपानं पार्श्वयोः कुर्याद्गजहस्तविभूषितम् ।
प्रासादभित्तिविस्तारतुल्यं वाऽर्धत्रिपादकम् ॥ ७ ॥
अन्तरालस्य भित्तेश्च व्यासाः स्युर्मण्डपे तथा ।
कूटकोष्ठादियुक्तं वा हीनं वा मुखमण्डपम् ॥ ८ ॥
त्रिवर्गसंहितं वाऽपि तोरणाद्यैर्विचित्रितम् ।
एकानेकतलं वाऽथ कर्तव्यं मुखमण्डपम् ॥ ९ ॥
हर्म्यतारांशभागैकं गर्भगेहस्य विस्तरम् ।
पञ्चभागेऽग्निभागं च वेदांशं सप्तभागिकम् ॥ १० ॥
द्वारांशे भूतभागं तु अर्कांशं रुद्रभागिके ।
त्रयोदशांशे वस्वंशं दशं वस्वांशभागिके ॥ ११ ॥
सपादं च नवांशं च व्यासोर्द्धं त्रि(त्रं हि) द्विजोत्तम ।
गर्भगेहस्य विस्तारो नवधा परिकीर्तितः ॥ १२ ॥
शेषभित्तिविशालं स्यात्परितः कल्पयेद्बुधः ।
एकद्वित्रिचतुष्पञ्च पङ्क्तिः स्यादेकभागिके ॥ १३ ॥
हर्म्योच्चं वसुधा भज्य एकांशं हि तलोन्नतम् ।
द्विभागं चरणायामं प्रस्तरस्यैकभागता ॥ १४ ॥
गलोच्चं त्वेकभागेन द्विभागं शिखरोदयम् ।
एकांशं स्तूपितुङ्गं तु कल्प्यैवं शान्तिकं भवेत् ॥ १५ ॥
एकांशरहितं शेषं पञ्चं वा पार्श्वदेवता ।
एवं शान्तिकमाख्यातं पौष्टिकं चाधुनोच्यते ॥ १६ ॥
सदनोच्चे नवांशे तु शिवांशं तु तलोदयम् ।
अन्धे(र्धे)नांशसमायुक्तं द्व्यांशं चरणायतम् ॥ १७ ॥
पञ्चभानं तथैवांशं साध्यं पादांशकं गलम् ।
सत्रिभागं द्विभागं तु शिखरोदयमीरितम् ॥ १८ ॥
स्तू(यू)पोत्सेधं तथैकांशं पौष्टिकं सदनान्वितम् ।
सदंतच्छे(दनोच्चं) दशांशैकमधिष्ठानोदयं भवेत् ॥ १९ ॥

वृत्तमस्तककण्ठाढ्यं वस्वग्रं वा गलं शिरः ।
वृत्तकेशि(स)रमाख्यातं वस्वग्रं राजकेसरम् ॥ ५० ॥
प्रासादस्य तु विस्तारः पञ्च सप्ताष्ट वा भवेत् ।
त्रिभागं वा द्विभागं वा प्राग्वद्वा मध्यभद्रकम् ॥ ५१ ॥
दण्डं वाऽध्यर्धदण्डं वा द्विदण्डं वा त्रिदण्डकम् ।
मध्यभद्रस्य निष्क्रान्तं भद्रापेक्षितहर्म्यके ॥ ५२ ॥
यन्नू(यन्म)हानासिकोपेतं शिरः स्वायक(न)वृत्तकम् ।
पादं प्रत्यल्पनासाढ्यं कण्ठं वै शीर्षमा(का)कृति ॥ ५३ ॥
कल्याणसुन्दरं ख्यातं सर्वदेवार्हकं परम् ।
तदेव भद्रनासाढ्यं पूर्वापरं द्विजोत्तम ॥ ५४ ॥
ललाटनासिकोपेतं पार्श्वयोर्द्विनसत्तम ।
समं वा सायतं वाऽथ कल्पितं कोशलं भवेत् ॥ ५५ ॥
तलं प्रतिविमानादि दु(उ)क्तं म(त्व)थ वक्ष्यते ।
स्कन्दं वै पूर्वदिग्भागे दक्षिणामूर्तिदक्षिणे ॥ ५६ ॥
पश्चिमे विष्णुमूर्तिं वा लिङ्गोद्भवमथापि वा ।
धातारमुत्तरे विप्र भारस्थाने तु वर्जयेत् ॥ ५७ ॥
मण्डपे दक्षिणे भद्रे स्थापयेद्द्वि(द्वि)विधा(ना)यकम् ।
पूर्वे वा पश्चिमे तस्य नृत्तमूर्तिं प्रकल्पयेत् ॥ ५८ ॥
दुर्गामुत्तरदिग्भागे क्षेत्रपालं तु वा द्विज ।
स्थानं वा सदनं वाऽथ दिशि मूर्तिं प्रकल्पयेत् ॥ ५९ ॥
एवं धरातलोर्ध्वे तु ... . ।
स्कन्दं वै पूर्वदिग्भागे शक्र वा सितरोहि(णि)मम् ॥ ६० ॥
हस्तिविधीनब्जकासीन एक एव समन्वितम् ।
दक्षिणे दक्षिणामूर्तिं वीरभद्रमथापि वा ॥ ६१ ॥
पश्चिमे नारसिंहं तु सौम्यमूर्तिमथापि वा ।
उत्तरे तु विधातार्थं(रं)अब्जं वा द्विजसत्तम ॥ ६२ ॥
प्रस्तरोपरि कर्तव्यमेकद्वित्रितले तथा ।
चतुर्भूम्यादिभूमासु महेशस्तु यथेष्टगः ॥ ६३ ॥
उमास्कन्दादिसहितो महेशः परिकीर्तितः ।
अन्यदेवाश्च गन्धर्वाः सिद्धा दैत्या मरुद्गणाः ॥ ६४ ॥

कलान्तयुगभूम्यादिग्रीवे च प्रस्तरान्तके ।
इष्टमूर्तिमवि(रि)ष्टांशे कल्पयेत्कल्पवित्तमः ॥ ६५ ॥
गलस्यादिस्थमञ्चोर्ध्वे कोणेषु वृषभं कुरु ।
कोणं प्रति द्वयं वैकं वृषभं शयनं कुरु ॥ ६६ ॥
भूतं वा चतुष्कोणे हृदयाञ्जलिसंयुतम् ।
कल्पयेत्प्रस्तरपीठे द्वे आसीनं तु बृहत्तनुम् ॥ ६७ ॥
आमोदं चाग्निकोणे तु प्रमोदं नैर्ऋते भवेत् ।
प्रमुखं वायुकोणे तु दुर्मुखीशानकोणके ॥ ६८ ॥
श्वेतं रक्तं तथा पीतं कृष्णमन्यादिषु क्रमात् ।
यमो वै देवता शेषा(ता)तासामावाहनं कुरु ॥ ६९ ॥
करालमुद्गुगुल्मासु ककपिं कर्णलेपनम् ।
नानालंकारसंयुक्तं नानालीलासमायुतम् ॥ ७० ॥
नानाक्रीडसमायुक्तं सुधया धातुभिस्तथा ।
यथोचितं कल्पयेत्तु शूलादाविष्टका भवेत् ॥ ७१ ॥
एवं तलमिदं ख्यातं द्वितलं तु ततो विदुः ॥ ७२ ॥

इति काश्यपशिल्प एकतलविमानलक्षणं सप्तविंशः पटलः ।

अथाष्टाविंशः पटलः ।

द्वितलम् ।

अथ वक्ष्ये विशेषेण द्वितलस्य तु लक्षणम् ।
प्रासादमानवत्कुर्याद्विस्तारोच्चं च निर्गमः ॥ १ ॥
विन्याससूत्रयोरन्तर्व्यासं सप्तर्तु वा भवेत् ।
एकांशं कूटविस्तारं कोष्ठं तु द्विगुणायतम् ॥ २ ॥
कूटव्याससमं कोष्ठं विस्तारं द्विजसत्तम ।
शेषं हारान्तरं कोष्ठं पार्श्वयोस्तु सपञ्जरम् ॥ ३ ॥
हारान्तरमशेषं वा त्रिपादं वार्ध एव वा ।
पञ्जरव्यासमाख्यातं कूटव्यासममोगतिम् ॥ ४ ॥

अन्तःप्रवेशं वा मानसूत्राणि प्रयुंतं तु वा ।
पञ्जरं कर्णकूटाभं नासिकाकारमेव वा ॥ ५ ॥
प्रासादोच्चं तु विभजेदष्टाविंशतिभागया ।
गुणांशं(ऽयंशं)धरातलोत्सेधं रसांशं चरणोदयम् ॥ ६ ॥
प्रस्तरोच्चं गुणांशं स्याद्भूतांशं चरणोदयम् ।
द्विभागं प्रस्तरोत्सेधमेकांशं वेदिकोदयम् ॥ ७ ॥
द्विभागांशं गलोत्सेधं सार्धवेदं शिरोदयम् ।
अत्यर्धांशं शिखामानं कल्पितं शाक्ति(न्ति)कं भवेत् ॥ ८ ॥
चतुस्त्रिंशतिभागं तु कृत्वा च सदनोदयम् ।
सार्धार्धांशमधिष्ठानं तद्विधं चरणोदयम् ॥ ९ ॥
प्रस्तरोच्चं गुणांशं स्यात्तलिपं सार्धषड् भवेत् ।
गुणांशं मञ्चमानं तु व्योमांशं वेदिकोदयम् ॥ १० ॥
सार्धाग्न्यंशं गलोत्सेधं भूतांशं शिखरोदयम् ।
अर्धांशं शिखरमानं पौष्टिकं सदनं भवेत् ॥ ११ ॥
तदेव गलमानं तु सार्धद्व्यंशेन कल्पयेत् ।
शेषं पूर्ववदेवं तु त्रयस्त्रिंशोदये कृते ॥ १२ ॥
जयदं सदनं ह्येतत्सर्वदेवप्रियावहम् ।
षट्त्रिंशद्विभजेत्यं(त्सा)र्धं धर्म्यं तु गन्ध(घटतुङ्गं ध)रातलम्॥१३॥
वस्वंशपादमानं तु सार्धाग्न्यंशं तु प्रस्तरम् ।
सप्तांशं चरणोच्चं तु गुणांशं च गलोदयम् ॥ १४ ॥
भूतांशं शिखरोच्चं तु स्थू(स्तू)प्युच्चं सार्धभागया ।
अर्धभूतं सदनं ह्येतत्कल्पयेत्कल्पवित्तमः ॥ १५ ॥
चत्वारिंशतिभागं तु कर्तव्यं सदनोदयम् ।
अधिष्ठानोच्चवेदांशं स्तम्भं तद्द्विगुणायतम् ॥ १६ ॥
युगांशं मञ्चमानं च स्तम्भलिप्साधेसप्तकम् ।
त्रिभागं प्रस्तरोत्सेधं द्विभागं वेदिकोदयम् १७ ॥
त्रिभाग ग्रीवमानं तु शिखरं सप्तभागया ।
शेषं शिरोदयं ख्यातं विमानं सर्वदा शिखा ॥ १८ ॥
होमादिस्तूपिपर्यन्तं युगाश्रं परिकल्पयेत् ।
चतुष्कूटं चतुःशालं पञ्जराष्टकसंयुतम् ॥ १९ ॥

षडष्टैवाल्पनासिं च पादं प्रति प्रकल्पयेत् ।
कल्पितं वेदिकाद्यैस्तु नानाचित्रैर्विचित्रितम् ॥ २० ॥
एतत्स्वस्तिकमाख्यातं सर्वदेवप्रियावहम् ।
तदेव शीर्षकाग्रेषु पार्श्वयोः स्वल्पनासिका ॥ २१ ॥
स्वस्तिभद्रमिति ख्यातं मम प्रीतिकरं भवेत् ।
तदेव नतकूटं च कोष्ठं नासिकमञ्चकम् ॥ २२ ॥
नतपञ्जरसंयुक्तं यथेष्टं क्रमशीर्षितः ।
स्तूपिघटं गलंतं च श्रीकरं समुदाहृतम् ॥ २३ ॥
तदेव कूटकोष्ठाः स्युः कूटशालोन्नताः समाः ।
निम्नपञ्जरवन्तो सौ यत्तत्कैलासमुच्यते ॥ २४ ॥
तदेव कूटकोष्ठौ द्वौ निम्नोन्नतविवर्जितौ ।
अन्तरप्रस्तरोपेतौ समसूत्रततौ नतौ ॥ २५ ॥
हारान्तरे विशेषेण युगं वा युगपञ्जरम् ।
चतुष्कूटं चतुःशालं षडष्टैवाल्पनासिका ॥ २६ ॥
वस्वग्रं वेदिकोपेतं वर्तुलं शीर्षकं गलम् ।
शिखरं वसुनासाढ्यं भद्राभद्रं चतुश्चतुः ॥ २७ ॥
वेदिकातोरणाढ्यं तु रुद्रकान्तमिदं परम् ।
कूटात्कोष्ठकनिष्ठान्तं दण्डं वाऽध्यर्धदण्डकम् ॥ २८ ॥
द्विदण्डं वा त्रिदण्डं वा कूटात्कोष्ठस्य निर्गतिः ।
नानाधिष्ठानसंयुक्तं नानास्तम्भविमानितम् ॥ २९ ॥
प्रागुक्तानां तु सर्वेषां कल्पितं वाऽपि हीनकम् ।
तदेव शिखरे चार्धकोष्ठकं तु चतुष्टयम् ॥ ३० ॥
चतुरश्रं शिरोपेतं चतुष्कूटसमन्वितम् ।
षडष्टनासिकोपेतं स्वस्तिसं(ब)न्धमिति स्मृतम् ॥ ३१ ॥
तदेव कूटकोष्ठौ द्वौ चान्तरप्रस्तरान्वितौ ।
हारपञ्जरसंयुक्तं षण्मृ(ड)ष्टौ वाऽल्पनासिकम् ॥ ३२ ॥
सर्वालंकारसंयुक्तमेतत्कल्याणसुन्दरम् ।
तदेव शिखरे चाध्य(र्ध)कोष्ठकं तु विवर्जयेत् ॥ ३३ ॥
चत्वारिनासिकोपेतं शिखरं परिकल्पयेत् ।
नानालंकारसंयुक्तमेतत्पाञ्चालमुच्यते ॥ ३४ ॥

तदेवाष्टाश्रमेदीयकंधरं शिखरं घनम् ।
शिरोष्ठौ [च] महानासियुक्तं तद्विष्णुकान्तकम् ॥ ३५ ॥
सान्तरं प्रस्तरोपेतं कूटकोष्ठौ चतुश्चतुः ।
लम्बपञ्जरसंयुक्तं वृत्तशीर्षककंधरम् ॥ ३६ ॥
दण्डं वाऽध्यर्धदण्डं वा द्विदण्डं वा त्रिदण्डकम् ।
कर्णकूटं तु कोष्ठानि निष्क्रान्तं परिकल्पयेत् ॥ ३७ ॥
षडष्टनासिकोपेतं चत्वारि शिखरे वर ।
एतद्विश्वकरान्यस्यादीश्वरस्य प्रियावहम् ॥ ३८ ॥
तदेव त्रिचतुर्भागे भागाधिक्यं यथाश्रकम् ।
तथाऽशीर्षमकण्ठं चावेदिकं तत्प्रकल्पयेत् ॥ ३९ ॥
स्तूपिन्यसमायुक्तमेतन्मङ्गल्यमुच्यते ।
तदेवायतवृत्ताभं गान्धारमिति विद्यते ॥ ४० ॥
तारादर्धाधिकादर्धमायताश्रं समाश्रं वा ।
द्व्यश्रवृत्तमुपानादिकलितं वा तदेव हि ॥ ४१ ॥
समाश्रमायताश्रं वा बाह्यतः परिकल्पयेत् ।
वृत्तगर्भगृहोपेतं कूटकोष्ठम(क)संयुतम् ॥ ४२ ॥
वृत्ताभं कर्णकूटानां शीर्षं स्यात्परिकल्पयेत् ।
कूटकोष्ठाल्पनीडाश्च समसूत्रैश्च कल्पयेत् ॥ ४३ ॥
नाम्ना मनोहरं रम्यं सर्स(र्व)देवार्हकं परम् ।
उपानादिस्तूपिपर्यंतं वृत्तं चेत्तु बहिर्बहिः ॥ ४४ ॥
शेषं प्रागिव कर्तव्यं शिवकान्तमिदं परम् ।
चतुरश्रमधिष्ठानं गर्भगेहं तथैव च ॥
अधिष्ठानोपरिष्टात्तु स्तूप्यन्तं वर्तुलाकृति ।
कूटकोष्ठादिसर्वाङ्गयुक्तं गर्भगृहं भवेत् ॥
चतुरश्रमधिष्ठानमायताश्रमथापि वा ॥ ४५ ॥
रसाश्रं शिखरं कण्ठं कूटकोष्ठादिसंयुक्तम् ।
यथोचितं तु संकल्प्य नाम्ना कूबेरकान्तकम् ॥ ४६ ॥
एवं तु द्वितलो(लं)योग्यं भेदमष्टदश स्मृतम् ।
इष्टकाभिः शिलाभिर्वा होमादिस्तूपिकान्तकम् ॥ ४७ ॥

कल्पितं सञ्चितं हर्म्यं पुमानिव घनीकृतम्।
दृष्टदेष्टकाभि(दृषद्भिरिष्टकाभिः) संमिश्रहर्म्यं तदेव हि ॥ ४८ ॥
श्रे(ते)ष्वादौ हि षट्कृ(ष्ट)त्कार्यं तदूर्ध्वेष्विष्टका क्रिया।
इष्टकादारुहिं(सं)मिश्रं षण्डमेतदुदाहृतम् ॥ ४९ ॥
तदेवोपचितं ख्यातं घनाधनमुदाहृतम्।
अशेषतरुभिः कार्यं संचितं स्त्रीति विद्यते ॥ ५० ॥
अघनं चेति तत्कार्यं एवं पुंषण्डयोषिताम्।
वक्त्रमण्टपमानं च गर्भगृहविशालकम् ॥ ५१ ॥
भित्तिव्यासं चतुः सर्वे (शालं)प्राग्वदेव तलोक्तवत्।
द्वारस्योभयपार्श्वे तु पादयोरन्तरे द्विज ॥ ५२ ॥
द्वारपालगृहां कुर्यात्तलादुत्तरसिंहकम्।
बिम्बादितं द्विशालं च दण्डमात्रं तु वेशनम् ॥ ५३ ॥
सर्वधामनि कर्तव्यं तवेशा(प्रवेश)रहितं तु वा।
एवं द्वितलमाख्यातं त्रितलं तु ततो विदुः ॥ ५४ ॥

इति काश्यपशिल्पे द्वितलविधानोनामाष्टाविंशः पटलः।

अथ नवविंशः पटलः।

त्रितलम्।

अथ वक्ष्ये विशेषेण त्रितलं शृणु सुव्रत।
तस्य विस्तारमानं च पुरोक्तं हर्म्यमानकम् ॥ १ ॥
विन्यासमूत्रयोरन्तरष्टाविंशे तु भाजिते।
एकांशं कूटविस्तारं शालायामं च तद्भयम् ॥ २ ॥
अंशं त्रिपादमर्धं वा पञ्च(ञ्ज)व्याद(व्यास) मुच्यते।
शेषं हारान्तरव्यातं निष्क्रान्तादीनि पूर्वकम् ॥ ३ ॥
ऊर्ध्वभूमिरसं शेषं कूटव्यासमुदाहृतम्।
शालायामद्विभागं तु शेषं हारान्तरं भवेत् ॥ ४ ॥

द्वारान्तरं तु संपाद्यं त्रिपादं वाऽथ पञ्चरम् ।
ऊर्ध्वभूमित्रिभागैकं मध्यभद्रं विधीयते ॥ ५ ॥
दण्डं सार्धद्विदण्डं वा मध्यभद्रस्य नीव्रकम् ।
प्रासादस्योच्छ्रयं भानुद्विगुणांशं विभाजिते ॥ ६ ॥
द्विभागं भूतलोत्सेधं वेदांशं चरणोदयम् ।
मञ्चमानद्विभागेन पादोनं चतुरंशकैः ॥ ७ ॥
पादायां(नां)वक्रिसाध्यांशं प्रस्तरोच्चमुदाहृतम् ।
पादोच्चं सार्धवह्न्यंशं सपादांशं तु मञ्चकम् ॥ ८ ॥
अर्धांशं वेदिकामानं गलमानं शिवांशकम् ।
सार्धाग्न्यंशं तु शिखरं स्तूप्युच्चं त्वेकभाजया ॥ ९ ॥
एवं हि कल्पितं गेहं शान्तिकक्षि(कं त्वि)ति विद्यते ।
चतुर्विंशति चायामे तलोच्चं तु द्विभागया ॥ १० ॥
वेदांशं चरणायामं पक्षांशं मञ्चमानकम् ।
पादोनचतुरंशं तु पादायाममितीष्यते ॥ ११ ॥
सार्धांशं प्रस्तरोत्सेधं साध्यर्धं स्तूदयं भवेत् ।
अर्धार्धांशं तु मञ्चोच्चमध्यांशं वेदिकोदयम् ॥ १२ ॥
शिवांशं ग्रीवमानं तु गुणांशं शिखरोदयम् ।
सपादांशं शिखामानं पौष्टिकं तदुदाहृतम् ॥ १३ ॥
सप्तविंशतिभागं तु कृत्वा च सदनोदयम् ।
द्विभागं धरातलोत्सेधं युगांशं चरणोदयम् ॥ १४ ॥
मञ्चमानं द्विभागेन वेदांशं चरणायतम् ।
पादोनद्व्यंशमञ्चोर्ध्वं तलिपोच्चं तु तद्द्वयम् ॥ १५ ॥
सार्धांशं प्रस्तरोत्सेधमेकांशं वेदिकोदयम् ।
द्विभागं ग्रीवमानं तु वेदभागं तु शीर्षकम् ॥ १६ ॥
शेषं स्तूप्युदयं ख्यातं जयदं तदुदाहृतम् ।
चत्वारिंशद्द्वयाधिक्यं भागं कृत्वा गृहोन्नतम् ॥ १७ ॥
अधिष्ठानत्रिभा[गा]र्धं सप्तांशं चरणोदयम् ।
तलोच्चसदृशं मञ्चं तलिपं सार्धषट्कम् ॥ १८ ॥
गुणांशं प्रस्तरोत्सेधंभूभागं च षडंशकम् ।
सार्धद्व्यंशं तु मञ्चोच्चमेकांशं वेदिकोदयम् ॥ १९ ॥

गलमानं द्विभागं स्याद् भूतांशं शिखरोदयम् ।
द्विभागं स्तूपितुङ्गं तु प्रोक्तमुद्भुतहर्म्यकम् ॥ २० ॥
प्रासादस्य तु तुङ्गेन षडष्टांशविभाजिते ।
अधिष्ठानयुगांशं तु वस्वंशं चरणायतम् ॥ २१ ॥
मञ्चमानं तु वेदांशं तली(लि)पं सार्धसप्तकम् ।
सार्धत्रिभागमञ्चोर्ध्वे सत्पांशं चरणायतम् ॥ २२ ॥
प्रस्तरोच्चं गुणांशं तु शिवांशं वेदिकोदयम् ।
द्विभागं गलमानं तु रसांशं शिखरोदयम् ॥ २३ ॥
द्विभागं तु शिखामानमेवं स्यात्सर्वदेशिकम् ।
अष्टकूटाष्टशालाभिः कलापञ्जरसंयुतम् ॥ २४ ॥
दूर्णवत्यल्पनासाढ्यं जन्मादाग्रं युगांशकम् ।
नानाधिष्ठानसक्तानां नानापादैरलंकृतम् ॥ २५ ॥
शिखरे भानुनासाढ्यं महाश्वं चतुरष्टकम् ।
कूटकोष्ठोन्नतादीनि गारादाद्युचितं भवेत् ॥ २६ ॥
स्वस्तिकं भवनं ख्यातं तदेव शिखरे द्विज ।
चतुर्थु(र्मे)हानासिकोपेत(नासिकाढ्य)मल्पाष्टकविवर्जितम् ॥ २७ ॥
स्वस्तिभद्रमिदं ख्यातं सर्वदेवप्रियावहम् ।
तदेव वृत्तशिखरं गलं वै वेदिका तथा ॥ २८ ॥
रुद्रकान्तमितिर्ना(दं ना)म्ना मम प्रीतिकरं परम् ।
तदेव शीर्षकोणेषु अल्पनासीद्वयान्वयम् ॥ २९ ॥
कल्पितं शिवकान्तं स्याच्छिवप्रीतिकरं गृहम् ।
तदेव वेदिका कण्ठं शीर्षकं च घटं तथा ॥ ३० ॥
वस्वग्रं (श्रं)कल्पितं यत्तद्विष्णुकान्तमिदं परम् ।
विन्यासस्त्रयोरन्तं नवभागविभाजिते ॥ ३१ ॥
एकांशं कूटविस्तारं द्विभागं कोष्ठदीर्घकम् ।
कोष्ठं प्रति द्विकोष्ठं स्यादर्धांशं पञ्जरं ततः ॥ ३२ ॥
शेषहारान्तरं ख्यातं कल्पयेत्कल्पवित्तमः ।
चतुष्कूटाष्टशालांशं भानुपञ्जरसंयुतम् ॥ ३३ ॥
तं चा(तच्चा)ल्पनासिकोपेतं वस्वग्रं शीर्षकं गलम् ।
प्रहानारथकोपेतं शिखरं तद्विजोत्तम ॥ ३४ ॥

नाम्ना शुद्धमिमानं तु धर्मप्रीतिकरं भवेत् ।
तदेवाष्टाश्रवेदी तु वि(वृ)त्ताभं शिखरं गलम् । ३५ ॥
विमानाकृतिनाम्नातं सर्वदेवार्हकं भवेत् ।
तदेव शिखरं कण्ठं युगाश्रं ब्रह्मकान्तकम् ॥ ३६ ॥
तदेव सायताग्रं तु सपादं सत्रिभागिकम् ।
वसुभागं तु विस्तारमायामं दशधा भजेत् ॥ ३७ ॥
एकांशं कूटविस्तारं शालाया द्विगुणायतम् ।
शेषं हारान्तरं ख्यातं प्रागिवैव प्रकल्पयेत् ॥ ६८ ॥
षडष्टभागविस्तारमायामं चोर्ध्वभूमिके ।
एकांशं कूटविस्तारं कोष्ठदीर्घं त्रियंशकम् ॥ ३९ ॥
अर्धांशं पञ्जरं व्यासं शेषं हारान्तरं भवेत् ।
ऊर्ध्वभूमीविस्तृतं च ग्री(चाग्नि)भाकैकं ध्य(गैःकण्ठ)भद्रकम् ॥४०॥
द्व्यंशवृत्तं च वेदी च कण्ठ(ण्ठं)वै शीर्षकं तथा ।
चतुष्कूटाष्टशाला(लं) च भानुपञ्जरसंयुतम् ॥ ४१ ॥
हारान्तरं चतुर्विंशत्कल्पयेदादिभूतले ।
चतुष्कूटं चतुःशालं पञ्जराष्टकसंयुतम् ॥ ४२ ॥
षोडशान्तरसंयुक्तं शतसंख्याल्पनासिका(कम्) ।
ललाटं नासिकायुक्तं पार्श्वयोर्भद्रनासिका ॥ ४३ ॥
तथैव नासिका पृष्ठे पृष्ठे सिंचोपमाचरेत् ।
नानाधिष्ठानसंयुक्तं नानाचाङ्घ्रिसमायुतम् ॥ ४४ ॥
सर्वालंकारसंयुक्तं हस्तिपृष्ठमिदं भवेत् ।
मानसूत्रान्तरं व्यासं नवभागविभाजिते ॥ ४५ ॥
गुणांशं गर्भगेहं तु शिवांशं कुड्यविस्तृतम् ।
परितोऽलींद्रु(लिन्द्र)मेकांशं हारं व्यासं शिवांशकम् ॥ ४६ ॥
एवं हि कल्पतेते(येत्ते)षु कण्ठकूटं शिवांशकम् ।
मध्ये कोष्ठं गुणांशं स्यादेकांशः पञ्जरस्ततः ॥ ४७ ॥
हारान्तरं तदर्धांशं कल्प्यैवं प्रथमे भुवि ।
अथवा पञ्जराणां तु अर्धांशं वा विधीयते ॥ ४८ ॥
शेषं हारान्तरं ख्यातं परितस्त्वेवमाचरेत् ।
कोष्ठमध्ये त्रिदण्डेन महानासिविनिर्गतम् ॥ ४९ ॥

ऊर्ध्वभूमौ षडंशेषं (षु) कूटकोष्ठायतद्वयम्।
अर्धांशं पञ्जरव्यासं शेषं हारान्तरं भवेत् ॥ ५० ॥
ऊर्ध्वभूमीविस्तृतार्धंतु अ(र्धं त्व)र्धदण्डेन निस्थितैः(र्गतम्)।
चतुरश्रमधिष्ठानं वस्वश्रं शीर्षकं गलम् ॥ ५१ ॥
आदौ तले चतुष्कर्णे कूटो वेदाश्रशीर्षकः।
अष्टाश्रं शीर्षकं कूटश्चोर्ध्वभूमौ प्रकल्पयेत् ॥ ५२ ॥
अष्टकूटाष्टकोष्ठं च कलापञ्जरसंयुतम्।
तालपत्रनासिकोपेतं शिखरेन्द्रं महान्तरम् ॥ ५३ ॥
भद्रकोष्ठमिदं नाम्ना सर्वदेवार्हकं परम्।
तदेव कर्णकूटानां शीर्षकं वर्तुलाकृति ॥ ५४ ॥
प्रासादशीर्षकं कण्ठं वृत्ताकारं प्रकल्पयेत्।
शेखरे तु चतुर्दिक्षु भद्रनासीसमन्वितम् ॥ ५५ ॥
तथा दिक्ष्वल्पनासाढ्यं वृत्तकूटमिदं परम्।
तदेव शिखरे कोणे क्षुद्रनासाष्टकान्वितम् ॥ ५६ ॥
पुनरश्रं कर्णकूटानां शीर्षकं परिकल्पयेत्।
शेषं प्रागिव कर्तव्यं श्रीकण्ठं तदुदाहृतम् ॥ ५७ ॥
तदेवाष्टांशमाधिक्यमायामं चतुरश्रकम्।
शालामध्ये महानासि भद्रं हीनं प्रकल्पयेत् ॥ ५८ ॥
शालाग्रे मस्तकं कण्ठं वृत्तायतमथापि वा।
शु(स्तू)पित्रयसमायुक्तमेतन्नाम्ना सुमङ्गलम् ॥ ५९ ॥
मानसूत्रान्तरं धर्म भागं कृत्वा द्विजोत्तम।
गर्भगेहं तु वेदांशं गृहं पिण्डयंशमावृतम् ॥ ६० ॥
परितोऽलिंद्रु(लिन्द्र)मेकांशं हारभागेन कल्पयेत्।
तदेकं कूटविस्तारं मध्ये तोहप(कोष्ठाय)तद्वयम् ॥ ६१ ॥
तयोर्मध्यैकभागेन पञ्जरव्यासमुच्यते।
हारान्तरं तथांऽशेन पञ्जरस्य तु पार्श्वयोः ॥ ६२ ॥
अष्टांशां चोर्ध्वभूमिं तु कृत्वांऽशं कूटविस्तृतम्।
शालाया द्विगुणायामं तयोर्मध्ये तु पञ्जरम् ॥ ६३ ॥
एकांशेनैव कर्तव्यं शेषं हारान्तरं भवेत्।
ऊर्ध्वभूमि चतुर्भागं द्विभागं मध्यभद्रकम् ॥ ६४ ॥

दण्डं वा द्विदण्डं वा त्रिदण्डं वाऽथ निर्गतिः ।
वेदाश्रं तदधिष्ठानं तदुत्कण्ठं च शीर्षकम् ॥ ६५ ॥
अष्टशालाष्टकूटं च पञ्जरं षोडशान्वितम् ।
नानाधिष्ठानसंयुक्तं नानापादैरलंकृतम् ॥ ६६ ॥
उन्नतौ कूटकोष्ठौ च भान्तरप्रस्तरान्वितौ ।
गान्धारमिति विख्यातमष्टाश्रं वा गलं शिरः ॥ ६७ ॥
श्रीविशालमिति ख्यातं वर्तुलं वेदिका गलम् ।
शीर्षं चैव च कर्तव्यं शेषं पूर्ववदाचरेत् ॥ ६८ ॥
श्रीभागाढ्यमिति ख्यातं सर्वदेवार्हकं परम् ।
वृत्ते वृत्तायते द्व्यश्रवृत्ते चैव षडश्रके ॥ ६९ ॥
कूटकोष्ठादिसर्वाङ्गं प्रागिवैव प्रकल्पयेत् ।
वर्षस्त(क्षःस्थ)लं मण्डलं च त्यजेत्कर्णं च शीर्षकम् ॥ ७० ॥
वक्षःस्थलविहीनानां क(नाम)कर्णं शीर्षसंयुतम् ।
कूटकोष्ठादिसर्वाङ्गमुचितं नागरादिकम् ॥ ७१ ॥
नानालंकारसंयुक्तं नानाचित्रैर्विचित्रितम् ।
गर्भगेहं विशालं च गृहं पिण्ड्यग्रमण्डपम् ॥ ७२ ॥
एकभूमिविधानोक्तमनुक्तानां विशेषतः ।
त्रितलं शेषमाख्यातं चतुर्भूममथोच्यते ॥ ७३ ॥

इति काश्यपशिल्पे त्रितलविधानं नामैकोनत्रिंशः पटलः ।

अथ त्रिंशः पटलः ।

चतुर्भूमिः ।

अथ वक्ष्ये विशेषेण चतुर्भूम्यादिलक्षणम् ।
विस्तारोत्सेधमानं तु प्रोक्तं प्रासादमानके ॥ १ ॥
रव्यंशमानसूत्रं वा कृते गर्भगृहांशकम् ।
गृहपिण्ड्यलिन्द्राहारं प्रत्येकं चैकभागतः ॥ २ ॥

विष्कम्भसूत्रयोरन्तर्वसुधामभजेद्वह(ह)म् ।
कर्णकूटसमांशं तु कोष्ठं तद्द्विगुणायतम् ॥ ३ ॥
पञ्च(ञ्ज)रव्यासमंशेन शेषं सा(हा)रान्तरं भवेत् ।
पुनरप्यूर्ध्वभूमिं च वसुभागविभाजिते ॥ ४ ॥
कर्णकूटं च कोष्ठं च पञ्जरं पूर्ववद्भवेत् ।
तदूर्ध्वभूमौ षड्भागे शिवांशं कूटविस्तृतम् ॥ ५ ॥
कोष्ठायामश्वरी(धरा)भागमर्धांशं पञ्जरस्य तु ।
शेषं हारान्तरं प्रोक्तं हीनाधीकां(कयं) तु नाऽऽश्रयेत् ॥ ६ ॥
उर्ध्वभूमानि(मिवि)भागेन व्योमां(म्ना)मर्धमभद्रकम् ।
दण्डं वाऽध्यर्धदण्डं वा द्विदण्डं वाऽथ निर्गमम् ॥ ७ ॥
प्रासादोच्चं तु विभजेत्सप्तत्रिंशदंशकम् ।
सार्धाष्टांशमधिष्ठानं भूतांशं चरणोदयम् ॥ ८ ॥
अधिष्ठानसमं मञ्चं पादं पादोनप(म)ञ्चकम् ।
दा(प)क्षांशं कर्मभञ्चोच्चं कल्पयेद्द्विजसत्तम ॥ ९ ॥
सार्धं वेदांशमपरं पक्षांशं प्रस्तरोदयम् ।
सपादवेदभागं च चरणोदयमिष्यते ॥ १० ॥
पादोनपक्षांशमञ्चोच्चं शिवांशं वेदिकोदयम् ।
कण्ठोच्चं तु द्विभागं स्यात्सार्धं वेदांशशीर्षकम् ॥ ११ ॥
स्तूप्युच्चं तु द्विभागं स्याच्छान्तिकं भवनं भवेत् ।
चत्वारिंशद्द्वयाधिकां(कयं) भागं कृत्वा गृहोन्नतम् ॥ १२ ॥
गुणांशं तलमानं तु रसांशं चरणोदयम् ।
प्रस्तरं त्वग्निभागेन भूतांशं तलिपोदयम् ॥ १३ ॥
गुणांशं प्रस्तरोत्सेधं पादं पादार्धपञ्चकम् ।
पादद्विभागमञ्चोच्चं सार्धवेदाङ्घ्रिणोदयम् ॥ १४ ॥
द्विभागं मञ्चमानं तु शिवांशं वेदिकोदयम् ।
अत्यर्धांशं गलोत्सेधं युगांशं शिखरोदयम् ॥ १५ ॥
द्विभागं तु शिखामानं पौष्टिकं तदुदाहृतम् ।
पञ्चांशं द्वि(वि)भजेद्धर्म्यं तुङ्गं स्तूप्यवसानकम् ॥ १६ ॥
सार्धोन्यंशमधिष्ठानं सर्पांशं चरणोदयम् ।
गुणार्धं प्रस्तरोत्सेधं रसांशं पाददैर्घ्यकम् ॥ १७ ॥

PG

गुणांशं मञ्चमानं तु ऊर्ध्वपादं तु तद्द्वयम् ।
त्रिभागं प्रस्तरोत्सेधं पादोच्चं सार्धपञ्चकम् ॥ १८ ॥
प्रस्तरोच्चं त्रिभागैकं शिवांशं वेदिकोदयम् ।
द्विभागं गलमानं तु भूतांशं शिखरोदयम् ॥ १९ ॥
सार्धांशं स्तूपिमानं तु जयदं तद्दुदाहृतम् ।
उपानादिस्तूपिपर्यन्तं पञ्चांशं विभजेद्बुधः ॥ २० ॥
तथोच्चं सार्धाऽन्यं(न्यंशं) स्यात्समांशं चरणोदयम् ।
तलोच्चसदृशं मञ्चं तस्य(स्मि)न् सार्धषट्कम् ॥ २१ ॥
पादाधिकत्रिभागेन मञ्चमानमुदाहृतम् ।
पादोच्चं रसभागेन गुणांशं प्रस्तरोदयम् ॥ २२ ॥
सार्धपञ्चांशमभ्युच्चं मञ्चं सार्धद्विभागयोः ।
एकांशं वेदिकामानं द्विभागं स्याद्गलोदयम् ॥ २३ ॥
पञ्चांशं शिखरोत्तुङ्गं पादद्वयंशं शिरो(खो)न्नतम् ।
तद्भूतं सदनं ह्येवं कल्पयेत्कलशान्वितम् ॥ २४ ॥
आरामोच्चं तु पञ्चांशं भागं कृत्वा विचक्षणः ।
सार्धांशांशमधिष्ठानं धारणांशं चरणोदयम् ॥ २५ ॥
प्रस्तरोच्चं त्रिभागैकं चरणं सार्धषड्भवेत् ।
सपादाग्न्यंशमञ्चं स्यात्तली(लि)पं सार्धषट्कम् ॥ २६ ॥
त्रिभागं प्रस्तरोत्सेधं पादोच्चं सार्धपञ्चकम् ।
पादोनाग्न्यंशमञ्चोच्चं शिवांशं वेदिकोदयम् ॥ २७ ॥
द्विभागं गलमानं तु पञ्चांशं शिखरोदयम् ।
व्योमांशं तु शिखामानं विमानं सार्वदेशिकम् ॥ २८ ॥
होमादिस्तूपिपर्यन्तं वेदाश्रं परिकल्पयेत् ।
भानुकूटं तथा कोष्ठं भानुद्विगुणपञ्जरम् ॥ २९ ॥
शिखरे तु चतुर्दिक्षु भद्रनासीचतुष्टयम् ।
पादं प्रत्यल्पनासाढ्यं शिखरेऽष्टालनासिकम् ॥ ३० ॥
कूटकोष्ठादिसर्वाङ्गं नागराद्युचितं कुरु ।
एकाकारतलस्तम्भं सुभद्रमिति विद्यते ॥ ३१ ॥
तदेव शिखरेऽष्टालनासिकारहितं भवेत् ।
तद्भद्रमिति विख्यातं सर्वदेव(देव)शिवावहम् ॥ ३२ ॥

तदेव शिखरे षण्ढवृतं श्रीकान्तमुच्यते ।
स्वस्वश्रं स्रीषकण्ठं वै श्रीमण्डनमुदाहृतम् ॥ ३३ ॥
तदेव शिखरे चाष्टौ (ष्ट)महानासिसमन्वितम् ।
श्रीभवन्तं च व्याख्यातं शालाभद्रयुतं तु वा ॥ ३४ ॥
विभद्रं वाऽथ भक्तव्यं सर्वेषां सप्तनामपि ।
श्रीकान्तं शिखरेऽष्टालपनापा(सा)ढ्यं श्रीविशालकम् ॥ ३५ ॥
नानांऽङ्घ्रितलयुक्तास्ते तत्तन्नाम्ना प्रकीर्तिताः ।
विस्तारार्ध्य....मंसं भास्करं तु विशीर्षकम् ॥ ३६ ॥
सर्वदालयमित्युक्तं सर्वदेवार्हकं परम् ।
मानमूर्ध्वान्तमानन्दभागं कृत्वा विशेषतः ॥ ३७ ॥
गर्भगेहं गुणांशं स्याद्भागेन गृहपिण्डिका ।
अलिन्द्रांशे तु कर्तव्यं भा(हा)गेन कल्पयेत् ॥ ३८ ॥
ततो विन्यासपत्रान्तं व्यासं नन्दविभाजिते ।
एकांशं कूटविस्तारं गुणांशं कोष्ठदीर्घकम् ॥ ३९ ॥
एकांशं पञ्जरव्यासमर्धांशं हरयाऽन्तरम् ।
शालामध्ये महानासि निवृत्तं त्वर्धभागया ॥ ४० ॥
ऊर्ध्वभूमा(न)न्दभागे तु कूटमंशेन कल्पयेत् ।
शालाया(तद्) द्विगुणायामं(मा)शिवांशं पञ्जरं भवेत् ॥ ४१ ॥
शेषं हारान्तरं चोर्ध्वे भूतारं रसभाजिते ।
कूटमेकेन कर्तव्यं कोष्ठं तद्द्विगुणायतम् ॥ ४२ ॥
अर्धांशं पञ्जरव्यासं शेषं हारान्तरं भवेत् ।
ऊर्ध्वभूमिं तथाऽर्धं तु मध्यदण्डेन निर्गतिम् ॥ ४३ ॥
चतुरष्टं श्रवृत्ताभं कूटानां शीर्षकं क्रमात् ।
ककुरीदण्डवत्कोष्ठं स्वश्रं हर्म्यादिशीर्षकम् ॥ ४४ ॥
महानास्यष्ट(ष्ट)कोपेतं शीर्षकं परिकल्पयेत् ।
रविकोष्ठं च कूटं च रविद्विगुणपञ्जरम् ॥ ४५ ॥
प्रागिवोच्चांशमानं तु ततः कोष्ठमिदं परम् ।
गेहव्यासं तु वर्मांशं कृत्वा नीचगृहच्छतुः (होचकम्) ॥ ४६ ॥
गृहपिण्डांशमानेन आलिन्द्रं त्वेकभागया ।
हाराप्या(रव्या)सं शिवांशेन परितः परिकल्पयेत् ॥ ४७ ॥

विन्याससूत्रयोरन्तर्व्यासधर्मविभाजिते ।
कर्णकूटं तदेकांशं कोष्ठायामं तु तद्द्वयम् ॥ ४८ ॥
अर्धांशं पञ्जरव्यासं शेषं हारान्तरं भवेत् ।
चतुष्कूटाष्टकोष्ठं च पञ्चारम्भं तु संख्यया ॥ ४९ ॥
हारान्तरं चतुर्विंशत्कल्पयेत्प्रथमं तलम् ।
आलिन्द्रं जलपादं स्यात्प्रस्तारं तु घनीकृतम् ॥ ५० ॥
ऊर्ध्वभूनवभागं स्याच्छिवांशं कूटविस्तरम् ।
कोष्ठं तद्द्विगुणायामं पञ्जरं शममानतः ॥ ५१ ॥
शेषं हारान्तरं ख्यातं क्षुद्रपञ्जरसंयुतम् ।
ऊर्ध्वभूमित्रिभागैकं मध्ये दण्डेन निर्गमम् ॥ ५२ ॥
चतुरश्रमधिष्ठानमष्टाश्रं मस्तकं गलम् ।
शिखरेऽष्टौ महानासि(स्यः) पादे प्रत्यल्पनासिका ॥ ५३ ॥
कर्णकूटं तु भागं स्यात्कोष्ठं षोडशभिर्युतम् ।
नतकूटोन्नतं कोष्ठमन्तरप्रस्तरान्वितम् ॥ ५४ ॥
क्षुद्रनीड ष्टविंशं स्यान्नानास्रं सूकरास्रचा(क्रांति) ।
नानाचित्रैर्विचित्रं तु तुङ्गं भागं तु पूर्वकम् ॥ ५५ ॥
जयावहमिदं ख्यातं सर्वदेवार्हकं परम् ।
तदेव वर्तुलं कर्णं शीर्षान्तं सर्वमामि(नि)कम् ॥ ५६ ॥
तदेव सान्तरं मञ्चं कूटकोष्ठं च पञ्जरम् ।
कूटानां शीर्षकस्तूपिकुम्भं कर्णं च वर्तुलम् ॥ ५७ ॥
एवं स्यान्मूलभूमौ तु वस्वश्रं मध्यमे तले ।
युगाश्रं मध्यभूमौ तु कर्णकूटं प्रकल्पयेत् ॥ ५८ ॥
सुखावहमिदं ख्यातं सर्वदेवार्हकं परम् ।
तदेव कूटकोष्ठं च अन्तरं प्रस्तरं विना ॥ ५९ ॥
व्यासोच्चसमसूत्रं तु सदस्र(दाज)यगृहं भवेत् ।
तदेव शिखरं कण्ठं युगाश्रं धारकान्तकम् ॥ ६० ॥

इति काश्यपशिल्पे चतुर्भूमिविधानो नाम त्रिंशः पटलः ।

अथैकत्रिंशः पटलः।

वक्ष्येऽहं कूटकोष्ठानां पञ्जराणां तु लक्षणम्।
द्वितलादितलान्तानां सममेव प्रकीर्तितम् ॥ १ ॥
तलं प्रत्युदितं व्यासं समाश्रं कर्णकूटकम्।
सार्धनाश्रं तु कोष्ठं स्याच्चतुष्पादैकपादुकौ ॥ २ ॥
अधस्तात्स्तम्भवर्गं च प्रस्तरः कर्णशीर्षकम्।
स्तूपिवर्गसमायुक्तौ कूटकोष्ठौ विशेषतः ॥ ३ ॥
एवं चाऽऽदितले कुर्याद्धारातालं विनोर्ध्वतः।
कूटशालौ च कर्तव्यौ पञ्जराश्च तथैव च ॥ ४ ॥
ऊर्ध्वपादोदयं सप्तभागं कुर्यादिशेषतः।
एकांशं वेदिकोत्सेधं साधांशं गलमुन्नतम् ॥ ५ ॥
शीर्षं तु त्रिगुणांशेन शेषं स्तूप्युदयं भवेत्।
एवं तु कूटकोष्ठौ द्वौ कल्पयेत्तु तलं प्रति ॥ ६ ॥
अथवा कूटकोष्ठानामुदयं तु वदाम्यहम्।
प्रस्तरस्योर्ध्वसीमान्तं हंसमालोर्ध्वसंम(सिंह)कम् ॥ ७ ॥
कपोतं वावसानं वा भागं पूर्ववदेव तु।
सान्तरप्रस्तरं चेत्तु प्रस्तरस्योर्ध्वसोमकम् ॥ ८ ॥
वेदिकोर्ध्वं समी(मं)वाऽथ सान्तरप्रस्तरान्वितः(तम्)।
तदुच्चं रुद्रधा भज्य एकांशं वेदिकोदयम् ॥ ९ ॥
गुणांशं चरणोच्चं तु पादोनद्व्यंशमञ्चकम्।
स्तूप्युत्सेधं सपादांशं क्रमशः परिकल्पयेत् ॥ १० ॥
एवं हि कूटकोष्ठौ द्वौ कल्पयेच्छिल्पवित्तमः।
कूटस्यास्य त्रिभागैकं स्वनासीविस्तृतं भवेत् ॥ ११ ॥
तद्व्यासत्रिचतुःपञ्चसप्तभागेन नीव्रकम्।
कर्णकूटे कपोतं तु नासिकानिर्गमं भवेत् ॥ १२ ॥
चतुर्दिक्षु चतुर्णासि(र्नासीः)कूटानां परिकल्पयेत्।
एकस्तूपिसमायुक्तं नीव्रवेशविमानवत् ॥ १३ ॥

तदेवाश्रं वसुकोणं वा वृत्ताभं वा ग ऽ शिरः ।
नागराद्युचितं कल्प्यं कर्णकूटं (टं)विशेषतः ॥ १४ ॥
शालानां पार्श्वयोर्विम्र ललाटाख्यं(ख्या)तु नासिका ।
शाला व्यासविशाला तु उन्नता मुखपट्टिका ॥ १५ ॥
स्वस्तूप्यग्रसमं प्रोतं शालानास्यश्रशी(सी)प्रकम् ।
शालादैर्घ्यं त्रिभागैकं मुखनासिविशालकम् ॥ १६ ॥
कूटानां नासिकानीव्रं महानासिवदाचरेत् ।
स(स्तू)पिन्नयसमायुक्तं नागरे भवने द्विज ॥ १७ ॥
का(शा)लानां द्राविडानां तु स्तूपिस्याक्षित्तिसंज्ञ(द्दिग्विंशसंख्य)या ।
शालानां वैसराणां तु स्तूप्येकं वा चतुष्टयम् ॥ १८ ॥
गलांशे कूटकोष्ठानां देवताद्यास्तु कल्पयेत् ।
एवं हि कूटकोष्ठस्तु पञ्जरस्त्वधुनोच्यते ॥ १९ ॥
उपानाद्युत्तरान्तं तु नवभागविभाजिते ।
उपपीठमथांशेन पक्षांशेन धरातलम् ॥ २० ॥
वेदांशं चरणायामं मञ्चमध्यर्धभागया ।
अर्धांशं वेदिकामानं कपोतान्तं गलोदयम् ॥ २१ ॥
प्रतिबाजनसीमान्तं पञ्जरोच्चमुदाहृतम् ।
प्रासादस्य कपोतं तु यथाशोभं विनिर्गतिः ॥ २२ ॥
पञ्जरो नासिकाकारः कूटकोष्ठाकृतिस्तु वा ।
हस्तिपृष्ठविमानं स्याच्छिखरान्तमथापि वा ॥ २३ ॥
एवं त्वनेकभेदेन पञ्जराकृतिरुच्यते ।
यथेष्टं तेषु कर्तव्यं हर्म्यकोष्ठेषु हर्म्यकम् ॥ २४ ॥
एकेन भूमिहर्म्येषु .... ॥
एवमादितले(लं)कुर्यादन्तरप्रस्तराञ्चितम् ॥ २५ ॥
मानसूत्रं तु निष्क्रान्तं युक्तमेव यदाचरेत् ।
पञ्जरं नीव्ररहितं प्रस्तरोर्ध्वे विशेषतः ॥ २६ ॥
कर्णकूटं समं वाऽथ त्रिपादं वाऽधिस्तरम् ।
तद्वयासभद्रशं (कं)तुङ्गं युक्तया पञ्जरमाचरेत् ॥ २७ ॥

तलं प्रत्यूर्ध्वपादोर्ध्वं प्रागिवैव नवांशकम् ।
गुणांशं वा घनं भित्तिश्छत्रं शीर्षसमं युतम् ॥ २८ ॥
पादायामं चतुर्भागमत्यर्धांशं तु प्रस्तरम् ।
अर्धांशे वेदिकामानं कपोतान्तं गलोदयम् ॥ २९ ॥
प्रतिवाजनसीमान्तं पञ्जरोदयमीरितम् ।
शेषं प्रागिव कर्तव्यमेवं निष्क्रान्तपञ्जरम् ॥ ३० ॥
निष्क्रान्तरहितं चेत्तु प्रस्तरोर्ध्वं तु वागिव(जनम्) ।
पञ्जरे कूटकोष्ठौ च पादे पादान्तरेऽपि वा ॥ ३१ ॥
गोपालधारिताकल्पमहाशालपराक्रमान् ।
हस्तौ पादौ द्वयोपेतां इष्टकीणेजटान्विताम् ॥ ३२ ॥
रौद्रदृष्टिसमायुक्तां नृत्तवाञ्जनसंनिभाम् ।
गोपालं यत्नतो धृत्वा पादौ हस्तौ तदन्वितौ ॥ ३३ ॥
एवं वा गजहंसाभं सिंहव्यालोह(लाभ) व वा ।
गोपालकशिरसाऽऽलक्ष्यं हस्तपादौ यथेष्टतौ ॥ ३४ ॥
कूटादिलक्षणं प्रोक्तं पञ्चभूमिविधिं ततः ॥ ३५ ॥

इति काश्यपशिल्पे कूटादिलक्षणमेकत्रिंशः पटलः ।

अथ द्वात्रिंशः पटलः ।

पञ्चभूमिः ।

अथ वक्ष्ये विशेषेण पञ्चभूम्यास्तु लक्षणम् ।
विस्तारोत्सेधमानं तु प्रोक्तं प्रासादमानके ॥ १ ॥
विस्तारं रुद्रया भज्य गुणांशं गर्भगेहकम् ।
द्विभागं भूदपिण्डी स्याद्भित्तिरिन्द्रं त्वेकभागया ॥ २ ॥
द्वाभ्यां(भ्या)मेक(न)कर्तव्यमलिन्द्रघनभित्तिकम् ।
वृषस्थलसमं युक्तं कल्पयेत्प्रस्तरोपरि ॥ ३ ॥
धरातले व(न)पञ्चोर्ध्वे द्वितीये वा त्रिभूमिके ।
केवलस्थापनं कुर्यात्तावदेव घनीकृतम् ॥ ४ ॥

विन्याससूत्रयोरन्तः, रुद्रभागविभाजिते ।
शिवांशं कर्णकूटं तु मध्यकोष्ठं गुणांशकम् ॥ ५ ॥
तयोर्मध्यैकभागेन पन्त(ञ्च)व्यासमुच्यते ।
हारान्तरमथांशेन कल्पयेत्कल्पवित्तमः ॥ ६ ॥
तदूर्ध्वभूमिविस्तृतं नन्दभागं कृत्वांशं(तु)सौष्ठिकम् ।
मध्ये कोष्ठाग्निभागं तु पञ्जरं स्वंशमानतः ॥ ७ ॥
हारान्तरमथार्धांशं कल्पयेत्तु द्वितीयके ।
तदूर्ध्वभुवनं चाष्टभागांशं कर्णकूटकम् ॥ ८ ॥
द्विभागं कोष्ठकं कुर्याद्भागं (गः)स्यात्पञ्जरस्तथा ।
हारान्तरमथार्धांशं कृत्वा कक्षणसंयुतम् ॥ ९ ॥
ऊर्ध्वभूमिरसांशे तु कूटव्यासयथांशकम् ।
शालादीर्घविभागं स्यादुद्गर्धा(दर्धा)शं पञ्जरस्तरम् ॥ १० ॥
शेषं हारान्तरं ख्यातं वलकुञ्जरमेव वा ।
तदूर्ध्वे भूमिनिर्व्यास्यं (विन्यासं) मध्ये दण्डेन निर्गतिः ॥११॥
गृहोच्चं तु षडष्टांशे पादोनांशं धरातलम् ।
सार्धपञ्चांशमप्युच्चं सार्धदृग्यंशं तु यञ्चकम् ॥ १२ ॥
सपादं पञ्चभागं तु चरणोदयमीरितम् ।
मञ्चोच्चं द्वयमर्धांशं पञ्चांशं चरणायतम् ॥ १३ ॥
सपादद्विभाग .ऽर्धं स्यात्पा(प)दामर्धेन पञ्चकम् ।
द्विभागं प्रस्तरोत्सेधं सार्धवेदाङ्घ्रितुङ्गकम् ॥ १४ ॥
पादोनदृग्यमञ्चैः स्याच्छिवांशं वेदिकोदयम् ।
कण्ठं वा तेन पक्षांशं सार्धवेदं शिरोदयम् ॥ १५ ॥
द्विभागं स्तूपिमानं तु शान्तिकं भवनं भवेत् ।
सवेदचत्वारिंशं तु भागं कृत्वा गृहोत्तमम् ॥ १६ ॥
गुणांशं तलतुङ्गं तु भूतांशं चरणोदयम् ।
प्रस्तरं चाग्निभागं तु पादं सार्धयुगं भवेत् ॥ १७ ॥
सपादद्विभागमञ्चं स्यात्तलिपं स्यादर्धी(स्यादधो)युगम् ।
प्रस्तरोच्चं द्विभागेन वेदांशं चरणोदयम् ॥ १८ ॥
पक्षांशं मञ्चमानं स्यात्पादं सार्धगुणांशकम् ।
अध्यर्धमञ्चमानं तु व्योमांशं वेदिकोदयम् ॥ १९ ॥

द्विभागं गलमानं तु सार्धं वेदांशशीर्षकम् ।
अत्यन्यं (र्धं) तु शिखामानं पौष्टिकं सदनं त्विदम् ॥ २० ॥
सदनोच्चं तु षट्त्रिंशद्भागं कृत्वा द्विजोत्तम ।
अधिष्ठानं द्विभागेन वेदांशं चरणायतम् ॥ २१ ॥
सत्रिपादश्रिवांशेन मञ्चमानं प्रकल्पयेत् ।
सार्धांन्यंशं तु तलिपं तदर्धं मञ्चमानकम् ॥ २२ ॥
सपादानल्पादं स्यान्मञ्चमत्यर्धभागया ।
गुणांशं पादपीठं तु सपादांशं [तु] प्रस्तरम् ॥ २३ ॥
एकांशं वेदिकामानं पादोनद्व्यंशकं गलम् ।
सपादाग्न्यंशशिरोपे(कं शीर्षं शे)षं स्तूप्युदयं भवेत् ॥ २४ ॥
जयदं भवनं ह्येवं कल्पयेत्कल्पवित्तमः ।
धिमाभोत्सेधं विभजेत्त्रयस्त्रिंशद्विभागया ॥ २५ ॥
द्विभागं रमणीमानं वेदांशं चरणोदयम् ।
प्रस्तरोत्थं द्विभागेन सार्धत्रिंशाङ्घ्रिणोदयम् ॥ २६ ॥
प्रस्तारं पादरहितं द्विभागेन विधीयते ।
त्रिभागं चरणायामं तदर्धं मञ्चमानकम् ॥ २७ ॥
सार्धद्विभागबाहोर्धं सपादांशेन मञ्चकम् ।
स्तम्भं पादाधिकद्व्यंशं मञ्चमानं सपादकम् ॥ २८ ॥
व्योमांशं वेदिकामानमत्यर्धाङ्गुल्मानकम् ।
सार्धत्रिभागं शिखरं द्विभागं स्तूपिमानकम् ॥ २९ ॥
अद्भुतं भवति ह्येवं कल्पयेद्देवतार्हकम् ।
चतुर्विंशतिभागं तु कृत्वा च सदनोदयम् ॥ ३० ॥
अत्यर्धांशतलोत्सेधं गुणांशं पादमानकम् ।
तदर्धं मञ्चमानं तु पादोदर्कं(यं)गुणांशकम् ॥ ३१ ॥
तस्यार्धं प्रस्तरोत्सेधं द्व्यर्धमङ्घ्र्युदयं भवेत् ।
प्रस्तरं तु सपादांशं स्तम्भं पादाधिकद्वयम् ॥ ३२ ॥
तदर्धं मञ्चमानं तु साष्टांशद्व्यंशमङ्घ्रिकम् ।
एकांशं प्रस्तरोत्सेधमर्धांशं वेदिकोदयम् ॥ ३३ ॥
त्रिपादं गलमानं तु पादोनद्व्यंशकं शिरः ।
अष्टांशरहितव्योमभागं स्तूप्युदयं भवेत् ॥ ३४ ॥

सर्वकामिकमेवं तु कर्तव्यं सदनं द्विज ।
होमादिस्नपिपर्यन्तं युगांशं परिकल्पयेत् ॥ ३५ ॥
कलांशालाकलांशौ पञ्जरं चतुरष्टकम् ।
पादाः प्रत्यल्पनासाढ्यं(ढ्या)हारान्तं नासिकाद्वयम् ॥ ३६ ॥
भद्रनासीचतुष्कं तु शिखरे च प्रकल्पयेत् ।
क्षुद्रनासीद्वयं कोणे कल्पितं ब्रह्मकान्तकम् ॥ ३७ ॥
कूटास्त्र(टेष्व)नन्तरं त्र्यादयं(सार्धं च)शालापञ्जरमुदाहृतम् ।
तदेवोन्नतकूटं तु कोष्ठेऽनन्ताः स्वमञ्चकाः ॥ ३८ ॥
स्वायंभुवमिदं गेहं सर्वदेवार्हकं परम् ।
तदेव वेदिकाकोष्ठं शीर्षकं वसुकोणकम् ॥ ३९ ॥
शालामध्येऽग्रमालेऽन्तर्निर्गतिः कोष्ठ एव वा ।
भद्रकान्तमिति ख्यातं कूटकोष्ठं परिस्समम् ॥ ४० ॥
समञ्चं वाऽपि (पञ्च)मञ्चं वा जनार्दनमुदाहृतम् ।
तदेव कोष्ठमध्ये तु भद्रहीनमञ्चमि वा ॥ ४१ ॥
मध्ये द्वयुतं वाऽपि मण्डलं शीर्षकं गलम् ।
अतिभद्रमिति ख्यातं सर्वदेवार्हकं परम् ॥ ४२ ॥
तदेव कूटकोष्ठं च पञ्जरं च समञ्चकम् ।
सोन्नतं सर्वतोभद्रं धर्ममीतिकरं भवेत् ॥ ४३ ॥
विपुल कूटकोष्ठं च पञ्जरं समसूत्रकम् ।
नानाधिष्ठानसंयुक्तं नानापादैरलंकृतम् ॥ ४४ ॥
नानालंकारसंयुक्तं युगपञ्जरसंयुतम् ।
शिखरेऽष्टकल्पनासाढ्यं महानासीचतुष्टयम् ॥ ४५ ॥
वीरभद्रमिति ख्यातं सर्वदेवप्रियावहम् ।
तदेवाष्टकशाड्यादिमादिभूमौ द्विभागया ॥ ४६ ॥
भानुपञ्जरसंयुक्तं शेषं प्रागिव कल्पयेत् ।
प्रागुक्तनाग मा(चाऽऽ)ख्यातं ना(ता)स्त्रियुक्तं परिकल्पयेत् ॥ ४७ ॥
पञ्चभूमिसमाख्यातं षट्तलं च युगं शृणु ॥ ४८ ॥

इति काश्यपशिल्पे पञ्चतलविधानो नाम द्वात्रिंशः पटलः ।

अथ त्रयस्त्रिंश. पटलः ।

षड्भूमिः ।

अथ वक्ष्ये विशेषेण षड्भूमिकविधिं परम् ।
तस्य विस्तारतुङ्गं तु प्रासादमानवद्भवेत् ॥ १ ॥
विस्तारं रुद्रधा भज्य गुणांशं गर्भगेहकम् ।
द्विभागं गृहविष्कं स्यादलिन्द्रं शिवभागयो ॥ २ ॥
हारं शिवांशमानेन अलिन्द्रं वा स्थलं भवेत् ।
धरातले द्वित्रिभूमौ ... ..., ... ॥ ३ ॥
वा(पा)दे तास्था(तस्था)पनं यत्र तावद्वै सुहृदं घनम् ।
बाह्मेचितमलंकारं घनाभ्यन्तरवद् भवेत् ॥ ४ ॥
रव्यंशं विभजेत्तारं विन्यासं सूत्रयोत्त(स्त)रम् ।
आरं सौष्टिकविस्तारं कोष्ठं तद्द्विगुणायतम् ॥ ५ ॥
भागेन पञ्जरव्यासं शेषं हारान्तरं भवेत् ।
चतुष्कूटाष्टकोष्ठे च भानुपञ्जरसंयुतम् ॥ ६ ॥
हारान्तरं चतुर्विंशत्कल्पयेदतिभूतले ।
पञ्जरं हर्म्यमध्ये तु कण्ठेषु सौष्टिकं भवेत् ॥ ७ ॥
पार्श्वयोः कर्णकूटस्य पञ्जरं परिकल्पयेत् ।
कोष्ठपञ्जरयोर्मध्ये कल्पयेत्तु विशेषतः ॥ ८ ॥
तदूर्ध्वभूदशांशेषु व्योमांशं कर्णकूटकम् ।
मध्ये पञ्जरमेकांशं कण्ठकूटमिवाऽऽकृतिः ॥ ९ ॥
द्विभागं कोष्ठदीर्घं स्यादर्धांशं पञ्जरस्य तु ।
शेषं हारान्तरं ख्यातमेषां संख्याऽऽदिभूमिवत् ॥ १० ॥
तस्योर्ध्वभूविशालं तु नवभागविभाजिते ।
कण्ठकूटमथांशेन मध्यशाला गुणांशकम् ॥ ११ ॥
पञ्जरव्यासमेकांशमर्धांशं हारयोऽन्तरम् ।
तदूर्ध्वं षडुभागं तु शिवांशं कूटविस्तृतम् ॥ १२ ॥

मध्ये कोष्ठद्विभागेन एकांशं पञ्जरस्ततम् ।
हारान्तरमथार्धांशं कल्पयेत्कल्पवित्तमः ॥ १३ ॥
तस्योर्ध्वभूमिविस्तारं षड्भागं विभजेत्समम् ।
कूटमेकांशमानेन कोष्ठायामं तु तद्द्वयम् ॥ १४ ॥
अर्धांशं पञ्जरव्यासं शेषं हारान्तरं भवेत् ।
तदूर्ध्वभूमिविस्तारमर्धांशं मध्यभद्रकम् ॥ १५ ॥
दण्डं वाऽध्यर्धदण्डं वा द्विदण्डं भद्रनीव्रकम् ।
तत्तुङ्गं सप्तपञ्चाशदंशं कृत्वा तु दैशिकः ॥ १६ ॥
अधिष्ठानोच्चपञ्चाग्निषड्भागं चरणोदयम् ।
पादहीनाग्निभागं तु प(म)ञ्चमानमुदाहृतम् ॥ १७ ॥
पादोच्चं सार्धपञ्चांशं मञ्चं सार्धविभागया ।
पादाधिकं तु पञ्चांशं पादायाममिति स्मृतम् ॥ १८ ॥
सार्धद्विभागमञ्चोच्चं पञ्चांशं चरणोदयम् ।
पादोदयं द्विभागं तु प्रस्तरोदयमीरितम् ॥ १९ ॥
पादहीनं तु पञ्चांशं तलिपस्योदयं भवेत् ।
द्विभागं प्रस्तरं ख्यातमर्धाधिक्यं युगांशकम् ॥ २० ॥
पादायाममिदं ख्यातं पादोनद्व्यंशमञ्चकम् ।
व्योमांशं वेदिकामानं पादोनद्व्यंशकं गलम् ॥ २१ ॥
सार्धवेदांशमानेन शीर्षकं परिकल्पयेत् ।
पक्षांशं तु विमानं च षड्भूमिकमेव हि ॥ २२ ॥
साष्टाविंशत्ति(त्त)लानि स्युर्विंशत्कूटसमन्वितम् ।
षडष्टपञ्जरोपेतं पादं प्रत्यल्पनासिकम् ॥ २३ ॥
होमादिस्तूपिपर्यन्तं चतुरश्रं प्रकल्पयेत् ।
शिखरे तु महानासिचत्वारि(सीश्चतस्रः)परिकल्पयेत् ॥ २४ ॥
अम्बुजासनमाख्यातं सर्वदेवप्रियावहम् ।
तदेव शिखरं कण्ठं वस्वश्रं परिकल्पयेत् ॥ २५ ॥
अशेषसौष्ठिकान्तं तु शीर्षकं चतुरश्रकम् ।
उन्नतावनतोपेतं भद्रं वाऽभद्रकोष्ठकम् ॥ २६ ॥
सान्तरप्रस्तरोपेतौ हीनौ वाऽपि समुन्नतौ ।
सुशांकरमिदं ख्यातं तदेवं सौष्ठिशीर्षकम् ॥ २७ ॥

वृत्ताकारं प्रकर्तव्यं नाम्ना तद्भद्रलीनकम्।
तदेव शिखरे चाष्टौ कल्पि(ल्प)तास्वल्पनासियुतं महत् ॥ २८ ॥
शिवभद्रमिति ख्यातं शिवप्रीतिकरं परम्।
तदेव दुग्धश्रवृत्ताभं शीर्षकं गलसंयुतम् ॥ २९ ॥
मुखे ललाटनासाढ्यं नागेन्द्रमिति संज्ञितम्।
षड्भूमिरेवमाख्याता सप्तभूमिमथोपरि ॥ ३० ॥

इति काश्यपशिल्पे षड्भूमिविधानं त्रयस्त्रिंशः पटलः।

अथ चतुस्त्रिंशः पटलः।

सप्तभूमिः।

अथ वक्ष्ये विशेषेण सप्तभूमेस्तु लक्षणम्।
प्रासादमानविधिना व्यासोदयं प्रकल्पयेत् ॥ १ ॥
रव्यंशं विभजेच्चारं वेदांशं गर्भगेहकम्।
पक्षांशं भित्तिविष्कम्भमेकेनालिन्द्रमिष्यते ॥ २ ॥
हारान्तक(र)मथांशेन परितः कल्पयेद्बुधः।
विन्याससूत्रयोरन्तं भान्वंशेन समं भवेत् ॥ ३ ॥
एकांशं कूटविस्तारं कोष्ठं तद्द्विगुणायतम्।
पञ्जरव्यासमेकांशं शेषं हारान्तरं भवेत् ॥ ४ ॥
चतुष्कूटाष्टशाला च भानुपञ्जरसंख्यया।
तस्योर्ध्वभूमिविस्तारं धर्मभागविभाजिते ॥ ५ ॥
कर्णकूटं च कोष्ठं च पूर्ववत्परिकल्पयेत्।
पञ्जरव्यासमर्धांशं शेषं तारान्तरं भवेत् ॥ ६ ॥
तस्योर्ध्वभूमिविस्तारं धर्मभागविभाजिते।
पञ्जरं कूटकोष्ठं च पूर्ववत्परिकल्पयेत् ॥ ७ ॥
ऊर्ध्वभूमौ नवांशे तु मध्ये शालाऽग्निभाजिते।
व्योमांशं कर्णकूटं स्यादेकांशं पञ्जरस्ततम् ॥ ८ ॥

हारान्तरमथार्धांशं तस्योर्ध्वं वसुभाजिते ।
मध्ये शाला द्विभागेन शेषं पूर्ववदाचरेत् ॥ ९ ॥
तदूर्ध्वभूमिविस्तारं रसभागविभाजिते ।
कूटमेकांशमित्युक्तं शाला तद्द्विगुणायता ॥ १० ॥
अर्धांशं पञ्जरव्यालं शेषं हारान्तरं भवेत् ।
तदूर्ध्वं भूम्य(भ्व)ग्निभागैकं मध्ये दण्डेन निर्गतम् ॥ ११ ॥
सप्तषष्टी(ष्टि)तिभागं तु कर्तव्यं सदनोदयम् ।
सपादाग्निरधिष्ठानं सार्धषट्काङ्घ्रितुङ्गकम् ॥ १२ ॥
तदर्धं मञ्चमानं तु षड्भागं चरणोदयम् ।
स्त्रीपादवद्द्विभागं तु मञ्चमानमुदाहृतम् ॥ १३ ॥
सार्धभूतांशमङ्घ्र्युच्चं सार्धद्व्यंशं तु प्रस्तरम् ।
सपादपञ्चभागं तु स्तम्भमानमुदाहृतम् ॥ १४ ॥
प्रस्तरं सार्धपञ्चांशं भूतांशं चरणोदयम् ।
सपाद्द्विभागं मञ्चं स्यात्स्त्रीपादं[तृ]युगांशकम् ॥ १५ ॥
चरणोदयमित्युक्तं प्रस्तरोच्चं द्विभागया ।
पादोच्चं सार्धवेदांशं पादोनद्व्यंशमञ्चकम् ॥ १६ ॥
व्योमांशं वेदिकोत्सेधं पादोनद्व्यंशकं गलम् ।
अर्धाधिकयुगांशं तु शिखरोदयमिष्यते ॥ १७ ॥
पक्षांशं स्तूपिमानं तु गव्यं (र्यं) सप्ततलं विदुः ।
पञ्जरं कूटकोष्ठं च समसूत्रे तु कल्पितम् ॥ १८ ॥
होमाद्राग्र्युग्मार्धं तु शिखरे वेदनासिका ।
शालापड्विंशतियुक्तं भानुद्विगुणकूटकम् ॥ १९ ॥
षष्टिपञ्जरसंयुक्तं पादं प्रत्यग्रपञ्चासिका ।
नानाधिष्ठानसंयुक्तमेकाकारमथापि वा ॥ २० ॥
एकेनाकृतिरङ्घ्री तु समुज्ज्वलमुदाहृतम् ।
तदेवान्तरकूटाः स्युः सान्तरप्रस्तरान्वितम् ॥ २१ ॥
श्रीच्छन्दमिति विख्यातं सर्वदेवार्हकं परम् ।
तदेव नतकूटाश्च कोष्ठोनान्ताः (श्चानन्ताः कोष्ठाः) समञ्चकाः ॥२२॥
श्रीविशालमिति ख्यातं सर्वदेवप्रियावहम् ।
तदेव शीर्षकण्ठं च अष्टाश्रं वेदिका तथा ॥ २३ ॥

श्रीकान्तमिति विख्यातं कूटकोष्ठसमं तु वा ।
समं च नतकूटं स्याच्छ्रीप्रियं तदुदाहृतम् ॥ २४ ॥
तदेव वृत्तशिखरं स्तूपिं चैव गलं तथा ।
रुद्रकान्तमिति ख्यातं रुद्रप्रीतिकरं परम् ॥ २५ ॥
तदेव कर्णकूटं तु वेदाश्राष्टाश्रमण्डलम् ।
क्रमेणाऽऽदितलात्कल्प्यं वृत्तभद्रमिदं परम् ॥ २६ ॥
तदेवोन्नतकूटं च नतशालासमन्वितम् ।
कूटमस्तकवृत्तं च सुवि(वृ)त्तमिति विद्यते ॥ २७ ॥
सोन्नतं कूटकोष्ठं च पञ्जरोन्नतमञ्चकम् ।
यथेष्टं शिखराकारं कण्ठं स्तूपिघटं तथा ॥ २८ ॥
युगाश्रं शीर्षकोपेतं कण्ठकूटं प्रकल्पयेत् ।
शिवभद्रमिति ख्यातं शिवप्रीतिकरं परम् ॥ २९ ॥
तदेव कूटकोष्ठं तु दण्डं वाऽप्यर्धदण्डकम् ।
द्विदण्डं वाऽथ निष्क्रान्तं भद्रं वा भद्रपञ्जरम् ॥ ३० ॥
नानाधिष्ठानसंयुक्तं नानापादैरलंकृतम् ।
नानाचित्रैर्विचित्रं तु शिवसौख्यमुदाहृतम् ॥ ३१ ॥
तदेव गर्भगेहं तु वृत्तं वाऽथ युगांशकम् ।
वृत्तमेवं हि वाऽथे तु वृत्ताभं सौष्ठिकान्वितम् ॥ ३२ ॥
शेषं पूर्ववदुद्दिष्टं नानासर्वाङ्गमण्डलम् ।
पञ्जरं कूटकोष्ठं च अन्तरप्रस्तरं विना ॥ ३३ ॥
यथेष्टं शिखराकारं शिवप्रीतिकमिष्यते ।
एवं सप्ततमं(लं) ख्यातं वसुभूमिमथोपरि ॥ ३४ ॥

इति काश्यपशिल्पे सप्तभूमिविधानं नाम चतुस्त्रिंशः पटलः ।

अथ पञ्चत्रिंशः पटलः ।

वसुभूमिः ।

अथ वक्ष्ये विशेषेण वसुभूमिविधिं परम् ।
प्रासादमानविधिना संग्राह्यं विस्तृतोदयम् ॥ १ ॥

त्रयोदशविभागं तु कृत्वा प्रासादविस्तृतम् ।
भूतांशं गर्भगेहं तु द्विभागं गृहपिण्डिका ॥ २ ॥
अलिन्द्रं चैकभागेन हार भागेन कल्पयेत् ।
अथवाऽनलभागेन गर्भगेहं विधीयते ॥ ३ ॥
भागेन ग्रहपिण्डः स्यादलिन्द्रं त्वेकभागया ।
कुड्यमेकेन कर्तव्यमलिन्द्रं तु विनांऽशकम् ॥ ४ ॥
तदर्धं पञ्जरव्यासं भद्रं वाऽभद्रमेव वा ।
भानुकोष्ठं चतुष्कूटं कलापञ्जरसंयुतम् ॥ ५ ॥
हारान्तरं च द्वात्रिंशत्कल्पयेदादिभूतले ।
वर्षस्तलमलिन्द्रं स्यात्प्रस्तरान्तघनीकृतम् ॥ ६ ॥
तदूर्ध्वभूमिविस्तृतं त्रयोदशविभाजिते ।
कूटकोष्ठादिसर्वाङ्गमादिभूमिमिवैव तु ॥ ७ ॥
तस्योर्ध्वभूविशालं तु भानुभागविभाजिते ।
कर्णकूटं तदेकांशं शालाभागद्विभागया ॥ ८ ॥
अर्धांशं पञ्जरव्यासं शेषं हारान्तरं भवेत् ।
पञ्जरं कूटकोष्ठं च संख्या त्वादितलोक्तवत् ॥ ९ ॥
हारान्तरमथार्धांशं लम्बपञ्जरसंयुतम् ।
तदूर्ध्वभूमिविभागं तु वसुभागविभाजिते ॥ १० ॥
कर्णकूटं तदेकांशं मध्ये शाला द्विभागया ।
पञ्जरव्यासमेकांशमर्धांशं हारयो(याऽ)न्तरम् ॥ ११ ॥
चतुष्कूटं चतुःशूलं वसुपञ्जरसंयुतम् ।
हारान्तरं तथा प्रोक्तं कल्प्यैवं षट्तलं भवेत् ॥ १२ ॥
तदूर्ध्वभूमिभागं तु षड्भागं विभजेत्समम् ।
कूटव्यासमे(सै)कांशमित्थं मध्ये कोष्ठं द्विभागया ॥ १३
अर्धांशं पञ्जरव्यासं शेषं हारान्तरं भवेत् ।
तदर्धं पञ्जरव्यासं भद्राभद्रं तु एव वा ॥ १४ ॥
भानुकोष्ठं चतुष्कूटं कपालं ज(लान्त)रसंयुतम् ।
हारान्तरं च द्वात्रिंशत्कल्पयेदादिभूतले ॥ १५ ॥
वर्षस्तलमलिन्द्रं स्यात्प्रस्तरं त्वघनीकृतम् ।
तदूर्ध्वभूमिविस्तारं त्रयोदशविभाजिते ॥ १६ ॥

कूटकोष्ठादिसर्वाङ्गमादिभूमिमिवैव तु ।
तस्योर्ध्वभूविशालं तु भानुभागविभाजिते ॥ १७ ॥
कूटकोष्ठादिसर्वाङ्गं मानसंख्यादि पूर्ववत् ।
तदूर्ध्वभूदशांशे तु कूटकोष्ठं च पूर्ववत् ॥ १८ ॥
हारान्तरमथार्धांशं लम्बपञ्जरसंयुतम् ।
तदूर्ध्वभूविशालं तु वसुभागविभाजिते ॥ १९ ॥
कर्णकूटं तदेकांशं मध्ये शाला द्विभागया ।
पञ्जरव्यासमेकांशमर्धांशं हारयोत्तरम् ॥ २० ॥
चतुष्कूटं चतुःशालं वसुपञ्जरसंयुतम् ।
हारान्तरं तथा प्रोक्तं कल्प्यैवं षट्तलं भवेत् ॥ २१ ॥
तदूर्ध्वभूविशालं तु षड्भागं विभजेत्समम् ।
कूटमेकांशमित्युक्तं मध्ये कोष्ठं द्विभागया ॥ २२ ॥
अर्धांशं पञ्जरव्यासं शेषं हारान्तरं भवेत् ।
तदूर्ध्वभूविशालाढ्ये मध्ये दण्डेन नीव्रकम् ॥ २३ ॥
कूटात्कोष्ठं तु नीव्रं वा मध्यशाला त्वनीव्रका ।
कूटं कोष्ठमशेषं तु समसूत्रग(त्रेण) एव वा ॥ २४ ॥
ससप्तसप्तांशभागं कृत्वा हेमसमुच्चयम् ।
सार्धत्रिंशमधिष्ठानं सप्तांशं चरणोदयम् ॥ २५ ॥
प्रस्तरं तु सपादाग्नि सार्धषट्काङ्घ्रितुङ्गकम् ।
सार्धद्विभागमश्चोच्चं कल्पयेत्तु विशेषतः ॥ २६ ॥
सपादपञ्चभागं तु चरणोदयमीरितम् ।
प्रस्तरं साध्यपक्षांशं भूतांशं चरणोदयम् ॥ २७ ॥
सपादभागमश्रं स्यात्पादं पादोनपञ्चकम् ।
मञ्चमानं द्विभागं तु सार्धं पादयुगांशकम् ॥ २८ ॥
सत्रिपादांशमश्चोच्चं व्योमांशं वेदिकोदयम् ।
कण्ठपादेन पक्षांशं सार्धवेदांशशीर्षकम् ॥ २९ ॥
कण्ठमानं समं स्तूपितुङ्गमित्यत्र कथ्यते ।
स्तूप्यन्तं तदुपानादि वेदाश्रं परिकल्पयेत् ॥ ३० ॥
श्रौष्ठ(अष्ठा)श्रं च युगांशं स्यात्स्तम्भं प्रत्यल्पनासिकम् ।
शिखरे तु चतुर्नासियुक्तास्ते स्युर्महान्तराः ॥ ३१ ॥

एकाकारतलं स्तम्भं शिवच्छन्दमुदाहृतम् ।
तदेव नतशाखाः स्युर्मञ्चमाः(काः) सौष्ठिकोन्नतम् ॥ ३२ ॥
वागीशमिति विख्यातं सर्वदेवप्रियावहम् ।
चतुरश्राष्टवृत्ताभं सौष्ठिको वा पुनः पुनः ॥ ३३ ॥
विमानशिखरं कण्ठमष्टाश्रं परिकल्पयेत् ।
तदष्टभागं विख्यातं धर्मप्रीतिकरं परम् ॥ ३४ ॥
तदेव कूटकोष्ठं च सचंवाविमव(मञ्चं वा विम)ञ्चकम् ।
समोन्नतं तथा कूटं नानाहस्तानताङ्घ्रिकम् ॥ ३५ ॥
नानाचित्रविचित्रं तु तत्पर्वतमिति स्मृतम् ।
तदेव शिखरं कण्ठं वृत्ताभं परिकल्पयेत् ॥ ३६ ॥
नाम्ना कैलासमित्युक्तं मम प्रीतिकरं परम् ।
एवमष्टतलं ख्यातं नवभूमिमथोपरि ॥ ३७ ॥

इति काश्यपशिल्पे वसुभूमिविधानं पञ्चत्रिंशः पटलः ।

अथ षट्त्रिंशः पटलः ।

नवभूमिः ।

अथ वक्ष्ये विशेषेण नवभूमिविधिं परम् ।
प्रासादमानवत्कार्यं गेहस्य सदनं तरम् ॥ १ ॥
पक्षांशं विभजेत्तारं गुणांशं गर्भगेहकम् ।
द्विभागा गृहपिण्डी स्यादलिन्द्रं त्वेकभागया ॥ २ ॥
व्योमांशं कुड्यविस्तारमलिन्द्रं तत्समं भवेत् ।
हारव्यासं शिवांशेन कल्पयेत्कल्पवित्तपः ॥ ३ ॥
अथवा षोडशांशं तु प्रासादं विभजेत्समम् ।
युगांशं गर्भगेहं तु द्विभागा गृहपिण्डिका ॥ ४ ॥
अलिन्द्रं तु शिवांशेन व्योमांशं कुड्यविस्तृतम् ।
अलिन्द्रं व्योमभागेन हारावैवं तु तत्समम् ॥ ५ ॥
विन्याससूत्रयोरन्तः कालांशं विभजेत्समम् ।
एकांशं सौष्ठिकं व्यासं कोष्ठं तद्द्विगुणायतम् ॥ ६ ॥

पञ्जरव्यासमेकांशमेकांशं कूटमानकम् ।
हारान्तरं च द्वात्रिंशत्कल्पयेदादिभूतले ॥ ७ ॥
एवमेव प्रकर्तव्यं द्वितीयं च महीतलम् ।
तृतीयमहीतलस्या(यभूतलाया)मं मनुभागविभाजिते ॥ ८ ॥
अर्धांशं पञ्जरव्यासं शेषं पूर्ववदाचरेत् ।
तदूच्चतुस्तलं चैव कल्पयेद्वैशिकोत्तमः ॥ ९ ॥
पञ्चभूमिविभागं तु भानुभागविभाजिते ।
एकांशं कूटविस्तारं शाला तद्द्विगुणायता ॥ १० ॥
अर्धांशं पञ्जरव्यासं तस्यार्धं हारयोत्तरम् ।
भानुशाला च कूटाभं पञ्जरं षोडशैव तु ॥ ११ ॥
तदूर्ध्वभूविशालं तु वसुभागविभाजिते ।
एकांशं सौष्ठिकव्यासं मध्ये भागद्विशालया ॥ १२ ॥
पञ्जरव्यासमेकांशमर्धांशं हारयोत्तरम् ।
तदूर्ध्वभूविशालं तु रसभागविभाजिते ॥ १३ ॥
एकांशं कूटविस्तारं कोष्ठं तद्द्विगुणायतम् ।
पञ्जरव्यासमर्धांशं शेषं हारान्तरं भवेत् ॥ १४ ॥
तदूर्ध्वं भूविशालं तु गुणभागविभाजिते ।
मध्यांशं दण्डमानेन निर्गमं परिकल्पयेत् ॥ १५ ॥
साष्टविंशतिभागं तु कृत्वा देहा(गेहो)दयं बुधः ।
पादोनचतुरंशं तु धरातलमिति स्मृतम् ॥ १६ ॥
पा ोच्चं सार्धसप्तांशं सार्धाग्न्यंशं तु प्रस्तरम् ।
सप्तांशं चरणोच्चं तु सपादाग्न्यंशमंश(मञ्च)कम् ॥ १७ ॥
सार्धषट्काङ्घ्रितुङ्गं तु गुणांशं मञ्चमानकम् ।
षड्भागं पादमानं तु पादोनाग्न्यंशमञ्चकम् ॥ १८ ॥
पादोच्चं सार्धभूतांशं सार्धपक्षांशमञ्चकम् ।
सपादपञ्चभागं तु पादोत्सेधं समुच्यते ॥ १९ ॥
प्रस्तरं सार्धपक्षांशं भूतांशं चरणोदयम् ।
पादाधिक्यं द्विभागं तु प्रस्तरस्योदयं भवेत् ॥ २० ॥
पादोनपञ्चकं पादं प्रस्तरोच्चं द्विभागया ।
सार्धवेदांशकं पादं पादोनद्वयंशमञ्चकम् ॥ २१ ॥

शिवांशं वेदिकोत्सेधं कण्ठं चाप्यर्धभागया ।
शीर्षं सपादवेदांशं पादोनद्व्यंशदं(सं)शिखम् ॥ २२ ॥
पादं प्रत्यल्पनासाढ्यं शिखरं वेदनासिकम् ।
समं च नतकूटाढ्यं कूटाढ्यं चतुरश्रकम् ॥ २३ ॥
होमादिस्तूपिपर्यन्तं युगाश्रं परिकल्पयेत् ।
अशेषं मध्यशालं तु पार्श्वकोष्ठं तु निर्गतिः ॥ २४ ॥
दण्डं वाऽध्यर्धदण्डं वा नाम्ना ललितभद्रकम् ।
तदेवोन्नतकोष्ठाः स्युः समं च नतभद्रकम् ॥ २५ ॥
ब्रह्मकान्तामिदं नाम्ना सर्वदेवप्रियावहम् ।
समञ्चं वाऽपि(प्य)मञ्चं वा कूटकोष्ठसमन्वितौ(तम्) ॥ २६ ॥
प्रादेशमिति विख्यातं सर्वदेवप्रियावहम् ।
तदेव शिखरं कण्ठं वस्वभ्रं (श्रं) चाष्टनासिकम् ॥ २७ ॥
युगाश्रं वसुकोणं वा वृत्तं वा सौष्ठिकं पुनः ।
सौम्यशेषं युगाश्रं स्याच्छ्रीवर्धनमिदं परम् ॥ २८ ॥
समञ्चौ कूटकोष्ठौ द्वौ विमुचौसाध(मञ्चौ वाऽथ)सदृशौ ।
वृत्ताश्रव(य)शिरोपेतं चतुर्दिग्भद्रनासिकम् ॥ २९ ॥
विदिक्षु युग्मनासाढ्यं युग्मसा(ग्मंवाऽ)युग्ममेव वा ।
युग्मं पञ्जरसंयुक्तं सुपद्ममिति विद्यते ॥ ३० ॥
तदेव वृत्तसौष्ठ्यग्रं कृतवर्धनमुच्यते ।
तदेव गर्भगेहं तु वृत्तं वृत्तगृहं भवेत् ॥ ३१ ॥
एवं नवतन्तु(लं) ख्यातं दशभूमिमथोपरि ॥ ३२ ॥

इति काश्यपशिल्पे नवभूमिविधानं षट्त्रिंशः पटलः ।

अथ सप्तत्रिंशः पटलः ।

दशभूमिलक्षणम् ।

अथ वक्ष्ये विशेषेण दशभूमेस्तु लक्षणम् ।
पार्श्वप्रासादमानोक्तप्रमाणैर्वोदयं ततम् ॥ १ ॥

कल्पयित्वा तु तत्तारं मनुभागविभाजिते ।
वेदांशं गर्भगेहं तु गृहपिण्डी त्रिभागया ॥ २ ॥
अलिन्द्रं त्वेकभागेन हारान्तरं शिवांशकम् ।
विन्याससूत्रयोरन्तर्मनुभागविभाजिते ॥ ३ ॥
तेष्टे(ष्वे)कं कूटविस्तारं बा(शा)लादीर्घं तु तद्द्वयम् ।
एकांशं पञ्जरं व्यासं पादं हारान्तरं भवेत् ॥ ४ ॥
चतुष्कूटं चतुःशालं पञ्जरं षोडशान्वितम् ।
हारान्तरं च द्वात्रिंशत्कल्पयेदादिभूतले ॥ ५ ॥
तदूर्ध्वभूमिविस्तारं त्रयोदशविभाजिते ।
एकांशं कण्ठकूटं तु शाला तद्द्विगुणायता ॥ ६ ॥
एकांशं पञ्जरव्यासं शेषं हारान्तरं भवेत् ।
ऊर्ध्वभूविस्तृतं भानुभागं कृत्वांऽशसौष्ठिकम् ॥ ७ ॥
द्विगुणं कोष्ठदीर्घं तु अर्धांशं पञ्जरस्ततम् ।
पादं हारान्तरं ख्यातं तेषां संख्यादिपूर्ववत् ॥ ८ ॥
तस्योर्ध्वतलविस्तारं रुद्रभागविभाजिते ।
पादपञ्जरविस्तारं शेषं पूर्ववदेव हि ॥ ९ ॥
तदूर्ध्वभूदशांशे तु व्योमांशं कूटविस्तृतम् ।
कोष्ठं तद्द्विगुणायामं शेषं हारान्तरं भवेत् ॥ १० ॥
हारान्तरं त्रिभागैकं पञ्जरव्यासमुच्यते ।
तस्योर्ध्वभूनवांशे तु शिवांशं सौष्ठिकं भवेत् ११ ॥
हारान्तरं द्विभागैकं पञ्जरव्यासमुच्यते ।
तस्योर्ध्वभूनवांशे तु शिवांशं सौष्ठिकं भवेत् ॥ १२ ॥
अत्यर्धांशं तु कोष्ठं स्याच्छेषं हारान्तरं समम् ।
हारान्तरं द्विभागैकं पञ्जरव्यासमुच्यते ॥ १३ ॥
शाश्वत्संख्यासरुद्रांशं सभूमिरेवमेव हि ।
अष्टांशं विभजेत्सप्ततलविस्तारमेव हि ॥ १४ ॥
कूटमेकांशमानेन मध्ये शाला द्विभागया ।
पञ्जरव्यासमेकांशं हारान्तरं तदर्धकम् ॥ १५ ॥
चतुष्कूटं चतुःशालं पञ्जराष्टकसंयुतम् ।
हारान्तरं कलासंख्यां कल्प्यैवं सप्तकं तलम् ॥ १६ ॥

सप्तांशं विभजेदष्टमत(ध)श्चैव तु विस्तरम् ।
प्राग्वत्कूटं च कोष्ठं च शेषं हारान्तरं तथा ॥ १७ ॥
....मग्निभागैकविस्तृतम् ।
नवभूमिविशालं तु षड्भागं विभजेत्समम् ॥ १८ ॥
प्राग्वत्कूटं च कोष्ठं च पञ्च(ञ्च)रं च प्रकल्पयेत् ।
तदूर्ध्वे भूमिविस्तारमनलांशविभाजिते ॥ १९ ॥
मध्ये भद्रं तदेकांशं दण्डमास्यति(नेन) निर्गतिः ।
प्रासादस्य तु चोत्सेधं शतभागविभाजिते ॥ २० ॥
युगांशं तदधिष्ठानमष्टांशं चरणायतम् ।
पादोनवेदभागं तु मञ्चमानमुदाहृतम् ॥ २१ ॥
पादोच्चं सार्धसप्तांशं प्रस्तरं सार्धवाह्लिकम् ।
धात्वंशं चरणोच्चं तु सपादाग्न्यंशमञ्चकम् ॥ २२ ॥
सार्धषट्काङ्घ्रितुङ्गं तु प्रस्तरं चाग्निभागया ।
रसांशं पाददीर्घं तु पादोनाग्न्यंशमञ्चकम् ॥ २३ ॥
पादोच्चं सार्धपञ्चांशं सार्धपक्षांशमञ्चकम् ।
पादाधिकं तु पञ्चांशं पादस्योत्सेधमुच्यते ॥ २४ ॥
सार्धपक्षांशमञ्चोच्चं पञ्चांशं पाददैर्घ्यकम् ।
पादाधिकं तु पक्षांशं मञ्चमानमुदाहृतम् ॥ २५ ॥
सत्रिपादयुगांशं तु पाददैर्घ्यमुदाहृतम् ।
प्रस्तरोच्चं द्विभागं तु सार्धवेदांशम(म)ङ्घ्रिकम् ॥ २६ ॥
पादोनद्व्यंशमञ्चः स्यात्पञ्च भागं वितर्दिका ।
तदेवोन्नतकूटादि नरकान्तमिति स्मृतम् ॥ २७ ॥
कण्ठमध्यर्धभागेन शीर्षकं सार्धवेध(द)कम् ।
पादहीनद्विभागं तु स्तूप्युत्सेधमुदाहृतम् ॥ २८ ॥
अग्राकारं युगाश्रं तु शिखरे युगनासिका ।
पादं प्रत्यल्पनासाढ्यं नानापादधरातलम् ॥ २९ ॥
अत्यन्तकान्तमित्युक्तं सर्वदेवप्रियावहम् ।
तदेवोन्नतकोष्ठं च नतं वोन्नतसौष्ठिकम् ॥ ३० ॥
पक्षशाला तु मध्यस्थं शालादण्डेन नीव्रकम् ।
अष्टाश्रं शिखरं कण्ठं शिखरं चाष्टनासिकम् ॥ ३१ ॥

नानालंकारसंयुक्तं चतुष्कूटमिदं परम् ।
तदेव कूटकोष्ठं च नान्तरप्रस्तरं परम् ॥ ३२ ॥
कूटकोष्ठादिसर्वाङ्गं समसूत्रमथापिवा ।
मन्त्रपूतमिति ख्यातं विमानं सर्वकामिकम् ॥ ३३ ॥
तदेव शिखरं कण्ठवृत्ताभं परिकल्पयेत् ।
नात्र(स्रा) कान्तमिति ख्यातं सर्वदेवार्हकं गृहम् ॥ ३४ ॥
तदेवं कर्णकण्ठानां शीर्षकं च गलं तथा ।
वृत्ताकारं प्रकर्तव्यं यत्तदीश्वरकान्तकम् ॥ ३५ ॥
दशभूभागमाख्यातं ततस्त्वेकादशातलम् ॥ ३६ ॥

इति काश्यपशिल्पे दशभूमिविधानं सप्तत्रिंशः पटलः ।

अथाष्टात्रिंशः पटलः ।

रुद्रभूमिः ।

अथ वक्ष्ये विशेषेण रुद्रभूमिविधानकम् ।
प्रासादमानविधिना संग्रहेत्तु ततोदयम् ॥ १ ॥
तिथ्यंशं विभजेत्तारं गुणांशं गर्भगेहकम् ।
पक्षांशा गृहपिण्डी स्यादलिन्द्रं त्वेकभागया ॥ २ ॥
एकांशं कुड्यविस्तारमलिन्द्रं तु शिवांशकम् ।
हारान्तरमथांशेन कल्पयेत्तु यथाक्रमम् ॥ ३ ॥
अलिन्द्रं वा घना भित्तिरथापि वा । (?)
प्रस्तरान्तं घनं वाऽपि तदूर्ध्वेऽलिन्द्रमेव वा ॥ ४ ॥
विन्याससूत्रयोरन्तर्वासः पक्षांशभाजिते ।
शिवांशं कर्णकूटं स्यात्पक्षशाला द्विभागया ॥ ५ ॥
मध्यशालाऽग्निभागा स्यादर्धांशं म(प)ञ्जरं भवेत् ।
हारान्तरं च तत्तुल्यं कल्प्यैवं ह्यादिभूतले ॥ ६ ॥
तदूर्ध्वभूविशालं तु मनुभागविभाजिते ।
शिवांशं कूटविस्तारं कोष्ठं तद्द्विगुणायतम् ॥ ७ ॥

शेषं हारान्तरं ख्यातं त्रिभागैकमपञ्जरम् ।
पञ्जरं कूटकोष्ठं च संख्या वै प्रागिवैव तु ॥ ८ ॥
तदूर्ध्वभूमिविस्तारं रुद्रांशं तु द्विभाजिते ।
पञ्जरं कूटकोष्ठं च प्रागिवैव प्रकल्पयेत् ॥ ९ ॥
तस्योर्ध्वभूमिविस्तारं दशभागविभाजिते ।
कूटं चैव तु कोष्ठं च संख्यामानं च पूर्वकम् ॥ १० ॥
तदूर्ध्वभूनवांशे तु कूटव्यासं शिवांशकम् ।
अत्यर्धांशं तु कोष्ठायां(नां) शेषं हारान्तरं भवेत् ॥ ११ ॥
हारान्तरं त्रिभागैकं पञ्जरव्यासमुच्यते ।
प्राग्वत्कूटाद्यसंख्याः स्युः कल्पयेत्कल्पवित्तमः ॥ १२ ॥
अष्टांशं विभजेदिष्टभूमेश्चैवं तु विस्तरम् ।
कूटविस्तारमेकांशं मध्ये शाला द्विभागया ॥ १३ ॥
पञ्जरं व्यासमेकांशं हारान्तं च तदर्धकम् ।
चतुष्कूटं चतुःशालं पञ्जराष्टकसंयुतम् ॥ १४ ॥
हारान्तरं कला संख्या प्रोच्यतेऽष्टकलान्वितौ(ते) ।
नवभूमिविशालं तु सप्तधा विभजेत्समम् ॥ १५ ॥
कूटव्यासमथांशेन कोष्ठदीर्घं द्विभागया ।
शेषं हारान्तरं ख्यातं तत्त्रिभागेन पञ्जरम् ॥ १६ ॥
दशभूमिविशालं तु रसभागविभाजिते ।
प्राग्वत्कूटं च कोष्ठं च पञ्जरं च प्रकल्पयेत् ॥ १७ ॥
प्रथमा(एका)दिपञ्चभूम्यन्तं भद्रपञ्जरसंयुतम्
पञ्जरं भूपरिष्ठात्तु भद्रं वा भद्रपञ्जरम् ॥ १८ ॥
ऊर्ध्वभूमिविशालं तु गुणभागविभाजिते ।
मध्यभद्रं तदेकांशं दण्डमानन निर्गतिः ॥ १९ ॥
प्रासादस्य तु चोत्सेधं शतांशं च त्रयोदश ।
कृत्वा सार्धं युगांशं तु धरातलमुदाहृतम् ॥ २० ॥
पादोच्चं सार्धवस्वंशं मञ्चमानं युगांशकम् ।
वस्वंशं चरणायामं पादोनं कंयु(च युगांशकम्) ॥ २१ ॥
चरणं सार्धसप्तांशं प्रस्तरं सार्धवह्निकम् ।
सप्तांशं पाददीर्घं तु सभादाग्निकमञ्चकम् ॥ २२ ॥

अर्धाधिकं पडंशं तु पादोच्चाग्रिस्तु मञ्चकम् ।
षडंशं पादतुङ्गं तु पादोनत्रिंशमञ्चकम् ॥ २३ ॥
सत्रिपादं तु भूतांशं पाददीर्घमुदाहृतम् ।
अर्धाधिकद्विभागं तु प्रस्तरस्योदयं भवेत् ॥ २४ ॥
सपादपञ्चभागं तु पादोदयमुदाहृतम् ।
सार्धपक्षांशमञ्चोच्चं भूतांशं चरणोदयम् ॥ २५ ॥
सपादपक्षभागं तु मञ्चमानमुदीरितम् ।
पादोनपञ्चभागं तु चरणोदयमीरितम् ॥ २६ ॥
मञ्चमानं द्विभागं स्यात्सार्धवेदांशमङ्घ्रिकम् ।
सत्रिपादशिवांशं तु प्रस्तरस्य समुच्चकम् ॥ २७ ॥
दस्वंशं वेदिकामानं कण्ठोच्चं सार्धभागया ।
अर्धाधिकं तु वेदांशं शिखरोदयमिष्यते ॥ २८ ॥
पादोनं तु द्विभागं स्यात्स्तूपेरुदयमिष्यते ।
होमादिस्तूपिपर्यन्तं युगाश्रं परिकल्पयेत् ॥ २९ ॥
शिखरे तु चतुर्दिक्षु महानासीसमन्वितम् ।
पादं प्रत्यल्पनासाढ्यं ब्रह्मकान्तं तदुच्यते ॥ ३० ॥
सौष्ठिकं सान्तरं मञ्चं विजयं तदुदाहृतम् ।
तदेव नतकूटं च कोष्ठानश्चा(चान-ता: कोष्ठाः)समञ्चकाः ॥३१॥
सर्वार्हकमिदं ख्यातं सर्वदेवार्हकं परम् ।
तदेव शिखरं कण्ठं वृत्तमष्टांशवेदिका ॥ ३२ ॥
इन्द्रकान्तमिति ख्यातं सर्वदेवार्हकं परम् ।
तदेव मध्यभद्राढ्यं कूटकोष्ठौ समौ ततौ ॥ ३३ ॥
समञ्चं वा विमञ्चं वा कूटशाला च पञ्जरम् ।
गणिकाशालकं प्रोक्तं ब्रह्मविष्णुशिवार्हकम् ॥ ३४ ॥
तदेव शिखरं कण्ठं वृत्तमष्टाक्षिवेदिकम् ।
इन्द्रकान्तमिति ख्यातं विमानं सर्वदेविकम् ॥ ३५ ॥
तदेव कर्णकूटं तु भद्रयुक्कर्णकूटकम् ।
तदेव सौष्ठिकानां तु शीर्षकं मण्डलाकृति ॥ ३६ ॥

नाम्ना कर्णविशालं तु सर्वदेवप्रियं गृहम् ।
एवमेकादशभूमिलक्षणं परिकीर्तितम् ॥ ३९ ॥

इति काश्यपशिल्पे रुद्रभूमिविधानमष्टात्रिंशः पटलः ।

अथैकोनचत्वारिंशः पटलः ।

भानुभूमिः ।

अथ वक्ष्ये विशेषेण भानुभूमिविधिं परम् ।
हर्म्यविस्तारतुङ्गं च प्रोक्तं प्रासादमानकम् ॥ १ ॥
सप्तधर्मभागं तु कृत्वा प्रासादविस्तरम् ।
तदेव सौष्ठिकानां तु शीर्षकं कुण्डलाकृति ॥ २ ॥
भूताङ्गं गृह(गर्भ)गेहं तु पक्षांशं गृहपिण्डिका ।
अलिन्द्रं त्वेकभागेन कुड्यमत्रां(र्धां)शमानतः ॥ ३ ॥
अलिन्द्रं तु शिवांशं स्याद्द्वारभागेन कल्पयेत् ।
अथवा गर्भगेहं तु गुणांशेनैव कारयेत् ॥ ४ ॥
गर्भगेहस्य तुल्यं स्याद्गृहपिण्डयास्तु विस्मृ(स्तृ)तम् ।
शेषं प्रागिव कर्तव्यमलिन्द्रं कुड्यहारया ॥ ५ ॥
विन्याससूत्रयोरन्तः सप्तदशविभाजिते ।
गुणांशं मध्यशाला स्यात्कर्णकूटं शिवांशकम् ॥ ६ ॥
तयोर्मध्ये तु पक्षांशं शालादिव्यमुदाहृतम् ।
कूटकोष्ठान्तरे चैव कोष्ठयोरन्तरेऽपि च ॥ ७ ॥
शिवांशं पञ्जरव्यासं कर्णकूटमिवाकृतिम् ।
हारान्तरं तदूर्ध्वांशं क्षुद्रपञ्जरसंयुतम् ॥ ८ ॥
एवमादितलं कुर्यादूर्ध्वं रुद्रतलोक्तवत् ।
सप्तविंशं च तं भागं कृत्वा हर्म्योदयं द्विज ॥ ९ ॥
धा(ध)रातलोच्चं भूतांशं नवांशं चरणोदयम् ।
सार्धदेवां(वेदां)शं मञ्चोच्चं शेषं रुद्रतलोक्तवत् ॥ १० ॥

एवं भानुतलं प्रोक्तं त्रयोदशतलं शृणु ॥ ११ ॥

इति काश्यपशिल्पे भानुभूमिविधानमेकोनचत्वारिंशः पटलः।

अथ चत्वारिंशः पटलः।

त्रयोदशभूमिः।

अथ वक्ष्ये विशेषेण त्रयोदशतलं परम्।
अस्य विस्तारमानं स्थ(तु) प्रासादमानवद्भवेत् ॥ १ ॥
एकोनविंशदं[शं] तु कर्तव्यं सदनं स्त(त)म।
गुणांशं गर्भगेहं तु पक्षांशं गृहपिण्डकम् ॥ २ ॥
अलिन्द्रं च शिवांशं स्याद्भित्तिः स्यादुन्नतं समम्।
अलिन्द्रं त्वेकभागेन भित्तिव्यासं शिवांशकम् ॥ ३ ॥
व्योमभागमलिन्द्रं स्याद्भित्तिव्यासं च तत्समम्।
विन्याससूत्रयोरन्तरेकोनविंशदंशके ॥ ४ ॥
शिवांशं कर्णकूटं स्यान्मध्ये शालाऽग्निभागया।
पक्षशाला च तत्तुल्यमेकांशं पञ्जरस्य तु ॥ ५ ॥
हारान्तरमथार्धांशं क्षुद्रपञ्जरसंयुतम्।
पञ्जरं कर्णकूटाभं तस्या(दा)मक्षुद्रपञ्जरम् ॥ ६ ॥
एवमादितलं प्रोक्तमूर्ध्वं भानुतलोक्तवत्।
चत्वारिंशद्द्व्याधिकये शतांशे सदनोत्सुके ॥ ७ ॥
पञ्चांशं तदधिष्ठानं दशांशं चरणोदयम्।
भूतांशं मञ्चमानं स्याच्छेषं द्वादशभूमिवत् ॥ ८ ॥
त्रयोदशतलं ह्येवं कलाभूमिमथोपरि ॥ ९ ॥

इति काश्यशिल्पे त्रयोदशभूमिविधानं नाम चत्वारिंशः पटलः।

अथैकचत्वारिंशः पटलः ।

षोडशभूमिः ।

अथ षोडशभूमिस्तु वक्ष्यते देशिकोत्तम ।
एवं क्रमेण संकल्प्य पञ्चालिन्द्रसमन्वितम् ॥ १ ॥
पञ्चहारसमायुक्तं गृहपिण्डे समानकम् ।
गर्भगेहं समांशं च वेदांशं गृहपिण्डका ॥ २ ॥
शेषं पूर्ववदुद्दिष्टमलिन्द्रादि द्विजोत्तम ।
एकद्वित्रिचतुष्पञ्च भूमौ वाऽथ धरातले ॥ ३ ॥
देवतास्थापनं कुर्यात्षोडशस्थलहर्म्यके ।
देवतास्थापनं भूमिर्यावत्तावद्धनं कुरु ॥ ४ ॥
बाह्येऽन्द्रे चिद(ह्यालिन्द्रे अ)लंकारं घनमत्यन्तरं कुरु ।
अलिन्द्रजलनत्पादाच्छादितं वा तुलादिभिः ॥ ५ ॥
प्रस्तरान्तर्घनं वाऽथ भान्तं वातात्तु तद्धनम् ।
व्यासे सवेदत्रिंशांशे कर्णकूटं शिवांशकम् ॥ ६ ॥
हर्म्यमध्ये तु वेदांशं शालायाममुदाहृतम् ।
तयोर्मध्ये तु पक्षांशे ध्वातुं सं(शेऽध्वतुङ्गं) परिकल्पयेत् ॥ ७ ॥
तयोर्मध्ये शिवांशेन पञ्जरं कर्णकूटवत् ।
हारान्तरं तयोर्मध्येद(ध्ये अ)र्धांशेनैव कल्पयेत् ॥ ८ ॥
एवं हि कल्पयेदादिभूमौ शालाष्टविंशतिः ।
कर्णकूटं तु वेदासु (दांशं) द्वात्रिंशं पञ्जरं भवेत् ॥ ९ ॥
सवेदपष्टिसंख्याः स्युर्हा(ख्यं स्याद्धा)रान्तरं द्विजोत्तम ।
एवमादितलं ख्यातं तद्धि द्वात्रिंशदंशके ॥ १० ॥
द्विभागं मध्यशाला स्याच्छेषं पूर्ववदाचरेत् ।
द्वितीयं ह्येवमाख्यातं तृतीयमधुनोच्यते ॥ ११ ॥
त्रिंशदंशद्विभागं तु कृत्वा भागान्त्रि(नं त्रि) भूमिकम् ।
कर्णकूटस्य पार्श्वस्थं पञ्जरं त्र्यर्धभागया ॥ १२ ॥
हारान्तरं तदर्धं स्याच्छेषं त्रितयभूमिवत् ।
चतुर्भूमिविशालं तु साष्टाविंशतिभागया ॥ १३ ॥

कर्णकूटसमीपस्थं शालायास्तु द्विपार्श्वयोः।
एकांशं पञ्जरव्यासं शेषं प्रागिव कल्पितम् ॥ १४ ॥
पञ्चमे तलविस्तारे षड्विंशत्यंशभाजिते।
मध्ये शाला तु वेदांशं व्योमांशं कर्णकूटकम् ॥ १५ ॥
तयोर्मध्यस्त(स्थ)शाला च तयोर्मध्ये च कोष्ठकम्।
प्रत्येकं च द्विभागेन कल्पयेत्कल्पवित्तमः ॥ १६ ॥
तयोर्मध्येऽर्धभागेन पञ्जरं कर्णकूटकम्।
हारान्तरं तदर्धेन तेषां संख्याऽऽदिभूमिवत् ॥ १७ ॥
षष्ठं च भूमिविस्तारं चतुर्विंशतिभाजिते।
मध्ये कोष्ठं द्विभागेन शेषं पूर्ववदेव हि ॥ १८ ॥
सप्तभूमि(मे)स्तु विस्तारं द्वाविंशत्यंशकं भवेत्।
शिवांशं कर्णकूटं तु मध्यशाला द्विभागया ॥ १९ ॥
तयोर्मध्ये शिवांशेन क्षुद्रकोष्ठं प्रकल्पयेत्।
तयोर्मध्ये द्विभागेन कोष्ठायाममुदाहृतम् ॥ २० ॥
अर्धांशं पञ्जरव्यासं तदर्धं हारयोत्तरम्।
पञ्जरं कूटकोष्ठं च संख्या वै प्रागिवैव तु ॥ २१ ॥
अष्टमं भूमिविस्तारं विंशत्यंशद्वि(त्रि)भाजिते।
व्योमांशं कर्णकूटं स्यान्मध्ये कोष्ठं द्विभागया ॥ २२ ॥
तयोर्मध्ये द्विभागेन कोष्ठायाममुदाहृतम्।
अर्धांशं पञ्जरव्यासं तदर्धं हारयोत्तरम् ॥ २३ ॥
पञ्जरं कूटकोष्ठं च संख्या स्यात्प्रागिवैव तु।
अष्टमं भूमिविस्तारं विंशत्यंशद्वि(त्रि)भाजिते ॥ २४ ॥
व्योमांशं कर्णकूटं स्यान्मध्ये कोष्ठं द्विभागया।
तयोर्मध्ये द्विभागेन कोष्ठायाममुदाहृतम् ॥ २५ ॥
तयोर्मध्ये शिवांशेन क्षुद्रकोष्ठं प्रकल्पयेत्।
शेषं प्रागिव कर्तव्यं तेषां संख्यादि पूर्ववत् ॥ २६ ॥
नवभूमिविशालं तु त्रिःपडंशविभाजिते।
शिवांशं कर्णकूटं स्यान्मध्ये शाला द्विभाजिता ॥ २७ ॥
तयोर्मध्येऽर्धभागेन पञ्जरं परिकल्पयेत्।
तस्यार्धेनैव तत्पार्श्वे तयेहा(योर्हा)रान्तरं भवेत् ॥ २८ ॥

तत्पार्श्वयोर्द्विभागं स्यात्कोष्ठं कुर्याद्विशेषतः ।
कूटकोष्ठान्तरे चैव कोष्ठयोरन्तरेऽपि च ॥ २९ ॥
पञ्जरं कल्पयेद्धीमानर्धांशेनैव सुव्रत ।
हारान्तरं तदर्धांशं कल्पयेत्कल्पवित्तमः ॥ ३० ॥
विंशत्कोष्ठं चतुष्कूटं पञ्जरं भानुभिर्द्वयम् ।
अ(क)ल्प्यैवं नवभूमौ तु दशभूमिम(र)थोच्यते ॥ ३१ ॥
दशभूमेस्तु विस्तारं षोडशांशविभाजिते ।
कर्णकूटं शिवांशं स्यत्तत्समं पञ्जरस्तरम् ॥ ३२ ॥
शालायामं द्विभागं स्यादर्धांशं हारयोत्तरम् ।
भानुशालाचतुष्कूटं कलापञ्जरसंयुतम् ॥ ३३ ॥
हारान्तरं तु द्वात्रिंशत्कल्पयेदशमे तले ।
एकादशतलव्यासं मनुभागविभाजिते ॥ ३४ ॥
शिवांशं कर्णकूटं तु मध्ये शाला द्विभागया ।
तयोर्मध्यस्थशालानां गुणांशं परिकल्पयेत् ॥ ३५ ॥
अर्धांशं पञ्जरव्यासं तस्यार्धं हारयोत्तरम् ।
चतुष्कूटार्कशाला च पञ्जरं षोडशान्वितम् ॥ ३६ ॥
हारान्तरं च द्वात्रिंशत्कल्पयं रुद्रतलेऽपि च ।
भानुभूमिविशालं तु भानुभागविभाजिते ॥ ३७ ॥
पञ्जरं कूटकोष्ठं च संख्या रुद्रतले तु वत्(वा) ।
सर्वेषामपि कोष्ठानां पक्षांशं प्रविधीयते ॥ ३८ ॥
त्रयोदशतलव्यासं दशभागविभाजिते ।
कर्णकूटं शिवांशेन मध्ये शाला द्विभागया ॥ ३९ ॥
तयोर्मध्येऽर्धभागेन पञ्जरं कर्णकूटवत् ।
हारान्तरं च तस्यार्धं संख्या द्वादशभूमिवत् ॥ ४० ॥
चतुर्दशतलव्यासो वसुभागविभाजिते ।
शिवांशं कर्णकूटं स्यान्मध्ये शाला द्विभागया ॥ ४१ ॥
अर्धांशं पञ्जरव्यासं तस्योर्ध्वं हारयोत्तरम् ।
चतुष्कूटं चतुःशालं पञ्जरं षोडशान्वितम् ॥ ४२ ॥
हारान्तरं चतुर्विंशत्कल्प्यैवं तु म(ब्र)नुत्तमम् ।
त्रिःपञ्चभूमिषड्भागं विस्तारं द्वि(वि)भजेत्समम् ॥ ४३ ॥

कर्णकूटं तु व्योमांशं मध्ये शाला द्विभागया।
हारान्तरं तु शशयंशं युग्मपञ्जरसंयुतम् ॥ ४४ ॥
अशेषोर्ध्वतलव्यासो वेदभागविभाजिते।
द्विभागविस्तृतं दण्डमानं नीव्रं तु मध्यमे ॥ ४५ ॥
कृत्वा प्रासादतुङ्गं तु द्विभागेन शतद्वयम्।
धरातलं तु सप्तांशं चरणं च त्रयोदश ॥ ४६ ॥
सार्धपञ्च तु मञ्चोच्चं पादोच्चं भानुसंख्यया।
प्रस्तरोच्चं तु षड्भागं रुद्रांशं चरणोदयम् ॥ ४७ ॥
सार्धभूतांशमञ्चं स्याद्दशांशं चरणोदयम्।
भूतांशं मञ्चमानं तु नवांशं चरणोदयम् ॥ ४८ ॥
सार्धवेदांशमञ्चोच्चं कल्पयेत्कल्पवित्तमः।
पादोच्चं सार्धवस्वंशं मञ्चमानं युगांशकम् ॥ ४९ ॥
वस्वंशं चरणोच्चं तु मञ्च(ञ्च)मानोदितं युत(ग)म्।
चरणं सार्धसप्तांशं प्रस्तरं सार्धचन्ति(न्हि)कम् ॥ ५० ॥
सप्ताग्निपाददीर्घं तु पादाधिक्याग्निमञ्चकम्।
अर्धाधिकं षडंशं तु पादोच्चाग्निस्तु मञ्चकम् ॥ ५१ ॥
षडंशं पादमानं तु पादोनाग्न्यंशमञ्चकम्।
अर्धाधिकं तु भूतांशं पाददैर्घ्यमुदाहृतम् ॥ ५२ ॥
अर्धाधिकं द्विभागं तु प्रस्तरस्योदयं भवेत्।
सपादपञ्चभागं तु पाददीर्घमुदाहृतम् ॥ ५३ ॥
सार्धपक्षांशमञ्चोच्चं भूतांशं चरणायतम्।
सपादपक्षभागं तु मञ्चमानमुदीरितम् ॥ ५४ ॥
पादोनपञ्चभागं तु चरणोदयमीरितम्।
पञ्चभागं द्विभागं स्यात्सार्धवेदांशमङ्घ्रिकम् ॥ ५५ ॥
सत्रिभानशिवांशं तु प्रस्तरस्य समुच्छ्रयम्।
शम्यं(श्यं)शं वेदिकामानं कण्ठोच्चं तद्द्विभागया ॥ ५६ ॥
अर्धाधिकयुगांशं तु शिखरोदयमीरितम्।
सपादांशं शिखामानं कल्पयेत्तु क्रमेण च ॥ ५७ ॥
होमादि स्तूपिपर्यन्तं युगाश्रं परिकल्पयेत्।
शिखरे तु चतुर्दिक्षु महानासीसमन्वितम् ॥ ५८ ॥

पादं प्रत्यल्पनासाढ्यं ब्रह्मकान्तमुदाहृतम्।
तदेव सोन्नतं मञ्चं सौष्ठिकोन्नतकोष्ठकम् ॥ ५९ ॥
सारस्वतमिदं ख्यातं शिवप्रियकरं गृहम्।
तदेव नतकूटं च कोष्ठोन्नतसमञ्चकम् ॥ ६० ॥
प्रादेशमिति विख्यातं सर्वेषु(र्वेस)मृद्धिकारणम्।
तदेव शिखरं कण्ठं वस्वश्रं परिकल्पयेत् ॥ ६१ ॥
शिखरेऽष्टौ(ष्ट)महानासीयुक्तं तच्छ्रीकरं भवेत्।
तदेव मध्यभद्राढ्यं कूटकोष्ठौ समोन्नतौ ॥ ६२ ॥
समञ्चौ वाऽप्यमञ्चौ वा कूटशालो द्विजोत्तम।
पार्वतीकमिदं ख्यातं मम प्रीतिकरं भवेत् ॥ ६३ ॥
तदेव शिखरं कण्ठं वृत्तमष्टाश्रवेदिकम्।
वेदिकाश्चैव वृत्ता वा वृत्ताकारघटाऽपि वा ॥ ६४ ॥
सुशांभवमिदं ख्यातं शंकरस्य प्रियावहम्।
पञ्जरं कूटकोष्ठं च शिखरं च घटं तथा ॥ ६५ ॥
एवमादीनि सर्वाणि नागराद्युचितं कुरु।
अनेनैवाथवा कुर्यादेकानेद्येक(कादि)भूमया(यः) ॥ ६६ ॥
यत्नल(न्त्रस्त)म्भेषु कर्तव्यं तलं तस्मादि(द)मञ्चकम्।
तत्तलस्योचितव्यासं तुङ्गकुडयं च गर्भकम् ॥ ६७ ॥
कर्तव्यं विधिना तेन गण्डा(घण्टा)लंकारसंयुतम्।
सालिन्द्रं सदनार्थं तु सोपानं रोहणाय वै ॥ ६८ ॥
तत्र तत्रोचितं कुर्याच्छालाभिष्ठैकताद्रुपे।
तस्याग्रे मण्डपं कुर्यादेकानेकतलं तु वा ॥ ६९ ॥
प्रायु(गु)क्तविधिना कुर्यात्सर्वालंकारसंयुतम्।
करालमुद्भिद्गुल्मासकल्पचित्तक(त्यैश्चित्ताकर्ष)णकर्मकृत् ॥ ७० ॥
नानाचित्रैर्विचित्रं तु कर्तव्यं विधिचोदितम्।
एवं यः कुरुते हर्म्यं स्वशक्त्या प्रोक्तयं तु(क्त्तु)वा ॥ ७१ ॥
इहैव धनवाञ्श्रीमान्पुत्रपौत्रकलत्रकैः।
दासीदासादिभिश्चान्यैः स्वेच्छावंशो मुदाऽन्वितः ॥ ७२ ॥

सोनेककुलजातं च या(पा)पयेत्तु मुद्रा च मा(ना) ॥ ७३ ॥

इति काश्यपे षोडशभूमिविधानमेकचत्वारिंशः पटलः ।

अथ द्विचत्वारिंशः पटलः ।

मूर्धेष्टकाविधानम् ।

अथ वक्ष्ये विशेषेण मूर्धेष्टकाविधिं परम् ।
शिखरस्योदयार्धान्ते महानास्यवसानके ॥ १ ॥
शलि(शक्ति)ध्वजावसाने वा मूर्धेष्टकां तु विन्यसेत् ।
यावत्य(द्य)दासमाप्तं तु तदा मूर्धे द्विजोऽष्टमः(ष्टका द्विज) ॥ २ ॥
एकाद्यनेकभूमानां हर्म्याणां तु विशेषतः ।
इष्टकाव्यासमायामं घनं चाद्येष्टकामिव ॥ ३ ॥
प्रासादस्याग्रतो देशे सौम्ये वायौ च गोपुरे ।
नवाष्टसप्तषट्पञ्चहस्तं वा मण्डपं ततम् ॥ ४ ॥
तद्विस्तारसमायामं चतुरश्रं समं कुरु ।
मण्डपं वा प्रपा वाऽथ षोडशस्तम्भसंयुतम् ॥ ५ ॥
चतुर्द्वारसमायुक्तं चतुस्तोरणसंयुतम् ।
पङ्क्तिं च नवं चैव वितानध्वजसंयुतम् ॥ ६ ॥
मुक्तास्रग्दर्भमालाभिरलंकृत्य विशेषतः ।
मण्डल(प)स्य त्रिभागैकां मध्ये कृत्वा तु वेदिकाम् ॥ ७ ॥
वेदाङ्गुलोन्नतां देशमुपवेदियुगत्रयम् ।
शेषं वेदिविशालं तु भानुमात्रं तदुन्नतम् ॥ ८ ॥
भानुद्व्याङ्गुलोच्चं तु दर्पणोदरसंनिभम् ।
इह चाग्निकु(स्थ)ण्डलानि चतुरश्राणि कल्पयेत् ॥ ९ ॥
अथवा वालुकैः स्तूलैः ... . ।
स्थण्डिलं कारणैर्दद्याद(कारयेदर्घाद्य)ष्टद्रोणैश्च शालिभिः॥ १० ॥
तदर्धैस्तण्डुलैस्तुभ्यं (लैःस्तूप्यं) तदर्धैश्च तिलैरपि ।
लाजैश्चैव परिस्तीर्य श्वेताब्जं परिकल्पयेत् ॥ ११ ॥

नानापुष्पैः कुशैर्दर्भैः परिस्तीर्य विचक्षणः ।
मनोन्मनीकर्णिकायां तुदलेषु व्या[दलाया]मादि शक्तितः॥१२॥
गन्धपुष्पादिभिर्यष्ट्वा सस्यमात्रैर्विशेषतः ।
लोहजं दारुजं वाऽथ स्तूपिदण्डं च कारयेत् ॥ १३ ॥
आसनं खादिरं वाऽथ तिन्तिणीसारमेव वा ।
मयूरं पद्मकण्डूरं भवेतद्दारुवत्ततम् ॥ १४ ॥
हेममुदितं ताम्रं वा त्रयसंमिश्र एव वा ।
ऊर्ध्वभूम्यग्नितुङ्गं तु स्तूपिदण्डायतं भवेत् ॥ १५ ॥
मूर्ध्नि शैलोपरिष्टात्तु स्तूप्यन्तं वा तदायतम् ।
ऊर्ध्वभूम्यत्र(मेश्च) विस्तारं स्तूपिमूलविशालकम् ॥ १६ ॥
तस्याग्रमङ्गुलव्यासे मूलाद्दारुक्रमात्कु(कृ)शम् ।
तुङ्गाणात्समं(यामात्समां)शं तु मूले वेदाश्रमाचरेत् ॥ १७ ॥
वंशं मध्यसमं त्वग्रे वृत्ताकारं प्रकल्पयेत् ।
चतुरश्रोपरिष्टात्तु सर्वं वृत्तमथापि वा ॥ १८ ॥
कर्तव्यं तस्य मूले तु शिखापान्तु(मानं तु) योजयेत् ।
दण्डमूलसमव्यासं दण्डं दण्डाग्रयोरपि ॥ १९ ॥
.... योजयेल्लोहजं बुधः ।
प्रक्षाल्य पञ्चगव्यैस्तु दण्डं चैवेष्टकाऽपि च ॥ २० ॥
कर्णिकायां न्यसेद्दण्डं कुमादीकु(क्रमादीश)महादिशि ।
चवारस्त्वेषटा(चतस्रस्त्विष्टकाः)स्थाप्याःशिलादिष्टम्भकैर्जलैः ॥२१॥
पृथिव्यादिपरीजानी दण्डं तु विलिखेद्बुधः ।
प्राग्दिश्यष्टक्रमाद्वर्भगन्धपुष्पादिभिर्यजेत् ॥ २२ ॥
स्वर्णरजतताम्रैर्वा सूत्रैः कार्पासकैस्तु वा ।
कौतुकं बन्धयेद्विप्र स्वस्वबीजमनुस्मरन् ॥ २३ ॥
ब्रह्म विष्णुं च रुद्रं च ईश्वरं च सदाशिवम् ।
शके(शैले)ष्टकादिदण्डान्तमधिदेवान्क्रमान्न्यसेत् ॥ २४ ॥
नैवेद्यं दापयेदेषां ताम्बूलं च निवेदयेत् ।
प्रत्येकं नववस्त्रेणाऽऽच्छादयेत्कूर्चसंयुतम् ॥ २५ ॥
अमितः कलाष्टधा(लशा)नष्टौ सकूर्चान्सापिधानकान् ।
गण्डा(न्धा)म्बुपूरितं(तान्) वस्त्रहेमपुष्पसमन्वितान् ॥ २६ ॥

फलपल्लवसंयुक्तानष्टौ विघ्नेश्वराधिपान् ।
संस्थाप्य स्वस्वमन्त्रेण नैवेद्यान्तं समर्चयेत् ॥ २७ ॥
ततो होमः प्रकर्तव्यो ह्यग्न्याधानादिकं कुरु ।
समिधाज्यचरुलीजयरान्सद्यादिविर्बु(च्चर्वाज्यलाजैश्च यवैः सद्ध-
विषा बु)धः ॥ २८ ॥
शतं वा शतमर्धं वा प्रत्येकं जुहुयात्क्रमात् ।
परब्रह्मषडङ्गैश्च क्षुरिकाबीजमुख्यवै(कैः) ॥ २९ ॥
आज्येन जुहुयाद्धीमान्प्रत्येकं पञ्चविंशतिम् ।
जयादिराष्ट्रधा(नाऽभ्याता)नैश्च राष्ट्रभिश्चैव(भृद्भिश्च) होमयेत् ॥
ब्रह्मादिबीजमन्त्रैस्तु ह्युष्वाभ्या(हुत्वाऽऽज्या)नि तथाऽऽहुनि(तीः) ।
एवं जागरणं रात्रौ प्रभाते विपुले शुभे ॥ ३१ ॥
आचार्य(र्यो)मूर्तिं वै(भिः)सार्धं स्नानं कृत्वा विधानतः ।
नख स्रधरोष्णीषो(ववस्त्रोष्णीषधरो) भस्मरुद्राक्षधारकः ॥ ३२ ॥
एवं यज्ञोपवीताढ्यः सितमाल्यानुलेपनः ।
हेमाङ्गुलीयकटककुण्डलाद्यैरलंकृतः ॥ ३३ ॥
यज्ञसूत्रादिसंयुक्तं भूषणैर्भूषि(ष्य)शिल्पिनम् ।
आचार्यो मण्डपं गत्वा दण्डेनाष्टघनानलान् ॥ ३४ ॥
गन्धपुष्पादिभिर्यष्ट्वा होमं कृत्वा जयादिभिः ।
स्विष्टमग्नेतिमन्त्रेण पूर्णाहुतिं समाचरेत् ॥ ३५ ॥
स्थित(र)राभ्यु(श्यु)दये विभोभयराश्युदयेऽपि वा ।
मीवो(ने)वा शुक्रसंयुक्ते तलोद्रि(तथा द)ष्टेऽथवा पुनः ॥ ३६ ॥
आचार्यशिल्पिभिश्चैव ने ह्यन्तौनुग्रहोपरि ।(!)
पुण्याहवाचनं वक्ष्य मृन्नेष्टकां निधापयेत् ॥ ३७ ॥
इष्टकास्तूपिकल्पश्च बाह्यधामप्रदक्षिणे ।
नानालंकारसंयुक्ताः कृत्वा हर्म्येऽनुलेपयेत् ॥ ३८ ॥
उत्तराभिमुखो भूत्वा आचार्यो मन्त्र(र्योऽनन्य)चेतसा ।
ब्रह्म विष्णुं च रुद्रं च ईश्वरं च सदाशिवम् ॥ ३९ ॥
विचिन्त्य स्वस्वमन्त्रैस्तु चतस्रो हीष्टाका न्यसेत् ।
पृथिव्यात्मकं क्रमं तु सौम्याग्रं शांकरेषु च ॥ ४० ॥

सुषे स्थाने मया(त्वाग्नेयमा,श्रित्य प्राग्रं रक्त(त्व)क्रमसात्मकम् ।
सुषे नैर्ऋत्यमाश्रित्य सौम्याग्रं सलिलात्मकम् ॥ ४१ ॥
सुषे वि(वा)यव्यमाश्रित्य प्राग्रं मरुतात्मकम् ।
एवं क्रमान्न्यसेद्(श्मा)त् सुनिच्छिद्रं समाचरेत् ॥ ४२ ॥
माणिक्यमरतकं(र्कतं)चैव वैडूर्यं त्विन्द्रनीलकम् ।
मौक्तिकं स्फटिकं चैव पद्मरागं प्रवालकम् ॥ ४३ ॥
वज्रं मध्ये दिषु(शि)स्थाप्यं शक्तिबीजमनुस्मरन् ।
तदूर्ध्वे स्थापयेत्स्तूपिदण्डमीशानमन्त्रतः ॥ ४४ ॥
कलशस्थोदकैः प्रोक्ष्य दण्डं चाश्म(पाषाण)पञ्चकम् ।
तत्तन्मूर्तीः समभ्यर्च्य गन्धैः पुष्पैश्च धूपकैः ॥ ४५ ॥
गलाम्भसा च सुदृढं स्थापयेद्वास्तुनिश्चलम् ।
ततोऽवशेषशिखरं कर्तव्यं स्यो(चो)दिता तथा ॥ ४६ ॥
शिखरोपरिष्टाच्च स्तूपिं प्रागुक्तविधिना कुरु ।
करालादींस्ततः कुर्यान्निश्चलं सुदृढं यथा ॥ ४७ ॥
स्वर्णैर्वा रजतैर्वाऽथ ताम्रैर्वाऽऽच्छादयेद्दृढम् ।
काञ्च(गां च) तलकृतार्थे च मा(आ)चार्याय प्रदापयेत् ॥ ४८ ॥
दक्षिणां दापयेत्तस्मै दशनिष्कं हिरण्मयम् ।
यागोपकरणं सर्वमाचार्याय च दापयेत् ॥ ४९ ॥
शिल्पिनो भो(नः पू)जयेत्पश्चाद् गोभूमिकाञ्चनादिभिः ।
एवं यः कुरुते मर्त्यः सोऽथाग्नि(सयाति)शुभदं फलम् ॥ ५० ॥

इति श्रीकाश्यपशिल्पे मूर्धेष्टकाविधानं द्विचत्वारिंशः पटलः ।

अथ त्रिचत्वारिंशः पटलः ।

प्राकारः ।

अथ वक्ष्ये विशेषेण प्राकाराणां च लक्षणम् ।
रक्षार्थं शोभनार्थं च शालास्तु(याः)सदनस्य च ॥ १ ॥

प्रासादस्य विशालार्थं(र्धं)गुणभागैग(क)मेव वा ।
चतुर्भागैकभागं वा अन्तर्मण्डलविस्तृतम् ॥ २ ॥
अन्तर्हारविशालं तु तद्बाह्ये द्विगुणं हि तत् ।
मध्यहारविशालास्तु(लं तु)बाह्यान्तं मण्डलत्रयम् ॥ ३ ॥
मध्यादेस्तु विशालं च बाह्ये त्वादिचतुर्गुणम् ।
महामर्यादिविस्तार आद्यैः पञ्चगुणो भवेत् ॥ ४ ॥
प्रासादचरणाद्विप्र द्वोवा(होमा)द्वा प्रथमस्य तु ।
प्रथमाद्द्वितीयनीव्रं तु द्वितीयात्तृतीयनीव्रकम् ॥ ५ ॥
तृतीयाच्चतुर्थं निष्क्रान्तं तस्मान्नीव्रं च पञ्चमम् ।
प्राकारं प्रतिनिष्क्रान्तं तस्मान्नीव्रं तु पञ्चमम्(तन्नीव्रं कुड्यसीमकम्)॥ ६ ॥
कुड्यमध्यमा(ध्याव)सानं वा कुडयबाह्यं तथापि वा ।
अथवा शेषविप्राणां नीव्रं होमाद्विधीयते ॥ ७ ॥
प्रथमं प्रकृतेस्तुल्यं तस्माद्गुणाङ्गुलं नतम् ।
द्वितीयाद्यं तु पञ्चान्तं तद्वदेव नतं क्रमात् ॥ ८ ॥
कल्पवं(ल्प्यं वै)हर्म्यमानेन हस्तमानमथोच्यते ।
त्रिपञ्चसप्तहस्तेन प्रथमं त्रिविधं भवेत् ॥ ९ ॥
नवैकादशहस्तं च त्रयोदशं द्वितीयकम् ।
त्रिपञ्चसप्तदशहस्तं मै(तथै)कोनविंशतिः ॥ १० ॥
मध्यहारं त्रिधा प्रोक्तं मर्यादास्तु ततः शृणु ।
एकविंशत्रयोविंशपञ्चविंशकरं भवेत् ॥ ११ ॥
सप्तविंश नवविंशमेकत्रिंशत्करेण तु ।
महामर्यादिविस्तार एवं त्रिविधमुच्यते ॥ १२ ॥
एवमाभासहर्म्याणां विकल्पानां च कल्पयेत् ।
सप्तहस्तं समारभ्य पञ्चत्रिंशावसानकम् ॥ १३ ॥
प्रत्येकं प्रथमादीनां सालानां त्रित्रिमानकम् ।
त्रिपञ्चसंख्यया प्रोक्तं हर्म्याणां चन्द्रसंख्यया ॥ १४ ॥
नवहस्तं समारभ्य हस्तत्रिंशावसानकम् ।
प्राग्वै सालसमाख्या तु हर्म्याणां जातिसंज्ञका ॥ १५ ॥
प्रागुक्तहर्म्यमानैश्च शालाद्यन्त्यं च संमतम् ।
पञ्चप्राकारमेवं हि त्रिप्राकारमथोच्यते ॥ १६ ॥

द्वितीयं तृतीयशालं च चतुर्थं च प्रगृह्यताम् ।
यत्र यद्विहितं सालं हर्म्यवृत्तं तु लक्षयेत् ॥ १७ ॥
तस्यामुखे मुखायामं कल्पयेत्कल्पवित्तमः ।
बीजात्पादबीजं त्वर्धं त्रिपादं च समं तु वा ॥ १८ ॥
द्विगुणं त्रिगुणं वाऽथ चतुःपञ्चगुणं तु वा ।
कल्पयेत्तु मुखायामं बीजमूर्ध्वं द्विजोत्तम ॥ १९ ॥
अन्तर्मण्डलभित्तेस्तु विस्तारो व्योमहस्तकः ।
तस्माच्त्रिमात्रवृद्ध्या वा पणात्रं वाऽथ वर्धयेत् ॥ २० ॥
सार्धहस्तद्विहस्तं तु महामध्यावसानकम् ।
भित्तिव्यासं समाख्यातमुत्सेधं शृणु सुव्रत ॥ २१ ॥
तद्व्यासात्त्रिचतुष्पञ्चगुणं वा सालतुङ्गकम् ।
अथवोत्तरसीमान्तं नीव्रान्तं वाजनान्तकम् ॥ २२ ॥
प्रस्तरेषु गलो वाऽथ सालतुङ्गमुदाहृतम् ।
ऋजुबीजतलोपेतं बाह्ये त्वभ्यन्तरार्जवम् ॥ २३ ॥
कुड्यमूलस्य विस्तारवस्त्वं(स्वं)शोनाग्रविस्तरम् ।
मूलादग्रं क्रमात्क्षीणं वस्वंशांशे द्विजोत्तम ॥ २४ ॥
अथवा हस्तमानेन सालोत्सेधं वदाम्यहम् ।
प्रथमं कलशान्तं तु द्वितीयं फलकान्वितम् ॥ २५ ॥
बोध्यंतं स्यात्तृतीयं तु चतुर्थं मञ्चमा(का)न्तकम् ।
पञ्चमं तु कपोतान्तं पञ्चचा(सा)लोदयं क्रमात् ॥ २६ ॥
एतद्धि पञ्चशा(सा)लेषु तासामुक्तो ह्ययं विधिः ।
आवृतं मालिका वा स्यात्सहकारमथापिवा ॥ २७ ॥
मण्डपाकृतिकं वाऽथ ऋजुमध्यमथापिवा ।
भूतवेदगुणं पक्षव्योमभूयमथोच्यते ॥ २८ ॥
कुड्यस्योपरि कुड्यं स्यात्पादं पादोपरि न्यसेत् ।
तलं प्री(प्र)ति तलं कुर्यात् पादं प्रत्यल्पनासिका ॥ २९ ॥
वक्ष्येऽहं पादमानं च पङ्क्तिमानं द्विजोत्तम ।
मूलहर्म्ये तु होमादि उत्तरान्तं यदुन्नतम् ॥ ३० ॥
तन्मानं सप्तधा भज्य पक्षांशं शु(सु)धरातलम् ।
पञ्चन्वं(श्वांशं)पाददीर्घं तु पादं सव्याङ्गसंयुक्तम् ॥ ३१ ॥

धरातलं तदुक्तं वा ह्युर्जमं वा प्रकल्पयेत् ।
मूलहर्म्ये तु होमादि उत्तरांशं नवांशके ॥ ३२ ॥
धरातलं द्विभागं स्यात्सप्तांशं चरणोदयम् ।
उत्तरान्तं तु होमादि रुद्रभागविभाजिते ॥ ३३ ॥
अधिष्ठानं गुणांशं स्याच्छेषं पादोदयं भवेत् ।
मूलप्रासादतुल्यं वा चरणं च धरातलम् ॥ ३४ ॥
पादोत्सेधांशमानं तु षट्सप्ताष्टौ तु वा भजेत् ।
एकांशं पादविष्कम्भं दारु(र)वाश्ममयं तु वा ॥ ३५ ॥
तत्त्रिभागं द्विभागं वा त्रिपादं वाऽर्ध एव वा ।
कुड्यपादस्य विस्तारं सर्वत्र परिकल्पयेत् ॥ ३६ ॥
त्रिचतुष्पञ्चहस्तं वा परितो मालिकाकृति ।
हस्तद्वयं समारभ्य पञ्चहस्तावसानकम् ॥ ३७ ॥
गुणाङ्गुलप्रवृद्ध्या च पङ्क्त्यायां पञ्चविंशतिः ।
भेदेन कथितं दिव्य सर्वत्र समपङ्क्तयः ॥ ३८ ॥
युग्मायुग्मं तु वा पङ्क्तिः सर्वत्र परिकल्पयेत् ।
मूलभागविशालं तु धर्मनन्दाष्टभाजिते ॥ ३९ ॥
एकांशरहिताग्रं स्यान्मूलादग्रं क्रमात्कृशम् ।
अग्रपादविशालं तु दण्ड इत्यभिधीयते ॥ ४० ॥
दण्डं त्रिपादमर्धं च क्रमाच्छेष्ठान्तराधमम् ।
उत्तरोत्सेधमाख्यातं विस्तारं मूलपादवत् ॥ ४१ ॥
मध्यपादसमं वाऽथ अग्रपादसमं तु वा ।
उत्तरव्यासमाख्यातं श्रेष्ठान्तराधमं क्रमात् ॥ ४२ ॥
उत्तरोच्चत्रिभागैक(र्वा)जनोत्सेधानि(धं तु)नीव्रकम् ।
उत्तरोत्सेधतुल्यं तु तुलानीव्रमुदाहृतम् ॥ ४३ ॥
तदर्धं वा त्रिपादं वा तस्य विस्तारमेव हि ।
वाजने व(गु)ल्मकोर्ध्वे वा तुलास्थापनमाचरेत् ॥ ४४ ॥
तुलार्धनीव्रविस्तारं जयन्तस्य तुलोपरि ।
जयन्य(न्ता)र्धविशालोच्चमनुमार्गमुदाहृतम् ॥ ४५ ॥
तुलान्तरं तुलोच्चं तु जयन्त्याश्च तदन्तरम् ।
मनुमार्गं तथा कल्प्यं दण्डमानेष्टकान्तरम् ॥ ४६ ॥

कपोतादीनि नीव्राङ्गप्रस्तारोक्तवदाचरेत् ।
अथवा तुलोपरिष्टात्तु इष्टकास्तरणं कुरु ॥ ४७ ॥
सुधया गुडतोयैश्च इष्टकास्तरणं भवेत् ।
करालमुद्गगुल्माः सकलकचिक्कणमाचरेत् ॥ ४८ ॥
इष्टकास्तरणं श्वेतच्छिला चेन्दुतलोपरि ।
शैलजोत्फलकाभिश्च च्छादयेत्तु विशेषतः ॥ ४९ ॥
वाजनोर्ध्वे तु वाऽऽसाद्य सुधाकर्म समाचरेत् ।
एवमादितलं प्रोक्तमूर्ध्वभूमिं वदाम्यहम् ॥ ५० ॥
मूलाग्रस्तम्भतुङ्गं तु मन्दमूलाष्टभाजिते ।
एकांशरहिताङ्घ्रिश्च तथैवोर्ध्वोर्ध्वभूमयः ॥ ५१ ॥
प्रस्तरं च तथार्धावमेकानेकतलोऽपि च ।
प्रस्तरोपरि कर्तव्यं भित्तिमेव परोदयम् ॥ ५२ ॥
छत्राकारं शिरोपेतं सदाकारमथापि वा ।
गोपानमथवा वाजं सदा कल्प्यान्तरे द्विज ॥ ५३ ॥
मृन्मयैर्लोष्टकैर्वाऽथ सारदारुमयैस्तथा ।
गोपानं छादनं कुर्याल्लुपक्रियाशिरोन्वितम् ॥ ५४ ॥
सभाकारमिदं ख्यातं यथेष्टं तेषु कल्पयेत् ॥ ५५ ॥
जातिपञ्चतलं ख्यातं छन्दवेदतलं भवेत् ॥ ५६ ॥
विकल्पं तत्तलं विद्यादाभासत्वेव भूमिके ।
जात्यादीनां तु हर्म्याणां योग्यं सालतलं कुरु ॥ ५ ।
मर्यादिसालमाश्रित्य पात(व)के पचनालयम् ।
नैर्ऋत्य आयुधस्थानं वायव्यं शयनाह्वकम् ॥ ५८ ॥
शाङ्करे योगशाला स्याद्भृशभागेऽथवा पुनः ।
आग्नेय्(ग्नेय)याम्ययोर्मध्ये कर्तव्यं जननालयम् ॥ ५९ ॥
सका(शक्र)शांकरयोर्मध्ये मञ्च(ज्ज)नालयमेव हि ।
धान्यस्थानं च तत्पार्श्वे भृङ्गराज(प)थेऽपि वा ॥ ६० ॥
निर्ऋतिवारुणीमध्ये पुस्तकारक्षता(नां महा)लयम् ।
तत्पार्श्वयोः प्रकर्तव्यं व्यञ्जनालयमुत्तमम् ॥ ६१ ॥
सोमवायव्ययोर्मध्ये वस्त्राणामालयं कुरु ।
सोमशंकरयोर्मध्ये गौर्यावासं प्रकल्पयेत् ॥ ६२ ॥

तत्पार्श्वे शयनस्थानं पर्यङ्केन समन्वितम् ।
पुष्पदन्तपदे वाऽथ महेन्द्र(माहेन्द्रे)पुष्पमण्डप (॥ ६३ ।
गृहक्षपपदे कुर्याद्धान्यालयं द्विजोत्तम ।
पाचि(रि)तो मालिकायां च एवमेव प्रकल्पयेत् ॥ ६४ ॥
मालिकात्वंरोपि(न्ते तु सो)मांशे कूपस्थानमुदाहृतम् ।
अथवाऽन्यप्रकारेण वक्ष्ये संदेशनिर्णयम् ॥ ६५ ॥
शक(शंक्र)शांकरयोर्मध्ये विद्यास्थानमुदाहृतम् ।
शंकरस्यांश(श्रीद)योर्मध्ये धनव्यास(स्थान)मुदाहृतम् ॥ ६६ ॥
याम्यपावकयोर्मध्ये पुष्पमण्डप उच्यते ।
याम्यनैरुभ(नैर्ऋत)योर्मध्ये स्नानाम्बुकोष्ठमुच्यते ॥ ६७ ॥
निर्ऋतिवारुणीमध्ये धर्मश्रवणमण्डपम् ।
वायव्यवारुणीमध्ये आयुधस्थानमुच्यते ॥ ६८ ॥
वायव्यसौम्ययोर्मध्ये शयनस्थानमुच्यते ।
ईशानसौम्ययोर्मध्ये यागार्थं मण्डपं कुरु ॥ ६९ ॥
जयन्ते मज्जनशाला(नागार)स्यादा(मा)ग्नेये पचनाद(ल)यम् ।
परितो मालिकायां तु सकलस्थानमुच्यते ॥ ७० ॥
शांकरे नृत्तमूर्तिस्तु आग्नेय्यां वृषवाहनम् ।
उमां स्कन्दं च सहितं नैर्ऋत्ये परिकल्पयेत् ॥ ७१ ॥
कङ्कालं वायुदिग्भागे भिक्षाटनं जयन्तके ।
सुखासं तु सत्यांशे वितथे त्रिपुरान्तकम् ॥ ७२ ॥
सुग्रीवे हरिकृद्धं स्याद् गन्धर्वे चन्द्रशेखरम् ।
शेषांशे कामदहनं मुख्ये कालारिमूर्तिकम् ॥ ७३ ॥
उदितेऽर्धनारिमूर्तिस्तु महेन्द्र कल्याणसुन्दरम् ।
क्षेत्रपालं तु पर्जन्ये याम्ये वै दक्षिणेश्वरम् ॥ ७४ ॥
वारुणे लिङ्गमुद्भूतं सौम्ये तु गजहारिणम् ।
इत्यर्धधर्म (हर्म्य)ईशांश्च अन्तरालेषु कल्पयेत् ॥ ७५ ॥
मूलहर्म्यं समीक्ष्यैव सकलस्थापनं कुरु ।
प्राकारेषु चतुर्दिक्षु द्वाद(र)शोभादि कल्पयेत् ॥ ७६ ॥
प्राकारततिमध्ये तु दीर्घमध्येतिवेचनम् ।
अथवा मूलहर्म्यस्य मध्यसूत्रश्रितं भवेत् ॥ ७७ ॥

प्रधानद्वारमेकं वा द्वयं वाऽन्यत्तु जालकम् ।
प्राकारमेवमाख्यातं बाह्ये विधिर्विधीयते ॥ ७८ ॥
एकद्वित्रिचतुष्पञ्चदण्डबाहादिविस्तृतम् ।
तद्बाह्ये तु त्रयश्रेणिमनेन विधिना कुरु ॥ ७९ ॥
शैवानां परिवाराणां प्राच्यमावासमुच्यते ।
प्राच्यां वा सौम्यदेशे वा देशिकावासमुच्यते ॥ ८० ॥
दैवज्ञाम्बष्ठभिषजां वासस्थानं च याम्यके ।
निबन्धाहारजावानां पश्चिमे वासमुच्यते ॥ ८१ ॥
सर्वेषामपि भक्तानां वासमुत्तरपार्श्वके ।
अग्नौ महाव्रतस्थानं याम्ये पाशुपतालयम् ॥ ८२ ॥
कलामुखं तु नैर्ऋत्ये चोर्ध्वालयं तु वारुणे ।
वायौ तु आर्हतस्थाने सौम्ये भूसुरसत्रकम् ॥ ८३ ॥
ज्ञानाभ्यासादधः कुर्याद्दैश्यानां तु विशेषतः ।
तद्बाह्ये त्वीशदिग्भागे कार्यं महाजलाशयम् ॥ ८४ ॥
याम्यपावकयोर्मध्ये गोशालांशं प्रकल्पयेत् ।
वारुणीनैर्ऋतीमध्ये सूतिकावासमुच्यते ॥ ८५ ॥
वारुणानिलयोर्मध्ये रोगार्तानां निवासकम् ।
सौम्यवानिल(यव्य)योर्मध्ये बालशिक्षार्थमण्डपम् ॥ ८६ ॥
सोमशंकरयोर्मध्ये धान्यमञ्जलिका भवेत् ।
तद्बाह्ये बलिते विप्र दासीनां गणिकादिनाम् ॥ ८७ ॥
नृत्तगेयाभ्यसानां (सतां) तु क्रयविक्रयजीविनाम् ।
चक्किनां (चक्रिणां) वापकानांच कुलालानां तथैव च ॥ ८८ ॥
मत्स्यमांसोपजीवानां न तु (नृत)कारकयोष्ठना(षिता)म् ।
पिताश्मशूद्रकानां तु गोपालानां च कारुणाम् ॥ ८९ ॥
करणानां गृहश्रेणीचापस्थानपरिग्रहम् ।
परितः कल्पयेद्धीमान्पूर्वाद्याशावसानकम् ॥ ९० ॥
तद्बाह्ये त्वीशदिग्भागे श्मशानं परिकल्पयेत् ।
दक्षिणे चोत्तरे वाऽपि स्थापत्यादिनिवासकम् ॥ ९१ ॥
तासां बाह्ये तु कर्तव्यं रजकानां निवासकम् ।
तद्बाह्ये के(क्रो)शमात्रे तु चण्डालश्रेणिरुच्यते ॥ ९२ ॥

प्राकारलक्षणं ह्येवं प्रोच्यते द्विजसत्तम ॥ ९३ ॥

इति काश्यपशिल्पे प्राकारलक्षणं त्रिचत्वारिंशः पटलः।

अथ चतुश्चत्वारिंशः पटलः।

मण्डपः।

अथ वक्ष्ये विशेषेण मण्डपानां तु लक्षणम्।
प्रासादत्वे(स्यै)कभूमौ तु प्रोच्यते मुखमण्डपः ॥ १ ॥
जातिश्च(च)न्द्रविकल्पानामाभासानां तथैव हि।
प्रासादादिमुखे चैव दिशासु विदिशासु वा ॥ २ ॥
ग्रामादीनां तु मध्ये वा दिशासु विदिशासु च।
उद्याने वा नदीतीरे तटाके वाऽथवा पुनः ॥ ३ ॥
देवार्थं मण्डपं कुर्यादष्टदिङ्मुखमण्डपम्।
प्रासादस्याग्रतः कुर्यान्मडपं तु (पाना) चतुष्टयम् ॥ ४ ॥
मुखमण्डपमादौ तु प्रतिमामण्डपं ततः।
स्नापनार्थं तृतीयं तु नृत्तार्थं च चतुष्टय(र्थक)म् ॥ ५ ॥
तेषु वै प्रथमं प्राग्वद्द्वितीयादीनि चो(दिरथो)च्यते।
अन्तप्राराणि चैतानि(हारांश्च तानेतान्)मध्यहारादि(रांश्च) वा कुरु ॥
मण्डपं म(पान्म)ण्डपं तत्र शालाद्वा मण्डपान्तरम्।
अन्तरालमिति ख्यातमादौ तल्लक्षणं शृणु ॥ ७ ॥
एकद्वित्रिश्चतुष्पञ्चषट्सप्ताष्टकरं तु वा।
नवधर्ममध(थो)वाऽपि रुद्रहस्तमथापि वा ॥ ८ ॥
अन्तरालविशालं तु(लस्य) रुद्रसंख्या प्रकीर्तिता।
यत्र यन्मण्डपं कुर्यात्तस्मिन्पङ्क्त्या विशेषतः ॥ ९ ॥
एकद्वित्रिचतुष्पञ्चभक्त्या वाऽभ्यन्तरालकम्।
सावकाशान्तरालं वा भित्तिमध्यमथापि वा ॥ १० ॥
भित्तिमध्यान्तरालं चेत्पार्श्वयोर्वेशसंयुतम्।
एकद्वित्रि अ(ऽय)ग्रपादं वा केशं (वेशं)भक्त्येकमेव वा ॥ ११ ॥

द्वयोर्मध्यमे(ध्ये च)द्वारं वा जालकं वा प्रकल्पयेत् ।
उत्तरे जलधारांश्च स्नानार्थं परिकल्पयेत् ॥ १२ ॥
युग्मायुग्मं तु पङ्क्तिर्वाऽभ्यन्तरालं द्विजोत्तम ।
अधिष्ठानादिसर्वाङ्गं मण्डपस्य समं भवेत् ॥ १३ ॥
अन्तरालं समाख्यातं शृणु मण्डपलक्षणम् ।
त्रिहस्तं तु समारभ्य द्विद्विहस्तविवर्धनात् ॥ १४ ॥
एवमेकोनविंशं तु नवधा मण्डपं भवेत् ।
आभाससदनानां तु आभासं मण्डपं भवेत् ॥ १५ ॥
एकविंशतिहस्तादिद्विद्विहस्तविवर्धनात् ।
सप्तत्रिंशतिहस्ता(त्करा)न्तं च विकल्पं नवधा भवेत् ॥ १६ ॥
आभासानां च तद्भोग(ग्यं)स्वस्वयोग्यमथापि वा ।
नवत्रिंशतिरा(तमा)रभ्य द्विद्विहस्तविवर्धनात् ॥ १७ ॥
पञ्चाधिकं तु पञ्चाशत्करांशं छन्दमुच्यते ।
सप्तपञ्चदशाऽऽरभ्य द्विद्विहस्तविवर्धनात् ॥ १८ ॥
साग्निसप्ततिहस्तान्तं प्रसृता जातिरुच्यते ।
तद्विस्तारसमं दीर्घं समाश्रं मण्डपं भवेत् ॥ १९ ॥
अध्यर्धहस्तमारभ्य षट्षडङ्गुलवर्धनात् ।
पञ्चहस्तविधिर्या(स्तावधिं या)वत् पङ्क्तिव्यासं तु कल्पयेत्॥२०॥
अर्धहस्तं समारभ्य यावत्पञ्चकरावधि ।
गुणाङ्गुलविवर्धो(द्धया,तु पङ्क्तिव्यासं प्रकल्पयेत् ॥ २१ ॥
सार्धद्विहस्तमारभ्य षडङ्गुलविवर्धनात् ।
स्तम्भानामुदयं ह्येवं स्तम्भव्यासमथोच्यते ॥ २२ ॥
वस्वङ्गुलं समारभ्य अर्धाङ्गुलविवर्धनात् ।
एकोनविंशमात्रं तु त्रयोविंशाङ्घ्रिविस्तृतम् ॥ २३ ॥
पादोच्चं भानुरुद्रांशे दश वै चाष्ट वा भजेत् ।
मूलाकारं तदेकांशं दन्तधूतूनमग्रकम् ॥ २४ ॥
तलिवा(पा)र्यतलोत्तुङ्गं सामान्यं सर्वमण्डपे ।
चली(तलि)पोच्चे तु भूतांशे द्विभागं च तलोदयम् ॥ २५ ॥
अङ्घ्रितुङ्गाग्निवेदैकभागं वाऽपि मयूरकम् ।
उपपीठमधिष्ठानं केवलं वा मसूरकम् ॥ २६ ॥

धरातलसमं प्रोक्तं द्विगुणं त्रिगुणं तु वा ।
उपपीठोदयं ख्यातमुपपीठार्थय(र्धव)त्तु वा ॥ २७ ॥
उपपीठमधिष्ठानं चरणं प्रस्तरं तथा ।
नीव्रवेशमलंकारं गुण्यं प्रागिव विद्यते ॥ २८ ॥
पङ्क्तित्रयसमायुक्तं षोडशस्तम्भसंयुतम् ।
कलाल्पनासिकोपेतं मध्ये कूटं तु एव वा ॥ २९ ॥
मण्डितं वाऽथ सर्वत्र चतुर्द्वार इति(युतं)तु वा ।
अष्टदिग्वा(ष्टदिग्द्वा)रमेकं वा द्वयं वा जालकोष्ठादिक् ॥ ३० ॥
बाह्ये सोपानसंयुक्तं चित्रितं तोरणादिभिः ।
तोरणादिविहीनं वा कल्पैवं प्रथमं भवेत् ॥ ३१ ॥
चतुर्भक्त्या विशालं तु अष्टदिग्द्वारसंयुतम् ।
पूर्वेऽपरे(र्वापर)द्विपत्ये(ङ्क्त्ये)कभक्त्या विस्तारनीव्रकम् ॥ ३२॥
मध्यस्थाङ्घ्रिं परित्यज्य ऊर्ध्वे कूटं द्विभक्तिकम् ।
वसुपञ्जरसंयुक्तं द्वितीयं मण्डपं भवेत् ॥ ३३ ॥
पञ्चभक्त्या विभाश्रं(शालं)तु मध्ये कूटं द्विभागया ।
मण्डपं परितोऽशोनद्वात्रिंशच्चरणान्वितम् ॥ ३४ ॥
भानुद्विगुणसंराष्ट्रं पञ्जराष्टकसंयुतम् ।
इष्टदिग्द्वारसंयुक्तं द्वारन्य(म)त्रैककुड्यकम् ॥ ३५ ॥
द्वारस्थाने तु सोपानं सर्वालंकारसंयुतम् ।
कुड्यकुम्भलताद्यैस्तु भूषितं तु तृतीयकम् ॥ ३६ ॥
चतुरश्रं तु षड्भक्त्या मध्ये कूटं विभागया ।
तत्कूटमष्टपादाढ्यं मध्ये रङ्गसमायुतम् ॥ ३७ ॥
चतुर्द्वारसमायुक्तमिष्टदिग्द्वारमेव वा ।
द्विभक्त्याऽपि हृतं चैव भक्त्यादिप्रथमायुतम् ॥ ३८ ॥
अष्टदिग्भद्रसंयुक्तं चतुर्दिग्भद्रमेव वा ।
चत्वारिंशतिचाष्ट्राङ्घ्रियुक्तं वा तत्र योदितम् ॥ ३९ ॥
चतुर्विंशाल्पनासाढ्यं कुड्यकुम्भलतादिक(न्वित)म् ।
तोरणाष्टकसंयुक्तं तृतीयं मण्डपं त्विदम् ॥ ४० ॥
चतुरश्रं तु सप्तांशं षष्ठ्यङ्घ्रिकसमायुतम् ।
नवभागेन तन्मध्ये कूटं वा मण्डिताङ्गणम् ॥ ४१ ॥

द्वात्रिंशदव(ल्प)नासाढ्यं चतुर्दिग्भद्रसंयुतम् ।
त्रिभागैकांशविस्तारं निर्गमं मुखभद्रकम् ॥ ४२ ॥
मध्यरङ्गसमोपेतं द्विष्ट(तमिष्ट)कुड्यसंयुत(समान्वित)म् ।
सर्वालंकारसंयुक्तं पञ्चमं परिकीर्तितम् ॥ ४३ ॥
युगाश्रमष्टभक्त्या तु अशीतिचरणान्वितम् ।
चतुर्भागेन तन्मध्ये ऊर्ध्वकूटं प्रकल्पयेत् ॥ ४४ ॥
चतुर्दिग्द्वारसंयुक्तमिष्टदिक्चा(ग्द्वा)रमेव वा ।
मुखसोषा(पा)नमग्न्यंशैर्वासनीव्रसमन्वितम् ॥ ४५ ॥
मध्यरङ्गसमायुक्तं षडष्टनासिकान्वितम् ।
सर्वालंकारसंयुक्तं सप्तमं मण्डपं भवेत् ॥ ४६ ॥
चतुरश्रं दशांशं तु भाद्वादि(न्वधि)कदशाङ्घ्रिकम् ।
मध्ये चैवाष्टदिग्भागनवकूटसमायुतम् ॥ ४७ ॥
कूटोपरि नीव्रतांशे तु अ(त्व)न्तरालं प्रकल्पयेत् ।
पार्श्वान्मुखेन सोपानं दिशि भद्रसमन्वितम् ॥ ४८ ॥
सर्वालंकारसंयुक्तमष्टमं मण्डपं भवेत् ।
रुद्रभक्त्या युगाश्रं तु मध्ये द्व्यंशेन कूटकम् ॥ ४९ ॥
मुखे सोपानसंयुक्तमिष्टदिग्भद्रसंयुतम् ।
द्वारन्य(म)त्रैव कुड्यांशमिष्टभागावसानकम् ॥ ५० ॥
सर्वालंकारसंयुक्तं नवमं मण्डपं भवेत् ।
द्वादशांशे युगाश्रं तु मध्ये द्व्यंशेन कूटकम् ॥ ५१ ॥
मण्डपस्य तु बाह्ये तु अंशेनालिन्द्रमिष्यते ।
तद्विंशेन तु विस्तारनिष्क्रान्तः स्याच्चतुर्दशी ॥ ५२ ॥
साष्टषष्टिसमं पादमाद्यङ्घ्रेः तु प्रकल्पयेत् ।
सर्वालंकारसंयुक्तं दशमं मण्डपं भवेत् ॥ ५३ ॥
पेतमण्डपस्य तदायतम् ।
तस्योचितविभागं तु कृत्वा वा मण्डलं कुरु ॥ ५४ ॥
पङ्क्तित्रयविशालं तु पञ्चपङ्क्तया विशालकम् ।
एकपार्श्वे पुरे वाऽथ पा(द्वा)रमंशेन कल्पयेत् ॥ ५५ ॥
पार्श्वे पा(द्वा)रयुतं द्वे तु त्रिंशदङ्घ्रिसमन्वितम् ।
तदेव परितोंऽशेन मण्डपाभ्यन्तरे रसः ॥ ५६ ॥

लुपादोर्ध्वं हनं कुर्यादष्टाविंशाङ्घ्रिसंयुतम् ।
पुरे पारयुतं चेत्तु चरणं चाष्टविंशतिः ॥ ५७ ॥
अथवा पारहीनं तु त्रिरष्टचरणान्वितम् ।
पादं प्रत्यल्पनासाढ्यं वेदिजालकतोरणम् ॥ ५८ ॥
नानाकुम्भलताद्यैस्तु कल्पितं प्रथमं भवेत् ।
चतुर्भित्तिविशालं तु आयामे तु षडंशकम् ॥ ५९ ॥
मण्डपं परितोंऽशेन कूटपभ्यन्तरेतरम् ।
द्विभक्तिविसृ(स्तृ)तं चैकभक्त्या तु मुखभद्रकम् ॥ ६० ॥
द्वाग्निं(द्वात्रिं)शच्चरणोपेतं मण्डपस्य द्वितीयकम् ।
विशालं पञ्चभक्त्या स्यादायामे सक्तभग(ग्नभक्त)यः ॥ ६१ ॥
त्रिपञ्चपत्ति(ङ्क्ति)विस्तारं दीर्घा मध्ये सभा भवेत् ।
मण्डपं परितोंऽशे तु इष्टदिग्भद्रसंयुतम् ॥ ६२ ॥
चत्वारिंशतिपादाढ्यं सर्वालंकारसंयुतम् ।
वेदिकाद्यैः समायुक्तं तृतीयं मण्डपं भवेत् ॥ ६३ ॥
रसभक्तिविशालं तु वसुभक्त्यायतं भवेत् ।
द्विचतुर्भक्तिविस्तारं दीर्घमध्ये महोदयम् ॥ ६४ ॥
मण्डपं परितोऽष्टांशमिष्टदीर्घकभद्रकम् ।
षष्टिसंख्याङ्घ्रिसंयुक्तं चतुर्थं मण्डपं भवेत् ॥ ६५ ॥
तारे सप्तविभागे तु नवभक्त्यायु(य)तान्वितम् ।
त्रिभक्तिविस्तृतं पञ्चभक्त्यायामसमं करम् ॥ ६६ ॥
तारत्रयोदशांशेन मध्यंशं(ध्यांशां)शेन कूटकम् ।
इष्टदिक्कुड्यसंयुक्तं चतुर्दिग्भद्रसंयुतम् ॥ ६७ ॥
प्रमुखे नन्दभागेन मुखभद्रं प्रकल्पयेत् ।
सद्वयं नवतीभक्त्या भक्त्याऽङ्घ्रिव(क)समन्वितम् ॥ ६८ ॥
सर्वालंकारसंयुक्तं द्वादशं मण्डपं भवेत् ।
त्रिपञ्चपङ्क्तिविस्तारमायामं चतुरश्रकम् ॥ ६९ ॥
मध्ये कूटं गुणांशेन श्वेने ऊर्ध्वसमन्वितम् ।
गुणांशं विस्तृतायामं मुखभद्रसमन्वितम् ॥ ७० ॥
इष्टदिक्कुड्यसंयुक्त मन्य(माय)ताङ्घ्रिसमन्वितम् ।
पञ्चांशं त्रिद्वयातिथ्या द्विशनं चरणायतम् ॥ ७१ ॥

सर्वालंकारसंयुक्तं मण्डपं तु त्रयोदशम् ।
षोडशांशे युगाश्रं तु मध्ये कूटं द्विभागया ॥ ७२ ॥
साष्टातिथेसमायुक्तं द्विशतं पादमुच्यते ।
मुखभद्रसमांशेन तदर्धे(र्धं)नेतरे दिशि ॥ ७३ ॥
सर्वालंकारसंयुक्तो मण्डपः स्याच्चतुर्दशः ।
एवं हि मनुभेदेन युगाश्रं मण्डपं विदुः ॥ ७४ ॥
इत ऊर्ध्वं चतुस्त्रिंशदंशं सीमावसानकम् ।
चतुरश्रो मण्डपः स्यात्सर्वालंकारसंयुतः ॥ ७५ ॥
भित्तिस्तम्भं च परितः कर्तुरिच्छावशान्नयेत् ।
समाश्रमण्डपं त्वेतदायामाश्रमथोच्यते ॥ ७६ ॥
विस्तारं पङ्क्तितुल्येव सा(ल्यं स्यात्सा)यतं वाऽथ पङ्क्तयः ।
विस्तारं पङ्क्तिमानं तु गुणाङ्गुलविवर्धनात् ॥ ७७ ॥
सप्तविंशाङ्गुलं यावत्तावदायनवोदितम् ।
वर्धाक्षीणं तथा वाऽथ मण्डपे न(म)करोदितम् ॥ ७८ ॥
नाश्रयेत्तु करं पूर्य(र्व)मण्डपं तु समाचरेत् ।
अशेषघटसंख्यां तु प्राग्वदायासि(म)माचरेत् ॥ ७९ ॥
मण्डपे परितोऽष्टांशे द(इ)ष्टदिग्भद्रसंयुतम् ।
त्रिभक्तिविस्तृतं चैव भक्त्या तन्मुखभद्रकम् ॥ ८० ॥
सप्ताधिकयद्वयाधिक्यं पादमित्यभिधीयते ।
सर्वालंकारसंयुक्तं पञ्चमं मण्डपं भवेत् ॥ ८१ ॥
वसुभक्तिविशालं च दशभक्त्या तथाऽन्वितम् ।
द्विचतुर्भागविस्तारदीर्घमध्यस(म)होदयम् ॥ ८२ ॥
परितो मण्डपो ह्यंशं मध्यस्तम्भविवर्जितम् ।
इन्द्रदिन्द्रमुखाभद्रां(ड्मुखभद्रं च)चतुर्द्वयेशेन सुव्रत ॥ ८३ ॥
षण्णवत्यङ्घ्रिसंयुक्तं सर्वालंकारसंयुतम् ।
षष्ठं मण्डपं ह्येव प्रोच्यते तु शिवाह्वयम् ॥ ८४ ॥
नवभक्त्या तयालं तु रुद्रभक्त्या तयान्वितम् ।
एकत्रिभक्तिविस्तारं दीर्घमध्ये सभा भवेत् ॥ ८५ ॥
परितो देवभागं तु मण्डपं परिकल्पयेत् ।
त्रिचतुर्भागविस्तारं दीर्घस्यामुखभद्रकम् ॥ ८६ ॥

सर्वालंकारसंयुक्तमष्टमं मण्डपं भवेत् ।
इष्टदिक्चारुरङ्कु स्यात्कल्पयेत्परितो भवेत् ॥ ८७ ॥
एवं हि मनुभेदं च सायतं मण्डपं विदुः ।
त्रिचतुष्पञ्चषट्सप्तभङ्गेणस्य तु एव वा ॥ ८८ ॥
सर्वेषां मण्डपानां च भित्तिव्यासं तु पञ्चधा ।
पादायामविशालेन दारुपादेन वा व्यथ(सम)म् ॥ ८९ ॥
सर्वेषां मुखभद्राणां करणं मण्डपाकृति ।
पार्श्वे सोपानसंयुक्तं हस्तिहस्तविभूषितम् ॥ ९० ॥
पञ्चषट्सप्तनवाष्टदण्डं वा तस्य विस्तृतम् ।
सपादं सार्धदण्डं वा हस्तिहस्तोदयान्वितम् ॥ ९१ ॥
यष्टिनानूर्ध्वकल्पं वा स्वश्रं हस्तिकहस्ति(स्त)कम् ।
तन्नीव्रं किपुरेरस्य अग्रं ककुन्ताकृति ॥ ९२ ॥
मूलादष्टांशरहितमग्रवा(म)स्तु क्रमात्कृशम् ।
हस्तिहस्त्यन्तरं विप्र युग्मं वाऽयुग्मद(य)ष्टयः ॥ ९३ ॥
दण्डं सपाददण्डं वा सार्धं वा द्वित्रिमात्रकम् ।
द्विदण्डं वाऽथ धीषुश्च विस्तारं स्यात्तदेव हि ॥ ९४ ॥
नेन द्विगुणनीव्रं तु अभयस्थानमण्डपे ।
यष्टेरुच्चाग्निभागैकं भागं स्यादामलोदयम् ॥ ९५ ॥
आदौ समतले स्थित्वा सव्यपादपुरःसरम् ।
सोपानारोहणं विद्यान्मर्त्यानां तु विधीयते ॥ ९६ ॥
मण्डपं ह्येवमाख्यातं गोपुरं शृणु सुव्रत ॥ ९७ ॥

इति काश्यपशिल्पे मण्डपलक्षणं चतुश्चत्वारिंशः पटलः ।

अथ पञ्चचत्वारिंशः पटलः ।

गोपुरलक्षणम् ।

अथ वक्ष्ये विशेषेण गोपुराणां तु लक्षणम् ।
अन्तर्मण्डलसालादिप्यसुन(विपुलं)प्रोच्यते क्रमात् ॥ १ ॥

द्वारशोभा द्वारशाला द्वारप्रासादहर्म्यकम् ।
द्वारगोपुरमित्येते क्रमान्नाम्ना प्रकीर्तिताः ॥ २ ॥
एकद्वित्रितला वाऽपि द्वारशोभां प्रकल्पयेत् ।
द्विभूमिर्वा त्रिभूमिर्वा चतुर्भूमिरथापि वा ॥ ३ ॥
द्वारशाला तु कर्तव्या साले स्यात्तु द्वितीयके ।
त्रिचतुष्पञ्चभूमिर्वा द्वारप्रासादमारभेत् ॥ ४ ॥
चतुष्पञ्चतलं वाऽथ षट्तलं वाऽथ हर्म्यकम् ।
पञ्चषट्सप्तभूमिर्वा द्वारगोपुरमिष्यते ॥ ५ ॥
अथवा सर्वसालेषु एकद्वित्रितलं तु वा ।
सोपपीठमधिष्ठानं... ... विनावाप्योपपीठकम् ॥ ६ ॥
तयोरुच्चयतः सर्वे नवपञ्च वदाम्यहम् ।
मूलप्रासादविस्तारं सप्ताष्टनवभाजिते ॥ ७ ॥
दशैकादशभागे च एकांशरहितं क्रमात् ।
शोभादिगोपुरान्तानां विपुलं कीर्तितं क्रमात् ॥ ८ ॥
विकल्पाहा(भा)सहर्म्याणां गोपुराणां ततस्त्वमे ।
मूलालयविशालं तु चतुष्पञ्चषडंशके ॥ ९ ॥
सप्ताष्टांशेन हीनं तु च्छन्दशोभोदयं भवेत् ।
मूलगेहत्रिभागैकं भागमर्धांशमेव च ॥ १० ॥
त्रिद्व्यंशं चतुरंशं तु गुणांशं च तथैव च ।
पञ्चभागे तु वेदांशं सालेषु प्रथमादिषु ॥ ११ ॥
शोभादिगोपुरान्तानां पतिर्जात्यायमा(जात्यायता)लयम् ।
कल्प्यैवं हर्म्यमानं स्यादथ मानवशात्ततः ॥ १२ ॥
द्विहस्तादिद्विरष्टान्तमेकहस्तविवर्धनात् ।
शोभादिगोपुरान्तानां प्रत्येकं त्रित्रिमानकम् ॥ १३ ॥
विकल्पाभासयोरेव चन्द्रहर्म्ये च लक्ष्यते ।
गुणहस्तं समारभ्य सप्तदशकरावधि ॥ १४ ॥
एकहस्तद्वि(वि)वृद्ध्या तु शोभादीनां त्रयं त्रयम् ।
चतुर्हस्तं समारभ्य यादवष्टादशं करम् ॥ १५ ॥
शोभादीनां क्रमाद्व्यासं जातिहर्म्ये विधीयते ।
प्रत्येकं त्रित्रिराकारनन्दपञ्चावधिर्भवेत् ॥ १६ ॥

रत्नमानेन विस्तारं क्षुद्राणामर्हकं क्रमात् ।
स्वस्वोदितं विकर्तव्यं विपरीतं विपत्करम् ॥ १७ ॥
अथवा त्रिचतुष्पञ्चषट्सप्ताष्टनवं करम् ।
दशैकादशहस्तं तु अधमादित्रयं त्रयम् ॥ १८ ॥
सर्वहर्म्ये तथा शा(सा)ले यथेष्टं परिकल्पयेत् ।
महत्तरे तु श्रेष्ठाग्रित्वन्तरे मध्यमत्रयम् ॥ १९ ॥
क्षुद्राल्पयोः प्रशस्ता(स्ता)नि कन्यासत्रैवमुच्यते ।
सर्वसालेषु कर्तव्यं कर्तव्यं सर्वदेशिके ॥ २० ॥
अथवाऽन्यप्रकारेण शोभादीनां च विस्तरम् ।
पञ्चहस्तं समारभ्य द्विद्विहस्तविवर्धनात् ॥ २१ ॥
त्रयोदशकारान्तं तु शोभाव्यासं तु कल्पय ।
पञ्चविंशत्कारारभ्य(भ्यं)त्रयस्त्रिंशत्कारान्तकम् ॥ २२ ॥
द्वारप्रासादविस्तारं पञ्चधा परिकीर्तितम् ।
पञ्चत्रिंशत्कारारभ्यं चत्वारिंशत्त्र्याधिकम् ॥ २३ ॥
पञ्चधा द्वारहर्म्यस्य विस्तारः परिकीर्तितः ।
सपञ्चचत्वारिंशत्पञ्चांत्रिंश(श्चाशद्वो)पुरान्तकम् ॥ २४ ॥
द्विद्विहस्तविवृद्ध्या तु पञ्चधा गोपुरान्तकम् ।
द्वारामधनसाद्याय(रसाधनसाख्यातं)ततेना(त आ)यतनं शृणु ॥ २५ ॥
सपादं सार्धपादोनद्विगुणं द्विगुणं तु वा ।
सत्रिभागैकभागं तु द्विभागं वाऽऽयतं भवेत् ॥ २६ ॥
सो(शो)भादिगोपुरान्तानामिष्टायामं प्रगृह्यताम् ।
तेषु किंञ्चिद्विशेषोऽस्ति तं विशेषं ण(न)वं शृणु ॥ २७ ॥
वि(द्वि)हस्तमानविस्तारं गृहीत्वैव विशेषतः ।
आयामं स(पु)र्ववत्कल्प्यमनेकेष्विष्टमायतम् ॥ २८ ॥
हस्तच्छन्दं प्रवृत्त्या वामन्यद्वा पूर्वमाचरेत् ।
आयादिशोभनोपेतं हस्तमानेन कल्पयेत् ॥ २९ ॥
तं विना हर्म्यमूलस्य वंशे द्वे कल्पितस्य तु ।
व्यासायामः समाख्यातस्तेषां तुङ्गमथोच्यते ॥ ३० ॥

विस्तारं सप्तधा भज्य शोभच्छं (भोच्चं) रुद्रभागया ।
तारार्ध्यादिक(र्धाधिक)तुङ्गं तु द्वारशालोच्छ्रयं भवेत् ॥ ३१ ॥
सप्तभागे तु रुद्रांशं मान्वंशं वा तृतीयके ।
विस्तारे तु नवांशे तु मध्यमं शो(स्या)च्चतुर्थके ॥ ३२ ॥
विस्तारजीवनोत्सेधे महागोपुरमुच्यते ।
होमादिस्तूपिपर्यन्तं मान्तो(नो)च्चं तु प्रकीर्तितम् ॥ ३३ ॥
विस्तारायामयोर्मानं सूत्रे प्राग्बाह्यमुच्यते ।
तद्बाह्ये कूटकोष्ठादिनीत्रं प्रासादच(व)द्भवेत् ॥ ३४ ॥
विस्तारस्य त्रिभागैकं चतुर्भागैकमेव वा ।
पञ्चभागे त्रिभागे वा प्राग्बाह्ये तु निसर्गतः ॥ ३५ ॥
सार्धहस्तं समारभ्य षट्षडङ्गुलवर्धनात् ।
पञ्चहस्तावधिर्यावत्क्षुद्राणां द्वारविस्तृतम् ॥ ३६ ॥
आल्पानां च तथा प्रोक्तं संनराणां ततः शृणु ।
त्रिहस्तं तु समारभ्य यावत्सप्तकरावधि ॥ ३७ ॥
षडङ्गुलविवृध्या तु द्वारव्यासं प्रकीर्तितम् ।
चतुर्हस्तं समारभ्य .... पञ्चदश याकरान्तकम् ॥ ३ ॥
रसमात्रविवृद्ध्या तु महते द्वारविस्तृतम् ।
तारे सप्तांशविंशांशं सप्तांशे तु दशांशकम् ॥ ३९ ॥
अत्यर्थं (र्धं) पादहीनं तु द्विगुणं द्विगुणोन्नतम् ।
सार्धपादं तु पादं वा द्वारोत्सेधं तु सप्तधा ॥ ४० ॥
लिङ्गस्य मध्यमद्वारं मध्यमं तु वदाम्यहम् ।
शक्तेश्च भूतयोर्मध्ये नवांशकविशेषतः ॥ ४१ ॥
लिङ्गमध्यं तु रामे तु द्वारमध्यं प्रयोजयेत् ।
शोभादिगोपुरान्तानां द्वारमध्यं क्रमोदितम् ॥ ४२ ॥
तन्मध्ये गोपुरायामं स्तम्भयोः पार्श्वयोः समम् ।
द्वारयोगकवाटं च द्वारलक्षणवत्कुरु ॥ ४३ ॥
गुणपङ्क्तिं समारभ्य यावदेकोनविंशतिः ।
तावत्पङ्क्तिस्तु विस्तारेष्वेवमेवं प्रकल्पयेत् ॥ ४४ ॥
यावद्भिन्द्रकृतिर्व्यस्तास्तावदेवाथ पङ्क्तयः ।
विस्तारे पञ्चभागे तु गुणांशं गर्भगेहकम् ॥ ४५ ॥

शेषं कुड्यविशालं स्यादेकभूमौ द्विजोत्तम ।
परितः कुड्यविस्तारं मानेनैव प्रकल्पयेत् ॥ ४६ ॥
एवमेकतलं ख्यातं द्वितलं तु तथोच्यते ।
विस्तारे पञ्चभागं स्यादायामेऽपि तथैव च ॥ ४७ ॥
दशांशं गर्भगेहं तु सार्धांशं कुड्यविस्तृतम् ।
कर्णकूटं तु मे(मी)नाशं शालादीर्घं विशालकम् ॥ ४८ ॥
हारान्तरं तदंशेन विस्तारे त्वेवमेव च ।
शालादीर्घं तु पञ्चांशमायामे तु प्रकल्पयेत् ॥ ४९ ॥
हारान्तरं तु कूटं च एकैकांशेन कल्पयेत् ।
कूटान्तरसमायामं शेषं हारान्तरेऽ(रा)न्वितम् ॥ ५० ॥
हारान्तरार्धमानेन भद्रं वा भद्रपञ्जरम् ।
द्वितलं ह्येवमाख्यातं त्रितलं त्वधुनोच्यते ॥ ५१ ॥
नवांशं विभजेद्वा(द्व्यास)मायामं च तलं भवेत् ।
गर्भगेहं गुणांशं स्यादंशेन ग्रहपिण्डिका ॥ ५२ ॥
अलिन्द्रं त्वेकभागेन हारव्यासं शिवांशकम् ।
कर्णकूटं शिवांशेन शालादीर्घं गुणांशकम् ॥ ५३ ॥
एकांशं पञ्जरं ख्यातमर्धांशं हारयोत्तरम् ।
कलयेबा(ल्यैव)मादिभूमिं च द्वितलं पूर्ववद्भवेत् ॥ ५४ ॥
अथवाऽन्यप्रकारेण त्रितलं शृणु सुव्रम् ।
द्वारभागं तु विस्तारं रुद्रांशं तु तदायतम् ॥ ५५ ॥
गुणांशं गर्भगेहं तु गृहपिण्ड्यंशमुच्यते ।
त्रितलं तत्समाख्यातं हारभागेन कल्पयेत् ॥ ५६ ॥
अलिन्द्रांशं तु कुड्यं वा गर्भगेहान्वितं तु वा ।
आयामे पञ्चभागेन कोष्ठदीर्घं प्रकल्पयेत् ॥ ५७ ॥
शेषं पूर्ववदुद्दिष्टं द्वितीयं द्वितलोक्तवत् ।
त्रितलं चैवमाख्यातं चतुर्भूमि(स्तल)मथोच्यते ॥ ५८ ॥
विस्तारे तु दशांशे तु तद्वदायामपञ्जयः ।
गर्भगेहत्रिभागं हि सार्धांशं कुड्यविस्तृतम् ॥ ५९ ॥

अलिन्द्रं शिवभागेन हारव्यासं तथैव च।
पञ्जरं कर्णकूटं च एकैकांशेन कल्पयेत् ॥ ६० ॥
कूटतारसमायामं शेषं हारान्तरेऽन्वितम्।
शालायामे तु वेदांशे अर्धांशं हारयोत्तम(र)म् ॥ ६१ ॥
आदिभूम्येवमाख्यातमूर्ध्वं पूर्ववदाचरेत्।
विस्तारे तु दशांशे तु भान्वंशं तु तदालयम् ॥ ६२ ॥
पूर्वेऽपरे च शालायां पञ्चभागेन कल्पयेत्।
शेषं पूर्ववदुद्दिष्टं चतुर्भूमि(स्तल)मिदं परम् ॥ ६३ ॥
तारमेकादशांशं तु आयामं च तथैव हि।
पूर्वेऽपरे च पार्श्वे च शालापञ्चांशमायतम् ॥ ६४ ॥
एकांशं पञ्जरव्यासं कूटव्यासं शिवांशकम्।
हारान्तरं तथाऽर्धांशं कल्प्यैवं(कल्प्यं वै) प्रथमं तलम् ॥ ६५ ॥
तस्योर्ध्वं त्र(भू)मयः सर्वे(र्वाः)पूर्ववत्परिकल्पयेत्।
तारमेकादशांशे तु तद्दीर्घं तु त्रयोदशे ॥ ६६ ॥
गुणांशं गर्भगेहं च द्विभागं भक्तिविस्तृतम्।
अलिन्द्रं भागया (तः) कल्प्यं हारभागेन कल्पयेत् ॥ ६७ ॥
पार्श्वे शाला तु वेदांशं षडंशं मुखपृष्ठयोः।
हारान्तरं शिवांशं स्याद्व्योमपञ्जरकूटयोः ॥ ६८ ॥
शेषं पूर्ववदुद्दिष्टं रसभूम्येवमेव तु।
त्रयोदशांशविष्कम्भे आयामे च तथैव हि ॥ ६९ ॥
भूतांशं गर्भगेहं तु गृहापिण्डी द्विभागया।
अलिन्द्रं तु शिवांशेन खण्डहर्म्यं शिवांशकम् ॥ ७० ॥
कोष्ठायामं तु भूतांशं रसांशेन च पञ्जरम्।
कूटमंशेन कर्तव्यं हारान्तरं तथैव च ॥ ७१ ॥
अथवा तत्र दशान्तरमायामं तु त्रिपञ्चकम्।
मुखे मुखे महाशाला सप्तांशेन प्रकल्पयेत् ॥ ७२ ॥
पञ्चभागेन कर्तव्यं पार्श्वयोः कोष्ठदीर्घकम्।
शेषं पूर्ववदुद्दिष्टं सर्वालंकारसंयुतम् ॥ ७३ ॥
सप्तभूमिसमाख्यातं महागोपुरकं भवेत्।

अलिन्द्रं वा विनाऽलिन्द्रं कल्पयेत्कल्पवित्तमः ॥ ७४ ॥
विनाऽलिन्द्रकृतं चेत्तु कुड्यगर्भगृहं तु वा ।
आलिन्द्रांशं तु संयोज्य कारयेत्तु द्विजोत्तमः ॥ ७५ ॥
आदिभूम्येवमाख्यातमूर्ध्वं षट्तलवद्भवेत् ।
सप्तभूमि समाख्यातं तेषां गण्यमथोच्यते ॥ ७६ ॥
पादाधिष्ठानयोस्तुङ्गं मूलप्रासादमूलकम् ।
चतुष्पञ्चषडंशं वा सप्ताष्टनव एव वा ॥ ७७ ॥
दशैकादशभागं वा कृत्वैकांशोपपीठकम् ।
अथवा हस्तमानेन द्वारं मांन(रमानं) यथोचितम् ॥ ७८ ॥
तदुच्चं तु चतुष्पञ्चषट्सप्ताष्टौ तु वा भवेत् ।
नवरुद्रांशभागं वा कृत्वैकांशं विशेषतः ॥ ७९ ॥
उपपीठोन्नतं ख्यातं शेषं तु गुणभाजिते ।
अधिष्ठानं तदेकांशं द्विभागं चरणायतम् ॥ ८० ॥
होमादुत्तरसीमान्तं द्वारमानं विधीयते ।
पादबन्धमधिष्ठानं द्वारशोभादिना कुरु ॥ ८१ ॥
स्तूप्यन्तमुत्तरान्तं च रसभागविभाजिते ।
प्रस्तरोच्चं सपादांशं शश्यंशं गलमानकम् ॥ ८२ ॥
पादोनगुणभागं तु शिरःशेषं शिखोदयम् ।
एवमेकतलं प्रोक्तं द्वितलं शृणु सुव्रत ॥ ८३ ॥
उत्तरादि शिखान्तं च नवभागविभाजिते ।
प्रस्तरं तु सपादांशं द्विभागं चरणोदयम् ॥ ८४ ॥
मञ्चमानं शिवांशं स्यात्तत्समं कंधरोदयम् ।
शिखरं सार्धपञ्चांशं सपादांशं शिखोदयम् ॥ ८५ ॥
द्वितलं ह्येवमाख्यातं त्रितलं चाधुना शृणु ।
उत्तरस्तूपिपर्यन्तं भानुभागविभाजिते ॥ ८६ ॥
सपादं प्रस्तरोत्सेधं सार्धद्व्यंशाङ्घ्रिकोदयम् ।
प्रस्तरं शशिभागेन द्विभागं चरणोदयम् ॥ ८७ ॥
मञ्चमानं शिवांशं स्यादंशं ग्रीवोदयं भवेत् ।
पक्षांशं शिखरं ज्ञेयमेकांशं स्तूपिमानकम् ॥ ८८ ॥

त्रितलं ह्येवमाख्यातं चतुर्भूममथोच्यते ।
उत्तरादिशिखांशं(न्तं) तु द्विनवांशविभाजिते ॥ ८९ ॥
पादोनद्व्यंशं मञ्चोच्चं गुणांशं चरणोदयम् ।
तदर्धं प्रस्तरोत्सेधं सार्धद्व्यंशाघ्रिकोदयम् ॥ ९० ॥
तदर्धं प्रस्तरोत्सेधं युग्मभागांघ्रितुङ्गकम् ।
तदर्धं मञ्चमानं स्यात्सार्धांशं गलमानकम् ॥ ९१ ॥
सार्धद्व्यंशं शिरोत्सेधं शिखामान शिवांशकम् ।
चतुर्भूमि(मं)समाख्यातं पञ्चभूमि(म)मथो शृणु ॥ ९२ ॥
शिखाग्रादुत्तरान्तं तु त्रयोविंशतिभाजिते ।
द्विभागं प्रस्तरोत्सेधं सार्धद्व्यंशाघ्रितुङ्गकम् ॥ ९३ ॥
तदर्धं मञ्चमानं स्यात्पादायामं गुणांशकम् ।
तस्यार्धं प्रस्तरोत्सेधं सार्धद्व्यंशाङ्घ्रितुङ्गकम् ॥ ९४ ॥
तदर्धं मञ्चमानं तु द्विभागं चरणोदयम् ।
प्रस्तरोच्चं शिवांशेन कंधरोच्चं तथैव च ॥ ९५ ॥
सार्धद्व्यंशं शिरोत्तुङ्गमेकांशं स्तूपिमानकम् ।
पञ्चभूमि(मं) समाख्यातं षड्भूमिं(मं) त्वधुना शृणु ॥ ९६ ॥
उत्तरादिशिखान्तं च एकोनत्रिंशदंशके ।
द्विभागं प्रस्तरोत्सेधं पादोच्चं चतुरंशकम् ॥ ९७ ॥
सत्रिपादशिवांशं तु भूमिं(भूमि)सामारुह्य(न्य)मीरितम् ।
सार्धाग्न्यंशाङ्घ्रितुङ्गं तु तदर्धं प्रस्तरोदयम् ॥ ९८ ॥
शिवांशं तु शिखामानं षट्तलं त्वधुनो(सप्तभूममथो)च्यते ।
उत्तरादिशिखांशं(न्तं) तु मानं पट्त्रिंशदंशके ॥ ९९ ॥
पादद्विभागं मञ्चोच्चं सार्धवेदांशमङ्घ्रिकम् ।
द्विभागं प्रस्तरोत्सेधं वेदांशं चरणोदयम् ॥ १०० ॥
पादोनद्व्यंशं मञ्चं स्यात्सार्धाग्न्यंशाङ्घ्रिमानकम् ।
पादोनद्व्यंशं मञ्चोच्चं गुणांशं पादमानकम् ॥ १०१ ॥
तदर्धं प्रस्तरोत्सेधं सार्धपक्षाङ्घ्रितुङ्गकम् ।
तदर्धं मञ्चमानं तु द्विभागं चरिता(रणा)यतम् ॥ १०२ ॥
प्रस्तरं शशिभागेन शिवांशं गलमानकम् ।
पादहीनाग्निभागं तु शिरःशेषं शिखोदयम् ॥ १०३ ॥

एवं सप्ततलं ख्यातमलंकारम(स्त्व)थोच्यते ।
मण्डपाभां यथा द्वारशोभां कुर्याद्द्विजोत्तमः ॥ १०४ ॥
मण्डं वा द्वारशाला स्यात्प्रासादं सदनाकृति ।
मालिकाकृति कर्तव्यं द्वारहर्म्यं द्विजोत्तम ॥ १०५ ॥
शालाकारं प्रकर्तव्यं द्वारं गोपुरमेव वा ।
सर्वं तु गोपुरान्तं वा वल्पयेत्कल्पवित्तमः ॥ १०६ ॥
तेष्वादौ द्वारशोभां तु वक्ष्येऽहं द्विजसत्तम ।
एकद्वित्रितलं वाऽपि सर्वालंकारसंयुतम् ॥ १०७ ॥
मुखे मुखे महानन्दपार्श्वयोर्वेशनासिका ।
स्वस्त्याकृत्यल्पनासाढ्यं प्रागुक्तविधिना द्विज ॥ १०८ ॥
युक्तस्तूपिसमायुक्तं लुपरोहशिरस्तु वा ।
मण्डपाकृतिकं वाऽपि श्रीकान्तं तदुदाहृतम् ॥ १०९ ॥
शालाकारशिरस्तस्मिन्पण्णासि(ण्णास्यो)मुखपृष्ठयोः ।
पार्श्वयोर्वेशनासाढ्यं युक्तस्तूपीव संयुतम् ॥ ११० ॥
अन्तः पादोत्तरैर्युक्तामिति कान्तमिदं परम् ।
मुखे मुखे च षण्णासि पार्श्वयोर्विंश(र्वे)शनासिका ॥ १११ ॥
सहा(मा)कारं शिरस्कन्धं कान्तं विजयमेव हि ।
एवं त्रिविधनित्यां तु द्वारशोभां प्रकल्पयेत् ॥ ११२ ॥
मुखे मुखे महानासी पार्श्वयोश्च तथैव च ।
अर्धकोटिचतस्राढ्यं पञ्जरं च तदाकृति ॥ ११३ ॥
शालाकारं शिरोपेतमयुगस्तूपिसंयुपम् ।
विशयं विशालमेतद्धि विशालालयमुच्यते ॥ ११४ ॥
अर्धकोटिसहस्राङ्गं पार्श्वयोर्भद्रनासिका ।
पार्श्वयोर्वेशनास्यङ्गमयुग्मस्तूपिकान्वितम् ॥ ११५ ॥
पादं प्रत्यल्पनासाढ्यं सर्वावयवसंयुतम् ।
विप्रतीकान्त(न्ता)लंकारं वक्ष्यते तु विशेषतः ॥ ११६ ॥
पूर्ववद्भूमिभागं च चतुर्दीभ(र्दिग्भ)द्रसंयुतम् ।
महानासीचतसा(तुष्का)ढ्यं शिरोभद्रसमन्वितम् ॥ ११७ ॥
अन्तः पादोत्तरैर्युक्तमयुग्मस्तूपिकान्वितम् ।
त्रिविधा द्वाद(र)शाला स्याद्द्वारप्रासादमुच्यते ॥ ११८ ॥

अन्तः पादोत्तरैर्युक्तं मन्धाध्यापै(मण्डपांघ्रै)रलंकृतम् ।
द्वारे द्वाराङ्गसंयुक्तं द्वारं तद्भद्रसंयुतम् ॥ ११९ ॥
पूर्वेऽपरे च शालायाः सभद्रं भद्रनासिका ।
नानामसूरकं स्तम्भवेदिकाजालतोरणम् ॥ १२० ॥
अन्तः पादोत्तरैर्युक्तं मध्यवा(तो)रणसंयुतम् ।
पार्श्वयोर्दण्डवक्रा(क्त्रा)ढ्यं क्षुद्रनास्य(सी)विभूषितम् ॥ १२१ ॥
शालाकारं शिरोपेतं जालकादिविभूषितम् ।
केशाविशालालंकारं भूमिभागे च पूर्ववत् ॥ १२२ ॥
पार्श्वयोश्च मुखे पृष्ठे महानासीचतुष्टयम् ।
अयुग्मस्तूपिसंयुक्तं द्वारप्रासादकुड्यकम् ॥ १२३ ॥
वक्ष्येऽहं तारं(द्वार)हर्म्यस्य लक्षणं द्विजसत्तम ।
प्रागुक्तवत्प्रकर्तव्यं भूमिभागे द्विजोत्तम ॥ १२४ ॥
सभाशिरस्यसंयुक्तं स्वस्तिकाकृतिनासिकम् ।
पादोत्तरैर्युतं युग्मं.....स्तूपिनाऽन्वितम् ॥ १२५ ॥
कूटं शिखरनासाढ्यमयुग्मस्तूपिनासिकम् ।
कूटादिभूमिभागं च प्रागिवैव प्रकल्पयेत् ॥ १२६ ॥
अपरे(रे च)परे नासि(स्यौ)सतारे द्व्यंशनीव्रकम् ।
शालाकार्यं(रं) शिरः कार्यं यश्वं(वस्वस्रं)स्तूपिकान्वितम् ॥१२७॥
शालानिष्क्रान्तसंयुक्तं नानालंकारसंयुतम् ।
नानाधिष्ठानचरणैर्युक्तं तत्सोपपीठकम् ॥ १२८ ॥
द्वारहर्म्यं त्रिधा प्रोक्तं शृणु गोपुरलक्षणम् ।
चतुर्दिग्भद्रसंयुक्तमन्तः पादोत्तरैर्युतम् ॥ १२९ ॥
शालाकारशिरोयुक्तं भद्रनासी मुखे मुखे ।
पार्श्वयोश्च महानासि(स्यौ)पादं प्रत्यल्पनासिका ॥ १३० ॥
मात्रादण्डमिति ख्यातं श्रीविशालमथो शृणु ।
पूर्ववद्भूमिभागं च तलात्तुङ्गं करी(क्रमात्कृश)कृतम् ॥ १३१ ॥
सभाकारं शिरो वाऽपि शालाकारमथापिवा ।
नानामसूरकस्तम्भवेदिकाद्यैरलंकृतम् ॥ १३२ ॥
चतुर्दिक्षु महानासि विदिक्षु क्षुद्रनासिकम् ।
चतुर्मुखं ततो वक्ष्ये भूमिभागादिपूर्वकम् ॥ १३३ ॥

शशिभद्रसमायुक्तं मध्ये वारणसंयुतम् ।
नानामसूरकस्तम्भवेदिकाद्यैरलंकृतम् ॥ १३४ ॥
सभाकारं शिरो वाऽपि शालाकारमथापि वा ।
मुखे मुखे महानासी पार्श्वयोर्द्विद्विनासिका(के) ॥ १३५ ॥
अन्तः पादोत्तरैर्युक्तं प्रस्तरे तु तलं प्रति ।
अन्तःस्थो(सो)पानसंयुक्तं मध्ये वारणसंयुतम् ॥ १३६ ॥
एवं त्रिधा समुद्दिष्टं द्वारगोपुरमध्यमम् ।
अलिन्द्रांशं च कुड्यं वा वृषभस्त(स्थ)लमेव वा ॥ १३७ ॥
तुल्यार्धैः प्रस्तरं वाऽथ अलिन्द्राङ्गं यथोचितम् ।
शालाकारं सभाकारं मालिकाकारमेव च ॥ १३८ ॥
यद्यदिष्टं तु यद्द्वारे तत्तत्रैव प्रकल्पयेत् ।
बाह्ये बाह्येऽङ्घ्रि या(पा)दाभ्यां मध्यकुड्ययुतं तु वा ॥ १३९ ॥
गृहपिण्डी गर्भगेहं प्रागिवैव प्रकल्पयेत् ।
अलिन्द्रं हारयोर्माने विवृताङ्घ्रिकमेव वा ॥ १४० ॥
प्रस्तरेदिष्टभूम्यन्तं गोपानादिसमन्वितम् ।
कूटकोष्ठाद्यलंकारमूर्ध्वस्तमत्र(म्भान्त्र)कल्पयेत् ॥ १४१ ॥
भूमिभागमलंकारं गलान्तं परिकल्पयेत् ।
शीर्षं दण्डांशं शालाभं शालाकारं तदुच्यते ॥ १४२ ॥
लुपारोप्य तमायत्तं सभाकारकमुच्यते ।
प्रस्तरं प्रतिसंछाद्य मण्डपं यत्रिविष्टिना ॥ १४३ ॥
मालिकाकृतिकं ख्यातं मण्डपे तु परस्परम् ।
गोपुरं चैवमाख्यातं परिवारविधिं शृणु ॥ १४४ ॥

इतिकाश्यपशिल्पे गोपुरलक्षणं पञ्चचत्वारिंशः पटलः समाप्तः ।

अथ षट्चत्वारिंशः पटलः ।

॥ परिवारः ॥

अथ वक्ष्ये विशेषेण परिवारविधिं परम् ।
अष्टौ च षोडशं चै(श्च त्थे)व द्वात्रिंशच्च यथाक्रमम् ॥ १ ॥

अन्तर्मण्डलगैः सर्वैः परिवारं न कल्पयेत् ।
संकल्पान्तं चारधारा परिवाराष्टकं द्विज ॥ २ ॥
कलाऽस्थे परिवारास्तु मध्याहारे प्रकल्पयेत् ।
प्राकारे तु चतुर्थी तु द्वात्रिंशत्परिवारकम् ॥ ३ ॥
तत्तत्प्राकारमध्ये वा सालकुड्याश्रितं तु वा ।
मुखायामं विना बीजं चतुरश्रे कृते सति ॥ ४ ॥
नवांशं विभजेद्बीजमर्धांशे मूलहर्म्यकम् ।
तथा दृष्टार्धभागेषु पूर्वादिक्रमयोगतः ॥ ५ ॥
प्राच्यां वै वृषभं स्थाप्य अतलं त्वग्निगोचरे ।
अग्निदुग्धां[तु] वायव्ये सप्तमातरमातृणाम् ॥ ६ ॥
दक्षिणे वीरभद्रं वा वामेऽ(विघ्न)विनायकं तथा ।
एक(कु)बेरं तु वायव्ये नैर्ऋत्यां विघ्नविनायकम् ॥ ७ ॥
कुमारं वारुणे देशे ज्येष्ठे वै वायुगोचरे ।
सौम्ये तु केशवस्थानं तत्र कात्यायनीं तु वा ॥ ८ ॥
भास्करं स्मकरे देशे ते पीठं प्रतिमे तु वा ।
प्रतिमा त्वालयोपेता पीठं चेदालयं विना ॥ ९ ॥
इन्द्रानलशिवांशस्थाः पश्चिमान्नि(दि)मुखस्थिताः ।
धृतिर्वारुणवायुश्च सर्वाश्च प्राङ्मुखस्थिताः ॥ १० ॥
विष्णुश्चेत्प्रमुखः सौम्ये दुर्गा चेद्दक्षिणानता(ना) ।
मातरः सौम्यवक्त्रास्तु विदेशः पश्चिमाननः ॥ ११ ॥
मातृवामस्थविघ्नेशः प्राच्यामाननमुच्यते ।
आदौ वा द्वित्रिसाले वा अंशे चण्डेश्वरालयम् ॥ १२ ॥
त्रिदण्डे बलिपीठाग्रे वृषस्थानं परं भवेत् ।
अपरध्वजदण्डेन तयोर्मध्येऽष्टभाजिते ॥ १३ ॥
नवधा स्यात्पुरस्थानं गोपुरद्वारनिर्गतिः ।
मण्डपाद्वाऽथ तन्नीत्रं वृत्तपीठान्तरं भवेत् ॥ १४ ॥
परिवाराष्टम(कं)ह्येवं षोडशं स्वधुना शृणु ।
बीजे तु पञ्चपञ्चांशे शक्रेभागादिषु क्रमात् ॥ १५ ॥
इन्द्रश्चाश्वासरोहिश्च पितरश्चाधमस्तथा ।
रोहिणी निर्ऋतिश्चैव अप्सरोगण एव च ॥ १६ ॥

वरुणद्विषयश्चैव वायुरुद्रस्तथैव च ।
सोमश्च क्षेत्रपालश्च ईशद्वारसभास्करः ॥ १७ ॥
मूलगेहं समीक्ष्यास्ते स्थापयेत्तु प्रदक्षिणम् ।
कर्णकांश्रगतान्देवान्भाग्देशे पश्चिमाननान् ॥ १८ ॥
पश्चिमे सौम्यप्रागग्रौ कल्पयेत्कल्पवित्तमः ।
षोडशं ह्येवमाख्यातं द्वात्रिंशद्धुनोच्यते ॥ १९ ॥
चतुर्थं सालबीजं तु नन्दनन्दविभाजिते ।
बाह्ये तु चतुरष्टांशे पूर्वादिक्रमयोगतः ॥ २० ॥
अनकार्यभवश्चैव मोटिसूक्ष्मं तथैव च ।
गौरीशसर्वस्तथाभासाह्याशिरोत्तमाभूरतथा ॥ २१ ॥
ईशानः कौशिकश्चैव एकाक्षोऽविघ्न एव च ।
सरस्वती तथा लक्ष्मीरेकरुद्रस्तथैव च ॥ २२ ॥
पशुपतिर्वसुश्चैव महादेवस्त्रिमूर्ति च ।
धनदो रुद्रकालाग्नी श्रीकण्ठो नागदेवता ॥ २३ ॥
हिमं च पृथिवी चैव शिखण्डि मरुतस्तथा ।
आत्रिः शनैश्चरश्चैव द्वात्रिंशत्परिवारकाः ॥ २४ ॥
अथाऽऽसु पृथिवीस्थाने गौरीस्थापनमाचरेत् ।
गौरीस्थाने न्यसेत्पृथ्वीं शेषं पूर्ववदाचरेत् ॥ २५ ॥
अभ्यन्तराननान्सर्वान्स्थापयेत्तु विशेषतः ।
गौर्यास्तु वनमालाऽथ विमानं वाऽथ कल्पयेत् ॥ २६ ॥
अन्येषामपि देवानां विमानं वाऽथ मण्डपम् ।
मूलहर्म्यत्रिपादं वा अर्धं वा पादमेव वा ॥ २७ ॥
गर्भगेहसमं वाऽपि सार्धं वा त्रिपादकम् ।
त्रिचतुष्पञ्चहस्तं वा परिवारालयं भवेत् ॥ २८ ॥
आभाससदने तेन मानेनैव समाचरेत् ।
मुक्तिकादिषु यन्मूलं गेहमेवं तथैव हि ॥ २९ ॥
कारतेत्वनितत्र (येत्सदनं र) म्यं विपरीतं विपत्करम् ।
त्रिवर्गमण्डपाकारं चतुरर्द्वासमन्वितम् ॥ ३० ॥
उक्षावासं प्रकर्तव्यं शेषाणां तु यथोचितम् ।
परिवारालयं प्रोक्तं प्रतिमालक्षणं शृणु ॥ ३१ ॥

परिवारालये द्वारगर्भमानं नयेद्बुधः ।
सकलानां तु यन्मानं तन्मानं तत्र गृह्यताम् ॥ ३२ ॥
सर्वस्य स्थानकं वासनं तु वा ।(?)
द्वात्रिंशत्परिवारं तु जातिहर्म्ये प्रकल्पयेत् ॥ ३३ ॥
छन्दं तु षोडशं ख्यातं शेषेषु त्वष्टकं भवेत् ।
अथवा सर्वहर्म्येषु सर्वं वा परिकल्पयेत् ॥ ३४ ॥
ना(जा)त्यायांशकभाती(माना)नि प्रतिमालक्षणोक्तवत् ।
आदौ तु परिवाराणां वक्ष्ये वृषभलक्षणम् ॥ ३५ ॥
तुङ्गे पञ्चदशांशे तु एकांशं चाङ्गुलं भवेत् ।
चत्वारिंशाङ्गुलायामं गलात्पृष्ठावसानकम् ॥ ३६ ॥
मूर्धादिगलपर्यन्तं वर्णमात्रमुदाहृतम् ।
तस्माद्वीवोच्चमष्टांशं पूर्वोक्तं षोडशाङ्गुलम् ॥ ३७ ॥
ऊरुदीर्घं चतुःस्थानैः षण्मात्रं परिकीर्तितम् ।
जानुमानं द्विमानं स्याज्जङ्घामानं षडङ्गुलम् ॥ ३८ ॥
खुरमानं द्विमानं स्याच्छृङ्गमेवं प्रकल्पयेत् ।
शृङ्गान्तरं तु वस्वंशं शृङ्गोच्चं चतुरंशकम् ॥ ३९ ॥
शृङ्गमूलविशालं तु चतुरङ्गुलमुच्यते ।
अर्धाङ्गुलं तदर्धाग्रं व्यासमूलात्कृशं क्रमात् ॥ ४० ॥
किंचिद्वक्रसमायुक्तौ शृङ्गमभ्यन्तरे बुधः ।
लालाटवा(व्या)सनन्दांशं मुखव्यासं शराङ्गुलम् ॥ ४१ ॥
घनं च तत्समाख्यातं नेत्रमेकाङ्गुलं भवेत् ।
नेत्रमध्यललाटोच्चं वेदमात्रमुहृतम् ॥ ४२ ॥
नेत्रात्कर्णान्तपर्यन्तंपञ्चांशं कर्णदीर्घकम् ।
कर्णमूलविशालं तु द्विमात्रमिति विद्यते ॥ ४३ ॥
मध्यवा(व्यासं)चतुर्मात्रमग्रमङ्गुलविस्तृतम् ।
घनमर्धाङ्गुलं ख्यातं घ्राणं सार्धाङ्गुलायतम् ॥ ४४ ॥
व्यासमेकाङ्गुलं ख्यातं गाढं तत्सममुच्यते ।
अङ्गुलं नासिकादूर्ध्वं तुङ्गमित्यभिधीयते ॥ ४५ ॥
आस्यं पञ्चाङ्गुलाय(म)ममधरोष्ठं द्व्याङ्गुलम् ।
त्रिमात्रं चोत्तरोष्ठं च युक्तितः कल्पयेत्क्रमात् ॥ ४६ ॥

जिह्वायामविशालोच्चं त्रिद्व्येकाङ्गुलमुच्यते ।
ग्रीवाव्यासो दशांशः स्यात्तन्मूलं द्वादशाङ्गुलम् ॥ ४७ ॥
पृष्ठग्रीवस्य मूलस्य व्यासमष्टाङ्गुलं भवेत् ।
पृष्ठग्रीवाग्रविस्तारं षडङ्गुलमुदाहृतम् ॥ ४८ ॥
ककुदुच्चं चतुर्मात्रं तस्य व्यासं षडङ्गुलम् ।
ग्रीवस्याग्रघनं चापि अत्यर्धाङ्गुलमुच्यते ॥ ४९ ॥
शरीरे मध्यमे वा(व्या)सं चतुर्विंशाङ्गुलं भवेत् ।
अपरे व्यासभान्वंशं शक्तियुक्त्या समाचरेत् ॥ ५० ॥
पूर्वपादोरुमूलस्य व्यासं पञ्चाङ्गुलं भवेत् ।
तदूर्ध्वाग्रं चतुर्मात्रं जङ्घामूलं च तत्समम् ॥ ५१ ॥
जङ्घाग्रं गुणमात्रं स्यात्साधार्धांग्न्यंशं खुरास्तृतम् ।
अपरे चोरुमूलं स्याद्व्यासवेदं क्रमात्कृतम् ॥ ५२ ॥
अग्रमष्टाङ्गुलं व्यासं मा(व्या)समूलं षडङ्गुलम् ।
जङ्घाग्रं चतुरङ्गुल्यं खुरस्या(व्या)सं युगांशकम् ॥ ५३ ॥
ऊरुपञ्चाङ्गुलायामं जानुदीर्घं द्विमात्रकम् ।
जङ्घापञ्चाङ्गुलं दीर्घं त्रिमात्रं खुरमानकम् ॥ ५४ ॥
पुच्छव्यासं त्रिमात्रं वा मूलाग्रे सार्धमात्रकम् ।
पुच्छं जङ्घाग्रसीमान्तं बालयेत्तु विशेषतः ॥ ५५ ॥
पुच्छाग्रे केशसहितव्यासं वेदाङ्गुलं भवेत् ।
मूलाग्रं चैकमात्रं स्यात्केशदीर्घं युगाङ्गुलम् ॥ ५६ ॥
बीजायामविशालं तु सर्वं वन्ह्यङ्गुलं क्रमात् ।
द्विमात्रं घनमित्युक्तं शेषायामं युगाङ्गुलम् ॥ ५७ ॥
उदयादङ्गुलवत्प्रघनमित्यभिधीयते ।
स्थितं वा शयितं वाऽपि पद्मे वा भद्रपीठके ॥ ५८ ॥
बुधस्पष्टकागर्भशिलालोहाक्तमेव वा । (?)
स्वर्णजं ताम्रजं वाऽपि लोहजं वृषभं कुरु ॥ ५९ ॥
किंचिद्धीनं न कर्तव्यं मानोन्मानप्रमाणके ।
तदा कर्तुस्तु कर्तृत्वं तस्माल्लक्षणमन्वितम् ॥ ६० ॥
कर्तव्यं विपरीतं चेद्विपरीतफलप्रदम् ।
वृषभे लक्षणं ख्यातं शृणु वह्नेस्तु लक्षणम् ॥ ६१ ॥

अनलेश्वरलक्षणम्—

उत्तमं दशतालेन कर्तव्यमनलेश्वरम् ।
द्विवक्त्रं त्वेकहृदयं द्विनासी च षट्कुक्षि तु ॥ ६२ ॥
त्रिमेखलं त्रिपादं च सप्तजिह्वाभिरावृतम् ।
दक्षवक्त्रे [च]तुर्जिह्वा वामवक्त्रे त्रिजिह्वया ॥ ६३ ॥
मेषारूढं चतुःशृङ्गं जटामुकुटमण्डितम् ।
दक्षिणे तु चतुर्हस्तं वामपार्श्वे त्रिहस्तकम् ॥ ६४ ॥
उषाशक्तिरग्निस्तथा स्रुक्स्रुवं वै दक्षिणोत्तरे ।
(शक्तिमन्नं स्रुक्स्रुवौ च बिभ्रद्वै दक्षिणेकरे) ॥
तोमरं व्यजनं वामे घृतपात्र विशेषतः ॥ ६५ ॥
वपुः स्वर्णमिदं ख्यातं नेत्रेपिङ्गलसंनिभम् ।
प्रभामण्डलसंयुक्तं पद्मपीठोपरि स्थितम् ॥ ६६ ॥
दुकूलवसनोपेतं कल्पयेदनलेश्वरम् ।

सप्तमातृकालक्षणम्—

ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ॥ ६७ ।
वाराही च तथेन्द्राणी चामुण्डा सप्त मातरः ।
दक्षिणेऽदक्षिणे चैव वीरभद्रविनायकौ ॥ ६८ ॥
चतुर्भुजौ त्रिनेत्रौ च जटामुकुटमण्डितौ ।
सर्वाभर- संयुक्तौ श्वेतवर्णवृषध्वजौ ॥ ६९ ॥
सशूलाभयहस्तौ च दक्षिणे तु करद्वयम् ।
गदावरदहस्तौ च वामपार्श्वे करद्वयम् ॥ ७० ॥
श्वेतपद्मासनासीनौ वटवृक्षसमाश्रितौ ।
चतुर्वक्त्रचतुर्बाहुसंयुक्तौ हेमसंनिभौ ॥ ७१ ॥
दक्षिणाभयशूलं च वरदं चाक्षमालिकाम् ।
शतपद्मासनानीत(सीना) हंसवाहनकौतुका ॥ ७२ ॥
जटामुकुटसंयुक्ता पीताम्बरधरा वरा ।
ब्राह्मणीत्येवमाख्याता ब्रह्मवृक्षसमन्विता ॥ ७३ ॥

चतुर्भुजा त्रिणे(ने)त्रा च अतिरक्तसमप्रभा ।
शूलाभयकराऽसर्वे(व्ये) वामे वरदहस्तका ॥ ७४ ॥
जपमालासमायुक्ता जटामुकुटसंयुता ।
ईश्वरेण समा ह्येषा ईश्वरीति प्रकीर्तिता ॥ ७५ ॥
चतुर्भुजा त्रिनेत्रा च रक्तवस्त्रनिभान्विता ।
सर्वाभरणसंयुक्ता वाचिकाबद्धकुट्टिमा ॥ ७६ ॥
शक्तिकुक्कुटहस्ता च वरदाभयपाणिका ।
मयूरध्वजवाही(ह्या) च उदुम्बरसमाश्रिता ॥ ७७ ॥
शङ्खचक्रधरा देवी वरदाभयपाणिका ।
सुस्तना चारुवदना श्याम्या(श्यामा)मा च सुलोचना ॥ ७८ ॥
पीताम्बरधरा देवी किरीटमुकुटान्विता ।
राजवृक्षं समाश्रित्य गरुडध्वजवाहिनी ॥ ७९ ॥
वैष्णवीं कारयेद्देवीं विष्णुभूषणभूषिताम् ।
करञ्जद्रुमसंयुक्ता महिषध्वजवाहिनीम् ॥ ८० ॥
चतुर्भुजां त्रिनेत्रां च सर्वाभरणभूषिताम् ।
किरीटमकुटोपेतां विद्रुमस्य निभाननाम् ॥ ८१ ॥
अङ्कुशं चाभयं सव्येऽवामे वरदशक्तिनी ।
कल्पद्रुमं समाश्रित्य गजध्वजाऽजवाहिनी ॥ ८२ ॥
चतुर्भुजा त्रिनेत्राच रक्तवर्षा(र्णो)र्ध्वकेशिनी ।
कपालशूलहस्ता च वरदाभयपाणिनी ॥ ८३ ॥
शिरोमालापरीता च पद्मपीठोपरि स्थिता ।
व्याघ्रचर्माम्बरधरा नागेन्द्राच्छादितस्तनी ॥ ८४ ॥
दंष्ट्राकरालवदना वटवृक्षसमाश्रिता ।
चामुण्डालक्षणं ह्येव मेकबेरं च तद्भवेत् ॥ ८५ ॥
दक्षपादस्थिताः सर्वा वामपादं तु लम्बितम् ।
एवं वै सप्तमातॄणां लक्षणं कथितं मया ॥ ८६ ॥

इति काश्यपशिल्पे सप्तमातृकालक्षणं षट्चत्वारिंशः पटलः ।

अथ सप्तचत्वारिंशः पटलः ।

विनायकलक्षणम्—

अथ वक्ष्ये विशेषेण विनायकस्य लक्षणम् ।
पादाङ्गुष्णीषसीमान्तं चतुःषष्ट्यंशकं भवेत् ॥ १ ॥
मूर्धमस्तकसीमान्तमङ्गुलद्वयमुच्यते ।
तस्माद्वैतेन सूत्रान्तं चतुर्मात्रमुदाहृतम् ॥ २ ॥
ऊरू षडर्धमात्रं स्याज्जानुदीर्घं गुणाङ्गुलम् ।
जङ्घा चोरुसमं दीर्घं गुणांशं पादत(पत्त)लोदयम् ॥ ३ ॥
सप्ताङ्गुलं तथायाममङ्गुष्ठाग्रावसानकम् ।
पादाङ्गुष्ठायतं द्व्यंशं सार्धांशं तु कनिष्ठिका ॥ ४ ॥
तर्जन्यादिकनिष्ठान्तं प्रत्येकं तु करोन्नतम् ।
त्रयोदशाङ्गुलं बाहू प्रकोष्ठाया(वा)नवाङ्गुलम् ॥ ५ ॥
चतुर्मात्रं तलायाममग्र्यंशं मध्यमाङ्गुलम् ।
तर्जन्यनामिके द्वे च एकविंशत्यवायतम् ॥ ६ ॥
कनिष्ठाङ्गुष्ठयोश्चैव दीर्घं सप्तदशायतम् ।
द्वादशाष्ट नवाष्टौ च सप्तसंख्यायवं(तं)क्रमात् ॥ ७ ॥
अङ्गुष्ठादिकनिष्ठान्तं व्यासमित्यभिधीयते ।
तत्तद्व्यासत्रिपादं स्यान्नखव्यासमुदाहृतम् ॥ ८ ॥
नखव्यासत्रिपादं स्यान्नवदीर्घायवृत्तवत् ।
खेदं करतलव्यासं मणिमन्नोदकं भवेत् ॥ ९ ॥
प्रकोष्ठकं युगाङ्गुल्यं बाहुव्यासं विदर्धकम् ।
बाहुमूलं तु वस्वंशं हस्तकोष्ठाङ्गुलान्तकम् ॥ १० ॥
सप्ताङ्गुलं तु तन्निम्नो(म्नं) मुखमध्ये दशाङ्गुलम् ।
हस्तमूलं षडङ्गुल्यं द्वाविंशत्यस्यदीर्घकम् ॥ ११ ॥
तदङ्गुलाग्रविस्तारं सार्धमात्रं द्विजोत्तम ।
क्रमेण कृशता हस्ते तन्मध्ये सुषिरद्वयम् ॥ १२ ॥
वामदन्तायतं वेदमात्रमित्यभिधीयते ।
दक्षिणे दन्तमूलं स्याद्वामाख्यमतलं भवेत् ॥ १३ ॥

अधरस्य तु निष्क्रान्तं लम्बनद्वयमङ्गुलम् ।
नेत्रायामं विशालं च षडध्वं परिकीर्तितम् ॥ १४ ॥
कण्ठं भूताङ्गुलव्यासमुत्सेधं चैव तद्भवेत् ।
अर्धाङ्गुलं घनं तस्य कर्णमूलं द्व्याङ्गुलम् ॥ १५ ॥
यद्वद्वजाननं तद्वत्कर्तव्यं तु मुखं द्विज ।
बाह्वो(हु)पर्यन्तविस्तारं द्वात्रिंशदङ्गुलं भवेत् ॥ १६ ॥
एकोनविंशदङ्गुल्यं कक्षान्तरमुदाहृतम् ।
स्था(स्त)नान्तरं दशाङ्गुल्यं हिक्कायाश्च द्विजो बहिः ॥ १७ ॥
स्था(स्त)नाभं द्व्य (द्वि)यव्यासं द्व्यङ्गुलं स्तनमण्डलम् ।
स्था(स्त)नाधःस्थविशालं तु त्रिपञ्चाङ्गुलमुच्यते ॥ १८ ॥
द्वाविंशदङ्गुलं ख्यातं मध्योदरविशालकम् ।
नाभिनिम्नविशालं तु अत्यर्था(र्धा)ङ्गुलमुच्यते ॥ १९ ॥
लिङ्गायामं गुणाङ्गुल्यं तस्यार्धं तस्य विस्तृतम् ।
मुष्कायामविशालं तु गुणाङ्गुलमुदाहृतम् ॥ २० ॥
ऊरुव्यासं तु भान्वंशं जानुव्यासं नवाङ्गुलम् ।
जङ्घामूलविशालं तु सप्तमात्रमुदाहृतम् ॥ २१ ॥
नखविस्तृतकं चापि सार्धं द्व्यङ्गुलमुच्यते ।
तदग्रं स्यात्तदासार्धं षण्मात्रमिति विद्यते ॥ २२ ॥
पौष्ण्यायामविशालं तु गुणाङ्गुलमुदाहृतम् ।
द्वादशार्धौ षडष्टौ च पञ्च षट्कयवं क्रमात् ॥ २३ ॥
अङ्गुष्ठादिकनिष्ठान्तं पादाङ्गुलविशालकम् ।
सत्रिपादनवव्यासं तदर्धायतमण्डलम् ॥ २४ ॥
स्थानकं वाऽऽसनं वाऽपि पद्मपीठे विशेषतः ।
स्वदन्तं दक्षिणे वा(ह)स्ते वामहस्ते कपिण्डके ॥ २५ ॥
मोदकं गजहस्ते तु अङ्कुशं दक्षिणे करे ।
वामहस्ते तु पाशं वा नागं चैवाक्षमालिका ॥ २६ ॥
त्रिनेत्रं हेमसंकाशं दुकूलवसनान्वितम् ।
अभङ्गं समभङ्गं वा स्थानके तु प्रकल्पयेत् ॥ २७ ॥
आसनं स्वासनं चेत्तु वामपादं तु चायतम् ।
मानान्तरे मूर्ध्नि पादे पादौ तु कुटिकां विना ॥ २८ ॥

ईषद्वक्रतनुर्वामे कर्तव्यं तु विशेषतः ।
व्यालयज्ञोपवीतं तु किरीटमुकुटान्वितम् ॥ २९ ॥
करं मुकुटकूटं वा जटामौलिकमेव वा ।
सर्वाभरणसंयुक्तं महाकायं महोदरम् ॥ ३० ॥
एवं विनायकं ख्यातं शृणु षण्मुखलक्षणम् ॥ ३१ ॥

इति काश्यपे विनायकलक्षणं सप्तचत्वारिंशः पटलः ।

अथाष्टचत्वारिंशः पटलः—

षण्मुखलक्षणम् ।

पञ्चतालोक्तमेनैव (मानेन) स्कन्दं कुर्याद्विलक्षणम् ।
मानोन्मानादया(दिकं) सर्वं प्रोक्तं वै स्कन्दलक्षणे ॥ १ ॥
द्विभुजं वा चतुर्हस्तं षड्भुजं भानुहस्तकम् ।
शक्तिं बाणं च खड्गं च चक्रं प्रासमसारितम् ॥ २ ॥
सव्ये वामे तु पिच्छं तु खड्गकाकूटकं तथा ।
धनुर्दण्डं हलं चैव भानुहस्तान्विते स्थितम् ॥ ३ ॥
षड्भुजस्य द्वयं खड्गं शक्तिर्दक्षिणपार्श्वके ।
खेटकं चाक्षमाला च कुक्कुटं वामहस्तके ॥ ४ ॥
चतुर्भुजेऽभयं शक्तिं दक्षिणे तु करद्वयम् ।
कुक्कुटं चाक्षमाला च वामहस्ते धृते गुहः ॥ ५ ॥
द्विभुजं कुक्कुटं वामे शक्तिर्दक्षिणहस्तके ।
अनुक्तं तु यत्सर्वं उमास्कन्दसहोक्तवत् ॥ ६ ॥
स्कन्दलक्षणमाख्यातं जेष्ठाविधिमतः परम् ।

अथ जेष्ठादेवीलक्षणम्—

द्विभुजाऽनलसंकाशा लम्बोष्ठा तुङ्गनासिका ॥ ७ ॥

लम्बमानस्तना कुक्षिनीला वा रक्तवाससी ।
उत्पलं दक्षिणे हस्ते वामे तु करकं न्यसेत् ॥ ८ ॥
भद्रपीठे सुखासीना द्विपादं चैव लम्बिता ।
सर्वाभरणसंपन्ना वाचिकाबन्धकूटिका ॥ ९ ॥
कोकध्वजसमायुक्ता सानुगा तिलकान्विता ।
तस्या दक्षिणपार्श्वे तु वृषो वै वृषवाहनः ॥ १० ॥
द्विभुजे दक्षिणे हस्ते दण्डं वामेन सूचिधृत् ।
लम्बितं दक्षिणं पादं वाममुत्कुटिकासनम् ॥ ११ ॥
श्वेतवर्णो महाकायः सर्वाभरणभूषितः ।
करण्डमुकुटोपेतो दुकूलवसनान्वितः ॥ १२ ॥
वृषं वै दक्षिणे त्वेवं वामे त्वग्निमथोच्यते ।
सुस्तना यौवनाङ्गा च सर्वाभरणभूषिता ॥ १३ ॥
कृष्णाञ्जननिभा रक्ता वस्त्रेणैव विभूषिता ।
एवं ज्येष्ठा समाख्याय दुर्गालक्षणमुच्यते ॥ १४ ॥
चतुर्भुजा द्विनेत्रा च सा तु स्यामनिभाप्परा ।
सौम्या पीताम्बरोपेता पीनोरुजघनस्तना ॥ १५ ॥
करण्डमुकुटोपैता सर्वाभरणभूपिता ।
अभयं दक्षिणे हस्ते कटकं वामहस्तके ॥ १६ ॥
परहस्ते तु सर्वेषां चक्रं वामे तु शङ्खधृत् ।
समपादस्तनां कुर्यात्पद्मपीठोपरिस्थिताम् ॥ १७ ॥
नागेन्द्रेण स्तनं बद्ध्वा रक्तकञ्चुकधारिणी ।
एवं दुर्गा समाख्याता विष्णुलक्षणमुच्यते ॥ १८ ॥

विष्णुलक्षणम्—

विष्णुं किरीटमुकुटकटिसूत्रादिमण्डितम् ।
पीताम्बरधरं सौम्यं चतुर्भुजसमन्वितम् ॥ १९ ॥
अभयं दक्षिणे हस्ते कटकं वामहस्तके ।
गदापद्मं च वामे तु शङ्खचक्रं तु दक्षिणे ॥ २० ॥

पद्मपीठोपरिस्थं तु सस्यया(श्या)मनिभाकृतिम् ।
आसीनं वा स्थितं वाऽपि सव्यसव्ये श्रियान्वितम् ॥ २१ ॥
संयुक्तां वा केवलां वा विष्णुमूर्तिं प्रचक्षते ।
एकवक्त्रां द्विहस्तां च जातिलिङ्गसमप्रभाम् ॥ २२ ॥
ईषद्विजृम्भपद्मौ द्वौ स्कन्देनैव करोधृतौ ।
करण्डमुकुटोपेतं सर्वाभरणभूषितम् ॥ २३ ॥
शक्तिं दक्षिणहस्ते तु वामहस्ते कुशान्वितम् ।
विशालोदरं तथा(लजठर)ग्रीवं वामे शशिसमन्वितम् ॥२४ ॥
द्विनेत्रं सौम्यवदनं सिंहासनोपरि स्थितम् ।
आसीनं वा प्रकर्तव्यं गजारूढमथापि वा ॥ २५ ॥
इन्द्रमेवं समाख्यातमश्विनावथ वक्ष्यते(च्म्यहम्) ।

अश्विनोर्लक्षणम्—

भद्रसिंहासनासीनावश्विनौ विश्वरूपिणौ ॥ २६ ॥
दाडिमीपुष्पसंकाशावभयौ सोपवीनतौ(ठकौ) ।
फुल्लरक्तोत्पलाक्षौ च कमण्डलु सुधारिणौ ॥ २७ ॥
नासत्यौ दस्रनामानौ चूडामुकुटधारिणौ ।
करद्वयसमायुक्तौ स्रग्भूषणविभूषितौ ॥ २८ ॥
अभयं दक्षिणे हस्ते पुस्तकं वामहस्तके ।
लम्बितौ दक्षिणौ पादौ वाममुत्कुटिकासनौ ॥ २९ ॥
देवानां भिषजावेतौ द्वौ चिकित्साविधायकौ ।
तयोः पार्श्वद्वये विप्र ...वामे च.... दक्षिणक्रमात् ॥ ३० ॥
धृतिः संजीवनीचैव संस्थितौ चामरौ धृतौ।
पृष्ठे विशल्यकरणी द्वे स्त्रियौ पीतपिङ्गलौ ॥ ३१ ॥
वामे धन्वन्तरिश्चैव वामात्रेयस्तथैव च ।
पीतरक्तनिभावेतौ संगतौ कृष्णवाससौ ॥ ३२ ॥
खड्गखेटकसंयुक्तौ सर्वाभरणभूषितौ ।
अश्विनौ तु समाख्यातौ वह्निः पूर्ववदेव हि ॥ ३३ ॥

अथ पितरः

पितरः पीतवर्णाभा वृद्धास्ते केशबुध्नताः ।
यज्ञसूत्रसमायुक्ता द्विभुजाः श्वेतवाससः ॥ ३४ ॥
नागाभरणसंयुक्ताः शशितुल्यनिभाननाः ॥ ३५ ॥
फलकाभद्रपीठस्थाः पितरस्तु महासनाः ।
वामजानूपरिन्यस्तवामहस्तसमन्विताः ॥ ३६ ॥
सूचिदक्षिणहस्तास्तु पितरस्तुय(तृणां रूप)मुच्यते ।
पितरस्तु समाख्याताः शृणु वैवस्वतं ततः ॥ ३७ ॥

अथ वैवस्वतः ।

द्विभुजं कृष्णवर्णं तु खड्गखेटकधारिणम् ।
करालदंष्ट्रवदनं रक्तमाल्यानुलेपनम् ॥ ३८ ॥
रक्तवस्त्रधरं चोग्रं किरीटमुकुटाञ्चितम् ।
दीप्ताग्निसदृशाक्षं च महामहिषवाहनम् ॥ ३९ ॥
वैवस्वतस्य पार्श्वस्थौ समीपस्थौ ग्रहोग्रकौ ।
चित्रगुप्तः किंनरश्च द्वारपार्श्वे तु संस्थितौ ॥ ४० ॥
कृष्णश्यामनिभौ तौ च रक्तवस्त्रधरावुभौ ।
पीठपार्श्वे स्थितौ मृत्युसहितौ व्य(तावु)ग्रतेजसौ ॥ ४१ ॥
नीललोहितसंकाशौ द्वौ चामरधृतास्त्रियौ ।
पुरतः संस्थितौ विप्र शर्मधर्मसमाह्वयौ ॥ ४२ ॥
यमः सिंहासनासीनो महिषोरोहितस्तथा ।
यमलक्षणमाख्यातं रोहिणीलक्षणं शृणु ॥ ४३ ॥

अथ रोहिणीलक्षणम्—

द्विभुजा करण्डमुकुटा रक्तवर्णा सुशोभना ।
सर्वाभरणसंयुक्ता नागहस्ता सिताम्बरा ॥ ४४ ॥
आसीना वा स्थिता वापि सप्तसंख्या हि रोहिणी ।
रोहिण्येवं समाख्याता नैर्ऋतेर्लक्षणं ततः ॥ ४५ ॥

अथ निर्ऋतिलक्षणम्—

निर्ऋतिर्नीलवर्णस्तु द्विभुजश्चमहातनुः ।
खड्गं दक्षिणहस्ते तु वामहस्ते च खेटकम् ॥ ४६ ॥

पीतवस्त्रधरं रौद्रं करालमुखदंष्ट्रकम् ।
सर्वाभरणसंयुक्तं श्वारूढं जगत्पतिम् ॥ ४७ ॥
रक्तकेशसमायुक्तं स्थितं वासितमेव वा ।
निर्ऋतिस्त्वेवमाख्यातस्ततस्त्वप्सरसः शृणु ॥ ४८ ॥

अथाप्सरोलक्षणम्—

अतिकान्तियुता रक्ताः केशभारालकान्विताः ।
नानाबन्धनसंयुक्ता नानापुष्पैरलंकृताः ॥ ४९ ॥
दुकूलवसनाः सर्वाः पीनोरुजघनस्तनाः ।
मध्यसूक्ष्माश्च सौम्याश्च किंचित्प्रहसिताननाः ॥ ५० ॥
नानागन्धानुलिप्ताङ्गा भद्रपीठोपरि स्थिताः ।
समभङ्गयुताः सप्तसंख्या अप्सरसां गणः ॥ ५१ ॥
अप्सरस्त्वेवमाख्याता वरुणस्त्वथ वक्ष्यते ।

अथ वरुणलक्षणम्-

वरुणः श्वेतवर्णस्तु द्विभुजः पाशहस्तकः ।
सर्वाभरणसंयुक्तः करण्डमुकुटान्वितः ।
पीतवस्त्रधरः शान्तो महाबलसमन्वितः ॥ ५३ ॥
यज्ञसूत्रसमायुक्तो मकरस्तो(स्था)नकासिन(स)नः ।
ऋषयः पीतवर्णास्तु नानावर्णाम्बरान्विताः ॥ ५४ ॥
वृद्धाश्च द्विभुजाः शान्ता जटाचूडासमन्विताः ।
चुलुकाहृदयान्ताश्च यज्ञोपवीतसंयुताः ॥ ५५ ॥
भस्मनैव त्रिपुण्ड्रः स्यात्स्थानकावसनं तथा ।
दण्डं दक्षिणहस्ते तु च्छत्रं वामकरोद्धृतम् ॥ ५६ ॥
छत्रदण्डौ विना वाऽथ सव्ये तु ज्ञानमुद्रिका ।
वामजानूपरिन्यस्तवामहस्तसमन्विताः ॥ ५७ ॥
भृगुंरगस्त्यवासिष्ठगौतमाङ्गिरसस्तथा ।
विश्वामित्रो भरद्वाज ऋषयः सप्त कीर्तिताः ॥ ५८ ॥

अथ मरुल्लक्षणम्—

द्विभुजस्तु महावीर्यो धूम्राक्षो धूम्रसंनिभः ।
ध्वजं वै दक्षिणे हस्ते वामहस्ते च दण्डभृक् ॥ ५९ ॥

कुञ्चितभुज(भुग्नबाहु)युतो वायुः शबलाम्बरभूषितः।
नानाभरणसंयुक्तः केशैस्तु सुविकर्णकः॥ ६०॥
सिंहासनोपरिष्टात्तु शीघ्रयात्रोत्सुकः स्थितः।
वायुरेवं समाख्यातो रुद्रलक्षणमुच्यते॥ ६१॥

अथ रुद्रलक्षणम्—

चतुर्भुजास्त्रिनेत्राश्च जटामुकुटमण्डिताः।
श्यामवस्त्रधराः सर्वे शुक्लवर्णाः प्रकीर्तिताः॥ ६२॥
समपादस्थानकाश्च पद्मपीठोपरि स्थिताः।
सर्वाभरणसंयुक्ताः सर्वपुष्पैरलंकृताः॥ ६३॥
अभयं परशुं सव्ये कृष्णं वरदवामके।
महादेवः शिवो रुद्रः शंकरो नीललोहितः॥ ६४॥
ईशानो विजयश्चेशो देवदेवो भवोद्भवः।
कपालीशस्त्विति ज्ञेया रुद्रास्त्वेकादश स्मृताः॥ ६५॥
सोमसिंहासनासीनं कुन्दशङ्खनिभयु(द्यु)तिम्।
प्रभामण्डलसंयुक्तं द्विभुजं सौम्यवक्त्र(क्त्र)कम्॥ ६६॥
आसीनं वा स्थितं वाऽपि कुमुदोत्पलहस्तकम्।
हेमयज्ञोपवीताङ्गं सर्वाभरणभूषितम्॥ ६७॥
शुक्लवस्त्रधरं शान्तं सर्वपुष्पैरलंकृतम्।
त्रिविधं क्षेत्रपालं तु सात्त्विकं राजसं तमः॥ ६८॥
श्वेतं रक्तं तथा कृष्णं सात्त्विकादिगुणं भवेत्।
द्विभुजं चतुर्भुजं शान्तं राजसं षड्भुजान्वितम्॥ ६९॥
तामसं चाष्टदोर्दण्डं त्रिनेत्रं समपादुकम्।
स्थानकं पद्मपीठे तु भद्रपीठे तु वा यथा॥ ७०॥
शूलं दक्षिणहस्ते तु कपालं त्वितरे धृतम्।
द्विभुजं श्वेतमाख्यातं चतुर्हस्तमथोच्यते॥ ७१॥
परहस्तं तु सव्ये च खट्वाङ्गं खड्गमन्यके।
अथवा पूर्वहस्ते तु अभयं वरदान्वितम्॥ ७२॥
पूर्ववत्परहस्तौ द्वौ घण्टिके वामहस्तके।
सात्त्विकं श्वेतमाख्यातं राजसं शृणु सुव्रत॥ ७३॥

शूलं खड्गं च घण्टां च दक्षिणे तु करत्रये ।
खेटकं च कपालं च नागं पाशं तु दक्षिणे ॥ ७४ ॥
तामसे तु धनुर्बाणं दक्षिणे तु करे धृतम् ।
शेषं राजसवत्ख्यातं रक्तकेशोर्ध्वमण्डलम् ॥ ७५ ॥
उग्रदृष्टिसमायुक्तं नानानागविभूषितम् ।
त्रिनेत्रमग्निरूपं च क्षेत्रपालं प्रकल्पयेत् ॥ ७६ ॥
ईशो वै द्विभुजः शान्तः सर्वाभरणभूषितः ।
जटामुकुटसंयुक्तः शुक्लवस्त्रद्युतिः स्थितः ॥ ७७ ॥
शुक्लयज्ञोपवीतश्च शुक्लपद्मोपरि स्थितः ।
शूलं दक्षिणहस्ते तु कपालं वामहस्तके ॥ ७८ ॥
ईश एवं समाख्यातस्ततो वै भास्करः क्रमात् ।

अथ भास्करलक्षणम् ।

द्विभुजाः पद्महस्ताश्च रक्तपद्मासने स्थिताः ॥ ७९ ॥
रक्तमण्डलसंयुक्ताः करण्डमुकुटान्विताः ।
रक्ताम्बरधराः सर्वे सर्वाभरणभूषिताः ॥ ८० ॥
छन्नवीरसमायुक्ता भास्करा द्वादशस्मृताः ।
विकर्तनो विवस्वांश्च मार्तण्डो भास्करो रविः ॥ ८१ ॥
लोकपालः प्रकाशश्च लोकसाक्षी त्रिविक्रमः ।
आदित्यश्च तथा सूर्यः, अंशुमाली दिवाकरः ॥ ८२ ॥
एते वै द्वादशाऽऽदित्या उत्तरादिक्रमात्स्थिताः ।
एवं षोडश संख्याता द्वात्रिंशदथ वक्ष्यते ॥ ८३ ॥
सौम्यश्चतुर्भुजोऽनन्तः सर्वाभरणभूषितः ।
जपापुष्पनिभाकारः करण्डमुकुटान्वितः ॥ ८४ ॥
सितवस्त्रधरः शान्तस्त्रिनेत्रः पद्मसंस्थितः ।
अभयं वरदोपेतं कटकं शूलधृच्छुचिः ॥ ८५ ॥
अर्कश्चतुर्भुजः शान्तः सर्वाभरणभूषितः ।
हिरण्यसदृशप्रख्यः, दुकूलवसनान्वितः ॥ ८६ ॥
अभयो वरदोपेतं खड्गखेटकधारकः ।
सुस्थितः पत्रपीठे तु आर्यमेवं प्रकल्पयेत् ॥ ८७ ॥

अभयश्चतुर्भुजः शान्तो जटामुकुटमण्डितः।
अतिरक्तः समप्रख्यः सर्वाभरणभूषितः॥ ८८॥
हिरण्यसदृशप्रख्यो दुकूलवसनान्वितः।
अभयो वरदोपेतः शूलपाशधरो भवः॥ ८९॥
भोगिहस्तद्वयोपेतः सौम्यात्मा च द्विनेत्रकः।
अत्यन्तसुन्दरी शान्ता सर्वाभरणभूषिता॥ ९०॥
नानागन्धानुलिप्ता वा वा(पी)तपुष्पोपशोभिता।
करण्ड(कुरण्ट)मकुटोपेता पद्मपीठोपरि स्थिता॥ ९१॥
किंश्चिद्विलक्षकुक्षी च दी(पी)नोरुजघनस्तना।
दुकूलपट्टदेवाङ्गैर्नानावस्त्रधरा वरा॥ ९२॥
सस्यश्यामनिभाकारा रक्तोत्पलधृक्करा (धरा करे)।
आजानुलम्बहस्ता च सर्वत्रं समभङ्गिका॥ ९३॥
सूक्ष्मानिलनिभा शान्ता हेमवस्त्रधरा वरा।
चतुर्भुजा त्रिनेत्रा च सर्वाभरणभूषिता॥ ९४॥
अभया वरदोपेता टङ्कशूलधरा तथा।
गौरीलक्षणमाख्यातं यथासकललक्षणे॥ ९५॥
तथैव कारयेद्धीमान् स्थापयेत्केवलात्मिकाम्।
शर्वश्चतुर्भुजः शान्तः सर्वाभरणभूषितः॥ ९६॥
जटामुकुटसंयुक्तः शङ्खकुन्देन्दुसंनिभः।
अभयो वरदोपेतः खड्गखेटकधारकः॥ ९७॥
पद्मपीठोपरिष्टात्तु स्थानकः शर्व एव हि।
चतुर्वक्त्रश्चतुर्बाहुर्हरितास्थ(ल)समप्रभः॥ ९८॥
जटामुकुटसंयुक्तः पिङ्गाक्षः सर्पभूषणः।
कृष्णाजिनोत्तरीयश्च यज्ञसूत्रसमन्वितः॥ ९९॥
शुक्लवस्त्रधरः शान्तः कटिसूत्रः समेखलः।
शुक्लमाल्यानुलेपश्च कर्णौ कुण्डलमण्डितौ॥ १००॥
दक्षिणे चाक्षमालां च कूर्चं चैव तु धारयेत्।
कमण्डलुं कुशं वामे दक्षिणे स्रुवस्रुवौ तथा॥ १०१॥
आज्यस्थालीं कुशांश्चैव वामहस्ते तु धारयेत्।
अभयं वरदौ पू(वरदाभययुक्पू)र्वहस्तौ वाऽथ द्विजोत्तम॥१०२॥

आसने तूभयागाङ्घ्रि(यौ चाङ्घ्री)रोधयेत्तु परस्परम् ।
मेढ्रमूलोपरिष्टात्तु वामहस्तोर्ध्ववत्करकम् ॥ १०३ ॥
सव्यहस्तं च तस्योर्ध्वे तत्र न्यस्त्वा समस्थितम् ।
दक्षिणे चाक्षमालां च वामहस्ते कमण्डलुम् ॥ १०४ ॥
सरस्वती दक्षिणे(दक्ष) भागे सावित्री वामपार्श्वके ।
आसीना वा स्थिता वाऽपि पद्मपीठोपरि द्विज ॥ १०५ ॥
त्रिनेत्रोऽसमश्चेतवर्णश्चतुर्दोर्भिः समन्वितः ।
सर्वाभरणसंयुक्तः शुक्लवस्त्रोपवीतकः ॥ १०६ ॥
नेत्रद्वयसमायुक्तः करण्डमुकुटान्वितः ।
अभयो वरदोपेतः शूलपाशभृतः शुचिः ॥ १०७ ॥
पद्मपीठोपरिष्टात्तु स्थानकं समपादकम् ।
भृगुः शुक्रनिभः शान्तः शुक्लवस्त्रधरस्तथा ॥ १०८ ॥
करण्डमकुटोपेतो हस्तद्वयसमन्वितः ।
अभयो वरदोपेतः सर्वाभरणभूषितः ॥ १०९ ॥
स्थानकं वाऽऽसनं वाऽपि पद्मपीठो भृगुः शुभः ।
पूर्वमेवोदितस्त्वीशस्तथाऽगस्त्यं कल्पयेत् ॥ ११० ॥
अगस्त्यवत्कौशिकं च स्थापयेत्स्थापकोत्तमः ।
एकनेत्रश्चतुर्बाहुर्नेत्रत्रयसमन्वितः ॥ १११ ॥
क्षौमवस्त्रधरः शान्तो बन्धूककुसुमप्रभः ।
जटामुकुटसंयुक्तः सर्वाभरणभूषितः ॥ ११२ ॥
अभयो वरदोपेतो टङ्कशूलसमन्वितः ।
विघ्नेशं पूर्ववत्कृत्वा स्थापयेद्देशिकोत्तमः ॥११३ ॥

अथ सरस्वती—

सरस्वती चतुर्हस्ता श्वेतपद्मासनान्विता ।
जटामुकुटसंयुक्ता शुक्लवर्णा सिताम्बरा ॥ ११४ ॥
यज्ञोपवीतसंयुक्ता रक्तकुण्डलमण्डिता ।
सर्वाभरणसंयुक्ता मुक्ताहारा सुलोचना ॥ ११५ ॥
व्याख्यानं चाक्षसूत्रं च दक्षिणे तु करद्वये ।
पुस्तकं कुण्डिका चापि त्रिनेत्रा चारुरूपिणी ।
ऋग्यजुःसामभिस्तेन मुनिभिः सेविता वरा ॥ ११६ ॥

एवं लक्षणसंयुक्ता वाग्देवी परिकीर्तिता।

अथ लक्ष्मीः—

लक्ष्मीः पद्मासनासीना द्विभुजा काञ्चनप्रभा ॥ ११७ ॥
हेमरत्नोज्ज्वलं तत्र कुण्डलं कर्णमण्डितम्।
सुयौवना सुरम्याङ्गा कुञ्चितभ्रूः सविभ्रमा ॥ ११८ ॥
रक्ताक्षी पीनगण्डा च कञ्चुचूद(काढय)स्तनद्वयी।
शिरसो मण्डनं शङ्खचक्रसीमन्तपङ्कजम् ॥ ११९ ॥
अम्बुजं दक्षिणे हस्ते वामे श्रीफलमिष्यते।
सुमध्या विपुलश्रोणी शोभनाम्बरवेष्टिता ॥ १२० ॥
मेखलाकटिसूत्रा च सर्वाभरणभूषिता।
एकाक्षसदृशस्त्वेकरुद्रं कुर्याद्विशेषतः ॥ १२१ ॥
पशुपतिं पूर्ववच्च स्थापयेद्देशिकोत्तमः।
धरो ध्रुवश्च सोमश्च आपस्त्वनल एव च ॥ १२२ ॥
अनिलः प्रत्युषाश्चैव प्रभावश्च तथैव च।
वसवश्चाष्टकास्ते वै रक्तवर्णा द्विदोर्द्विकाः ॥ १२३ ॥
पीताम्बरधराः सर्वे आसीना वा स्थिताश्च वा।
खड्गखेटकहस्तास्ते सर्वाभरणभूषिताः ॥ १२४ ॥
करण्डमुकुटोपेता रौद्राः सर्वे प्रकीर्तिताः।
कर्तव्यः पशुपतिवन् महादेवो द्विजोत्तम ॥ १२५ ॥
एकरुद्रवत्कर्तव्यस्त्रिमूर्तिर्द्विजसत्तम।
सत(धन)दः सर्वयक्षेशः सर्वाभरणभूषितः ॥ १२६ ॥
तप्तकाञ्चनसंकाशहस्तद्वयसमन्वितः।
वरदाभयहस्तश्च गदां वा वामहस्तके ॥ १२७ ॥
पद्मपीठोपरिष्टात्तु द्विनेत्रो मेघवाहनः।
रक्ताम्बरधरः सौम्यः शङ्खपद्मनिधीयुतः ॥ १२८ ॥
शङ्खपद्मनिधी द्वौ च भूताकारमहाबलः(लौ)।
आसीनौ पद्मपीठे तु पद्महस्तौ द्विजोत्तम ॥ १२९ ॥
करण्डमुकुटोपेतौ सितवासोत्तरीयकौ।
दक्षिणेऽदक्षिणे शङ्खनिधिं पद्मनिधिं क्रमात् ॥ १३० ॥

धनदस्य तु वामे च देवीं कुर्यात्सलक्षणाम् ।
धनदो ह्येवमाख्यातः प्राग्वदिन्द्रान्प्रकल्पयेत् ॥ १३१ ॥
कालाग्निरुद्रमूर्तेस्तु लक्षणं वक्ष्यतेऽधुना ।
चतुर्भुजं त्रिनेत्रं च ज्वालामालोपशोभितम् ॥ १३२ ॥
खड्गखेटकसंयुक्तं शशाङ्कार्धधृतं परम् ।
रक्तवस्त्रधरं रौद्रं सर्वाभरणभूषितम् ॥ १३३ ॥
रक्तोर्ध्वकेशसंयुक्तं सिंहासनोपरि स्थितम् ।
चतुर्भुजं त्रिनेत्रं च नीलोत्पलसमप्रभम् ॥ १३४ ॥
करण्डमुकुटोपेतं सर्वाभरणभूषितम् ।
अभयं वरदोपेतं टङ्कशूलधृतं परम् ॥ १३५ ॥
रक्तवस्त्रसमायुक्तं पद्मपीठोपरि स्थितम् ।
श्रीकण्ठो ह्येवमाख्यातो नगदेवस्त्वथोच्यते ॥ १३६ ॥
त्रिनेत्रं चतुर्भुजं सौम्यं रक्ताभं सितवाससम् ॥
अभयं वरदोपेतं परहस्ते तु नागधृत् ॥ १३७ ॥
करण्डमुकुटोपेतं नागं पञ्चफणान्वितम् ।
सर्वाभरणसंयुक्तं पद्मपीठोपरि स्थितम् ॥ १३८ ॥
भीमश्चतुर्भुजो रौद्रः सर्वाभरणभूषितः ।
अभयं वरदं चैव शूलं पाशं च धारयेत् ॥ १३९ ॥
सितवस्त्रधरश्चैव उग्रदृष्टिः सदंष्ट्रकः ।
सस्याङ्कुरनिभाभूषीनीलालकसमन्वितः ॥ १४० ॥
करण्डमुकुटोपेतः सर्वाभरणभूषितः ।
पीताम्बरधरश्चैव प्रसन्नवदनान्वितः ॥ १४१ ॥
पद्मं वाऽप्युत्पलं वाऽपि उभयोर्हस्तयोर्धृतः ।
पद्मपीठोपरिष्टात्तु आसीनो वा स्थितस्तु वा ॥ १४२ ॥
शिखण्डः कज्जनाभस्तु चतुर्भुजसमन्वितः ।
खड्गखेटकसंयुक्तः पद्मपीठोपरि स्थितः ॥ १४३ ॥
मरुद्गणा धूम्रवर्णा द्विभुजाश्चसमुद्गराः ।
केशभारसमायुक्ताः सर्वाभरणभूषिताः ॥ १४४ ॥
दुकूलवसनाः सर्वे नानापुष्पैरलंकृताः ।
टङ्कशूलसमायुक्ताः पीनोरुजघनस्तनाः ॥ १४५ ॥

पादपीठोपरिष्टात्तु अष्टावेतान्मरुद्गणान् ।
उग्रश्चतुर्भुजो रौद्रो रक्तवस्त्रसमन्वितः ॥ १४६ ॥
करण्डमुकुटोपेतः सर्वाभरणभूषितः ।
अभयं वरदोपेतं टङ्कशूलधृतः परः ॥ १४७ ॥
स्थानकं पद्मपीठे तु शुक्लवस्त्रधरः शुचिः ।
शनैश्चरः कृष्णवर्णो द्विभुजः सितवक्र(क्त्र)कः ॥ १४८ ॥
करण्डमुकुटोपेतः सर्वाभरणभूषितः ।
दण्डं दक्षिणहस्ते तु वरदं वाम उच्यते ॥ १४९ ॥
स्थानकं पद्मपीठे तु आसीनं वा विशेषतः ।
ईषत्कुञ्चितमिवस्थान ईषद्ध्रस्वतनुः स्मृतः ॥ १५० ॥
प्रथमं ह्येवमाख्यातं पीठं तल्लक्षणं शृणु ।
प्रासादस्य तु विस्तारं यत्तद्दण्डमिहोच्यते ॥ १५१ ॥
भानुद्वयाङ्गुलं तारमुत्सेधं भानुमात्रकम् ।
गुणाङ्गुलं समुत्सेधं पद्मोत्सिक्तगुणालयम् ॥ १५२ ॥
षडङ्गुलं पद्मविस्तारं शेषोर्ध्वं कम्पनीत्रकम् ।
शिलाभिरिष्टकाभिर्वा सुधया वा प्रकल्पयेत् ॥ १५३ ॥
परिवारविष्टरो ह्येवं महापीठविधिं शृणु ।
प्रासादस्य तु विस्तारं यत्तद्दण्डमिहोच्यते ॥ १५४ ॥
मूलहर्म्यं समालभ्य षडष्टमण्डलान्वितम् ।
दशद्वादशदण्डो वा मनुदण्डावसानकम् ॥ १५५ ॥
षोडशेऽष्टादशे वाऽपि महापीठं प्रकल्पयेत् ।
अथवाऽन्यप्रकारेण पीठस्थानं विधीयते ॥ १५६ ॥
तृतीये वा चतुष्पञ्च सालेऽग्रायाममध्यमे ।
महापीठं प्रकर्तव्यं तस्य लक्षणमुच्यते ॥ १५७ ॥
मूलधामस्य द्वारोच्चमुत्तमं पीठविस्तृतम् ।
त्रिपादं मध्यमं प्रोक्तं द्वारतुङ्गार्धकन्यसम् ॥ १५८ ॥
शुद्धद्वारस्य विस्तारं मध्यमं पीठमुच्यते ।
द्विगुणं मध्यमं प्रोक्तं त्रिगुणं श्रेष्ठमुच्यते ॥ १५९ ॥
अथवा व्योमहस्तं तु अधमं पीठविस्तृतम् ।
द्विहस्तं मध्यमं प्रोक्तं त्रिहस्तं वृत्तमात्मकम् ॥ १६० ॥

दुर्मुखं सौम्यदिग्भागे वायुभूतं तदेव हि ।
अविघ्नं कर्णिकोर्ध्वे तु व्योमात्मकमुदाहृतम् ॥ १६१ ॥
तामसं त्वनले पद्मे वा स्यान्नैर्ऋते दले ।
सात्त्विकं वायुदिग्भागे विघ्नकर्तारमीशके ॥ १६२ ॥
विघ्नकर्तारमित्युक्तमात्मनत्वमुदाहृतम् ॥
भूम्यन्तरिक्षं स्वर्गं च सर्वभूतगुणात्मकम् ॥ १६३ ॥
तत्सर्वमात्मामित्युक्तं महापीठं द्विजोत्तम ।
तामसाद्धि निवृत्त्यर्थं नित्यं बल्यन्तमर्चयेत् ॥ १६४ ॥
तासामात्मापहाराय नित्योत्सवैः प्रदक्षिणम् ।
भूमिप्रदक्षिणं त्वादौ द्वितीयं ह्यन्तरिक्षकम् ॥ १६५ ॥
स्वर्गप्रदक्षिणं पश्चात्कृततद्वासिनां हितम् ।
जगदार्तिविनाशार्थं कल्प्यैवं साधकोत्तमः ॥ १६६ ॥
पश्चिमाभिमुखे हर्म्ये किंचिद्भेदं वदाम्यहम् ।
वृषस्थाने कुमारं तु कौमारे वृषं विन्यसेत् ॥ १६७ ॥
वारुणं तु महापीठं शेषं पूर्ववदाचरेत् ।
परिवारविधिः प्रोक्तः पश्चाल्लिङ्गस्य लक्षणम् । ॥ १६८ ॥

इति काश्यपशिल्पे परिवारविधिरष्टचत्वारिंशः पटलः ।

अथैकोनपञ्चाशत्तमः पटलः ।

लिङ्गलक्षणम् ।

अथ वक्ष्ये विशेषेण शिवलिङ्गस्य लक्षणम् ।
संसारविषये भूता लयं गच्छन्त्यशेषतः ॥ १ ॥
यथा सृष्टिस्तथा तस्मात्सृष्टित्वाल्लिङ्गमुच्यते ।
संसारे निष्कलं शान्तं वाङ्मनोतीतगोचरम् ॥ २ ॥
मुक्तिदं सर्वभूतानां स्वात्मनः परमं विना ।
सर्वाभिव्यापिनं गुह्यं सर्वलोकैकनायकम् ॥ ३ ॥
तस्माद्वै सृष्टिकालेषु शान्तितत्त्वसमुद्भवः ।
तच्छान्तेः शक्तिः संभूता तस्या नादस्य संभवः ॥ ४ ॥

तस्माद्बिन्दुसमुत्पन्नं नादं सादाख्यमुच्यते ।
बिन्दुमानेन विख्याता तस्मादीश्वरसंभवः ॥ ५ ॥
ईश्वरान्महेश्वरस्य सृष्टिस्तस्मात्तु वैष्णवम् ।
तस्मात्प्रासादसद्भावः प्रादेशात्तु विशेषतः ॥ ६ ॥
त्रीणि चैव त्व(तु)त्रिंशच्च त्रिंशतं त्रिसहस्रकम् ।
देवता ऋषयश्चैव दानवा रसयोनयः ॥ ७ ॥
संभवो ह्यादितो विप्र तेष्वादौ त्रीणि निष्कलम् ।
शिवं तं सकलं ख्यातं मिश्रनादं च बिन्दुकम् ॥ ८ ॥
नादं लिङ्गाकृति ज्ञेयं बिन्दुपीठाभमुच्यते ।
लिङ्गं शिवमयं ख्यातं पीठं तस्यात्मकामयम् ॥ ९ ॥
तस्माच्छिवात्मिका चैव अभिन्नेवानलोष्णवत् ।
जगदार्तिविनाशार्थं सर्वप्राणिहिताय वै ॥ १० ॥
देवादीनां हितार्थाय ध्यानपूजानिमित्तकम् ।
लिङ्गे योनिप्रकारेण सादाख्यं तत्त्वमुद्भवम् ॥ ११ ॥
सर्वेषामुद्भवार्थं तु प्रोच्यते लिङ्गलक्षणम् ।
तल्लिङ्गं त्रिविधं ख्यातं चलं चैवाचलं तथा ॥ १२ ॥
चलाचलं च विख्यातं क्रमेणैव विशेषतः ।
रत्नजं लोहजं वाऽथ लिङ्गं कृत्वा सयोनिकम् ॥ १३ ॥
लिङ्गद्रव्येतरं ख्यातं योनिं कृत्वा सलक्षणम् ।
शिरसो वर्तनोपेतं लक्षणोद्धारवर्जितम् ॥ १४ ॥
वृत्ताकारमशेषं तु कृते लिङ्गोदयार्धकम् ।
उदयेन लोकभागं वा वेदांशेन तथापि वा ॥ १५ ॥
पीठे निवेशयेच्छेषं दृय(श्य)मानसमन्वितम् ।
गमागम ... चेष्टदेशेऽन्यस्योद्धृतक्षयम् ॥ १६ ॥
यत्तल्लिङ्गं चलं वेशं दृश्य चलाचलाचलम् ।
अश्मजं सूत्रसंयुक्तं बाणलिङ्गं तु तद्विना ॥ १७ ॥
तेष्वादौ त्वचलं लिङ्गलक्षणं वक्ष्यतेऽधुना ।
सुमासतिथिनक्षत्रलग्नवारे शिलां ग्रहेत् ॥ १८ ॥
आचार्यः शिल्पिसंयुक्तः शिलाग्रहणमाचरेत् ।
दिव्यान्तरिक्षभौमानि निमित्तान्युपलक्षयेत् ॥ १९ ॥

वायसं दक्षिणे वामादागतं च तथैव च ।
श्येनं वै दक्षिणे वामे गृध्रं मांसेन संयुतम् ॥ २० ॥
कन्यागोदर्शनं चैव गावस्त्वावाहनं तथा ।
दधिना पूर्णकुम्भं च क्षीरकुम्भं तथैवच ॥ २१ ॥
पुष्पं पुष्पधृतं वाऽपि सुतवतीयु(द्यु)वतिस्त्रियः ।
अन्नं च मांसहास्व(हारं च)शिवभक्तिपरायणम् ॥ २२ ॥
ज्वालानलं च दीपं च जलैः पूर्णं घटावृतम् ।
त(व)राहं च गजं चैव वेण्या चात्यन्तसुन्दरी ॥ २३ ॥
शुभान्येतानि भौमानि अशुभं विपरीतकम् ।
उल्कापातं दिशां दाहं महावातप्रवर्तनम् ॥ २४ ॥
अशुभान्यन्तरिक्षाणि भौमाशोभनमुच्यते ।
मुक्तकेशनराश्चैव कीर्णकेशास्तथैव च ॥ २५ ॥
तैलाभ्यक्ताश्च नग्नाश्च काषायवसनान्विताः ।
दर्शनेनैव मृद्भाण्डं तैलपात्रं तथैव च ॥ २६ ॥
छिन्ननासिकन्यां(साकर्णक)श्च हीनाङ्गश्चाधिकाङ्गवान् ।
पुत्रहीना तु नारी च विधवा च तथैवच ॥ २७ ॥
बहुभक्ष्याश्च भौमान्येतानि[वै]वर्जयेच्छुभे ।
शुभं चेद्भवनं कुर्यादशुभं चेद्विवर्जयेत् ॥ २८ ॥
अशुभे त्वग्निमास्तीर्य शिवेनैव शताहुतीः ।
सामिदाज्योदनैः कुर्यान्नागान्नं नागभूषणम् ॥ २९ ॥
दत्त्वा शिवं नमस्कृत्य गच्छेदाचार्यशिल्पि च ।
पर्वते सागरे तीर्थे क्षेत्रे चैव वने पुनः ॥ ३० ॥
क्षीरवृक्षसमीपे च देवहर्म्यसमीपके ।
नदीतटाकतीरे वा शिलां संगृह्य शिल्पकः ॥ ३१ ॥
अन्यस्थाने न गृह्णीयाद्ग्राहितेस्यान्नुनाशनम् ।
श्वेता रक्ता च पीता च कृष्णा चैव चतुर्विधा ॥ ३२ ॥
गोक्षीरशङ्खकुन्देन्दुमुक्तास्फटिकसंनिभा ।
मल्लिकाकुसुमप्रख्या श्वेता सप्तविधा स्मृता ॥ ३३ ॥
जपाकिंशुकपुष्पाभा इन्द्रको(गो)पसमप्रभा ।
जातिलिङ्गनिभाकारा शशरक्तसमप्रभा ॥ ३४ ॥

दाडिमीपुष्पसंकाशा बन्धूककुसुमप्रभा ।
कोरण्ड(कुरण्ट)कुसुमप्रख्या पीता शैला च सप्तधा ॥ ३५ ॥
महिषाक्षाञ्जनाभासा नीलोत्पलसमप्रभा ।
भृङ्गमायूरकण्या(ण्ठा)भा मषीपत्रसमा तथा ॥ ३६ ॥
राजावर्तनिभाकारा कृष्णमुद्गसमप्रभा ।
ह्रस्वमुद्गसमाकारा कृशैशला(ष्णशैल)दशा स्मृता ॥ ३७ ॥
श्वेता रक्ता च पीता विप्रादीनां क्रमाद्भवेत् ।
धर्मकामार्थमोक्षांश्च दद्युः सततमेव च ॥ ३८ ॥
परेषां वाचकं श्रेष्ठं परेषामपरं विना ।
प्रतिलोमानुलोमाभ्यां भिन्नयोगं न गृह्यताम् ॥ ३९ ॥
आचार्यशिल्पिनौ चैव सितवस्त्रधरावुभौ ।
शुक्लमाल्यानुलिप्ताङ्गौ पञ्चाङ्गभूषणान्वितौ ॥ ४० ॥
कुठारादीनि संगृह्य शिलां गच्छेत्समाहितौ ।
यस्मिन्देशे शिला शेते तां कृत्वा तु प्रदक्षिणम् ॥ ४१ ॥
दोषवर्जां शिलां दृष्ट्वा परिच्छेद्य विशेषतः ।
वम्रा(र्षा)तपाग्निगन्धां च सुकीर्णां क्षारवारिणा ॥ ४२ ॥
दुर्देशस्थां तटस्थां च कर्मान्तरे तु योजिताम् ।
शर्कराढ्यां च पङ्कां च जर्जरां रूक्षसंयुताम् ॥ ४३ ॥
रेरवाबिन्दुकलङ्कादिसंयुक्तां परिवर्जयेत् ।
सूत्रवद्धातदाकारा रविरश्मिसमायुता ॥ ४४ ॥
वर्षपातवदाकारा रेखा वै त्रिविधा स्मृता ।
जम्बूफलसमाकारा वा द्राक्षासदृशोपमा ॥ ४५ ॥
अन्यद्वा वृत्तसंकाशा त्रिविधा बिन्दुरेव हि ।
कृष्णलोहनिभाकारा कृष्णभ्रमरसंनिभा ॥ ४६ ॥
शिखिपिच्छसमाकारा कलङ्का च चतुर्विधा ।
खर्जूरपत्रसंकाशा दूर्वास्तम्बनिभा तथा ॥ ४७ ॥
वैणवाङ्कुरसंकाशा लूतापादवदायता ।
अन्याश्मसु सितारेखा सर्वसम्पत्समृद्धिदा ॥ ४८ ॥
कृष्णकृष्णा विनाशाय श्वेतकृष्णातथैव हि ।
यस्मात्सर्वप्रयत्नेन इतरा परिगृह्यताम् ॥ ४९ ॥

हरिता कृष्णा शिला ग्राह्या सितवर्णा विशेषतः ।
खर्जूरपत्रसदृशा दूर्वास्तम्बाकृतिः शुभा ॥ ५० ॥
अन्यकृत्वा (ष्णाऽशुभा ख्याता गोधान्यधननाशनम् ।
सकलं रोगदं ज्ञेयं राजराष्ट्रविनाशनम् ॥ ५१ ॥
बिन्दुः पुत्रविनाशः स्याद्दारिद्र्यं श्रीविनाशनम् ।
एवं पर्यक्षि(रीक्ष्य)बहुधा कारयेल्लक्षणान्वितम् ॥ ५२ ॥
बाला युवतिर्वृद्धा च पुंस्त्रीनपुंसकं तथा ।
स्वरैराकृति भेदैश्च परिच्छेदविधिं शृणु ॥ ५३ ॥
खनकंसध्वनिर्हस्वा शिला बाला इति स्मृता ।
घण्टाध्वनिसमा दीर्घा युवतिः सा प्रकीर्तिता ॥ ५४ ॥
विप्र(त)तध्वनिसंयुक्ता या सा वृद्धाचँ कीर्तिता ।
घण्टाध्वनिसमोन्नादा दीर्घा सा पुंशिला इव ॥ ५५ ॥
तालशब्दसमाकारा दीर्घा या सा शिला स्त्रियः ।
अस्निश्च(स्नेहा) झर्झरी इ(रू)क्षा स्वरहीना नपुंसका ॥ ५६ ॥
स्वरैरेव समाख्याता आकृत्या भेद उच्यते ।
चतुरश्रा च वस्वश्रा स्त्रीशिलेति प्रकीर्तिता ॥ ५७ ॥
आयताश्रा च वृत्ता च दशद्वादशकोणका ।
पुंलिङ्गा सा शिला ख्याता सुवृत्ता सा नपुंसका ॥ ५८ ॥
दशाग्रद्वादशाग्रां च बालवृद्धां च वर्जयेत् ।
पुंशिलाभिः कृतं लिङ्गं स्त्रीशिलाभिस्तु पिण्डिका ॥ ५९ ॥
नपुंसकशिलाभिस्तु पादाधारः समाचरेत् ।
कृतं च विपरीतं यत् तत्सदा कर्तृनाशनम् ॥ ६० ॥
प्रागग्रां वोदगग्रां वा शिलां संग्राह्य देशिकः ।
प्रागग्रे पश्चिमं मूलमुदगग्रं तु दक्षिणे ॥ ६१ ॥
शङ्कुसौम्यगतं यत्तल्लिङ्गाग्रं तत्प्रकीर्तितम् ।
अधोभागं मुखं ख्यातं पृष्ठमूर्ध्वगतं भवेत् ॥ ६२ ॥
एवं परीक्ष्य संग्राह्य गव्यैः क्षाल्य हृदा बुधः ।
सत्यमन्त्रेण संस्थाप्य गन्धपुष्पादिभिर्यजेत् ॥ ६३ ॥

तस्यास्तु शाङ्करे देशे शान्तिहोमं तु कारयेत् ।
अग्न्याधानादिकं सर्वमग्निकार्योक्तमाचरेत् ॥ ६४ ॥
समिधो हृदयेनैव मूलेनाऽऽज्यं तु होमयेत् ।
चरुहोममघोरेण पुरुषेणैव तण्डुलम् ॥ ६५ ॥
तिलमीशानमन्त्रेण सर्षपं कवचेन तु ।
शतमर्धं तदर्धं वा प्रत्येकं जुहुयात्क्रमात् ॥ ६६ ॥
स्विष्टकृतिमग्नेति(दग्ने)मन्त्रेण पूर्णाहुतिमथाऽऽचरेत् ।
ततो वह्निं समुद्वास्य पूजापर्युषितं त्यजेत् ॥ ६७ ॥
शिलाच्छेत्ताहकं(दकरं)श(स्त्रमस्त्र)मन्त्रेण पूजयेत् ।
अपसर्पणमुच्चार्य शिलाच्छेदनमाचरेत् ॥ ६८ ॥
गर्भगेहं तु पञ्चांशं गुणांशं श्रेष्ठमुच्यते ।
गर्भगेहप्राणं च द्वारमानं तथैव च ॥ ६९ ॥
स्तम्बं च कालमानं च हस्ततालाङ्कुलं तथा ।
लिङ्गमानं ध्रुवं सप्त भेदास्ते प्रत्यनेकधा ॥ ७० ॥
गर्भगेहं तु पञ्चांशं गुणांशं श्रेष्ठमुच्यते ।
गर्भार्धं मध्यमाख्यातं तयोर्मध्येऽष्टभाजिते ॥ ७१ ॥
श्रेष्ठमध्याधमं लिङ्गं प्रत्येकं त्रिविधा भवेत् ।
अथवा गर्भगेहं तु नवभागविभाजिते ॥ ७२ ॥
गर्भगेहसमासार्धानुत्तमादि त्रयत्रयम् ।
शुद्धद्वारसमं श्रेष्ठं त्रिद्व्यंशं तु कनीय्र(य)सम् ॥ ७३ ॥
तयोर्मध्येऽष्टभागे तु नन्दभेदं द्विजोत्तम ।
स्तम्भायामसमासं तु नवभागविभाजिते ॥ ७४ ॥
श्रेष्ठान्त(ध)मानि नवधा प्रोच्यते द्विजसत्तम ।
प्रासादे त्वादिभूमौ तु स्तम्भभागसमं हि तत् ॥ ७५ ॥
तन्मध्यमिति विख्यातं तस्यार्धमधमं भवेत् ।
तयोर्मध्येऽष्टभागेन नन्दभेदे द्विजोत्तम ॥ ७६ ॥
स्तम्भायामे तु तत्रैव नवभागविभाजिते ।
नवधा लिङ्गमानं तु स्तम्भमानं द्विजोत्तम ॥ ७७ ॥
अधिष्ठानोदयं विप्र स्तम्भमानवदाचरेत् ।
एकहस्तं समारभ्य स्वाष्टांशांशविवर्धनात् ॥ ७८ ॥

नवहविधिर्या(स्तावधिं या)वत् संख्या षष्टिः सपञ्चका ।
पञ्चहस्तद्विमानासि(नि)हर्म्ये हस्तवशान्नयेत् ॥ ७९ ॥
पञ्चहस्तादतो हर्म्ये लिङ्गस्तम्भवशं विना ।
हस्तादि गुणहस्तान्तं विकल्पाभासहर्म्ययोः ॥ ८० ॥
त्रिहस्तं षट्करान्तं तु लिङ्गच्छन्दविमानके ।
षट्करादि नवान्तं तु लिङ्गं जातिगृहोचितम् ॥ ८१ ॥
एवं हस्तवशात्ख्यातं तालमानमथोच्यते ।
तालादि नवतालान्तमेकतालविवर्धनात् ॥ ८२ ॥
लिङ्गे हि नव संख्याः स्युः कल्प्यं जातीतरालये ।
त्रयोदशाङ्गुलारभ्य यावन्नद(व)शताङ्गुलम् ॥ ८३ ॥
तावदेकोनपञ्चांशलिङ्गं मानाङ्गुलेन तु ।
त्रिभागसहितं लिङ्गं हस्तक्षीणं न कारयेत् ॥ ८४ ॥
हस्तमानाक्षयं लिङ्गं वृत्ताकारमशेषकम् ।
वेदानवोल एवांशषष्टि(विष्ट)रे योजयेद्बुधः ॥ ८५ ॥
शेषं तु दृश्यमानं स्याद्विकल्पाभाससंय(हर्म्य)योः ।
विष्टरे ये(ई)शलिङ्गं तु विकल्पापगृहे विना ॥ ८६ ॥
एकाङ्गुलं समारभ्य यावद्राता(त्सप्ता)ङ्गुलावधि ।
लोहजं रत्नजं तावदूर्ध्वं शैलजमुच्यते ॥ ८७ ॥
त्रयोदशाङ्गुलं लिंगं शैलजं तु न कारयेत् ।
एवं त्वनेकभेदेन प्रोच्यते लिङ्गमानकम् ॥ ८८ ॥
नागरं द्राविडं लिङ्गं वेसरं च वदाम्यहम् ।
लिङ्गोदये तु वेदांशे एकांशं कन्यसस्तमम् ॥ ८९ ॥
तुङ्गऽंशे शिवांशं तु विस्तारं श्रेष्ठमुच्यते ।
तयोर्मध्येऽष्टभागे तु नवधा तारमुच्यते ॥ ९० ॥
अथोदये कलांशे तु पञ्चांशं शान्तिकं भवेत् ।
वेदांशं पौष्टिकं ख्यातं गुणांशं जयदं भवेत् ॥ ९१ ॥
अविचारादिभागः स्याद्वासमेवं चतुर्विधम् ।
एवं त्रयोदशव्यासं नागरे तु विधीयते ॥ ९२ ॥
लिङ्गोच्चे द्विर्नवांशे तु रसभूतयुगांशके ।
गुणांशे शान्तिकादिः स्याद्द्राविडे च चतुर्विधम् ॥ ९३ ॥

वेसरे लिङ्गतुङ्गे तु विंशत्यंशविभाजिते ।
अष्टवा सप्तषट्पञ्चभागैर्व्यासं प्रकल्पितम् ॥ ९४ ॥
शान्तिकं पौष्टिकं चैव जयदं च क्रमेण तु ।
वेसरं च चतुर्भेदं हर्म्यलिङ्गं च पिण्डिका ॥ ९५ ॥
पादाधारशिलाश्चैव एकजातिस्वशङ्करम् ।
पादधारशिलाश्चैव एकजातिष्वसंङ्करम् ॥ ९६ ॥
यत्रैवं कल्पितं लिङ्गं वृद्धिहेतुरुदाहृतम् ।
अन्योन्यसंकरश्चेत्तु राज्ञो दुःखभयावहं ॥ ९७ ॥
तस्मात्सर्वप्रयत्नेन संकरं न समाचरेत् ।
लिङ्गानां नागराद्येवं ख्यातमायादिकं शृणु ॥ ९८ ॥
लिङ्गस्योत्सेधमानं तु मानाङ्गुलेन भाजयेत् ।
मात्रच्छेदं प्रवृद्ध्या वा हन्याद्वा परिकल्पयेत् ॥ ९९ ॥
श्रेष्ठान्तरायाममात्रैर्मात्रपूर्णं परिग्रहेत् ।
उत्सेधमात्रमष्टाभिर्व्यधितं ऋक्षसंख्यया ॥ १०० ॥
त्वष्टां शे नन्दिनं ख्यातमश्विन्यादि द्विजोत्तम ।
नवभिर्गुणिते सप्तद्वित्रे(हृते)त्वेकादिवारके ॥ १०१ ॥
अनले गुणिते चाष्टहृद(ते)योनिमु(रु)दाहृतम्(ता) ।
अष्टभिर्वर्धिते भानुधृ(हृ)ते त्वायमुदाहृतम् ॥ १०२ ॥
नवभिर्गुणिते नाडीहृते शेषमृणं भवेत् ।
युगवृद्ध्या नवे हासे त्वशंकं तस्करादयः ॥ १०३ ॥
आयाधिक्यं व्ययं क्षीणं संपदामास्पदं सदा ।
ध्वजसिंहवृषाहस्तिशुभयोनिरुदाहृता ॥ १०४ ॥
नृपकर्तुश्च जन्मर्क्षल(र्क्षाल्लि)ङ्गऋक्षावसानकम् ।
तथैर(व)वास्तुऋक्षादि गणयेत्तु शुभाय(श)या(वहम्) ॥ १०५ ॥
जन्मत्रयं च युग्मं च वेदाष्टर्तुनन्दकाः ।
शुभावहपिना(य विहिता) ह्येते शेषकास्त्वशुभावहाः ॥ १०६ ॥
लग्नाष्टकं च वै ... ... नराक्षसम् ।
वर्जितास्त्वशुभा ह्येते यत्नतः परिवर्जयेत् ॥ १०७ ॥
भानुवारादिसंयुक्ता शूर्पक्षा(सूर्यर्क्षा)दिचतुश्चतुः ।
रिपुत्वं मरणं नाशममृतं च यथाक्रमात् ॥ १०८ ॥

तस्करं चमणिं(र्मिणं)पण्ड(ण्ढं)मशकं परिवर्जयेत् ।
शेषाङ्गकं परिग्राह्यं शुभमानं तु संग्रहेत् ॥ १०९ ॥
समलिङ्गं वर्धमानं शैवाधिकं तु स्वस्तिकम् ।
सर्वत्रो(तो)भद्रलिङ्गं च सार्वदेशिकमेव च ॥ ११० ॥
धारालिङ्गं मुखलिङ्गं लिङ्गभेदमष्टविधं भवेत् ।
समलिङ्गं तु विप्राणां नृपाणां वर्धमानकम् ॥ १११ ॥
शैवाधिकं तु वैश्यानां शूद्राणां स्वस्तिकं भवेत् ।
सर्वेषामितरल्लिङ्गं सर्वकामफलप्रदम् ॥ ११२ ॥
एक एव महादेवो लिङ्गभेदान्नृणां हितः ।
इष्टायामविशालेन चतुरश्रीकृतं पुरा ॥ ११३ ॥
पश्चाद्भागत्रयं कल्प्यमनेन विधिना युतः ।
चतुरश्रमधोभागं ब्रह्मभागं समुच्यते ॥ ११४ ॥
मध्ये तु वसुकोणं स्याद्विष्णवंशं तत्प्रकीर्तितम् ।
ऊर्ध्वभागं तु वृत्तं स्यात्तच्छिवांशेति विद्यते ॥ ११५ ॥
अंशं प्रत्यभिधानास्ते अशेषं तु शिवात्मकम् ।
शिवातीत ... ... ॥ ११६ ॥
पूजाभागत्रयं कृत्वा ऊर्ध्वभागमुखं भवेत् ।
... ... चैव समायतम् ॥ ११७ ॥
कर्णाष्टौ द्वादशाक्षं च सर्वलक्षणसंयुतम् ।
लिङ्गारयतस्तस्य तस्यांशं पिण्डिकान्वितम् ॥ ११८ ॥
.... अथवाऽधिकम् ।
नेत्रसूत्रात्पुटान्तं च पुटार्धं वर्धमानकम् ॥ ११९ ॥
प्रत्येकं तु पदाधिक्यं युगांशं परिकल्पनम् ।
ह(हि)त्वादि गलमानं तु चत्वार्येवमुदाहृतम् ॥ १२० ॥
यवैकोनदशांशं तु कण्ठोच्चमिति विद्यते ।
शेषं लिङ्गाकृति ख्यातं कलयेल्लक्षणान्वितम् ॥ १२१ ॥
चतुर्वक्त्रैकवक्त्रं वा चतुर्बाहु द्विबाहु वा ।
स्तनसूत्रोपरिष्टात्तु बिम्बं लक्षणसंयुतम् ॥ १२२ ॥
हित्वा सूत्रोपरिष्टाद्वा शेषं लिङ्गाकृतिर्भवेत् ।
मुखलिङ्गमिति ख्यातं नृपाणामपि वृद्धये ॥ १२३ ॥

विष्कम्भमष्टधा कृत्वा मूले मध्ये तथाऽग्रके ।
भागहीनं तु संकल्प्य स्थूलमूलमुदाहृतम् ॥ १२४ ॥
ह्रासयेच्छिवभागादि शिरःस्थूलमुदाहृतं ।
एतदार्षमिति ख्यातमृषिभिः पूजितं वरम् ॥ १२५ ॥
गुणाग्रं पञ्चकोणं च षट्सप्तद्वादशाश्रकम् ।
दशधा वाऽश्रकं चापि अश्रेतरमनोहरम् ॥ १२६ ॥
फलकादर्पणाकारमेकरेखमरेखकम् ।
शिरसो वर्तनाहीनं मानोन्मानैरनन्वितम् ॥ १२७ ॥
सेव्यं स्वायंभुवं चेति ख्यातं देवैः सुपूजितम् ।
बाणेन पूजिताभोगिं (गं) बाणलिङ्गमुदाहृतम् ॥ १२८ ॥
स्थूलं सूक्ष्मं शिरोमूलं क्रमेण परिपठ्यते ।
उत्तमं तु मुखं ख्यातं मधुवर्णं सुम(न)न्दनम् ॥ १२९ ॥
विष्टरे तु प्रवेशांशं सार्वदेशिकलिङ्गवत् ।
लोहजं रत्नजं चैव सार्वदेशिकलिङ्गवत् ॥ १३० ॥
लिङ्गभेदः समाख्यातः शिरसो वर्तनं शृणु ।
लिङ्गमूर्धादिकेशान्तं शिरसो वर्तनं भवेत् ॥ १३१ ॥
तस्माल्लिङ्गोदये कुर्याच्छिरसो वर्तनं द्विज ।
छत्राकारं भवेत्पूर्वं कुक्कुटाण्डं द्वितीयकम् ॥ १३२ ॥
तृतीयं त्रिपुराकारमर्धचन्द्रं तु मूर्धकम् ।
यस्य लिङ्गस्य विष्कम्भमष्टाया(ष्टधा)विभजेद्बुधः ॥ १३३ ॥
ऊर्ध्वादर्धांशमालम्ब्य प्रथमं च त्रिशीर्षकम् ।
द्वात्रिंशद्विभजेत्तारमर्धाद्भूतांशलम्बितम् ॥ १३४ ॥
छत्राभं तद्द्वितीयं स्यात्सप्तांशं तत्तृतीयकम् ।
चतुर्थं तु नवांशं तु छत्राभं च चतुर्विधम् ॥ १३५ ॥
द्विजानां च नृपाणां च छत्राभं सर्वकामदम् ।
सर्वेषामपि लिङ्गानां छत्राभं तु प्रशस्तकम् ॥ १३६ ॥
वा(हा)से द्वात्रिंशदंशे तु मनुपक्षकलांशकैः ।
रुद्रादशांशकं चैव कुक्कुटाण्डं चतुर्विधम् ॥ १३७ ॥
वर्धमानं च लिङ्गं तु प्रशस्तं क्षत्रियार्हकम् ।
द्वात्रिंशांशे शिरस्तारे धर्मरुद्रांशकैः सदा ॥ १३८ ॥

भानुत्रयोदशांशैस्तु त्रिपुराभं चतुर्विधम् ।
शिवाधिकं च लिङ्गं तु शस्तं वैश्यार्हकं मतम् ॥ १३९ ॥
त्रिंशत्त्रिंशे शिरस्तारे द्वाविंशत्येकविंशतिः ।
विंशदेकोनविंशांशैरर्धचन्द्रं चतुर्विधम् ॥ १४० ॥
स्वस्तिकाख्यं च लिङ्गं तु प्रशस्तं शूद्रवृद्धिदम् ।
सार्वदेशिकलिङ्गानामन्येषां च विशेषतः ॥ १४१ ॥
छत्राद्विशीर्षकारे तत् कर्ततिवाशयं ननेत् ।
दैविकार्षप(ज)लिङ्गानां तेष्विष्टं शीर्षकं भवेत् ॥ १४२ ॥
शिरसो वर्तनोत्सेधौ गुणभागविभावयः(गतः) ।
स्थपतिश्च शुचिर्भूत्वा यज्ञसूत्रेत(त्रान्त)रान्वितः ॥ १४३ ॥
प्राग्वदग्निं समभ्यर्च्य स्विष्टपूर्णाहुतिं चरेत् ।
प्रतिसरं बन्धयेत्तत्र लिङ्गपीठे द्विजोत्तम ॥ १४४ ॥
स्वर्णारचितकार्पाससूत्रैर्वाहमयेन तु ।
प्रभाते सुमुहूर्ते तु लक्षणोद्धारमाचरेत् ॥ १४५ ॥
पायसं घृतसंयुक्तं शिरःस्थाने बलिं हरेत् ।
रक्तशिङ्गीं परित्यज्य गन्धाद्यैरर्चयेद्भृदा ॥ १४६ ॥
रक्तेन यातुना लिङ्गमध्ये सूत्रं तु पातयेत् ।
मुखभागस्य मध्ये तु नालं कुर्यात्सलक्षणम् ॥ १४७ ॥
लिङ्गमानेन मतिमान्सूत्रविस्तारमुच्यते ।
रुद्रभागोदयं गृह्य शिरसो वर्तनान्वितम् ॥ १४८ ॥
सवेदविशदं भागं कृत्वैकांशे तु विस्तृतम् ।
अङ्गुलं वसुधा भज्य एकांशं यवमुच्यते ॥ १४९ ॥
उत्तमोत्तमलिङ्गानां सूत्रं पञ्चायतं ततिः ।
सर्वेषामपि लिङ्गानां यवार्धं प्रतिहासयेत् ॥ १५० ॥
अधमाधमलिङ्गस्य सूत्रतारं यवं भवेत् ।
सूत्रविस्तारमेवं स्यात्ख्यातं चैव तु तत्समम् ॥ १५१ ॥
एकांशमूर्ध्वतो वर्ज्य स्तनादूर्ध्वं तदंशके ।
ततस्तदंशयोर्विप्र लक्षणोद्धारमाचरेत् ॥ १५२ ॥
लक्षणं शिरसि व्याधिर्ललाटे मरणं भवेत् ।
नेत्रे कृते त्वपस्मारं आस्ये धान्यविनाशनम् ॥ १५३ ॥

चुबुके बन्धुनाशः स्यात्कण्ठे स्कन्धविनाशनम् ।
स्तनदेशे सुतं हन्ति तस्मादेतानि वर्जयेत् ॥ १५४ ॥
शिरसा व्यह(व्यास) रुद्रांशं गुणांश विभजेत्समम् ।
पद्मस्य मुकुलाकारं लिङ्गाकारं यथाकृति ॥ १५५ ॥
द्विजानामतिवृद्ध्यर्थं नृपाणां च जयावहम् ।
खड्गौ प्रत्यत्विकाकारं कुञ्जराक्षमिवाकृतिः ॥ १५६ ॥
शङ्खाभं छत्रयोर्भेदान्नृपाणामपि वृद्धये ।
कराञ्जलिसमाकारं गोकर्णाकृतिवज्ज्ञवेत् ॥ १५७ ॥
वैश्यानां तत्त्रिकोणं च शूलवृत्तायतं तथा ।
शूद्रवृद्धिकरत्रीणि सूत्रं गृह्य तु लक्षणम् ॥ १५८ ॥
लक्षणोद्धारणोक्तांशं रुद्रभागविभाजिते ।
मुकुलोदयमेकांशं तद्वा(द्व्या)सं चापि तत्समम् ॥ १५९ ॥
तन्मूलानां तु दीर्घत्वं नवभागमुदाहृतम् ।
तन्नालमेकसूत्रं वा सूत्रद्वित्रियुतं तु वा ॥ १६० ॥
सूत्रमाययुतं चेत्तु सूत्रान्तरयवत्रयम् ।
य[व]द्वयान्तरं वाऽथ नालतारं द्विजोत्तम ॥ १६१ ॥
नालमूर्ध्वे च तस्याग्रे सीमासूत्रं समालिखेत् ।
तन्नालं त्वेकसूत्रं चेल्लिङ्गमध्ये विशेषतः ॥ १६२ ॥
सूत्रोक्तव्यासखातं च नालायामे तु कल्पयेत् ।
नालाधस्तात्तु व्योमांशं त्यजेद्विष्वंशकोपरि ॥ १६३ ॥
मणिरेखा ततः कार्या मुकुलं स्पृल्लिङ्गमन्तगौ ।
मणिरेखयोन्तर्विप्र पद्ममूलं समं तु वा ॥ १६४ ॥
पद्मतारं त्रिधैकं वा वेदांशे त्र्यंश एव वा ।
पञ्चांशे तु युगांशं वा पद्मतारार्ध एव वा ॥ १६५ ॥
मुकुलमूलेऽन्तरं ह्येवं नालमूलेऽन्तरं शृणु ।
नालायामसमं वाऽर्धपादं पादयुगांशकौ ॥ १६६ ॥
त्रिभागं पञ्चभागं तु वेदभागमथापि वा ।
नालमूलसमं त्वेव मणिरेखाद्वयोत्तरम् ॥ १६७ ॥
मूलाद्ग्रं क्रमात्क्षीणं मणिरेखान्तरं कुरु ।
धातुमूले समे तिर्यग्गत्वा पृष्ठे तु संधयेत् ॥ १६८ ॥

मणिरेखाव्यासघातं लिङ्गस्योच्छ्रितं सूत्रयेत् ।
मणिरेखालम्बनं नालादिसार्द्धसममेव वा ॥ १६९ ॥
तस्मादामूलपर्यन्तं वसुभागविभाजिते ।
मणिरेखालम्बनं वाऽपि प्रण(न)वधा परिकीर्तितम् ॥ १७० ॥
सर्वेषु लक्षणोद्धारेष्वष्टमं मणिरेखिके ।
प्रथमं लक्षणं प्रोक्तं द्वितीयं लक्षणं शृणु ॥ १७१ ॥
लक्षणोद्धरणोर्ध्वांशं दशभागविभाजिते ।
मुकुलोदयमेकांशं वस्वंशं नालदीर्घकम् ॥ १७२ ॥
नालाधस्तात्तु व्योमांशं नीत्वा शेषं तु पूर्ववत् ।
द्वितीयं लक्षणं ख्यातं तृतीयं लक्षणं शृणु ॥ १७३ ॥
लक्षणोद्धारभागं तु धर्मभागविभाजिते ।
एकांशं मुकुलोच्चं तु नवांशं नालदीर्घकम् ॥ १७४ ॥
शेषं पूर्ववदुद्दिष्टं चतुर्थं लक्षणं शृणु ।
लक्षणांशं तु नवधा भज्यैकांशं तु कुड्मलम् ॥ १७५ ॥
सप्तांशं नालदीर्घं तु शेषं पूर्ववदाचरेत् ।
चतुर्थं लक्षणं प्रोक्तं पञ्चमं शृणु सुव्रत ॥ १७६ ॥
लक्षांशं वसुधा भज्य व्योमांशं मुकुलोदयम् ।
षडंशं नालदीर्घं तु नालाधस्ताच्छिवांशकम् ॥ १७७ ॥
तदेव सप्तभागं तु नालदीर्घमुदाहृतम् ।
शेषं प्रागिव कर्तव्यं सप्तमं लक्षणं शृणु ॥ १७८ ॥
लक्षार्धांशे तु सप्तांशे शक्त्यंशं मुकुलोदयम् ।
भूतांशं नालदीर्घं तु शेषं पूर्वदेव हि ॥ १७९ ॥
षडंशं वाऽर्धतन्नालदीर्घशेषं तु प्रागिव ।
एवमष्टविधं ख्यातं नालायामं द्विजोत्तम ॥ १८० ॥
अग्राकारेऽब्जमुकुलं भानुसंख्या तु सुव्रत ।
यथेष्टनालं कर्तव्यं नव संख्या तु देशिकः १८१ ॥
दृढसूत्रं प्रकर्तव्यं लिङ्गेषूक्तप्रमाणतः ।
स्थापयेत्तु ततो लिङ्गं प्रागग्रं दारुविष्टरे ॥ १८२ ॥
लक्षयेत्पीठकोव(वि)त्तं लिङ्गं सौम्ये निधापयेत् ।
स्थापितैः कलशैः स्थाप्य लिङ्गपीठं हृदा बुधः ॥ १८३ ॥

गवैं(व्यै)गन्धोदकैः स्थाप्य गन्धपुष्पादिभिर्यजेत् ।
लम्बकूर्चसमायुक्तं सर्वालंकारसंयुतम् ॥ १८४ ॥
रथे तु शिबिकायां वा ग्रामं कृत्वा प्रदक्षिणम् ।
ततो जलाशयं प्राप्य जलाधिवासनं कुरु ॥ १८५ ॥
लक्षणोद्धारमाख्यातं प्रतिमालक्षणं शृणु ।

इति काश्यपशिल्पे लिङ्गलक्षणोद्धार एकोनपञ्चाशत्तमः पटलः ।

॥ अथ पञ्चाशत्तमः पटलः ॥

प्रतिमालक्षणम् ।

प्रतिमालक्षणं वक्ष्ये शृणुष्वैकाग्रमानसः ।
अचलं च चलं चैव चलाचलमिति त्रयम् ॥ १ ॥
मृन्मयं शार्करं चैव सौयजं च चलि(वर्णे चाचलं)स्मृतम् ।
शैलजं दारुजं चैव धातुजं रत्नजं तथा ॥ २ ॥
चलाचलमिति ख्यातं चलमेवं तु लोहजम् ।
अर्धचित्रं च चित्रं च चित्राभासमिति त्रिधा ॥ ३ ॥
अर्धाङ्गादर्धदं बिम्बमर्धचित्रमिति स्मृतम् ।
सर्वावयवसंदृष्टं यत्र चित्रमितीष्यते ॥ ४ ॥
निम्नोन्नते पटे भित्तौ बिम्बं त्वाभासमुच्यते ।
अर्धचित्रं तु सुधया अन्यचित्रवशार्धकम् ॥ ५ ॥
आभासं धातुभिः कुर्याच्चित्रं चित्रार्धमेव वा ।
चित्राभासं तु देवानां फलं श्रेष्ठान्तराधमम् ॥ ६ ॥
इष्टिकाभिः परं पीठं पीठादाभासकं परम् ।
आभासार्धं तु तस्माद्वै मृन्मयं परमं परम् ॥ ७ ॥
मृन्मयं दा(याद्दा)रुजं श्रेष्ठं दारुजाच्छैलजं वरम् ।
शैलजाल्लोहजं श्रेष्ठं कर्तृणां तु फलं तथा ॥ ८ ॥

लोहजादुत्तमं स्वर्णं मध्यमं राजतं भवेत् ।
ताम्रजं कन्यसं ख्यातं तेषु तेषु फलं तथा ॥ ९ ॥
बिम्बमानं च द्रव्यं च श्रेष्ठमध्याधमं भवेत् ।
सर्वद्रव्येषु देवत्वं सममेवं तु विद्यते ॥ १० ॥
समं चेति दि(द्वि)व्यं देवेश फलं श्रेष्ठादया(दिकं) कथम् ।
स्थलभेदेन वृक्षं च (क्षाणां) भेदः क्षेत्रेषु विद्यते ॥ ११ ॥
तथा दिव्ये फले तुल्यं दिव्यभेदफलप्रदम् ।
तस्मादेतु(षु)यथालाभं द्रव्येण सकलं कुरु ॥ १२ ॥
यो नरः कृतवान्भूमौ पुत्रमित्रकलत्रयुक् ।
यथेष्टविषयोपेतश(मि)ष्टादिविषयं सुखम् ॥ १३ ॥
भुञ्जितेकृत(ङ्क्ते च क्रम)तो विप्र सालोक्यादिफलाश्रितम् ।
मनसा कर्मणा वाचा यो नरः स्तम्भकारिणा(रकः) ॥ १४ ॥
सोऽपि कर्मानुसारेण सक्तकृत्स्नफलानुभाक् ।
तस्मादात्ते(द्ये) न कर्तव्यं सकलं तु शिवात्मकम् ॥ १५ ॥
सुखासनस्थितं बिम्बं उमास्कन्दसमं द्विज ।
तृतीयं चन्द्रमूर्तीनां चतुर्थं वृषवाहनम् ॥ १६ ॥
पञ्चमं नृत्तमूर्तिं तु गङ्गाधरनंतरम् ।
सप्तमं त्रिपुरारि श्राष्टमं कल्याणसुन्दरं तथा ॥ १७ ॥
नवमं सार्धनारी तु दशमं गजहारिणम् ।
तथा पाशुपतं विद्यात्कङ्कालं द्वादशं स्मृतम् ॥ १८ ॥
त्रयोदशं हरिं विद्याद्भिक्षाटनं चतुर्दशम् ।
चण्डेश्वरप्रसादं तु पञ्चदशमुदाहृतम् ॥ १९ ॥
षोडशं दक्षिणामूर्तिं ततः कालारुणं भवेत् ।
सर्वेषां प्रतिमानां तु मानमादौ वदाम्यहम् ॥ २० ॥
सर्वेषामपि लिङ्गानां शिरोमानं विनोदयम् ।
गृहीतो विद्यमाने तु शिरसावर्तनं तथा ॥ २१ ॥
स्थूलदेशे परीणाहविस्तारं चैव तत्र वै ।
पूजांशं द्विगुणं ग्राह्यं द्वात्रिंशद्भिभजेत्समम् ॥ २२ ॥
तेषु वै सप्तविंशांशं पञ्चविंशांशमेव वा ।
त्रिभागाधिकविंशांश एकविंशतिरेव वा ॥ २३ ॥

एकोनविंशदंशं वा षोडशं वा त्रयोदशम् ।
रुद्रांशं नन्दभागं वा सप्तांशं पञ्च एव वा ॥ २४ ॥
अथवा रुद्रभागोऽन्त्यं नवभागविभाजिते ।
तेष्वेकांशं समारभ्य एकैकांशविवर्धनात् ॥ २५ ॥
यावती(च)सप्तविंशांशं तद्वै च (तावद्वै)सप्तविंशतिः ।
पूजां(जनां)शे तु बिम्बोच्चं साष्टत्रिंशत्रिभेदकम् ॥ २६ ॥
तथैव लिङ्गतारे वा लिङ्गानां (ङ्गना) हे च कल्पयेत् ।
लिङ्गाद्बिम्बोच्चभेदं तु तत्त्वाधिक्यशतं भवेत् ॥ २७ ॥
गर्भगेहं तथा नन्दभागं नन्दविदं भवेत् ।
अथवा गर्भगेहं तु त्रिनवांशविभाजिते ॥ २८ ॥
सप्तविंशतिमानं स्यादेतदेकांशवर्धनात् ।
पञ्चांशमुत्तमोत्सेधं मध्यमं चतुरंशकम् ॥ २९ ॥
अधमं तु गुणांशं स्यात् त्रिविधं द्वारमानकम् ।
अधमोत्तमयोर्मध्ये वसुभागविभाजिते ॥ ३० ॥
नवधा सकलोत्तुङ्गं द्वारमानं विधीयते ।
अथवा द्वारतुङ्गं तु सप्तविंशतिभाजिते ॥ ३१ ॥
एकैकांशविहीनेन बिम्बोच्चं सप्तविंशतिः ।
एवं हि द्वारमाने तु षट्त्रिंशं कौतुकोदयम् ॥ ३२ ॥
तथाऽधिष्ठानमानेन स्तम्भमाने च कल्पयेत् ।
सम्यग्द्वाविस्तारे अथवैवं प्रकल्पयेत् ॥ ३३ ॥
एकादिनवहस्तान्तं नवधा हस्तमानकम् ।
तालादिनवतालान्तं तथा नवविधं भवेत् ॥ ३४ ॥
कर्तुश्चोदयतुल्यं वा यजमानवशादि दे(म्) ।
अथवा कन्तु(कर्तृ)तुङ्गं तु नवभागविभाजिते ॥ ३५ ॥
एकैकांशविहीनेन यावत्त्वं (त्तु)सकलोदयम् ।
चतुर्विंशश्चतुर्भागं पूजांशोच्चं तु भाजिते ॥ ३६ ॥
एकांशं मङ्गलं ख्यातं मूलं लिङ्गाङ्गुलं विदुः ।
मानाङ्गुलं तु वा प्रोक्तं पुरप्रासादमानकम् ॥ ३७ ॥
कर्त्य(र्तृ)दक्षिणहस्ते तु मध्यमाङ्गुलमध्यमे ।
पर्वदीर्घं तु तारं वा मानाङ्गुलं द्विधा स्मृतम् ॥ ३८ ॥

सप्ताङ्गुलं समारभ्य द्विद्व्यङ्गुलविवर्धनात् ।
त्रयोविंशाधिकं यावच्छतान्तं त्रिभिरङ्गुलैः ॥ ३९ ॥
विम्बमानं तु कर्तव्यमादौ द्वाभ्यां परार्थकम् ।
गृहे वाऽऽत्मार्थबिम्बानां मानमात्राङ्गुलेन तु ॥ ४० ॥
कर्तव्यमन्यथा श्वे(चे)त्तु कर्तव्ये कर्तृनाशनम् ।
अङ्गुले निर्मितं बिम्बं सर्वजात्यर्हकं परम् ॥ ४१ ॥
अङ्गुलाङ्गुलविध्याभिः आ(वृद्ध्या त्रिरा)यादिषट्शुभेक्षणम् ।
त्रिषडङ्गुलक्रमेणेक्षुजात्यायांशं न रोपयेत् ॥ ४२ ॥
अङ्गुलादन्यय(द्य)न्मानं सं(स)वेदाशि(शी)ति या भवेत् ।
एकांशं रोपयेत्तस्माज्जात्यंशं तद्द्विजार्हकम् ॥ ४३ ॥
द्विभागाधिकषष्ट्यंशं भागैकांशसमन्वितम् ।
नृपजात्यंशकं ज्ञेयं नृपाणां वृद्धिकारणम् ॥ ४४ ॥
चतुर्विंशतिभागं तु कृत्वा भागसमन्वितम् ।
वैश्यजात्यर्हकं ख्यातं वैश्यानामपि वृद्धिदम् ॥ ४५ ॥
षोडशांशे समारोप्य शूद्रवृद्धिकरांशकम् ।
एवं जात्यंशसंयुक्तमंशमष्टगुणीकृते ॥ ४६ ॥
सप्तविंशतिसंख्या तु त्हृते शेषाद्दिनं भवेत् ।
तद्दिनं जातिऋक्षं स्यात्तद्दिनं सुखसंपदे ॥ ४७ ॥
सुशोभनं तु युक्तं चेत्कर्तुर्वास्तु नृपादिताम् ।
त्रिंशच्छतान्तभागान्तं बिम्बोच्चं तु विभाजिते ॥ ४८ ॥
शवरं रोपयेद्यावच्छुभयादिनिसंभवम् ।
तन्मानं कौतुकोच्चं तु पादादुष्णिक(ष्णीष)सीमकम् ॥ ४९ ॥
कर्तुर्वांशकमिदं ख्यातमंशैरायादि कल्पयेत् ।
अष्टाभिर्वृद्धिदेशांशभानुभिस्तु त्हृते द्विज ॥ ५० ॥
शेषमायमिति ख्यातमंशमष्टगुणीकृते ।
सप्तविंशतिहृच्छेषमश्विन्यादिक संभवेत् ॥ ५१ ॥
नवभिर्गुणिते त्वंशराशिभिर्हासयेत्ततः ।
शेषं व्ययमिति ख्यातमंशशेषानलेन तु ॥ ५२ ॥
वर्धयेद्बुसुभिः प्रोक्तं शेषं ध्वजादियोनया ।
नवभिर्गुणिते सप्तहृते सौरवारादिकम् ॥ ५३ ॥

संभवं वर्धयेद्वेदसंख्या तु ह्रसयेच्चेदसंज्ञया ।
शेषमंशकमित्युक्तमेवमादि च षड्भवेत् ॥ ५४ ॥
आयाधिक्यं व्ययं क्षीणं पुष्कलाभं च शोभनम् ।
ध्वजधूमं च सिंहं च श्वानवृक्षादहस्ति च ॥ ५५ ॥
काकश्चयोनयश्चाष्टौ तेषु हारिवृषंगजं ।
योनयः शुभदाज्ञेया इतराविपरीतकाः ॥ ५६ ॥
विधुरं चैव ये वेनाशिकस्तथा .... ।
षष्ठाष्टमं भज्यशेषरिपुक्षयावहम् ॥ ५७ ॥
कर्तुश्च जन्मनक्षत्रं नृपवास्तुत्रिभिन्नया ।
गणयेद्विम्बऋक्षान्तं शोभनं च परिग्रहेत् ॥ ५८ ॥
वारं सौर्यादि शुभदं भौमवारश्च वर्जयेत् ।
सूर्यं वारं च सौरस्य मध्यं शेषोत्तमाः स्मृताः ॥ ५९ ॥
भानुवारादिसंयुक्तं विशाखादिश्चतुश्चतुः ।
वियोगं मरणं नाशममृतं च यथाक्रमम् ॥ ६० ॥
तस्करं भक्तिशक्तिश्च वनं राजं च षण्डकम् ।
अभयं धनमृणं चैव नवांशकमुदाहृतम् ॥ ६१ ॥
तेषु तस्करषण्डं च ऋणं चैव तु वर्जयेत् ।
गणेव्यस्मुरमानुषं योगमात्रं विवर्धयेत् ॥ ६२ ॥
एवं परीक्ष्य शोभाढ्यं माधुर्यं तु सुशोभयेत् ।
चतुर्णामभिवृद्ध्यर्थं जात्यंशकं प्रयोजयेत् ॥ ६३ ॥
तस्मादुगायभागौ च प्रशस्तप्रवेशकाश्यपम् ।
उत्तमं दशतालादिलक्षणं वक्ष्यतेऽधुना ॥ ६४ ॥
मृन्मयं चेत्तु बिम्बं वै शूलस्थापनमाचरेत् ।
शैलजं प्रतिमं चेति शिलाग्रहणलिङ्गवत् ॥ ६५ ॥
लोहजं सकलं यत्तु मधूच्छिष्टेन निर्मितम् ।
स्थण्डिलं शालिभिः कुर्यात्कलयाग्रे तु मण्डपे ॥ ६६ ॥
कुशेशयं तु संकल्प्य दर्भैः पुष्पैः परिस्तरेत् ।
तदूर्ध्वे फलकायादि दारुजं प्रागुदाहृतम् ॥ ६७ ॥
आचार्यः शिल्पी कर्ता च शुभमानं परिग्रहेत् ।
तन्मानस्योत्थिताङ्गानि सिकतेनैव कारयेत् ॥ ६८ ॥

प्राक्छिरश्चोर्ध्ववक्त्रं तु फलकायां निधापयेत् ।
गन्धपुष्पैश्च धूपैश्च दीपैरर्घ्यैश्च पूजयेत् ॥ ६९ ॥
तस्य दक्षिणपार्श्वे तु शिवाग्निं तु प्रकल्पयेत् ।
समिदाज्यचरुद्रव्यं हुत्वा चाष्टशताहुतीः ॥ ७० ॥
द्रव्यान्तेऽप्याहुतिं हुत्वा पूर्णाहुतिं समाचरेत् ।
ध्यात्वा बिम्बाकृतिं त्वग्निं मध्यमूलमुदाहृतम् ॥ ७१ ॥
आत्मनि यथा धूपं आघ्राणं तु समर्चयेत् ।
आघ्रात्क्रमात्संधानमाचरेत् .... ॥ ७२ ॥
शिरःसंधानमीशेन मुकुटं कवचेन तु ।
अस्त्रेण अस्त्रसंधानं पादौ सद्यः समर्चयेत् ॥ ७३ ॥
आदौ पश्चात्तु संधानं क्रमात्संपूर्णमाचरेत् ।
उपाङ्गं तु ततः कुर्यात्प्रत्यङ्गं तु ततः कुरु ॥ ७४ ॥
अष्टत्रिंशत्कलान्यासं तत्तदङ्गानि विन्यसेत् ।
वस्त्रमाभरणं चैव सूत्रं चोपाङ्गमिष्यते ॥ ७५ ॥
हस्तभृतिरितिच्छिन्नं प्रत्यङ्गमिति विद्यते ।
धर्मतालात्रितालान्तं श्रेष्ठान्तराधमं त्रयम् ॥ ७६ ॥
उत्तमं दशतालाख्यं चतुर्विंशच्छताङ्गुलम् ।
मध्यमं दशतालं स्याद्भानुपङ्क्त्याङ्गुलं भवेत् ॥ ७७ ॥
कलाधिकशताङ्गुल्यमधमं दशतालकम् ।
सद्वादशशतं भागं नवतालोत्तमं भवेत् ॥ ७८ ॥
अष्टोत्तरशतांशं तु मध्यमं नवतालकम् ।
कन्यसं नवतालं स्यात् द्वेधाधिकशतं भवेत् ॥ ७९ ॥
तालं प्रत्येवमेवं तु क्रमाद्वेदाङ्गुलं हरम् ।
उत्तमं दशतालेन ब्रह्मविष्णुमहेश्वरम् ॥ ८० ॥
मध्यमं दशतालेन उमा सरस्वती तथा ।
उषा भूमिश्च दुर्गा च लक्ष्मीश्च मातरस्तथा ॥ ८१ ॥
ज्येष्ठा चैव प्रकर्तव्या स्वस्वाङ्गानि समन्विता ।
चन्द्रादित्याश्विनौ चैव ऋषयस्तु ग्रहास्तथा ॥ ८२ ॥
अर्थं च षण्मुखं चैव चण्डेशक्षेत्रपालकम् ।
कन्यसं दशतालेन कारयेद्द्विजसत्तमः ॥ ८३ ॥

वसुवर्गाष्टमूर्तिंश्च विद्येशाल्लोकपालकान्।
अन्याश्च देवताश्चैव नवतालोत्तमेन तु ॥ ८४ ॥
यक्षाप्सरोगणाश्चैव अस्त्रमूर्तिमरुद्गणान्।
मध्यमं नवतालेन विद्याधरगणस्तथा ॥ ८५ ॥
असुरान् सिद्धगन्धर्वान् पितरश्च तथैव च।
कन्यसं नवतालेन कारयेत्तु विचक्षणः ॥ ८६ ॥
अष्टतालेन म(सा)ध्यास्तु पिशाच(चाः)सप्तमेन तु।
रसतालेन कुब्जांस्तु कारयेद्देशिकोत्तमः ॥ ८७ ॥
पञ्चतालोक्तमानेन विन्ये(त्ते)शं कारयेद्बुधः।
तन्मध्यमाधमेनैव सर्वभूतगणान्कुरु ॥ ८८ ॥
बालस्तु वेदतालेन त्रितालेनैव कारयेत्।
द्वितालं किंनरश्चैव एकतालं तु कूर्मकम् ॥ ८९ ॥
एवं तालक्रमं प्रोक्तं बेराणामनुकूलकम्।
सवेदविंशदंशं च शतं बिम्बोदयं कुरु ॥ ९० ॥
तेष्वेव तालमात्रं स्यात्तन्मात्रं वसुभाजिते।
एकांशं तु यवं प्रोक्तं यवैरप्यङ्गुलैरपि ॥ ९१ ॥
उष्णीषात्पादपर्यन्तमङ्गमानं प्रमीयते।
त्रियवाधिकचन्द्रांशा उष्णीषोक्त(च्च)मुदाहृतम् ॥ ९२ ॥
तस्मादापूर्वकेशान्तमङ्गभागमुदाहृतम्।
केशान्तादक्षिसूत्रान्तं युग्मांशं त्रियवाधिकम् ॥ ९३ ॥
अक्षिसूत्रात्पुटान्तं च पुटाद्धन्वन्तमानकम्।
प्रत्येकं त्रियवाधिक्यं युगांशोदयमिष्यते ॥ ९४ ॥
हन्वादिगलमानं तु चतुर्यवमुदाहृतम्।
यवैकोनमुदांशं तु कण्ठोच्चमिति विद्यते ॥ ९५ ॥
केशमूलाद्धनुसूत्रं हिक्कासूत्रमुदाहृतम्।
हिक्कादाहृदयान्तं च हृदयं नाभिसीमकम् ॥ ९६ ॥
नाभेस्तुमे(अ)ग्रमूलं तु समं गुणयवाधिकम्।
त्रयोदशांशमुत्सेधं प्रत्येकं द्विजसत्तम ॥ ९७ ॥
अग्रमूलात्सूत्रमध्यं मध्यसूत्रं तदुच्यते।
अर्धसूत्रादधश्चोरुदीर्घं नक्ष(व)भागमायतम् ॥ ९८ ॥

तस्माद्वेदाङ्गुलं जानु जङ्घातुङ्गेरुसदृशम् ।
युगं पादतलोत्सेधमेवमुत्सेधमुच्यते ॥ ९९ ॥
अङ्गुष्ठाग्रं तु भाज्यं तु तलं सप्तदशाङ्गुलम् ।
हिक्कामूत्रादधोभागं दीर्घमृक्षाङ्गुलं भवेत् ॥ १०० ॥
कूर्परोच्चं द्विभागं स्यादेकविंशत्यकोष्ठकम् ।
सार्धत्रयोदशाङ्गुल्यं मध्यमाङ्गुलिसीमकम् ॥ १०१ ॥
अग्रतो मुखविस्तारं सार्धभाराङ्गुलं भवेत् ।
मुखात्कर्णांतविस्तृतं त्रयोदशाङ्गुलं मतम् ॥ १०२ ॥
ग्रीवाग्रं सार्धनन्दांशं ग्रीवामूलं दशाङ्गुलम् ।
हृदयाद्बाहुसीमान्तं हु(च)त्वारिंशच्च वाऽर्धकम् ॥ १०३ ॥
सार्धद्वाविंशदङ्गुल्यं कक्षयोरत्न(न्त)रस्तनम् ।
नवाश्वं चतुर्यवोपेतं बाहुमूलविशालकम् ॥ १०४ ॥
एकविंशतिबाहुः स्यात्स्तनदेशस्य विस्तरम् ।
हृदयावधिविस्तारमेकोनत्रिंशदङ्गुलम् ॥ १०५ ॥
कलांशं चतुर्यवोपेतं मध्यव्यासमुदाहृतम् ।
एकोनविंशदंशं तु श्रोणीतारमुदाहृतम् ॥ १०६ ॥
कटि(ट्यो)रग्रे विशालं तु द्विनवाङ्गुलमुच्यते ।
तदधः कटिपार्श्वान्तं विस्तारः साधेविंशतिः ॥ १०७ ॥
पादोनमनुभागं तु ऊरुमूलविंशालकम् ।
सपादद्वादशांशं तु ऊरुमध्ये विशालकम् ॥ १०८ ॥
पादोनधर्मभागं तु जानुव्यासमुदाहृतम् ।
सपादवसुभागं तु नलिकाविस्मृ(स्तृ)तं भवेत् ॥ १०९ ॥
यवोपेतद्वयांशं तु तस्य विस्तारमुच्यते ।
अक्षदातलतुङ्गं तु तस्य विस्तारमुच्यते ॥ ११० ॥
तारार्धनखविस्तारं पादोनायतवर्तुलम् ।
त्रियवोपेतवेदांशं तर्जन्यायाममुच्यते ॥ १११ ॥
पादोनवेदभागं तु मध्याङ्गुल्यायतं भवेत् ।
यवोपेताग्निभागं त्वनामिकायामिष्यते ॥ ११२ ॥
सार्धपक्षांशमानं तु कनिष्ठाङ्गुलदीर्घकम् ।
प्रदेशिन्यादितत्रय सप्तार्धांश .... ॥ ११३ ॥

नवतारं स्वतारार्धं नखं पूर्वोक्तवद्विदुः ।
तत्तदङ्गुलविस्तारं वेदांशं विभजेद्बुधः ॥ ११४ ॥
त्रिभागं मङ्गलाग्रोक्तं शेषं स्यात्तु नखान्तरम् ।
त्रियवाधिकविस्तारं बाहुमध्यविशालकम् ॥ ११५ ॥
सभागसप्तभागं तु कूर्परव्यासमुच्यते ।
पादोनरसभागं तु प्रकोष्ठमध्यविस्तरम् ॥ ११६ ॥
पादोनचतुरंशं तु मणिबद्ध(न्ध)विशालकम् ।
सप्तांशं तु तलायामं सार्धषण्मध्यमाङ्गुलम् ॥ ११७ ॥
सपादभूतभागं स्यात् अ(त्व)नामिकायमुच्यते ।
यवाधिकं तु पञ्चांशं तर्जन्यायाममुच्यते ॥ ११८ ॥
सपादवेग(द)भागं तु दैर्घ्याङ्गुष्ठकनिष्ठयोः ।
अङ्गुष्ठमूलविस्तारं सपादांशमुदाहृतम् ॥ ११९ ॥
तर्जन्यष्टयवा ख्याता नवसंख्या तु मध्यमा ।
अनामिकाष्टयवा ख्याता सप्तसंख्या कनीयसी ॥ १२० ॥
अङ्गुष्ठाद्यङ्गुलान्तं तु मूलविस्तारमेव हि ।
तत्तन्मूलकलांशेऽशहीनमग्रविशालकम् ॥ १२१ ॥
अग्रतारं रसांशे तु पञ्चांशं नखविस्मृ(स्तृ)तम् ।
पार्श्वयोर्मांसलं शेषं वृत्तायत[न]ताकृति ॥ १२२ ॥
सपादं नखतारं तु नखायाममुदाहृतम् ।
नखायामं द्वयं चाधः पर्वदीर्घं प्रशस्यते ॥ १२३ ॥
अङ्गुष्ठमूलपर्वस्य दीर्घं सप्तदशयवाः ।
तर्जनीमूलपर्वं तु अनामिकाद्वयाङ्गुलम् ॥ १२४ ॥
मध्यमामूलपर्वस्य दैर्घ्यमष्टादश यवाः ।
कनिष्ठामूलपर्वस्य त्रयोदश यवाः स्मृताः ॥ १२५ ॥
मूलाग्रपर्वयोर्मध्ये दीर्घमध्यस्थपर्वसु ।
अङ्गुष्ठं तु द्विपर्वार्धं शेषास्त्रिपर्वसंयुताः ॥ १२६ ॥
सिद्धं तलाङ्गुलं विप्र तलाग्रं विपुलं भवेत् ।
रसांशं मध्यविस्तारं हस्तस्यैव तलस्य तु ॥ १२७ ॥
तलमूलविशालं तु सार्धषट्काग्रमुच्यते ।
अङ्गुष्ठमूलमारभ्य तर्जनीमूलमन्तकम् ॥ १२८ ॥

सार्धद्वयङ्गुलं प्रोक्तं शूकोदरमिहोच्यते ।
अङ्गुष्ठमूलमारभ्य मणिबन्धावसानकम् ॥ १२९ ॥
दीर्घवेदाङ्गुलं प्रोक्तं द्वयर्धांशं तु घनं भवेत् ।
पार्ष्णिहस्तघनाग्न्यंशमग्रमङ्गुष्ठव(म)क्षयम् ॥ १३० ॥
अङ्गुलीनामधस्तात्तु द्वयर्धांशस्यांसलान्तकम् ।
द्विभागपार्ष्णिहस्तस्य शू(शु)कोदरविशालकम् ॥ १३१ ॥
शेषमध्यतलं निम्नं भूतो वेदाग्निवायवम् ।
सूक्ष्मरेखां लिखेत्तस्मिञ्शङ्खं वा चक्रशूलवत् ॥ १३२ ॥
पद्माभं वा कुशाभं वा तलरेखां प्रकल्पयेत् ।
यवाष्टशतनिम्नं स्याद्रेखाणां तु द्विजोत्तम ॥ १३३ ॥
वृत्ताभेऽपेक्षितं(ताङ्)गेषु व्यासं पञ्चविभाजिते ।
एकांशं तु परिग्राह्यं विस्तारं त्रिगुणान्वितम् ॥ १३४ ॥
यत्तन्नाहमिति ख्यातं नाहतो तार कल्पितम् ।
कर्णोर्ध्वे शिरसा नाहं साष्टत्रिंशाङ्गुलं भवेत् ॥ १३५ ॥
कर्णोर्ध्वे तु शिरस्तात्तु यवोनद्वादशाङ्गुलम् ।
कर्णयोः पूर्वनालं तु द्वाविंशदङ्गुलं भवेत् ॥ १३६ ॥
कर्णयोः पूर्वनाहं तु भान्वङ्गुलमुदाहृतम् ।
तयोर्मध्यस्थभागं तु कर्णस्थितिरुदाहृतम् ॥ १३७ ॥
शिरसो मध्यमामूर्तिमण्डलं चतुरङ्गुलम् ।
तस्मादादग्रकेशान्तं नवाङ्गुलमुदाहृतम् ॥ १३८ ॥
ततो वै मण्डलात्कर्णकेशान्तं च नवाङ्गुलम् ।
मण्डलात्पृष्ठकेशान्तं सार्धमध्याङ्गुलं भवेत् ॥ १३९ ॥
ललाटे तिर्यगानन्तु नवाङ्गुलमुदाहृतम् ।
केशान्तादक्षिसूत्रस्य द्वयोर्मध्ये भ्रुवोः स्थिते ॥ १४० ॥
भ्रुवाश्रौ तु नवाङ्गुल्यं चापाकारं यथा कुरु ।
द्वयन्तरं तु भ्रुवोर्विप्र सार्धवेदयवं भवेत् ॥ १४१ ॥
पञ्चाङ्गुलं भ्रुवायामं मध्यतारं यवद्वयम् ।
बालचन्द्राग्रवत्क्षीणं भ्रुवाग्रौ तस्य मध्यमात् ॥ १४२ ॥
कर्णिकायामविस्तारं यवमानमुदाहृतम् ।
कृष्णमण्डलविस्तारं चोत्सेधं च यवं भवेत् ॥ १४३ ॥

तां तत्समं व्यासं (?) कृष्णमण्डलपार्श्वयोः।
शफलाकृतिकं स्या(वाऽ)पि धनुषा(रा)कृतिरेव वा ॥ १४४ ॥
अर्धचन्द्राकृतिर्वाऽथ नेत्राकारं प्रकल्पयेत्।
तदाकारानुकोल(कूलो)च्चसितमण्डलयोर्द्विज ॥ १४५ ॥
नेत्रान्ते त्व(न्तेऽ)र्धयवं रक्तमण्डलं तु सितांशकम्।
कृष्णमण्डलमध्ये तु ज्योतिर्मण्डलकं यवम् ॥ १४६ ॥
तदष्टांशैकभागं तु तन्मध्ये दृष्टिमण्डलम्।
तत्सार्धं यवमानं तु ऊर्ध्ववर्मततं भवेत् ॥ १४७ ॥
अधोवर्म च तत्तुल्यं दीर्घमष्टादशं यवम्।
नेत्रयोरन्तरं विप्र सपादद्व्यङ्गुलं भवेत् ॥ १४८ ॥
ऊर्ध्ववर्म भ्रुवोरन्त(न्तः)सार्धषट्कयवं भवेत्।
अधोवर्मस्थितिः क्षिप्रं तत्र सूत्रे विधीयते ॥ १४९ ॥
कर्तृनाशमथा(धो)दृष्टिश्चोर्ध्वदृष्टिर्विपत्करम्।
बहुनाशं भवेत्पार्श्वदृष्टिश्चेद्भावमासनम् ॥ १५० ॥
तस्मात्सर्वप्रयत्नेन सममेव निरीक्षणम्।
नेत्रमेवं समाख्यातं नासिकालक्षणं पुनः ॥ १५१ ॥
नासिकापुटबाह्यं तु तारमष्टादशा यवाः।
तदर्धं मध्यविस्तारं तस्यार्धं मूलविस्तृम् ॥ १५२ ॥
गोजिमूलं तु नास्याग्रात्तत्तुङ्गं द्व्यङ्गुलं भवेत्।
पुटयोर्मध्यभित्तिस्तु पुष्करं त्विति विद्यते ॥ १५३ ॥
अत्यर्थ(र्ध)यवमालम्ब्य नासाग्रपुटसूत्रकम्।
साध्य(र्ध)वेदयज्ञा(वा)ङ्गोच्चदीर्घं तस्यार्धविस्तृतम् ॥ १५४ ॥
ऊर्ध्वेष्टस्योर्ध्वनिम्नं तु गोजिनाम्ना प्रशंसिता।
यवानं तु (वोपनता) गोजी तु ततैवं नासिका द्विज ॥ १५५ ॥
सपादं चतुरंशं तु आस्यदीर्घं तिर्यग्विदुः।
उत्तरोष्ठायतं चाऽऽस्यदीर्घतुल्यमुदाहृतम् ॥ १५६ ॥
उत्तरोष्ठस्य मध्ये तु तारं सार्धत्रयं यवम्।
अपूर्वकृतशान्तारमास्यसीमावसानकम् ॥ १५७ ॥
यवमानघनं पालि उत्तरोष्ठस्य चोपरि।
त्रियवोपनता पालि ततोऽष्ट(तोष्ठ)सदृशायता ॥ १५८ ॥

अष्टादश यवाः प्रोक्ता अधरोष्ठस्य दीर्घकम् ।
यवाधिकाङ्गुलं तस्य विस्तारं द्विजसत्तम । १५९ ॥
अधरं पालिकासार्धं यवतारमधोगतम् ।
चिबुकादधरोच्चं तु सार्धषड्विधमुच्यते ॥ १६० ॥
किंचित्प्रहसिताकारमाढ्ययुक्तया तु कारयेत् ।
अधराशि(चि)बुकालम्बं सार्धपक्षाङ्गुलं भवेत् ॥ १६१ ॥
चिबुकात्तुङ्गशर्वेशं सार्धाष्टयवमुच्यते ।
सार्धद्वयाङ्गुलं तस्य तारमायतवृत्तवत् ॥ १६२ ॥
भानोः संधौ कर्णबन्धान्तरं तु द्वादशाङ्गुलम् ।
भानोर्बाह्य समारभ्य पादोनगुणमात्रकम् ॥ १६३ ॥
कण्ठवेशमिति ख्यातं तनेतन्यं (तो नेत्रं) वदामि ते ।
नेत्रं तत्कर्णबन्धान्तं द्वयन्तरं सप्तमात्रकम् ॥ १६४ ॥
कर्णस्य तु विशालं तु अष्टादशयवाः स्मृताः ।
अक्षिसूत्रोर्ध्वतः कर्णं तुङ्गं चाष्टयवं स्मृतम् ॥ १६५ ॥
तदूर्ध्वं चोर्ध्वबन्धं तु शेषं वृत्तं तु मूर्धतः ।
नेत्रसूत्रा ... ... ॥ १६६ ॥
नेत्रसूत्रादधः कर्णबन्धं सप्तदशं यवम् ।
सार्धवेदाङ्गुलं तस्मात्तस्य नालं प्रलम्बयेत् ॥ १६७ ॥
पूर्वनालायतं व्योमभावं सार्धाङ्गकं परम् ।
नालयोर्व्यासमाख्यातं गलमर्धाङ्गुलं नतम् ॥ १६८ ॥
ता(ना)लाकारौ त्रिपादं च वेदांशं विस्तृतायतम् ।
कर्णेतुङ्गमशेषं तु यवैकोननवाङ्गुलम् ॥ १६९ ॥
पिप्पलीन्नमथांशं हि द्विगुणं हि तदायतम् ।
उत्सेधं चार्धमात्रं स्यान्मूलादाग्रक्षयानुगम् ॥ १७० ॥
द्विभागं पिञ्जु(चक्षु)षीदीर्घं द्वियवार्धांशतत्ततिः ।
अक्षिसूत्रादधः कर्णद्वारमर्धाङ्गुलं भवेत् ॥ १७१ ॥
कर्णद्वारं नतं निम्नं समभेव हि वक्षलम् ।
कर्णपालिघनं सार्धयवनीत्रं चतुर्यवम् ॥ १७२ ॥
पृष्ठकर्णस्य विस्तारमध्यार्धांशमुदाहृतम् ।
वे(के)शान्तात्पृष्ठकर्णं तु द्वयन्तरार्ध(र्धांश)मात्रकम् ॥ १७३ ॥

पृष्ठकेशावसाने तु नाड्यर्धांशकं त(शं तु तत्त)तम् ।
तस्याधः पृष्ठग्रीवोच्चं युगांशं त्रियवाधिकम् ॥ १७४ ॥
कृकाटिकाधः पृष्ठाग्रं[ग्री]वाग्रं तु नवाङ्गुलम् ।
पृष्ठग्रीवस्य मूलस्य तारं सार्धदशाङ्गुलम् ॥ १७५ ॥
आमूलाग्रं क्रमात्कर्षं ग्रीवावृत्ताङ्गमुच्यते ।
द्विक्कासूत्रोपरि स्कन्धतुङ्गं तु चतुरङ्गुलम् ॥ १७६ ॥
तस्मादाकटिसीमान्तं वंशिक्र(शम्)क्षांशमायतम् ।
तद्वंशनतविस्तारं सार्धषोडशकं यवम् ॥ १७७ ॥
वंशमानादधस्तात्तु वंशमूलं गुणाङ्गुलम् ।
परे तु तुङ्गमेवं स्यात्तस्मिन्व्यासं वदामि ते ॥ १७८ ॥
सार्धऋक्षाङ्गुलं प्रोक्तं कक्षयोरन्तरं द्विज ।
कक्षयोः स्वंसफकतुङ्गं सप्ताङ्गुलान्तरं भवेत् ॥ १७९ ॥
कक्षोर्ध्वे बाहुसीमान्तं सप्ताङ्गुलमुदाहृतम् ।
सार्धषोडशमात्रं तु मध्यव्यासमुदाहृतम् ॥ १८० ॥
कक्षस्याग्रविशालं तु सप्तमात्रमुदाहृतम् ।
नाभिसूत्रे तु विस्तारं सार्धद्व्यर्धाङ्गुलं भवेत् ॥ १८१ ॥
कटिबन्धौ तु विस्तारं त्रिषडंशमुदाहृतम् ।
पादोनकर्मभागं तु स्फिक्पिण्डं प्रतिविस्तृतम् ॥ १८२ ॥
सवित्तौ तौ समाख्यातौ तयोर्मध्यं चतुर्यवम् ।
अपरेतरबिम्बोक्तं पार्श्वव्यासमुदाहृतम् ॥ १८३ ॥
कक्षस्याग्रविशालं तु सप्तमात्रमुदाहृतम् ।
सपादषोडशमात्रं स्यात्स्तनसूत्रेण विस्तृतम् ॥ १८४ ॥
सपादद्वादशांशं तु मध्ये पार्श्वे घनं भवेत् ।
श्रोणिमध्ये घनं पार्श्वे सप्तदशाङ्गुलं भवेत् ॥ १८५ ॥
ततः श्रोण्युदयं विप्र सप्तमात्रमुदाहृतम् ।
नाभिसूत्रादधश्चोर्ध्वे चतुर्विंशाङ्गुलं भवेत् ॥ १८६ ॥
श्रोण्यधस्तात्कटेरुच्चं सार्धभूताङ्गुलं भवेत् ।
तत्कटेस्तु घनं धीमन्सार्धभान्वङ्गुलं भवेत् ॥ १८७ ॥
प(स्फिक्)पिण्डं चोरुमूलात्तु नीत्रं सार्धयुगाङ्गुलम् ।
तत्पिण्डलं घनं त्वर्धसूत्रादर्धाङ्गुलं भवेत् ॥ १८८ ॥

कक्षाग्रधरनिम्नं तु सार्धद्व्यङ्गुलकं भवेत् ।
ग्रीवं सुवृत्तनं नाभौ ग्रीवाष्टौ परिवेष्टितौ ॥ १८९ ॥
कण्ठमूलेन तं ता(तत्ता)रं तुङ्गं चैव चतुर्यवम् ।
हिक्कायास्त्वक्षमात्रं च ज(त)त्र सूत्रमुदाहृतम् ॥ १९० ॥
हिक्कामध्यात्तु कक्षान्तं स्तनान्तरं समं भवेत् ।
हृदयं स्तनयोर्मध्ये निम्नमध्यर्धमात्रकम् । १९१ ॥
नी(ना)लं वै कण्ठमूले च यवत्रयप्रमाणतः ।
अत्यर्धायामसंयुक्तं कल्पयेन्मन्त्रवद्भवेत् ॥ १९२ ॥
कण्ठमूले नतं हिक्कासूत्राधस्तात्प्रकल्पयेत् ।
हिक्कासूत्रोपरिष्टात्तु नीलवर्णं प्रकल्पयेत् ॥ १९३ ॥
हृदयस्तनपीठोच्चं द्व्याङ्गुलमुदाहृतम् ।
सप्तदशयवं ख्यातं स्तनमानीलविस्तृतम् ॥ १९४ ॥
तन्मध्ये चूचूकोच्चं तु व्यासं चैव .वद्वयम् ।
नाभेः स्तनस्य विस्तारं व्योमावशं द्व्याधिकम् ॥ १९५ ॥
नाभिप्रदक्षिणावृत्तं मूलतारं यवद्वयम् ।
तन्नाभ्य(भि)वृत्तमध्यस्थनाभिसूत्रं द्विजोत्तम ॥ १९६ ॥
नाभेरधःस्थपादोनस्तोच्चयं पञ्चमात्रकम् ।
तत्तत्स्थानात्कटिश्रोणी सार्धद्व्यङ्गुलमुच्यते ॥ १९७ ॥
तस्मादामेढ्रमूलान्तं मेढ्रपीठं युगाङ्गुलम् ।
पादतन्मात्रं च लिङ्गदीर्घमुदाहृतम् ॥ १९८ ॥
लिङ्गमूलविशालं तु सप्तदश यवाः स्तृतम् ।
लिङ्गायामं त्रिभागैकमग्रण्यायतं भवेत् ॥ १९९ ॥
तत्र आगण्डमूले तु यवमानं द्रुह(गुदा)न्तरम् ।
रक्तोत्पलमुकुलायाममग्रगण्याग्रमुच्यते ॥ २०० ॥
मुष्कायामविशालं तु सार्धवेदाङ्गुलं भवेत् ।
धनं सार्धगुणांशं तु तन्मूलोद्धोरुवर्धनम् ॥ २०१ ॥
मेढ्रपीठस्य मूलस्य व्यासं सप्तार्धमात्रकम् ।
मेढ्रपीठस्य मूलान्तमूरुमूलस्य मांसलम् ॥ २०२ ॥
जानुमण्डलविस्तारं सपादं चतुरङ्गुलम् ।
सार्धद्व्यङ्गुलकं प्रोक्तं जानुमण्डलनीव्रकम् ॥ २०३ ॥

सार्धद्व्यङ्गुपृष्ठजान्वोतां विदुः । (?)
मध्ये तु पार्श्वयोः शेषं यथासौन्दर्यमाचरेत् ॥ २०४ ॥

इत्यंशुमद्भेदे काश्यपशिल्प उत्तमदशतालपुरुषमानं नाम-
पञ्चाशत्तमः पटलः ।

॥ अथैकपञ्चाशत्तमः पटलः ॥

मध्यमं दशतालेन स्त्रीमानमथ वक्ष्यते ।
सरस्वती च दुर्गाच उमा भूमिश्च मातरः ॥ १ ॥
लक्ष्मीश्चैव तु ज्येष्ठा च अनेन विधिना कुरु ।
ईशो ब्रह्मा रथे विष्णुः शक्तिरित्यभिधीयते ॥ २ ॥
तेषामनुगुणं मानं तन्मध्ये तेऽस्तु मानकम् ।
शंभुं नासाग्रसीमान्तं शक्तु(क्त्यु)चं हु(ह्यु)त्तको(मो)त्तमम् ॥ ३ ॥
शंभोर्वै स्तनसीमान्तमधमाधममुच्यते ।
तयोर्मध्येऽष्टभागेन नवधा शक्तिमानकम् ॥ ४ ॥
शंभोर्हि ख्यातमुद्दिष्टं स्तनान्तमधमाधमम् ।
तयोर्मध्येऽष्टभागैकं नवधा शक्तिमानकम् ॥ ५ ॥
एवं द्विर्नवयोत्तुङ्गं पादादुष्णीषसीमकम् ।
तस्या जात्यंशमायामं योजयेस्ति(त्सि)द्धरुच्यताम् ॥ ६ ॥
श्रीभङ्गासननृत्तानां चान्यमानवमूर्तिनाम् ।
देव्युच्चं समपादस्य स्थानकं ह्येव युक्तितः ॥ ७ ॥
दुर्गा ज्येष्ठा च लक्ष्मीश्च मातरश्च विशेषतः ।
मानकम्प्येतु लिङ्गाद्या माने संकल्प्य देशिकः ॥ ८ ॥
मूललिङ्गस्य गौरी तु लिङ्गमानेन कल्पयेत् ।
सद्व्यंशतीशतं भागं स्त्रीमाने तु विभाजिते ॥ ९ ॥
एकांशमङ्गुलं ख्यातं तदष्टांशयवं भवेत् ।
तदङ्गुलैर्यवैश्चैव अङ्गमानं प्रमीयते ॥ १० ॥
उमादीनां तु देवीनामेतदेवाङ्गुलायतम् ।
उष्णीषोदयमेकांशं केशान्तं तु गुणाङ्गुलम् ॥ ११ ॥

केशान्तादक्षिसूत्रान्तं सत्रिपादयुगांशकम् ।
अक्षिसूत्रात्पुटान्तं तु सार्धवेदांशमिष्यते ॥ १२ ॥
नासापुटात्तु हत्व(न्व)न्तं सत्रिपादगुणांशकम् ।
तस्याथ ग्रीवामानं तु चतुर्भागमुदाहृतम् ॥ १३ ॥
हि(वि)ख्यातं(हृ)दयान्तं च हृदयान्नाभिसीमकम् ।
नाभ्यादियोनिपर्यन्तं समं त्रयोदशाङ्गुलम् ॥ १४ ॥
ऊरुदीर्घं समंजङ्घा दीर्घपात(द)तलं युगम् ।
तलपादतलायामं पार्ष्णेरङ्गुल्यग्रसीमकम् ॥ १५ ॥
तर्जन्यादिषु ये दीर्घं चतुर्भागमुदाहृतम् ।
सार्धत्रिपादमर्धं स्यात्त्रिभागं तदनामिका ॥ १६ ॥
सार्धद्विभागमानं तु कनिष्ठाङ्गुलिदीर्घकम् ।
द्विरष्टासार्धपातालपातालरसभिर्यवैः ॥ १७ ॥
अङ्गुष्ठादिकनिष्ठान्तं चरणाङ्गुलिविस्तृतम् ।
त्रिद्व्यंशं तु नखव्यासं पादोन्त(ना)यतवर्तुलम् ॥ १८ ॥
अङ्गुलीनां मुखोच्चं तु नखव्याससमं भवेत् ।
मध्यं रसाङ्गुलं जान्वोर्व्यासं तु मिति विद्यते ॥ १९ ॥
मध्ये पञ्चाङ्गुलं पार्ष्णिविस्तारं चतुरङ्गुलम् ।
कुक्षिगुल्फान्तविस्तारं पञ्चभागं विधीयते ॥ २० ॥
नलिका त्रिवेदांशं जङ्घामध्यं रसाङ्गुलम् ।
जानोर्व्यासं तु सप्तांशं भान्वंशमूरुमूलतः ॥ २१ ॥
भानुद्विगुणभागं तु विस्तारं कादि(कटि)बन्धके ।
योनिपीठविशालं तु सप्ताङ्गुलमुदाहृतम् ॥ २२ ॥
योनिभागं चतुर्भागमधोगाश्वत्थपत्रवत् ।
विस्तारसदृशोत्सेधं योनिं कुर्यात्समालयम् ॥ २३ ॥
श्रोणिस्थाने तु विस्तारं सयवं विंशदङ्गुलम् ।
नाभेस्तु नतविस्तारं सयवं परिकीर्तितम् ॥ २४ ॥
मध्यमंसविशालं तु रुद्राङ्गुलमुदाहृतम् ।
स्तनयस्तन्तु(योस्तत्तु)विस्तारं सार्धत्रयोदशाङ्गुलम् ॥ २५ ॥
स्तनान्तरं नवांशं स्याद्द्विगुणं स्तनचूचुकम् ।
स्तनोच्चं सार्धवेदांशमक्षार्धा(र्धो)नाङ्गुलोन्नतम् ॥ २६ ॥

स्तनाक्षं च स्तनं चैव वृतं कृत्यादिसुन्दरम् ।
स्तनान्तरं यवाष्टांशं चिन्तविरंचतत्र वै ॥ २७ ॥
अक्षयोरन्तरं विप्र सप्तदशाङ्गुलं स्मृतम् ।
बाहुपर्यन्तविस्तारमेकत्रिंशाङ्गुलं भवेत् ॥ २८ ॥
हिक्कासूत्रादधो बाहुदीर्घं षड्विंशदङ्गुलम् ।
कोष(कूर्प)रोच्चं द्विभागं स्यात्प्रकोष्ठाद्द्विर्नवाङ्गुलम् ॥ २९ ॥
मणिबन्धान्तलायामं सप्ताङ्गुलमुदाहृतम् ।
तस्मान्मध्यमाङ्गुल्यं षड्भिः पश्चात्तर्जनी भवेत् ॥ ३० ॥
अनामिकातर्जनीगुल्यं युगाङ्गुष्ठकनिष्ठयोः ।
अङ्गुलीनां तु दीर्घैवं हस्तयोरुभयोरपि ॥ ३१ ॥
नवसप्ताष्ट सप्त तु यवाङ्गुष्ठादि विस्तृतम् ।
तत्षडंशं च भाग च नखतारमिहोच्यते ॥ ३२ ॥
यवद्वाराधिकं तारं नखायामं तु तीक्ष्णवत् ।
हस्तस्य तलविस्तारं पञ्चाङ्गुलं विधीयते ॥ ३३ ॥
मणिबन्ध विशालोऽग्निभूतांशं कोपरोस(कूर्परस्य) तु ।
षडंशं बाहुविस्तारं सप्तांशं बाहुमूलके ॥ ३४ ॥
तस्मादामणिबन्धान्तं तरुणं वेणुवत्कृशम् ।
हस्तविस्तारमेवं स्यात् सप्ताशं ग्रीवविस्तृतम् ॥ ३५ ॥
अग्रमूले तु विस्तारं वस्वंशं सा(स्या)द्यवाधिकम् ।
रुद्रांशं मुखविस्तारं कुक्कुटाण्डसमाकृति ॥ ३६ ॥
भ्रुवः केशान्तयोर्मध्यं साधृतिद्व्यङ्गुलं भवेत् ।
भ्रूमध्यनेत्रसूत्रान्तं सपादद्व्यङ्गुलं भवेत् ॥ ३७ ॥
...सयवैकाङ्गुलं भवेत् ।
तदर्ध(र्धं) कोज(न)दीर्घं तु तस्यार्धं तस्य विस्तृतम् ॥ ३८ ॥
हस्तिहस्तोपमं पादं हस्तं गोपुच्छवत्कृतम् ।
शेषमुक्तं तु तालोक्तमार्गेणैव समाचरेत् ॥ ३९ ॥
स्त्रीणां सामान्यमेतद्धि विशेषमधुना शृणु ।
गौर्येवं द्विभुजा शान्ता द्विनेत्रैः षट्प्रसारिता ॥ ४० ॥
करण्डमुकुटा वाऽथ किरीटमुकुटा तथा ।
मुकुटं केशबन्धं स्यात्तेषु वै सुन्दरं कुरु ॥ ४१ ॥

केशान्तमुकुटोत्सेधमष्टादशाङ्गुलाधमम् ।
एकविंशाङ्गुलं मध्यं श्रेष्ठं भानुद्वयाङ्गुलम् ४२ ॥
शिरोनाहाद्यवाधिक्यं मुकुटं मूलविशालक(स्तृत)म् ।
मूलं सप्ताष्टधा भाज्य भागोनाग्रविशालकम् ॥ ४३ ॥
किरीटमुकुटं चैव केशबन्धैवमाचरेत् ।
मूलादग्रं क्रमात्क्षीणं करण्डमुकुटस्य तु ॥ ४४ ॥
पद्मस्य मुकुलाकारं मुकुटाग्रं प्रकल्पयेत् ।
त्रिपञ्चसप्तनन्दैर्वा करण्डैस्तु विराजितम् ॥ ४५ ॥
चतुष्यूरु(री)प्रसंयुक्तं नानापुष्पैर्विराजितम् ।
हारोपग्रीवसंयुक्तं मुक्तादामैरलंकृतम् ॥ ४६ ॥
कर्णौ कुण्डलसंयुक्तौ चतुर्मात्रौ तता(थाऽऽ)यतौ ।
मुकुटं कुण्डलं वाऽथ वृत्तं कुण्डलमेव वा ॥ ४७ ॥
कटकैः कटिसूत्रं च सारोपग्रीवसंयुतम् ।
बाहुपूरिमसंयुक्तं छिन्नवीरसमन्वितम् ॥ ४८ ॥
यज्ञोपवीतसंयुक्ता केयूराढ्या सुशोभना ।
दुकूलवसना देवी श्यामवर्णा च सुस्तनी ॥ ४९ ॥
उत्पलं दक्षिणे हस्ते वामहस्तं प्रलम्बितम् ।
अपाङ्गसमभङ्गं वा कल्पयेदतिसुन्दराम् ॥ ५० ॥
दक्षिणं सुस्थितं पादं वामपादं तु कुञ्चितम् ।
आभङ्गे तु गुणांशे तु पदांशं समभङ्गके ॥ ५१ ॥
नतमानं समाख्यातं सूत्रं वक्ष्ये यथाक्रमम् ।
ललाटमध्याद्वामे तु नेत्राधश्च पुटात्मके ॥ ५२ ॥
हरेर्वारे समालम्ब्य स्तनयोरन्तरे तमा(ता)म् ।
नाभेर्दक्षिणपार्श्वे तु वामोरुदक्षिणं वृतम् ॥ ५३ ॥
अवामश्चरणौ पार्ष्णि वामपार्श्वे तु लम्बयेत् ।
पादादङ्गुष्ठयोश्चैव द्वयन्तरं षोडशाङ्गुलम् ॥ ५४ ॥
तत्र भागैकभागं तु पार्ष्ण्यन्तरमुदाहृतम् ।
एवमाभङ्गमाख्यातं समभङ्गमथ शृणु ॥ ५५ ॥
ललाटमध्यनासाग्रात् पादपार्ष्ण्यैश्च मध्यमे ।
प्रसार्य ब्रह्मसूत्रं तु द्वयन्तरं तु प्रमीयते ॥ ५६ ॥

तत्सूत्रं स्तनयोर्मध्यं दक्षिणे तु गुला(णा)ङ्गुलम्।
तत्सूत्राद्वामने(दक्षिणे)नाभिनीव्रं द्व्यङ्गुलकं भवेत् ॥ ५७ ॥
तत्सूत्राद्वामतो योनिमूलं मध्यं युगाङ्गुलम्।
तत्सूत्राद्दक्षिणे जानुनीव्रं गुणाङ्गुलं भवेत् ॥ ५८ ॥
शेषं पूर्ववदुद्दिष्टं गौरीलक्षणमेव हि।
सरस्वत्यादिशक्तीनां प्रागेव प्रोच्यते न वा ॥ ५९ ॥

इत्यंशुमद्भेदे काश्यपशिल्पे मध्यमदशतालविधानं नामैक-
पञ्चाशत्तमः पटलः।

॥ अथ द्विपञ्चाशत्तमः पटलः ॥

कन्यसं दशतालेन शृणु वक्ष्ये द्विजोत्तम।
चन्द्रादित्याश्विनौ चैव ऋषयश्च गुहस्तथा ॥ १ ॥
आर्यः शतमुखश्चैव श(च)ण्डेशः क्षेत्रपालकः।
कन्यसं दशतालेन कारयेत्तु विचक्षणः ॥ २ ॥
कलाधिकशतांशः स्यादधमं दशतालकम्।
उष्णीशमङ्गुलं प्रोक्तं केशमानं गुणाङ्गुलम् ॥ ३ ॥
केशात्तु हनुपर्यन्तं सोर्ध्वं(सार्धं) भान्वङ्गुलं भवेत्।
युगाङ्गुलं समाख्यातं कण्ठमानं द्विजोत्तम ॥ ४ ॥
हिक्यान(क्कादि)स्तनमूलान्तं सार्धरूप्यं(द्व्य)ङ्गुलकं भवेत्।
स्तनादानाभिपर्यन्तं तत्समं चेति कीर्तितम् ॥ ५ ॥
नाभेस्तु मेढ्रमूलान्तं सार्धद्वादशमात्रकम्।
तन्मेढ्रमूलं जान्वग्रात्पञ्चविंशतिमात्रकम् ॥ ६ ॥
वेदभागं तु जानूश्च जङ्घा चोरुसमा भवेत्।
वेदांशं चरणोत्सेधं तुङ्गमेवं विधीयते ॥ ७ ॥
उष्णीषात्पृष्ठकेशान्तं सार्धभान्यङ्गुलं भवेत्।
उष्णीषपार्श्वात्केशान्तं पञ्चाङ्गुलमुदाहृतम् ॥ ८ ॥
केशा[न्ता]द्धनुपर्यन्तं मानं तु गुणभाजिते।
केशान्तादक्षिसूत्रान्तं पुटार्धं जान्वकं तथा ॥ ९ ॥

यवोपेतद्विमात्रं तु नेत्रयोरन्तरं द्विज ।
तत्समं नयता(ना)यामं भूतमात्रं तु वाऽऽयतम् ॥ १० ॥
नृ(भ्रू)मध्यादूर्ध्वकेशान्तं सप्तदश यवाः स्मृताः ।
यवं भ्रूमध्यविस्तारमानुपूर्व्यात्तदग्रकौ ॥ ११ ॥
षड्यवं नेत्रविस्तारमूर्ध्ववर्मं यवार्धकम् ।
अधोवर्मं तु तत्तुल्यं करवीरयवं भवेत् ॥ १२ ॥
नेत्रायामं त्रिधा कृत्वा एकांशं कृष्णमण्डलम् ।
कृष्णमण्डलमध्ये तु ज्योतिर्यवप्रमाणकम् ॥ १३ ॥
यक(व)मानेन दृष्टिः स्याज्ज्योतिर्मण्डलमध्यमे ।
अधोवर्मं सिततिनेत्रं सू(र्मसु तन्नेत्रसू)त्रं कुर्याद्विशेषतः ॥ १४ ॥
तस्य केशान्तयोर्मध्ये भ्रूस्थितिर्बालचन्द्रवत् ।
कर्णस्थानं च कर्णं च उत्तमं दशतालवत् ॥ १५ ॥
घ्राणमूलस्य विस्तारं यवमात्रमुदाहृतम् ।
नासिकाग्रविशालं तु व्योमाङ्गुलमुदाहृतम् ॥ १६ ॥
अधरोष्ठस्य चाऽऽयामं पक्षाङ्गुलमुदाहृतम् ।
तदर्धं तस्य विस्तारं चिबुकं च द्व्याङ्गुलम् ॥ १७ ॥
विस्तारं तत्समं विद्यान्निम्नमर्धयवं भवेत् ।
तस्मादधरनिष्क्रान्तं यवोनव्योममात्रकम् ॥ १८ ॥
ग्रीवामूलविशालं तु वस्वङ्गुलमुदाहृतम् ।
ग्रीवाग्रस्य तु विस्तारं सार्धसप्ताङ्गुलं भवेत् ॥ १९ ॥
वक्षःस्थलस्य विस्तारं सप्तत्रिंशतिमात्रकम् ।
पञ्चविंशतिमात्रं तु बाहुदीर्घमुदाहृतम् ॥ २० ॥
आयामं तु प्रकोष्ठस्य एकोनविंशदङ्गुलम् ।
तस्मादामध्यमाग्रान्तं सार्धद्वादशमात्रकम् ॥ २१ ॥
तदर्धं तु तलायामं शेषं मध्या(षमर्धा)ङ्गुलायतम् ।
अङ्गुष्ठस्तस्य दीर्घं तु अष्टादश यवाः स्मृताः ॥ २२ ॥
सार्धवेदाङ्गुलं प्रोक्तमतामिका तु(नामायास्तु)दीर्घकम् ।
तदा(थै)व तर्जनीदीर्घं कनिष्ठाया युगांशकम् ॥ २३ ॥

धर्माब्धिवसुभूतं च यवाङ्गुष्ठादिविस्तृतम् ।
तन्मूलेऽष्टांशहीनं तु शेषमग्रविशालम् ॥ २४ ॥
अग्रव्यासेन भूतांशे वेदांशं नखविस्तृतम् ।
विस्तारात्पादमाधिक्यं नखयाममुदाहृतम् ॥ २५ ॥
अङ्गुष्ठे तु द्विपादं स्यादन्येषां तु त्रिपादकम् ।
तलमध्यमरेखाभिः शूलाभं पार्श्ववत्तले ॥ २६ ॥
मूलप्रदेशस्य घनं.. .....कोलकमुच्यते ।
अष्टांशहीनमग्रं तु घनमित्यभिधीयते ॥ २७ ॥
तलायामसमं ज्ञेयं तलस्यैव तु विस्तृतम् ।
मणिबन्धस्य विस्तारं त्रिमात्रं द्वियवाधिकम् ॥ २८ ॥
प्रकोष्ठमूलविस्तारं सार्थभूतांशमुच्यते ।
बाहु(ह्व)ग्रस्य तु विस्तारं सार्धषण्मात्रमुच्यते ॥ २९ ॥
बाह्वोर्मध्यविशालं तु सप्ताङ्गुलमुदाहृतम् ।
हिक्कासूत्रं तु कक्ष्यान्तं वस्वङ्गुलमुदाहृतम् ॥ ३० ॥
द्वात्रिंशदं[ङ्गं सं]प्रोक्तं....कक्षयोरन्तरा युगम् ।
हृदयाविध(वधि)विस्तारमष्टादशाङ्गुलं भवेत् ॥ ३१ ॥
उदरस्य विशालं तु सप्तादशाङ्गुलं भवेत् ।
श्रोणिप्रदेशविस्तारं दशाङ्गुलमुदाहृतम् ॥ ३२ ॥
षड्व्यङ्गं नाभिविस्तारं निम्नमर्धयवं भवेत् ।
स्तनमण्डलविस्तारमर्धाङ्गुलमुदाहृतम् ॥ ३३ ॥
चूचु[काग्रस्य विस्तार]मुत्सेधं तत्समं भवेत् ।
जानुमध्यविशालं तु सार्धषण्मात्रमुच्यते ॥ ३४ ॥
नलिकायास्तु विस्तारं सार्धं वेदाङ्गुलं भवेत् ।
अङ्घ्रितलाग्रविस्तारं कनका(द्विनवा)ङ्गुलमुच्यते ॥ ३५ ॥
तलमध्यविशालं तु भूताङ्गुलमुदाहृतम् ।
पादाङ्गुष्ठसमायामं चतुर्मात्रमुदाहृतम् ॥ ३६ ॥
तस्याग्रादङ्गुल्फमध्यन्तं सार्धद्वादशमात्रकम् ।
अनामिकास्तु(या)दीर्घं तु त्रयस्त्रिंशद्यवं भवेत् ॥ ३७ ॥

मध्याङ्गुलं तु तत्तुल्यं वेदांशं तु तदाननम् ।
कनिष्ठायास्तु दीर्घं तु सार्धोनं द्व्यङ्गुलं भवेत् ॥ ३८ ॥
सप्ताष्टनवधर्म(धाम)न्त्रयोदशयवं क्रमात् ।
कनिष्ठाद्यङ्गुलानां तु विस्तारः प्रविधीयते ॥ ३९ ॥
अग्रमूलसमं प्रोक्तं विस्तारं तु त्रिभाजिते ।
द्व्या(द्वि)भागं नखविस्तारं तत्तुल्यायतवर्तुलम् ॥ ४० ॥
तलाग्राङ्गुष्ठमूले तु द्विमात्रं तु घनं भवेत् ।
कनिष्ठायास्तु मूले तु घनं नवयवं भवेत् ॥ ४१ ॥
अक्षात्पार्ष्ण्यन्तरं भागं पार्ष्ण्युत्सेधं च तत्समम् ।
प्र(पृ)ष्ठमण्डलविस्तारं पादोनं नवमात्रकम् ॥ ४२ ॥
वक्षःस्थले परे व्यासं पञ्चत्रिंशतिमात्रकम् ।
अक्षयोरन्तरं प्रोक्तं चतुर्विंशतिमात्रकम् ॥ ४३ ॥
अत्रानुक्तं तु यत्सर्वमुत्तमं दशतालवत् ।
येषां लक्षणमाख्यातं तेषामाकृतिः पूर्ववत् ॥ ४४ ॥

इति काश्यपशिल्पे दशतालं नाम द्विपञ्चाशत्तमः पटलः ।

॥ अथ त्रिपञ्चाशत्तमः पटलः ॥

नवता दशतालोक्तं (अथोक्तं नवतालं तु) शृणुष्वैकाग्रमानसः ।
वसवश्चाष्टमूर्तीश्च विद्ये(त्ते)शाल्लोकपालकान् ॥ १ ॥
अन्याश्च देवताश्चैव नवतालोत्तमं कुरु ।
सद्वादशशतं भागं वेरमाने विभाजिते ॥ २ ॥
उष्णीषं चैकभागेन दे(के)शान्तं तु गुणाङ्गुलम् ।
केशान्तादक्षिसूत्रान्तं वेदमात्रं विधीयते ॥ ३ ॥
तस्मादापुटसीमान्तं वेदांशं तु पुटार्धकम् ।
कण्ठमानं तु वेदांशं भान्वंशं हृदयावधि ॥ ४ ॥
हृदयाभाभिसीमान्तं तथा द्वादशमात्रकम् ।
नाभ्यादिमेढ्रमूलान्तं भानुमात्रं विधीयते ॥ ५ ॥

ऊरुदीर्घं चतुर्विंशदंशं ता(जा)नुयुगांशकम् ।
जङ्घादि चोरुतुल्यं स्याद्वेदांशं च रसोदयम् ॥ ६ ॥
हिक्काभो बाहुदीर्घं स्याच्चतुर्विंशतिभागया(तः) ।
भि(त)क्त्वा(वां)स्यंश(शं)प्रकोष्ठं स्याद्दशांशं तु तलायतम् ॥ ७ ॥
तस्मान्मध्याङ्गुलायामं षडङ्गुलमुदाहृतम् ।
कन्यसं दशतालोक्तं मार्गेण शेषमाचरेत् ॥ ८ ॥
तस्मादवयवार्थं च प्रत्येकमेवमाचरेत् ।
मानमेवं समाख्यातं लक्षणं कथितं पुरा ॥ ९ ॥

इति काश्यपशिल्प उत्तमं नवतालं नाम त्रिपञ्चाशत्तमः पटलः ।

॥ अथ चतुःपञ्चाशत्तमः पटलः ॥

मध्यमं नवतालं तु वक्ष्ये संक्षेपतः क्रमात् ।
यक्षाप्सरोगणाश्चैव अस्त्रमूर्तिमरुद्गणाः ॥ १ ॥
मध्यमं नवतालेन कर्तव्यं द्विजसत्तम ।
अष्टोत्तरशतांशं तु प्रतिमोच्चं विभाजिते ॥ २ ॥
उष्णीषं व्योमभागेन केशं पादोनतालकम् ।
केशान्ताभ्रूत्रसून्तान्तं चतुर्भागयवोनितम् ॥ ३ ॥
पुटान्तं चैव तत्तुल्यमाननं च तथा भवेत् ।
पादोनचतुरंशं तु ग्रीवामानमुदाहृतम् ॥ ४ ॥
भान्वंशाग्नियवोनं तु हिक्कादाहृदयावधि ।
नाभ्यन्तं चैव तत्तुल्यं मेढ्रमूलान्तकं तथा ॥ ५ ॥
पादाधिकगुणोपेतं विंशांशं चोरुदीर्घकम् ।
जानुग्रीवसमं तुङ्गं जङ्घा चोरुसमा भवेत् ॥ ६ ॥
जानुतुल्यतलोपेतं बाहुश्चोरुसमो भवेत् ।
सप्तदशाङ्गुलं मोक्षं प्रकोष्ठस्य तु दीर्घकम् ॥ ७ ॥

षडंशं च यवोनं तु तु(त)लायामं करस्य तु ।
तत्समं मध्यमायामं शेषं युक्त्या समाचरेत् ॥ ८ ॥

इति काश्यपशिल्पे मध्यमनवतालकं नाम चतुःपञ्चाशत्तमः पटलः ।

॥ अथ पञ्चपञ्चाशत्तमः पटलः ॥

अधमं नवतालस्य लक्षणं वक्ष्यतेऽधुना ।
विद्याधरगणश्चैव असुराश्च तथैव च ॥ १ ॥
पितरः सिद्धगन्धर्वा नवतालोन्नतेन तु ।
सवेदशतभागं तु कौतुकोच्चं विभाजिते ॥ २ ॥
उष्णीषोच्चं त्रिपादं स्याच्छेषं सार्धत्रिभागया(तः) ।
केशान्ताब्नेत्रसूत्रान्तं पादोनचतुरंशकम् ॥ ३ ॥
तस्माब्नेत्राद्विहन्वन्तमाननं स्यात्तथोदितम् ।
भवेद्वेदाङ्गुलं ग्रीवामानमित्यभिधीयते ॥ ४ ॥
ग्रीवापादतलं जानुतुल्यं जङ्घोरुसदृशम् ।
बाहु(हो)श्चोरुसमं दैर्घ्यं प्रकोष्ठं षोडशाङ्गुलम् ॥ ५ ॥
तलदीर्घं तु भूतांशं तत्समं मध्यमाङ्गुलम् ।
शेषं युज्यं (क्त्या) तु कर्तव्यं सर्वमङ्गं विधीयते ॥ ६ ॥

इति काश्यपशिल्पेऽधमनवतालं नाम पञ्चपञ्चाशत्तमः पटलः ।

॥ अथ षट्पञ्चाशत्तमः पटलः ॥

अथ वक्ष्ये विशेषेण अष्टतालं विधीयते ।
शतांशं मध्यबिम्बोच्चमुष्णीषं तु शिवांशकम् ॥ १ ॥
सार्धद्व्यंशं तु केशान्तं केशान्तात्त्वर्धसीमकम् ।
पादोनदशभागं स्यात्तत्त्रिभागविभाजिते ॥ २ ॥

शिवांशं त्वक्षिसूत्रान्तं पुटान्तं चैव तत्समम् ।
पुटार्धं त्वन्तके शेषं सार्धत्र्यंशं गलोदयम् ॥ ३ ॥
हिक्कादिहृदयान्तं तु रुद्रांशं द्वितयोन्नतम् ।
नाभ्यन्तं चैव तुल्यांशं मेढ्रमूलान्तकं तथा ॥ ४ ॥
सार्धत्रिसप्तभागं तु ऊरुदीर्घमुदाहृतम् ।
जानुकण्ठसमं तुङ्गं जङ्घा चोरुसमा भवेत् ॥ ५ ॥
जानुतुल्यं तलोत्सेधं बाहुश्चोरुसमो यतः ।
प्रकोष्ठं तु कलांशं स्यात्सार्धं भूताङ्गुलं तथा ॥ ६ ॥
तत्समं मध्यमाङ्गुल्यं शेषं प्रागपरोदितम् ।
अत्रानुक्तं तु यत्सर्वं कन्यसं दशतालवत् ॥ ७ ॥

इति काश्यपशिल्पेऽष्टतालं नाम षट्पञ्चाशत्तमः पटलः ।

॥ अथ सप्तपञ्चाशत्तमः पटलः ॥

अथ वक्ष्ये विशेषेण सप्ततालविधिं परम् ।
पिशाचप्रतिमोत्सेधं साष्टाशिकां(शीत्यं)शकं भजेत् ॥ १ ॥
उष्णीषमर्धभागेन केशान्तं शि(श)शिभागया(तः) ।
सार्धद्व्यंशं तु नेत्रान्तं सार्धाग्न्यंशं पुटान्तकम् ॥ २ ॥
चिबुकान्तं च तत्तुल्यं वेदांशं च गलोदयम् ।
स्तनान्तं सप्तभागं तु रुद्रांशं नाभिसीमकम् ॥ ३ ॥
तथा वै योनिमूलान्तं विंशांशं चोरुदीर्घकम् ।
जानुमानं द्विभागेन जङ्घा चोरुसमा भवेत् ॥ ४ ॥
चरणोच्चं द्विभागेन मन्वंशं तु तलोन्नतम् ।
ऊरुदीर्घसमं बाहुप्रकोष्ठान्तं त्रिपञ्चकम् ॥ ५ ॥
तलायामं तु भूतांशं वेदांशं तस्य विस्तरम् ।
तत्तलायामसदृशं मध्यमाङ्गुलिदीर्घकम् ॥ ६ ॥

शेषं प्रागुदिते देशे ह्रासं कुर्यादतीन्द्रियम् ।
सप्ततालं समाख्यातं शेषं प्रागपरोदितम् ॥ ७ ॥

इति काश्यपशिल्पे सप्ततालं नाम सप्तपञ्चाशत्तमः पटलः ।

॥ अथाष्टपञ्चाशत्तमः पटलः ॥

अथातो नागरादीनां लिङ्गानां प(पी)ठलक्षणम् ।
आदौ तु वक्ष्यते विप्र सकलान्तं ततो विदुः ॥ १ ॥
शैलजे शिलया पीठं सुधयेष्टकयाऽपि वा ।
दारुजे दारुजना(जं वाऽ)थ इति(ष्ट)कामयमेव वा ॥ २ ॥
रत्नलोहजलिङ्गानां सयोनिर्लोहजं तु वा ।
लिङ्गोदयसमं पीठं विस्तारेणोत्तमोत्तमम् ॥ ३ ॥
पूजांशोच्चसमं पीठं तारं कन्यसमुच्यते ।
तयोर्मध्येऽष्टभागं तु उत्तमान(दि) त्रयत्रयम् ॥ ४ ॥
पीठव्यासं त्रिधा भज्य द्विभागं चोरुमो(जो)न्नतम् ।
व्यासार्धमधमोत्सेधं तयोर्मध्येऽष्टभाजिते ॥ ५ ॥
नवधा पीठतुङ्गं च उत्तमादि त्रयत्रयम् ।
क्रमेण कथितं विप्र नागरस्त्वेवमुच्यते ॥ ६ ॥
लिङ्गस्योच्चसमं व्यासं श्रेष्ठमध्यकनिष्ठकम् ।
तयोर्मध्येऽष्टभागे तु नवधा पीठविस्तृतम् ॥ ७ ॥
नवधा विस्तृतं ख्यातं ब्रह्मविष्ण्वंशयोरपि ।
उदयं वसुधा भज्य द्विभागं वा यसां(थां)शकम् ॥ ८ ॥
एकांशं वा विशेषेण स्थलांशे तु निवेशयत् ।
शेषं पीठोदयं ख्यातमेवं द्राविडमुच्यते ॥ ९ ॥
पूजांशश्च परीणाहसमं श्रेष्ठं विशालकम् ।
परीणाहे कलांशे तु भान्वंशमधमं त्विति ॥ १० ॥
तयोर्मध्येऽष्टभागे तु नवधा पीठविस्तृतम् ।
अथवा लिङ्गविष्कम्भं चतुरस्रकृते सति ॥ ११ ॥

तत्कर्णद्विगुणं वाऽथ सार्धद्विगुणमेव वा ।
त्रिगुणं च विशालं तु पीठानां तु विशेषतः ॥ १२ ॥
गर्भगेहं त्रिभागैकं चतुर्भागैकमेव वा ।
पीठव्यासं समाख्यातं विष्णुभागसमोन्नतम् ॥ १३ ॥
सामान्यं नागरादीनां लिङ्गानां पीठिकासमे ।
उपानबाह्यविस्तारं सर्वेषां तु विधीयते ॥ १४ ॥
तदष्टनवदशांशहीनं वाऽग्रविशालकम् ।
विष्णुभागसमोत्तुङ्गं सपादं सार्धमेव वा ॥ १५ ॥
सामान्यपीठिकानां तु नागराद्व्यासमुन्नतम् ।
लिङ्गानां सकलानां तु सामान्यं पीठलक्षणम् ॥ १६ ॥
कलोदये नवांशे तु व्योमांशं कन्यसोदयम् ।
गुणांशं श्रेष्ठमानं तु तयोर्मध्येऽष्टभाजिते ॥ १७ ॥
नवधा पीठतुङ्गं तु तस्य विस्तारमुच्यते ।
पीठतुङ्गसमं व्यासमधमं पीठमुच्यते ॥ १८ ॥
द्विगुणं चोत्तमं व्यासात्तयोर्मध्येऽष्टभाजिते ।
नवधा विस्तृतं ख्यातं सकलानां विशेषतः ॥ १९ ॥
पिण्डिका गोमुखोपेता लिङ्गानां तु विधीयते ।
गोमुखाकृति पीठं स्यात्सकलानां विशेषतः ॥ २० ॥
समाश्रं समवृत्तं वा लिङ्गानां तु विधीयते ।
सायताग्राय(प)वृत्तं वा प्री(प्र)तिमानं समं तु वा ॥ २१ ॥
पद्मपीठं भद्रपीठं वेदिकोपरि मण्डलम् ।
पीठं चतुर्विधं ख्यातमलंकारं द्विजोत्तम ॥ २२ ॥
कलांशं विभजेत्तुङ्गमुपानोच्चं द्विभागया(तः) ।
भूतांशोच्चमथो पद्मं कण्ठं पादुकसदृशम् ॥ २३ ॥
ऊर्ध्वपद्मं तु वेदांशं द्विभागं पट्टिकोदयम् ।
शिवांशं प्रीतवायुश्च(प्रतिभागं च)षोडशदलसंयुतम् ॥ २४ ॥
क्षुद्रं दलं तयोर्मध्ये अष्टौ वाऽथ महादलम् ।
अर्धाङ्गुलं दलाग्रोच्चं मानाङ्गुलसमावृतम् ॥ २५ ॥

लिङ्गदेहाङ्गुलोर्ध्वं वा दलाग्राणां समुच्छ्रयम् ।
पीठतारत्रिभागैकं गोमुखं दीर्घमुच्यते ॥ २६ ॥
तद्दीर्घसदृशं ख्यातं मूलव्यासमुदाहृतम् ।
मूलतारत्रिभागैकं तस्याग्रे विस्तृतं भवेत् ॥ २७ ॥
मूलादग्रं क्रमात्क्षीणं तद्घनं व्याससदृशम् ।
त्रिपादं वाऽर्धपादोनं वृत्तिभागांश एव वा ॥ २८ ॥
व्यासत्रिभागभागं तु शिलामार्गविशालकम् ।
पट्टिकोर्ध्वसमं निम्नं तस्माद्धीनं तु कन्यसम् ॥ २९ ॥
उपानाद्यङ्गवेशं च नीत्रं सौन्दर्यमाचरेत् ।
अधिष्ठानं भवेद्वेशनीत्रं वा परिकल्पयेत् ॥ ३० ॥
पद्मपीठं समाख्यातं भद्रपीठमथोच्यते ।
कृत्वा तु षोडशोत्सेधं भागेनोपानमुच्यते ॥ ३१ ॥
जगत्युच्चं तु वेदांशं गुणांशं कुरुतोश्र(च्छ्र)यम् ।
शिवांशं पट्टिकामानं कण्ठमानं गुणांशकम् ॥ ३२ ॥
तदूर्ध्वं पट्टमेकांशं द्विभागं पट्टिका भवेत् ।
शश्यंशं घृतवारि स्याद्भद्रपीठमिदं परम् ॥ ३३ ॥
पटोच्चं तु कलांशे तु द्विभागं पादुकोदयम् ।
गुणांशं जगतीमानं कुमुदोच्चं तु तत्समम् ॥ ३४ ॥
व्योमांशं पट्टमानं तु कण्ठमानं द्विभागया(तः) ।
तस्योर्ध्वं कम्पमेकांशं गुणांशं पट्टिका भवेत् ॥ ३५ ॥
एकांशं घृतवारि स्याद्वेदीभद्रं तथोच्यते ।
भद्रमेवं समाख्यातं वेदपीठमथोपरि ॥ ३६ ॥
त्रयोदशांशं पीठोच्चं द्विभागं पादुकोदयम् ।
तदूर्ध्वं पद्मकं तुल्यं कम्पमंशेन कारयेत् ॥ ३७ ॥
द्विभागं कम्पमानं तु ऊर्ध्वकम्पं शिवांशकम् ।
तदूर्ध्वपद्मं पक्षांशं पट्टकं चैव तत्समम् ॥ ३८ ॥
घृतवार्युदयं व्योमभागेन परिकल्पयेत् ।
अथोदये तु वस्वंशे उपानोच्चं शिवांशकम् ॥ ३९ ॥

एकांशं घृतवारि स्याच्छेषं वेदियुगाश्रक(य)म् ।
वेदिकापीठमाख्यातं तदेवाक्षांशपट्टिका ॥ ४० ॥
कर्तव्यं तु त्रिधैवाह्नि वेदिकापीठमुच्यते ।
पद्मं वा भद्रपीठं वा वृत्तं तु परिमण्डलम् ॥ ४१ ॥
अधिष्ठानं तु यावद्वा पीठाङ्गं परिकल्पयेत् ।
उपपीठाङ्गवद्बन्धात्तत्तन्नाम्ना प्रकीर्तितम् ॥ ४२ ॥
जयदं चतुरश्रान्तं योन्याकारं प्रजाकरम् ।
शान्तिः स्याद्धनुराकारे गुणाश्रं रिपुनाशनम् ॥ ४३ ॥
वर्धमानं तु वृत्तं स्यात्पञ्चाश्रं पुष्टितुष्टिदम् ।
षट्कोणं रोगनाशं स्याद्वे(दे)वदे(मे)व क्रमाद्विदुः ॥ ४४ ॥
एष्वाकारेषु पीठाग्रात्प्रागुक्तविधिना कुरु ।
द्रव्ये तुष्टेऽष्टपीठे तु जीर्णे धारे द्विजोत्तम ॥ ४५ ॥
पूर्वाऽऽकृतिर्यथा कार्या तथा कुर्यात्पुनः पुनः ।
पश्चादन्याकृतातीतकर्तव्यं कर्तृनाशनम् ॥ ४६ ॥
तस्मात्सर्वप्रयत्नेन पूर्वाकारं प्रकल्पयेत् ।
सापेक्षं यत्तु तत्तारान्सपादं सार्ध एव वा ॥ ४७ ॥
आजयं मुखभद्रं वा भद्रं चोपसभद्रवत् ।
लिङ्गानां सायतं पीठं न कुर्यात्तु कदाचन ॥ ४८ ॥
समाश्रं समवृत्तं च सायतं वा तदन्यकम् ।
सर्वं च सक्रमोपेतं कर्तव्यं संपदां पदम् ॥ ४९ ॥
पिण्डिकालक्षणं प्रोक्तं पादशैलोदयं शृणु ॥ ५० ॥

इति काश्यपशिल्पे पिण्डिकालक्षणं नामाष्टपञ्चाशत्तमः पटलः ।

॥ अथैकोनषष्टितमः पटलः ॥

अथ वक्ष्ये विशेषेण पादशैलादिलक्षणम् ।
लिङ्गान्तारत्रयं व्यासं तत्र पादसमोन्नतम् ॥ १ ॥
श्रेष्ठमध्यकनिष्ठोर्ध्वं तयोर्मध्येऽष्टभाजिते ।
तुङ्गं तु नवधा प्रोक्तं पादांशं (वे)सरोदितम् ॥ २ ॥

लिङ्गव्यासद्वयाधिक्यं व्यासं तद्वसुभाजिते ।
कृ(ए)कांशमवटे निम्नं लिङ्गमूलवदाकृति ॥ ३ ॥
नवरत्नप्रमाणेन नवकोष्ठं प्रकल्पयेत् ।
अन्यतः समतां कुर्यादाधाराख्यशिलासह ॥ ४ ॥
तदस्मात्पीठसीमान्तं नन्द्यावर्तशिलोदयम् ।
लिङ्गपीठसमानं वा एकद्वित्र्यङ्गुलाधिकम् ॥ ५ ॥
नान्यवृत्तशिलाव्यासं नागरेषु विधीयते ।
पीठव्यासान्यके वाऽथ द्राविडाक्षाग्निकायिकम् ॥ ६ ॥
लिङ्गव्यासेन पादांशे पीठादेकैकवर्धनात् ।
नन्द्यावर्तशिलाव्यासं नवधा वेसरोदितम् ॥ ७ ॥
लिङ्गस्योपरितः कल्प्यं चत्वारश्च(त्वरं च)तुरश्रकम् ।
चतुरश्रोच्चतायामं तेषां मानमुदाहृतम् ॥ ८ ॥
उत्तराग्रं तु प्राग्भागे प्रागग्रं दक्षिणे न्यसेत् ।
पश्चिमे चोत्तराग्रं चेत् प्रागग्रं चोत्तरे न्यसेत् ॥ ९ ॥
शांकरे प्रथमरयाग्रमनलाग्रे द्वितीयकम् ।
तृतीयं मरुतो वायुमूलं च चतुरर्थकम् ॥ १० ॥
नन्द्यावर्तशिलास्त्वेवं योज्यं कल्पदलोदके ।
तदूर्ध्वेऽष्टबन्धनं कुर्यात्स्थापयेत्पिण्डिकां बुधः ॥ ११ ॥
सुधया वज्रबन्धं वाऽऽलिप्य पीठं प्रयोजयेत् ।
एकांशं चोत्तमं पीठं द्वाभ्यां वै मध्यविष्टरम् ॥ १२ ॥
त्रिचतुष्पञ्चभिर्वाऽथ कन्यसं पीठमुच्यते ।
पीठानां तु तदूर्ध्वे तु मञ्चै(ध्यै)केन समाचरेत् ॥ १३ ॥
बहुवस्तुदलाधस्तात्पीठसंधैर्गलैर्गुरुः ।
गलाधस्ताद्वृषौ द्वयश्रौ तत्पूर्वे वाऽपरे न्यसेत् ॥ १४ ॥
त्रयश्चेदाश्रयं त्वेकं वामेऽवामे परे द्वयम् ।
चत्वारं चेद्द्रोणयुगं चतुरश्रं प्रकल्पयेत् ॥ १५ ॥
पञ्चषट् चैव कर्तव्यं पिण्डिकालक्षणान्वितम् ।
सुधयाऽष्टबन्धनाद्वा निश्छिद्रं सुदृढं कुरु ॥ १६ ॥
इष्टकाभिः शिलाभिर्वा दृढं स्यात्सुधयाऽन्वितम् ।
लोहजं राजतं चैव यथावद्दृढता भवेत् ॥ १७ ॥

सर्वेषां बन्धनं चाष्टबन्धमित्यभिधीयते ।
विष्णुभागोर्ध्वसीमं च पिण्डिकोर्ध्वे समुन्नयेत् ॥ १८ ॥
नतोन्नतं न कर्तव्यं कृतं चेत्कर्तृनाशनम् ।
लिङ्गस्य मुखनिर्माणं लक्षणोद्धारमुच्यते ॥ १९ ॥
प्रासादस्याग्रतो वाऽपि चांशके दक्षिणेऽपि वा ।
हस्तमानं समुत्सेधं दर्पणोदरसंनिभम् ॥ २० ॥
गोमयालेपनं कृत्वा पिण्डीं चूर्णैरलंकृताम् ।
नानाधूपैश्च दीपैश्च नानापुष्पैरलंकृताम् ॥ २१ ॥
शालिभिः स्थण्डिलं कुर्याद्वेदिकायां विशेषतः ।
तण्डुलैश्च तिलैर्दर्भैर्लाजैः पुष्पैरलंकृतैः ॥ २२ ॥
अधमत्रयलिङ्गानामेवं मण्डपमाचरेत् ।
शेषाणां लिङ्गदीर्घे स्याद्यथावेदिकविस्तृतम् ॥ २३ ॥
तेनैव त्रिगुणव्यासं मण्डपस्य विशालकम् ।
अन्यत्सर्वमलंकारं प्रागिवैव समाचरेत् ॥ २४ ॥
विध्यूर्ध्वं श्वयते(रथपति)र्लिङ्गं प्राक्छिरश्चोर्ध्ववक्त्रकम् ।
परिवेष्ट्य घटानष्टौ सकूर्चान्सावधानवान् ॥ २५ ॥
ससूत्रान्नववस्त्राढ्यान् गन्धतोयेन पूरयेत् ।
सावधानान्सभो(शो)भाढ्या(ढ्यान्)लोकपालादिदैवतान् ॥ २६ ॥
गन्धैः पुष्पैश्च धूपाद्यैरर्चयेत्स्वस्वनामतः ।
लिङ्गमूलस्य वामे तु पिण्डिकाश्म निधापयेत् ॥ २७ ॥
रक्तवस्त्रादिनाऽऽवेष्ट्य लिङ्गपीठे समर्चयेत् ।
वेदिकायां सत्वयैन्द्रे कुण्डं वा स्थण्डिलं कुरु ॥ २८ ॥
अग्न्याधानादिकं सर्वमग्निकार्योक्तमाचरेत् ।
ब्रह्मवृक्षसमिद्भिश्च होमं कृत्वा विधानतः ॥ २९ ॥
आपोहिष्ठादिमन्त्रेण इदं विष्णुश्च मन्त्रतः ।
ब्रह्म जज्ञानमन्त्रेण आज्य[त]न्त्रं समाचरेत् ॥ ३० ॥
चरुहोममघोरेण प्रत्यगष्टादशाहुतीः ।
तथा जागरणं रात्रौ प्रभाते सुमुहूर्तके ॥ ३१ ॥
देशिकस्तु शुचिर्भूत्वा सकलीकृतविग्रहः ।
सितवस्त्रोत्तरीयाढ्यः सितमाल्यानुलेपनः ॥ ३२ ॥

सितयज्ञोपवीतश्च शिवद्विजकुलोद्भवः ।
स्थपतिश्च शुचिर्भूत्वा यज्ञसूत्रोत्तरान्वितः ॥ ३३ ॥
प्राग्वदग्निं समभ्यर्च्य स्विष्टपूर्णाहुतिं यजेत् ।
प्रतिसरं बन्धयेन्मात्रं लिङ्गपीठे द्विजोत्तम ॥ ३४ ॥
स्वर्णरजतकार्पाससूत्रैर्वा हृदयेन तु ।
प्रभाते सुमुहूर्ते तु लक्षणोद्धारमाचरेत् ॥ ३५ ॥
पायसं घृतसंयुक्तं शिरःस्थाने बलिं हरेत् ।
रत्नशान्तिं परित्यज्य गन्धाद्यैरर्चयेद्धृतम् ॥ ३६ ॥
रत्नेन धातुना लिङ्गमध्ये सूत्रं तु पातयेत् ।
मुखभागस्य मध्ये तु नालं कुर्यात्सलक्षणम् ॥ ३७ ॥
लिङ्गमानेन मतिमान् स्तूपिविस्तारमाचरेद् ।
रुद्रभागोदयं गृह्य शिरसो वर्तनान्वितम् ॥ ३८ ॥
सवेदविंशति[र्हस्तं]कृत्वैकांशं तु विस्तृतम् ।
अङ्गुलं वसुधा भज्य एकांशं यवमुच्यते ॥ ३९ ॥
उत्तमोत्तमलिङ्गानां सूत्रं पञ्चयवं ततः ।
शेषाणामपि लिङ्गानां यवार्धं प्रतिहासयेत् ॥ ४० ॥
अधमाधमलिङ्गं तु सूत्रतारं यवं भवेत् ।
सूत्रविस्तारमेवं स्यात्रूया(खा)तं चैव तु तत्समम् ॥ ४१ ॥
लक्षणं शिरसि व्याधिर्ललाटे मरणं भवेत् ।
नेत्रे कृते त्वपस्मारमास्ये ध्यात्वा विनाशनम् ॥ ४२ ॥
चिबुके बन्धुनाशः स्यात्कण्ठे स्कन्धविनाशनम् ।
स्तनदेशे सुतं हन्ति तस्मादेतानि वर्जयेत् ॥ ४३ ॥
शिरसा सह रुद्रांशं गुणांशं विभजेत्समम् ।
एकांशं मूर्धतो[वर्ज्यस्त]नादूर्ध्वं तदंशके ॥ ४४ ॥
तदसतांशयोर्विप्र लक्षणोद्धारमाचरेत् ।
पद्मं वा मुकुलाकारं लिङ्गाकारं यथोचितम् ॥ ४५ ॥
द्विजानामतिवृद्ध्यर्थं नृपाणां च जयावहम् ।
खड्गप्रत्यञ्चिकाकारं कुंजराक्षमिवाकृति ॥ ४६ ॥
शङ्खाभश्च चतुर्भेदं नृपाणामपि वृद्धये ।
करसञ्जलिसमाकारं गोकर्णाकृति वा भवेत् ॥ ४७ ॥

वैश्यानां च त्रिकोणं च शूलवृत्तायतं तथा ।
शूद्रवृद्धिकरं त्रीणि सूत्रं गृह्य तु लक्षणम् ॥ ४८ ॥
लक्षणोद्धरणोत्थांशं रुद्रभागविभाजिते ।
मुकुलोदयमेकांशं तद्व्यासं चापि तत्समम् ॥ ४९ ॥
तन्मूलानां तु दीर्घत्वं नवभागमुदाहृतम् ।
तन्नालमेकसूत्रं स्यात्सूत्रद्वित्रियुगं तु वा ॥ ५० ॥
सूत्रत(त्र)ययुतं चोक्तं सूत्रान्तरयवत्रयम् ।
यवद्वयान्तरं वाऽथ नालातरं द्विजोत्तम ॥ ५१ ॥
नालमूलेन तस्याग्रे सीमासूत्रे तथा लिखेत् ।
तन्नालं चैकसूत्रं स्यालिङ्गमध्ये विशेषतः ॥ ५२ ॥
सूत्रोक्तव्यासखातं च नालायामं च कल्पयेत् ।
नालाधस्तात्तु व्योमांशं त्यजेद्विष्णंवशकोपरि ॥ ५३ ॥
मणिरेखा ततः कार्या मुकुलस्फुङ्गं(फुल्ल)नाकृति ।
रेखात्रयं तथा विप्र पद्ममूलं समं तु वा ॥ ५४ ॥
पद्मतारत्रयैकांशं वेदांशेऽग्न्यंश एव वा ।
पञ्चांशं[वा]युगांशं वा पद्मनालार्धमेव वा ॥ ५५ ॥
मुकुलमूलेऽन्तरं ह्येवं नालमूलेऽतरं शृणु ।
नालायामसमं पश्चाद्द्वित्रिपादयुगांशके ॥ ५६ ॥
त्रिभागं पञ्चभागं तु वेध(द)भागमथापि वा ।
नालमूलसमत्वे वा मणिरेखाद्वयोत्तरम् ॥ ५७ ॥
मूलादग्रं क्रमात्क्षीणं मणिरेरवान्तरं भवेत् ।
तन्तुमूले समे तिर्यग्गत्वा पृष्ठे तु संधयेत् ॥ ५८ ॥
मणिरेखाव्यासखातं चालिङ्गस्यात्रि लिङ्गवत् ।
मणिरेखालम्बि नालं दीर्घास्रं सममेव वा ॥ ५९ ॥
तस्मादामूलपर्यन्तं वसुभागविभाजिते ।
मणि(णे)रालम्बनं विप्र नवधा परिकीर्तितम् ॥ ६० ॥
सर्वेषु लक्षणोद्धारे श्रीहिंस्यान्मणिरेखिका ।
प्रथमं लक्षणं प्रोक्तं द्वितीयं लक्षणं शृणु ॥ ६१ ॥

लक्षणोद्धरणार्धांशं दशभागविभाजिते ।
एकांशं मुकुलोच्चं तु नवांशं नालदीर्घकम् ॥ ६२ ॥
शेषं पूर्ववदुद्दिष्टं चतुर्थं लक्षणं शृणु ।
लक्षणांशं तु नवधा भाज्यैकांशं तु कुण्डकम् ॥ ६३ ॥
सप्तांशं नालदीर्घं तु शेषं पूर्ववदेव हि ।
चतुर्थं लक्षणं प्रोक्तं पञ्चमं लक्षणं शृणु ॥ ६४ ॥
लक्षांशं वसुधा भज्य व्योमांशं मुकलोदयम् ।
षडंशं नालदीर्घं तु नालाधस्ताच्छिवांशकम् ॥ ६५ ॥
तदेव सप्तभागं तु नालदीर्घमुदाहृतम् ।
शेषं प्रागिव कर्तव्यं सप्तमं लक्षणं शृणु ॥ ६६ ॥
लक्षार्धांशे तु सप्तांशे शश्यंशं मुकुलोदयम् ।
भूतांशं नालदीर्घं तु शेषं पूर्ववदेव हि ॥ ६७ ॥
षडंशं वाऽथ तन्नालदीर्घं शेषं तु प्रागिव ।
एवमष्टविधं ख्यातं नालायामं द्विजोत्तम ॥ ६८ ॥
अग्राकारेऽब्जमुकुलाद्भानुसंख्या तु सुव्रत ।
यथेष्टनालं कर्तव्यं वसुसंख्या तु देशिकः ॥ ६९ ॥
दृढसूत्रं प्रकर्तव्यं लिङ्गे पूक्तप्रमाणतः ।
स्थापयेत्तु ततो लिङ्गं प्रागग्रं दारुविष्टरे ॥ ७० ॥
लक्षयेत्पिण्डिकावक्त्रं लिङ्गं सौम्ये निधापयेत् ।
स्थापितः कलशैः स्थाप्य लिङ्गपीठे हृदा बुधः ॥ ७१ ॥
गन्धोदकैः [स्तु सं]स्नाप्य गन्धपुष्पादिभिर्यजेत् ।
लम्बकूर्चसमायुक्तं सर्वालंकारसंयुतम् ॥ ७२ ॥
र(थे वा शि)बिकायां वा ग्रामं कृत्वा प्रदक्षिणम् ।
ततो जलाशयं प्राप्य जलाधिवासनं कुरु ॥ ७३ ॥
लक्षणोद्धारमाख्यातं प्रतिमालक्षणं शृणु ॥ ७४ ॥

इति काश्यपशिल्पे पीठलक्षणोद्धारो नामैकोनषष्टितमः पटलः ।

॥ अथ षष्टितमः पटलः ॥

अथ शैवादनन्तरं [स्याद्]विष्णुस्थापने विधिः ।
नगरे पश्चिमे वाऽपि मध्ये वा उत्तमोत्तमम् ॥ १ ॥
मध्यादिकलिकान्तं वा अवतारं तु शिक्षितम् ।
तत्पदे वास्तुदेवांश्च स्थापयेच्छिल्पिकोत्तमः ॥ २ ॥
खगं तु विष्णुपुरतो विष्णुकुञ्जमथापि वा ।
अञ्जलिं हस्तसंयुक्तं पूर्वे वा अग्रतस्तथा ॥ ३ ॥
आलयेऽर[ण्यके] वाऽपि तटाके पुण्यतीर्थके ।
ग्रामे वा वास्तुमध्ये वा भवेत्पूर्व उदङ्मुखे ॥ ४ ॥
वरुणे वैश्यभूमिं च यममिन्द्रं तु स्थापयेत् ।
पिशाना(चा)ग्नौ पदे स्थाप्य नैर्ऋतिं वायुमर्चयेत् ॥ ५ ॥
अथ वक्ष्ये विशेषेण सकलस्थानमुत्तमम् ।
शांकरे नृत्तमूर्तिस्तु आग्नेय्यां वृषवाहनम् ॥ ६ ॥
उमास्कन्द[यु]तं विप्र नैर्ऋत्यां परिकल्पयेत् ।
कङ्कालं वायुदिग्भागे भिक्षाटनं जयान्तिके ॥ ७ ॥
सुखासनं तु सत्यांशे विध्यंशे त्रिपुरान्तकम् ।
सुग्रीवे हरिरर्धे स्याद्गन्धर्वे चन्द्रशेखरम् ॥ ८ ॥
शेषांशं..... मुख्ये कालारिमूर्तिकम् । (?)
उदिते त्वर्धनारी स्यादैन्द्रे कल्याणसंयुतम् ॥ ९ ॥
क्षेत्रपालस्तु पर्जन्ये याम्ये वा दक्षिणेश्वरम् ।
वारुण्ये लिङ्गमुद्भूतं सौम्ये तु गजहारिणम् ॥ १० ॥
इत्यूर्ध्वमालयं प्रोक्तमन्तरालस्य कल्पयेत् ।
मूलमध्ये तु संवीक्ष्य सकलं स्थापनं कुरु ॥ ११ ॥
प्राकारेऽष्टचतुर्दिक्षु द्वारशोभादि कल्पयेत् ।
प्राकारान्ताति(नि) मध्ये च दीर्घमध्ये च वेशनम् ॥ १२ ॥
अथवा हर्म्यस्य मध्येन द्व्येकमंशकम् ।(?)
प्रधानमारभेकं वा त्वग्रे वाचालकं द्विज ॥ १३ ॥

इति काश्यपशिल्पे सकलस्थापनविधिर्नाम षष्टितमः पटलः ।

॥ अथैकषष्टितमः पटलः ॥

अथ वक्ष्ये विशेषेण सुखासनविधिं परम् ।
आसनं राजसं भावं भद्रपीठं [सुखा]सनम् ॥ १ ॥
वामाङ्घ्रिश्छादयेत्पीठे दक्षिणाङ्घ्रिस्तु लम्बयेत् ।
ऊर्ध्वभागोपरिष्टात्तु सार्धवेदाङ्गुलाधिकम् ॥ २ ॥
स्फिक्पिण्डमानमेतद्धि आसीनोर्ध्वे विशेषतः ।
आसने पूर्वकेशान्तं जान्वोर्बाह्यावसानकम् ॥ ३ ॥
जानूर्ध्वं पूर्वकेशान्तं जानोर्बा(नुबा)हुग्रीवास्यकम् ।
परहस्तमणिबन्धं मध्यमं च समं भवेत् ॥ ४ ॥
आसीनेन स्वसूत्रेऽस्ति पूर्वसूत्रेऽधुना शृणु ।
मौलिमध्यं तु नासाग्रात्स्तनाभं नाभिमध्यमम् ॥ ५ ॥
वामाङ्घ्रिगुल्फमध्ये तु ब्रह्मसूत्रं प्रलम्बयेत् ।
सूत्राद्दक्षिणजान्वन्तमेकत्रिंशाङ्गुलं भवेत् ॥ ६ ॥
अथवा त्रिंशदङ्गुल्य एकोनत्रिंशतोऽपि वा ।
सूत्रात्तदङ्घ्रिनलकाद्वाऽन्तरं द्वादशाङ्गुलम् ॥ ७ ॥
त्रयोदशाङ्गुलं वाऽथ दशाङ्गुलमथापि वा ।
पीठं नादं प्रपार्ष्ण्योस्तु नीत्रं द्वित्र्यङ्गुलं तु वा ॥ ८ ॥
तत्सूत्रान्मथये(ध्यमे)हस्ते मध्यरेखावसानकम् ।
चतुर्दशाङ्गुलं प्रोक्तमन्तरं तु द्विजोत्तम ॥
ऊरोर्द्वे मणिबन्धान्तं नीत्रं द्वित्र्यङ्गुलं तु वा ॥ ९ ॥
कटकं सिंहकर्णं वा तत्रस्थं प्रविधीयते ।
तर्जन्यादिकनिष्ठान्तं तत्राङ्गुल्यस्तु वक्रगाः ॥ १० ॥
ईषद्वक्रं तदङ्गुष्ठमेवं स्यात्कटकाकृति ।
मध्यामध्यतलान्तं तु अर्धमर्धं त्वनामिका ॥ ११ ॥
वक्रं शेषाङ्गुलं प्राग्वत्सिंहकर्णमिदं परम् ।
हिक्कासूत्रं समं कुर्यात्कर्तव्याग्रौ करे परे ॥ १२ ॥
वक्रावनामिकाङ्गुष्ठौ तलमध्यावसानकौ ।
किंचिद्वक्रा कनिष्ठाऽपि शेषौ द्वौ तु ऋजुक्रियौ ॥ १३ ॥

कर्तव्याऽऽकृतिरेवं स्याल्लक्षणाञ्चितसुन्दरम् ।
कूर्परं श्रोणिपार्श्वे तु पञ्चषट्सप्तमाकृतिम् ॥ १४ ॥
कुक्षिमध्ये च नासाग्रे पूर्वसूत्रं तु संस्पृशेत् ।
मेढ्रमूलं तु वामाङ्घ्रि गुल्फमध्यं रसाङ्गुलम् ॥ १५ ॥
अथवा सप्तमात्रं तु पञ्चमात्रमथापि वा ।
नाभिमध्यं तु वामाङ्घ्रिनलिकाग्रं चतुर्दश ॥ १६ ॥
त्रयोदशाङ्गुलं वाऽथ भान्वङ्गुलमथापि वा ।
मौल्यग्रमध्यमात्सूत्रं द्व्यन्तरं मनुमातृ(त्र)कम् ॥ १७ ॥
सार्धत्रयोदशं वा [त्र]योदशाङ्गुलमेव वा ।
ऋजो(जु)गतं सुखासीनं प्रवालसदृशप्रभम् ॥ १८ ॥
त्रिनेत्रं सुष्ठुवदनं संपन्नं राजसं गुणम् ।
व्याघ्राजिनाम्बरोपेतं दुकूलवसनान्वितम् ॥ १९ ॥
कर्तरीपरहस्तौ द्वौ बाह्ये वाऽभ्यन्तरासनम् ।
दक्षिणे परशुं वामे कृष्णं चान्यवरद्वयम् ॥ २० ॥
अभयं दक्षिणं वामं कटकं सिंहकर्णवत् ।
वामे कर्णविशेषेण शङ्कपात्रमथापयेत् ॥ २१ ॥
त्रिचतुष्पञ्चमात्रं वा पञ्चमण्डलविस्तृतम् ।
कर्णनालघनं चैव त्रिगुणं पत्रविस्तृतम् ॥ २२ ॥
य(ए)वं पत्रघनं प्रोक्तं श्वेतभान्वादिमार्दवम् ।
दक्षिणे कर्णमेवं तु कुण्डलं सिंह एव वा ॥ २३ ॥
कुण्डलं व्यासतुङ्गं तु त्रिचतुष्पञ्चमात्रकम् ।
युक्त्या तत्कुण्डलं कृत्वा कर्णस्कन्धोपरि न्यसेत् ॥ २४ ॥
अथवा कर्णयोर्विप्र वृत्तकुण्डलकं न्यसेत् ।
वृत्तकुण्डलविस्तारमष्टादशयवं भवेत् ॥ २५ ॥
वेदाङ्गुलं तु तत्तुङ्गं कुम्भाब्जं मुकुलोदयम् ।
क(अ)न्यद्वा सुन्दरोपेतं कल्पयेद्वृत्तकुण्डलम् ॥ २६ ॥
जटामुकुटसंयुक्तं युग्मसंख्याजटान्वितम् ।
मुकुटस्योदयं विप्र चतुर्विंशाङ्गुलं भवेत् ॥ २७ ॥
त्रिसप्ताङ्गुलतुङ्गं वा द्विर्नवाङ्गुलमेव वा ।
केशांश्च मुकुटं चंतु(चापि) ललाटे पट्टसंयुतम् ॥ २८ ॥

मुखान्तसदृशं विप्र मुकुटमूलविशालकम् ।
तत्सप्ताष्टनवांशेन हीनमग्रविशालकम् ॥ २९ ॥
चतुष्पूरिमसंयुक्तं भान्वंशं पूरिमोदयम् ।
सव्ये नागार्कपुष्पैश्च वामे त्वर्धशशिं न्यसेत् ॥ ३० ॥
दक्षिणोत्थं शिवार्धं वा वामे नागार्कपुष्पधृत् ।
कटिसूत्रत्रिसंख्यादि सूत्रं प्रति यवं स्वनम् ॥ ३१ ॥
कटिसार्धोपरिष्टात्तु कटिसूत्रं तु बन्धयेत् ।
पञ्चषट्सप्तमात्रं वा कीर्तिमाननविस्तृतम् ॥ ३२ ॥
तद्विस्तारसमोत्तुङ्गं मेद्रोर्ध्वं परिकल्पयेत् ।
कटिसूत्रादूरुदाममूरुत्रयावसानकम् ॥ ३३ ॥
मुक्तादामोरुदाम स्यादन्तरे रत्नसंयुतम् ।
कटिसूत्रं समाख्यातं कटकं वलयान्वितम् ॥ ३४ ॥
कटकं वलयोपेतं प्रकोष्ठं द्विजसत्तम ।
कनिष्ठाङ्गुलिपरीणाहं वलयं मार्दवं हितम् ॥ ३५ ॥
अथवा वलयस्यैव घनं द्वित्रियवं तु वा ।
पराजितं तु वलयं युग्मं प्रकेे(कोष्ठे) निधापयेत् ॥ ३६ ॥
मार्दवं रत्नबन्धं वा कृत्वा तु वलये द्विज ।
केयूरं कूर्परे न्यस्य मुकुटं च घनान्वितम् ॥ ३७ ॥
एकाकारं तु केयूरं वाऽष्टपत्राब्जसंयुतम् ।
नानारत्नसमायुक्तं शैलवाहमथापि वा ॥ ३८ ॥
पत्रपूरिमसंयुक्तं बाहुमध्ये द्विजोत्तम ।
पत्रपूरिमनालं तु केयूरसदृशं घनम् ॥ ३९ ॥
तत्पूरिमादधोनालं बाहुद्वित्रिपरं तु वा ।
त्रिचतुष्पञ्चमात्रं वा पत्रपूरिमविस्तृतम् ॥ ४० ॥
तद्व्यासार्ध[मात्र]तुङ्गं पादोनं द्विगुणं तु वा ।
द्विगुणं वाऽपि तुङ्गं तु तद्बाहुवलयं भवेत् ॥ ४१ ॥
मध्याङ्गुल्या विना शेषाः स्वाङ्गुलीमुद्रिकान्विताः ।
मुद्रिकामूलपर्वस्था वृत्ताया वसनान्वितम् ॥ ४२ ॥
उदरं स(ब)न्धं विशालं चैकद्वित्रियुगं तु वा ।
यवं वा द्वियवं वाऽथ उदरं बन्धनं भवेत् ॥ ४३ ॥

नानालंकारसंयुक्तं नानारत्नैर्विचित्रितम् ।
नाभेरूर्ध्वे गुणांशं तु नीत्वा वा दारु वर्धयेत् ॥ ४४ ॥
पादयोर्मध्यमादन्याः स्वङ्गुल्यो वलयान्विताः ।
का(जा)लयवद्वयघनं स्वङ्गुलानां तु मध्यगम् ॥ ४५ ॥
पादौ जालकयुक्तौ[हि]गुल्फजस्थौ द्विजोत्तम ।
जालकाबन्धसूत्रं तु यवद्वयघनान्वितम् ॥ ४६ ॥
तत्सूत्रजालनालं स्यान्त्रिपञ्चयवमानकम् ।
त्रियवं जालकानालं शेषं वै जालकोदयम् ॥ ४७ ॥
तदुन्नतसमं व्यासं यवमानं च तत्समम् ।
शेषं हीनं घनं गाढं यस्य यच्च यथोचितम् ॥ ४८ ॥
गाढावृतं तु युक्तं स्यादन्तःपाषाणसंयुतम् ।
घनं पाषाणहीनं तु गाढनीव्रं तदोच्यते ॥ ४९ ॥
परशोर्हरिणीदीर्घं भान्वङ्गुलमुदाहृतम् ।
परशुं हरिणीं चैव युक्त्या वा द्वयमाचरेत् ॥ ५० ॥
यज्ञोपवीतसंयुक्तं यवाष्टांशं घनं भवेत् ।
उपवीतद्विसूत्रं स्यादुपवीतसमं घनम् ॥ ५१ ॥
वासः स्कन्धोपरि न्यस्य नाभ्यधस्ताङ्गुलं भवेत् ।
यज्ञोपवीतसूत्रं स्यान्नाभेर्दक्षिणपार्श्वके ॥ ५२ ॥
अपरे वाममाश्रित्य यज्ञसूत्रं निधापयेत् ।
ऊरुसूत्रं समालम्ब्य स्तनादष्टाङ्गुलोत्तरम् ॥ ५३ ॥
यज्ञोपवीतमेवं स्याच्छ्रुवीरमथ शृणु ।
यज्ञोपवीतं स्याद्विप्र स्कन्द(न्ध)योरुभयोरपि ॥ ५४ ॥
पार्श्वयोश्चैव श्रोण्यर्धे न्यस्य स्थानान्तरैकवत् ।
[ग्रीवा]हारं विजानीयाद्विक्काधस्तात्षडङ्गुलम् ॥ ५५ ॥
लम्ब्ये वेदाङ्गुलं तारं यवत्रयघनान्वितम् ।
नानारत्नैर्हिरण्यैश्च हारं कृत्वा तु सुन्दरम् ॥ ५६ ॥
हिक्कासूत्रोपरिष्टात्तु उपग्रीवं च बन्धयेत् ।
रुद्राक्षं व्राऽथ रत्नं वा हेमसूत्रमथापि वा ॥ ५७ ॥

उपग्रीवं समाख्यातं नानापुष्पविराजितम् ।
सर्वाङ्गसुन्दरं देवं शेषं युक्त्या समाचरेत् ॥ ५८ ॥
एवं सुखासनं प्रोक्तमुमास्कन्दयुतं तथा ॥ ५९ ॥

इति काश्यपशिल्पे सुखासनं नामैकषष्टितमः पटलः ।

॥ अथ द्विषष्टितमः पटलः ।

अथ वक्ष्ये विशेषेण सोमकन्देश्वरं द्विज ।
सुखासनं यथा प्रोक्तं तथेदं च विधीयते ॥ १ ॥
देवस्य वामपार्श्वे तु पार्वतीं च सुखासनाम् ।
चय(रच)येद्दक्षिणे पादे वामपादं प्रलम्बयेत् ॥ २ ॥
आसनस्योपरिष्टात्तु स्विष्टीनां चतुरङ्गुलम् ।
ऊर्ध्वकायसमायुक्तं मानस्योपरि कल्पयेत् ॥ ३ ॥
किंचिद्देव्याश्रितं वक्त्रं लक्षणं भागसंयुतम् ।
वरदं वामहस्ते तु उत्पलं दक्षिणे करे ॥ ४ ॥
किंचिद्भुजौ यथापूर्वौ वामहस्तौ तथोर्ध्वके ।
वरदं चामिति(भयं) ख्यातं पृथक्सिंहस्य कर्णवत् ॥ ५ ॥
वामांके स्थापयेद्देवीं सर्वाभरणभूषिताम् ।
रक्ताम्बरधरां देवीं छत्रवीरसमन्विताम् ॥ ६ ॥
अथवाऽन्यप्रकारेण देवीभङ्गं वदामि दम्(ते) ।
वामोरु(रौ)बाह्यपीठे तु वामहस्ततलं न्यसेत् ॥ ७ ॥
पश्चादुत्पलसंयुक्तं दक्षिणं हस्तमुच्यते ।
पीठं तु दक्षिणे जानुं किंचिदुच्छ्रितसंयुतम् ॥ ८ ॥
त्रिचतुष्पञ्चमात्रं वा पीठजान्वन्तरं भवेत् ।
षट्सप्ताष्टाङ्गुलं वाऽथ पीठं जान्वन्तरं भवेत् ॥ ९ ॥
एवं द्विविधमित्याहुर्देवीभङ्गं विधीयते ।
श्रीमान्मेनु(मता चो)क्तमार्गेण देवीमानं तु गृह्यताम् ॥ १०

स्थानकानां तु देवेश देवि चास्थानकं भवेत् ।
आसने त्वासनं ख्यातं विपरीतं विपत्करम् ॥ ११ ॥
देवीलक्षणमेवं वा स्कन्दलक्षणमुच्यते ।
देवीदेवेशयोर्मध्ये स्थापयेत्स्कन्दमूर्तिकाम् ॥ १२ ॥
देव्या हिक्कावसानं तु स्कन्दमानं तदुत्तरम् ।
स्तनाक्षान्तं कनिष्ठं स्यात्त्रयोर्मध्येऽष्टभाजिते ॥ १३ ॥
नवधा स्कन्दमानं तु उक्तमानं त्रयं त्रयम् ॥
जात्या व्यासयुतं वाऽपि हीनं वाऽपि प्रकल्पयेत् ॥ १४ ॥
सवेदरसधर्मांशं तन्मानं तु विभाजिते ।
एकांशमङ्गुलं ख्यातं तदष्टांशं यवं भवेत् ॥ १५ ॥
एकाङ्गुलं शिरोमानं केशान्तं चैव तत्समम् ।
त्रिभागं नेत्रसूत्रान्तं पुटान्तं चैव तत्समम् ॥ १६ ॥
गुणांशं हनुसीमान्तं ग्रीवोच्चं तु द्वयाङ्गुलम् ।
हिक्कासूत्रस्तता(ना)न्तं तु नवभागमुदाहृतम् ॥ १७ ॥
तस्मानिन्मि(म्ना)भ्य)वसानं तु वस्वङ्गुलमुदाहृतम् ।
नाभेस्तु मेढ्रमूलान्तं सप्तमात्रमिति स्मृतम् ॥ १८ ॥
भान्वंशमूरुदीर्घं स्याज्जानु द्व्यङ्गुलकं भवेत् ।
जङ्घा चोरुसमं तुल्यं द्व्यंशं पादतलोन्नतम् ॥ १९ ॥
दशांशांघ्रीतलायामं बाहुदीर्घं चतुर्दश ।
प्रकोष्ठायामं दशांशं तलं वेदाङ्गुलं भवेत् ॥ २० ॥
युगांशं मध्यमाङ्गुल्यं सार्धाग्न्यंशमनामिका ।
तत्समं तर्जनीदीर्घं कनिष्ठायां गुणाङ्गुलम् ॥ २१ ॥
अङ्गुष्ठाया(मम)ग्न्यंशं युगांशं तलविस्तृतम् ।
प्रकोष्ठाग्रं गुणांशं तु तन्मूलं चतुरङ्गुलम् ॥ २२ ॥
भूतांशं बाहुमूलं स्याद्विस्तारं द्विजसत्तम ।
सार्धाष्टांशं मुखव्यासं सप्तांशं कर्णविस्तृतम् ॥ २३ ॥
कक्षयोरन्तरव्यासं त्रयोदशाङ्गुलं भवेत् ।
पञ्चांशं हृदयविस्तारं रुद्रांशं मध्यविस्तृतम् ॥ २४ ॥

श्रोणिस्थाने तु भान्वंशं कटिस्थाने त्रयोदश ।
ऊरुमूलविशालं तु वस्वङ्गुलमुदाहृतम् ॥ २५ ॥
षडङ्गुलं जानुविस्तारं(वृत्तं) जङ्घामूलं युगाङ्गुलम् ।
गुणांशं नलकं तारं षडंशं तलविस्तृतम् ॥ २६ ॥
पार्ष्णिन्यासं युगांशं वा शेषं युक्त्या तु कल्पयेत् ।
केशान्ते नासिकोपेतं करण्डमुकुटान्वितम् ॥ २७ ॥
उभयोर्हस्तयोः पुष्पं वामो वरद एव वा ।
कटकं वाऽथ तद्धस्तं सिंहकण्ठमथापि वा ॥ २८ ॥
दक्षिणे पुष्पहस्तं वा कपिण्डमुभयं तु वा ।
कटिसूत्रधृतं नग्नं छन्नवीरसमन्वितम् ॥ २९ ॥
मृदुकचं उपग्रीवं बालभूषणभूषितम् ।
आसीनं वा स्थितं वाऽथ नृत्तं वा स्कन्दमाचरेत् ॥ ३० ॥
आसीनौ चरणौ द्वौ द्वौ विष्टरोपरि शाययेत् ।
स्थितौ पादतलौ द्वौ तु स्थलभङ्गमिति स्थितौ ॥ ३१ ॥
चरणौ कुञ्चितोभौ तु युक्त्या जानु(न्वो)श्च नीव्रकम् ।
द्विपादौ कुञ्चितौ किंचित् किंचद्भमन एव वा ॥
नृत्तं चेत्स्वस्तिकः सव्यपादं वक्रसमन्वितम् ।
उद्धृत्य वामपादं तु पीठोत्सेधं कलावधि ॥ ३३ ॥
षण्मात्रपञ्चमात्रान्तं पादमुद्धारतो द्विज ।
फलेनावरदं वामं हस्तमन्यं तु सूचितम् ॥ ३४ ॥
अथवा वामहस्तं तु फलं न्यस्त्वा(स्य)प्रसाधयेत् ।
हिक्कासूत्रे समे धृत्वा कर्णबन्धोर्ध्वसीमकम् ॥ ३५ ॥
द्वयन्तरं लम्बसूत्रं तु नृत्तमूर्तिवदाचरेत् ।
उमास्कन्दयुतं प्रोक्तं शृणु चन्द्रधरादिधृत् ॥ ३६ ॥

इति काश्यपशिल्पे द्विषष्टितमः पटलः ।

॥ अथ त्रिषष्टितमः पटलः ॥

अथ वक्ष्ये विशेषेण चन्द्रशेखरमूर्तिना(काम्) ।
केवलं गौरिसहितमालिङ्गं च त्रिधा भवेत् ॥ १ ॥
केवलं गौरिसहितं सहजं गौरिसंयुतम् ।
आलिङ्ग्य चैकहस्तेन देविदेवौ परस्परम् ॥ २ ॥
कृतमालिङ्गनाख्यातमेवं त्रिविधमूह्यताम् ।
केवलं समपादं तु स्थानकं सहितं भवेत् ॥ ३ ॥
समभङ्गं त्रिभङ्गं स्यादभङ्गं चन्द्रशेखरम् ।
केवलं मूर्तिदं ख्यातं सहितमभयप्रदम् ॥ ४ ॥
तेष्वादौ समपादं तु स्थानकं सहितं तथा ।
बिम्बमानोदयं सर्वं प्रागेव परिकीर्तितम् ॥ ५ ॥
लम्बमानोपमानं च ह्यधुना वक्ष्यते क्रमात् ।
प्रलम्बफलकायामं चत्वारि चाष्टमात्रकम् ॥ ६ ॥
अष्टादशाङ्गुलं तारं सार्धाद्विद्व्यङ्गुलं घनम् ।
चतुष्पादसमायुक्तं पादोच्चं प्रतिमोदयम् ॥ ७ ॥
रि(ऋ)क्षाङ्गुलसमायुक्तं स्थापयेत्समभूतले ।
समसूत्रं विनिश्चित्य प्रलम्बफलकोपरि ॥ ८ ॥
पूर्वेऽपरे च पार्श्वे च मानसूत्रं प्रलम्बयेत् ।
अन्तरे सुषिरं कल्प्यं सूत्रान्त्यं लम्बयेत्तदा ॥ ९ ॥
तत्सूत्रं तु गुणं बिम्बं कारयेद्द्विजसत्तम ।
पूर्वे च पातयेत्पृष्ठे कायमध्ये च लम्बयेत् ॥ १० ॥
एतानि पञ्च सूत्राणि ब्रह्मसूत्रमुदाहृतम् ।
कक्षान्तरे मुखान्ते च द्वे द्वे सूत्रे प्रलम्बयेत् ॥ ११ ॥
एवं हि नवसूत्राढ्यं स्थानकं चाऽऽसनं तथा ।
मुकुटं मध्यमं चैव ललाटस्य तु मध्यमे ॥ १२ ॥
नासाग्रमध्यमं चैव हनोर्मध्यं तथैव च ।
हिक्कामध्यं च हृदयं मध्ये नाभिश्च मध्यमे ॥ १३ ॥
लिङ्गमध्ये च मध्ये तु पादयोश्च तलान्तरे ।
लम्बयेत्पूर्वसूत्रं स्यादपरस्तमथोच्यते ॥ १४ ॥

मुकुटस्य मध्यमाद्भिम कुकाटिकास्तु मध्यमे ।
ककुन्मध्यत्वमध्ये तु स्फिक्पिण्डान्तरके तथा ॥ १५ ॥
ऊरुजश्रो(ङ्घ)र्ध्वशङ्का(जङ्घा)यां पाष्ण्योश्च द्वयन्तरे तथा।
एवं स्याल्लम्बयेत्सूत्रमपरस्यात्रमेव हि ॥ १६ ॥
पार्श्वयोः कर्णवल्यन्तं ग्रीवामध्ये तथैव च ।
बाहौ च मध्यमालम्ब्य गुल्फमध्ये तु लम्बयेत् ॥ १७ ॥
देहमध्ये गतेनैव पञ्चसूत्रं प्रकल्पयेत् ।
श्रोत्राभ्यन्तर्गतं सूत्रं स्तनचूचुकमध्यमे ॥ १८ ॥
पादोरुमध्यदेशेऽन्त्ये मध्यमे तु प्रलम्बयेत् ।
पूर्वसूत्रं तु मौल्यग्रं निम्नं द्वादशमातृ(त्र)कम् ॥ १९ ॥
पूर्वसूत्रं मौल्यमग्रं षण्मात्रं तु प्रमुच्यते ।
पूर्वसूत्रं ललाटान्तं ह्यन्तरं द्वयङ्गुलं भवेत् ॥ २० ॥
अपरसूत्रं शिरःपृष्ठे पादोनान्तं युगाङ्गुलम् ।
पूर्वसूत्रं तु मन्म(न्व)न्तं सयवं द्वयंशमिष्यते ॥ २१ ॥
कुकाटिकापरं सूत्रं यवोनं द्वयन्तरान्तरे ।
पूर्वसूत्रं तु हिक्कान्तं द्वयन्तर तु रसाङ्गुलम् ॥ २२ ॥
ककुदोऽपरपृष्ठे तु षोडशं तु यवान्तरम् ।
उरसः पूर्वसूत्रं तु द्वयन्तरं तु द्विमातृ(त्र)कम् ॥ २३ ॥
ककुन्मध्यात्परं सूत्रं द्वयन्तरं त्वणुमात्रकम् ।
मध्योदरं न्यसेत्पूर्वं सूत्रं वै तत्समं परे ॥ २४ ॥
वशं निम्नपरं सूत्रं पादोनाष्टार्हकं परम् ।
प्राक्सूत्राभिमध्ये तु द्वयन्तरं सार्धमातृ(त्र)कम् ॥ २५ ॥
नाभिसूत्रात्परे पृष्ठे सार्धपक्षाङ्गुलं भवेत् ।
प्राक्सूत्रान्मेढ्रमूलान्तं गुणाङ्गुलमुदाहृतम् ॥ २६ ॥
तत्समं तु परे सूत्रे द्वयन्तरं तु द्विमात्रकम् ।
ऊरुमध्ये तु पुरतो जटामध्यं तथैव च ॥ २७ ॥
जङ्घामध्ये च नलिकामध्ये चैव पुरोगतम् ।
तिर्यक्सूत्रं तु संकल्प्य द्वयन्तरं तु प्रमीयते ॥ २८ ॥
तत्तत्स्थाने पुरे चैव तिर्यक्सूत्रं प्रकल्पयेत् ।
ऊरुमध्याङ्गसूत्रं तु पूर्वसूत्रं तु द्वयङ्गुलम् ॥ २९ ॥

तत्रैवापरसूत्रं तु षड्विंशतियवं भवेत् ।
जानुबध्नाङ्गसूत्रान्तं पूर्वसूत्रं रसाङ्गुलम् ॥ ३० ॥
तत्रैवापरसूत्रं तु पादोनं पञ्चमात्रकम् ।
जङ्घामध्यं तु प्राक्सूत्रं वस्वङ्गुलमुदाहृतम् ॥ ३१ ॥
तत्रैवापरसूत्रान्तं षड्विंशतियवं भवेत् ।
प्राक्सूत्राज्जालकामध्यं सार्धं वस्वङ्गुलं भवेत् ॥ ३२ ॥
नालकापरसूत्रान्तं पादोनं पञ्चमात्रकम् ।
द्व्यर्धषडङ्गुष्ठयोरग्रं पूर्वसूत्रं विशेषतः ॥ ३३ ॥
तत्सूत्रपार्ष्णिपर्यन्तं सार्धमन्विष्यमिष्यते ।
प्राक्सूत्रकायमध्यस्थं सूत्रं सार्धं नवाङ्गुलम् ॥ ३४ ॥
कायमध्यस्थसूत्रं तु शिरः पृष्ठयुगान्तकम् ।
तत्कायमध्यसूत्रं तु ककुत्पञ्चाङ्गुलार्धकम् ॥ ३५ ॥
उरोमध्यमदेशे तु पृष्ठं सार्धषडङ्गुलम् ।
सूत्रमध्योदरे पृष्ठे सार्धवेदाङ्गुलं भवेत् ॥ ३६ ॥
नाभिप्रदेशपृष्ठे तु सार्धभूताङ्गुलं भवेत् ।
कटि(टि)नीत्रं षडंशं स्यात्सार्धाष्टांशं स्रि(स्फि)काग्रकम् ॥ ३७ ॥
ऊरुमध्योत्पलं वेदो जानुपृष्ठं तथैव च ।
जङ्घामध्ये गुणांशं तु नलिका द्व्यङ्गुला भवेत् ॥ ३८ ॥
गुल्फौ हि(ल्फयोर्हि) युगाङ्गुल्यं परसूत्रे बहिर्गतम् ।
पार्श्वसूत्रमधस्तं(स्तात्तु) समसूत्रं तु संस्थितम् ॥ ३९ ॥
पार्श्वसूत्रात्पुरो बाहुपर्यन्तं चतुरङ्गुलम् ।
तत्सूत्रादपरे बाहुपर्यन्तावं(वं)समातृ(त्र)कम् ॥ ४० ॥
पूर्वाकारौ तु मध्ये च कूर्परं तु वलग्नकौ ।
तत्करे बाहुविस्तारौ चतुरङ्गुलमिष्यते ॥ ४१ ॥
कर्तरीपरहस्ताग्रौ हिक्कासूत्रं समं भवेत् ।
मध्याङ्गुलाग्रमुभयोः स्तनचूचुकसंभवेत् ॥ ४२ ॥
अभयं दक्षिणे हस्ते वरदं वामहस्तकम् ।
प्राक्सूत्रमध्ये हस्ते मध्यं पञ्चदशाङ्गुलम् ॥ ४३ ॥

वरदं वामहस्तं तु अधोमुखं प्रकल्पयेत् ।
तलमूलं कटीपृष्ठे मेढ्राग्रं तु तत्क(तः प)रे ॥ ४४ ॥
मध्याङ्गुल्यं [स]मालम्ब्य ऊरुनीव्रं युगाङ्गुलम् ।
ऊरुवक्त्रं तु वरदं पृष्ठं नाभिसमोद्धृतम् ॥ ४५ ॥
वरदं हस्ततलमध्ये पूर्वसूत्रं तलाङ्गुलम् ।
कर्तरीमणिबन्धं तु बाहुबाह्यमुखं भवेत् ॥ ४६ ॥
अथवा रुद्रभागं तु दशाङ्गुलमथापि वा ।
को(कू)र्परं पूर्वसूत्रान्तं नीव्रं सप्तदशाङ्गुलम् ॥ ४७ ॥
जङ्घयोरेकोनविंशदं ऊ(मू)रुमूलं द्वयोन्नतम् ।
गुल्फयोरन्तरं चैव एकाङ्गुलमुदाहृतम् ॥ ४८ ॥
ऊरोर्मध्यान्तरङ्गुल्यं विंशाद्यं वा उदाहृतम् ।
जान्वन्तरं चतुर्मात्रं जङ्घयोः पञ्चमातृ(त्र)कम् ॥ ४९ ॥
तलोरुं(रू) तु रसांशं तु वेदांशं गुल्फयोर्भवेद् ।
पादाङ्गुष्ठद्वयोरन्तं द्व्यन्तरं वसुमात्रकम् ॥ ५० ॥
आर्जवं राजसं भावं कल्पयेद्वा द्विजोत्तम ।
कर्तरीपरहस्तौ द्वौ टङ्कं वै दक्षिणे करे ॥ ५१ ॥
हरिणी वामहस्ते तु टङ्कं कृत्वा बहिर्मुखम् ।
हरिणीबाह्यमूलं वा द्व्यन्तराननमेव च ॥ ५२ ॥
जटामुकुटसंयुक्तं दक्षिणे चन्द्रशेखरम् ।
वामेन्दुशेखरं वाऽथ प्रवालसदृशप्रभम् ॥ ५३ ॥
त्रिनेत्रं सौम्यवदनं सर्वाभरणभूषितम् ।
पीताम्बरधरं देवं वस्त्राग्रौ नलकान्तकौ ॥ ५४ ॥
उभयोः पार्श्वयोरेवमम्बरं चोरुमध्यमम् ।
केवलं चैवमाख्यातं वामे गौरीसमायुतम् ॥ ५५ ॥
भिन्नपीठैकपीठं वा भवेद्वा भङ्गसंयुतम् ।
तद्वौरीसंयुतं चोरुभिन्नपीठैकमेव वा ॥ ५६ ॥
तदेव भङ्गसंयुक्तं देवदेव्यौ परस्परम् ।
देवो वरदहस्तेन देवीं वै त्वपरांश्रिताम् ॥ ५७ ॥

स्थानमध्यान्तरे वामपार्श्वमालिङ्गनं कुरु ।
पार्श्वसूत्रात्परो वाऽथ बाहुमालिङ्गनं तु वा ॥ ५८ ॥
दोवि(वी)दक्षिणहस्तेन शंभोर्दक्षिणपार्श्वतः ।
कटिसूत्रोपरिष्वाथ(ष्टात्तु) पुष्पं वामकरे धृतः ॥ ५९ ॥
अथवा पार्श्वदेवेशो व्योम्नस्तु दक्षिणे करे ।
करोत्पलं (व)हन्त्याश्च वामहस्तं प्रलम्बयेत् ॥ ६० ॥
एवमालिङ्गमूर्तिश्च त्रिधामान्ये(नेन)कल्पयेत् ।
सर्वाभरणसंयुक्तं प्रभामण्डलसंयुतम् ॥ ६१ ॥
चन्द्रशेखरमाख्यातं वृषारूढमथ शृणु ॥ ६२ ॥

इति काश्यपशिल्पे चन्द्रशेखरमूर्तिलक्षणं नाम त्रिषष्टितमः पटलः ।

अथ चतुःषष्टितमः पटलः ।

वृषवाहनमूर्तेस्तु लक्षणं वक्ष्यतेऽधुना ।
समभङ्गं त्रिभङ्गं वा कल्पयेत्कल्पवित्तमः ॥ १ ॥
दक्षिणं स्वस्तिकं पादं वामपादं तु कुञ्चितम् ।
उष्णीषान्मध्यमाद्भामे ललाटं मध्यवामके ॥ २ ॥
वामनेत्रावसाने तु वामनासापुटान्तके ।
दक्षिणे स्तनपीठं स्याद्वामनाभिश्च मध्यमे ॥ ३ ॥
वामोरुमध्यपार्ष्ण्योश्च मध्यसूत्रं प्रलम्बयेत् ।
एवं तु समभङ्गं स्यात् नतमानं युगाङ्गुलम् ॥ ४ ॥
मुखे पूर्ववदुद्दिष्टं दक्षिणे तु स्तने तथा ।
नाभेर्वामे गुणांशं तु वामोरुमध्यमे तथा ॥ ५ ॥
स्वसि(स्थि)ताङ्घ्रिस्तु गुल्फं स्यात्मध्ये सूत्रं प्रलम्बयेत् ।
अतिभङ्गमिति ख्यातं नतं पञ्चाङ्गुलं भवेत् ॥ ६ ॥
वृक्ष(ष)स्य मरतकोर्ध्वे तु न्यसेच्चै(च्च)वामको(कू)परम् ।
हिक्कासूत्रं तथा विप्र कलांशं वा नवाङ्गुलम् ॥ ७ ॥

वामकर्ण(कू)परं लम्बं स्यात्तस्मादास्तनसीमकम् ।
वृषभस्योच्चयं ख्यातं पादस्थानाहिताङ्गुलम् ॥ ८ ॥
वृषभोदयमाख्यातं वृषं लक्षणवत्कुरु ।
वृषमूर्ध्नि तु हस्ते तु मध्याङ्गुल्यग्रसीमकम् ॥ ९ ॥
नाभिसूत्रं समं कुर्यादङ्गुलं वा नताङ्गुलम् ।
(अध)स्तात्तलमध्ये तु पूर्वसूत्रं यवद्वयम् ॥ १० ॥
अधोमुखं प्रकर्तव्यं तदर्धं तु प्रसारयेत् ।
दक्षिणे पूर्वहस्ते तु पार्ष्णिं नाभेरधो बुधः ॥ ११ ॥
पक्षे षोडशमात्रं वा नतं तत्सिंहकर्णवत् ।
वक्त्रदण्डोत्थितं तस्मिन्कल्पयेत्तु चलाचलम् ॥ १२ ॥
स्थिताङ्घ्रिजानुरूर्ध्वासु हिक्कासूत्रं तु(स)मुन्नतम् ।
कनिष्ठाङ्गुलिपरीणाहमग्रं वक्त्रत्रयान्वितम् ॥ १३ ॥
लोहजं दारुजं वाऽथ वक्त्रदण्डैवमाचरेत् ।
अधस्तान्मणिबन्धस्तु ऊरुमूलं तदुत्तरम् ॥ १४ ॥
पञ्चषट्सप्तमात्रं वा वसुनन्दाङ्गुलं तु वा ।
जटामुकुटसंयुक्तं जटाभारस्तु लम्बितः ॥ १४ ॥
जयबन्धशिरो वाऽपि कर्तुरिच्छावशान्नयेत् ।
सर्वाभरणसंयुक्तं रक्ताभं रक्तवद्वृत(क्त्रक)म् ॥ १६ ॥
वामपार्श्वे उमादेवी दक्षिणे वा विशेषतः ।
स्वस्तिकं दक्षिणं पादं वामपादं तु कुञ्चितम् ॥ १७ ॥
उत्पलं दक्षिणे हस्ते वामहस्ते प्रसारितम् ।
क्षीमानेन विधानेन उमादेवीं च कारयेत् ॥ १८ ॥
वृषवाहनमाख्यातं नृत्तमूर्तिरथोपरि ॥ १९ ॥

इत्यंशुमद्भेदे काश्यपशिल्पे वृषवाहनमूर्तिलक्षणं नाम
चतुःषष्टितमः पटलः ।

॥ अथ पञ्चषष्टितमः पटलः ॥

अथ वक्ष्ये विशेषेण नृत्तमूर्तेस्तु लक्षणम् ।
उत्साहवर्धनार्थाय उद्भूता चर्ममुण्डिका ॥ १ ॥
रुरुण्डावदनं कृत्वा स्पिक्यात्पणनितं तथा ।
हिंसोत्सुकासना देवी तत्सुखासनवृद्धये ॥ २ ॥
तथा नृत्तं करिष्यति सर्वलोकहिताय वै ।
देवानां मूर्तिनाथाय राजराष्ट्रविवर्धनात् ॥ ३ ॥
नृत्तमष्टादशं ह्येव तेष्वादौ नवमुच्यते ।
प्रकृतौ विधिना ग्राह्यं बिम्बमानं द्विजोत्तम ॥ ४ ॥
उत्तमं दशतालेन सर्वाङ्गं परिकल्पयेत् ।
भानुरुद्रदशं चैव तुङ्गं नृत्तोन(न्न)तं भवेत् ॥ ५ ॥
उष्णीषान्मध्यमात्सव्ये ललाटं मध्यदक्षिणे ।
नीत्वा शिवाङ्गुलं सव्ये नेत्रान्ते च पुटान्तके ॥ ६ ॥
हनोः सर्वं तु हिक्कायां मध्ये नाभिं च मध्यमे ।
वामोर्वभ्यन्तरे लम्ब्य स्थिताङ्घ्री गुल्फमध्यमे ॥ ७ ॥
प्रभामण्डलमध्ये तु पूर्वसूत्रं तु लम्बयेत् ।
ललाटसूत्रनीत्रं तु युगार्धाङ्गुलमन्तरम् ॥ ८ ॥
गुल्फसूत्रान्तरे चैव द्वादशांशं विधीयते ।
हिक्कामध्यं तु सूत्रं तु सार्धसप्तनवाङ्गुलम् ॥ ९ ॥
मुकुटोव्य(द्व्ये)कपक्षाग्रं सूत्रान्तरं तथैव च ।
ऊर्ध्वकुक्षिं स्पृशेत्पूर्वं सूत्रमेवं प्रलम्बयेत् ॥ १० ॥
तत्सूत्राडोल(त्पर)बाबा(ह्व)ग्र मर्धाधिककलाङ्गुलम् ।
तस्मादपरबाह्वग्रं युगाङ्गुलमुदाहृतम् ॥ ११ ॥
तस्मादग्निकराग्रान्तं साष्टत्रिंशाङ्गुलं तु वा ।
चत्वारिंशतिमात्रं वा तस्मादधिगुणाङ्गुलम् ॥ १२ ॥
हिक्कासूत्रं समोद्धृत्य मध्यमे मध्यमाग्रकम् ।
तथास्ता(द्धस्त)तलमध्ये वा मध्याङ्गुल्यग्रपूर्वके ॥ १३ ॥

मध्यपर्वे यवाधिक्यं त्वनलं पात्रसंयुतम् ।
पात्रं विनाऽध(थ)वाऽऽधिक्यं पञ्चाङ्गुलं विशालकम् ॥ १४ ॥
तुङ्गं सप्ताङ्गुलं वाऽष्टनवमात्रमथापि वा ।
त्रिपञ्चसप्तजिह्वायां कल्प्यमेवमथोच्यते ॥ १५ ॥
उक्तासु मध्यजिह्व(ह्वा)यां वन्यं दक्षिणाननं कुरु ।
दक्षिणे पूर्वसूत्रं तु बाह्वग्रं विशदं कुरु ॥ १६ ॥
तस्माद्डमरुके हस्ते मणिबन्धस्य बाह्यके ।
अष्टत्रिंशतिमात्रं वा चत्वारिंशतिरेव वा ॥ १७ ॥
चत्वारिंशतिमात्रं वा वामहस्तस्य सव्ययोः ।
तथ(द्ध)स्ते मणिबन्धोर्ध्वं हिक्कासूत्रं समं भवेत् ॥ १८ ॥
डमरुं मध्यमं पिण्डयं सूचीकर्णं तु उद्धृतम् ।
तर्जन्यग्रं तु सूच्यग्रं तर्जनी रजनी भवेत् ॥ १९ ॥
अथवा चर्मसूत्रं तु पिण्डी मध्याङ्गुलोपरि ।
अनामिकोपरिष्टात्तु डमरुं परिकल्पयेत् ॥ २० ॥
डमरोर्दीर्घविस्तारं वसुपञ्चाङ्गुलं क्रमात् ।
मध्यं गुणाङ्गुलव्यासं पद्माकारं प्रकल्पयेत् ॥ २१ ॥
वलयद्वयसंयुक्तं चर्मसूत्रेण बन्धितम् ।
गव्येनाकृतबिम्बं तं तद्द्रव्येण तु कारयेत् ॥ २२ ॥
सूच्यग्रात्कर्णसीमान्तं चत्वारिंशतिमात्रकम् ।
सपञ्चचत्वारिंशद्वा पञ्चांशन्मातृ(त्र)कं तु वा ॥ २३ ॥
पार्श्वसूत्रं समं सूच्या वन्यास्तौ मध्याङ्गुलम् ।
दक्षिणे पूर्वहस्तं तु अभयं परिकल्पयेत् ॥ २४ ॥
प्राक्सूत्रादुभये हस्ते मध्यं भानुद्वयाङ्गुलम् ।
तन्मध्यमाङ्गुलान्तं तु हिक्कासूत्रसमं भवेत् ॥ २५ ॥
सूत्रात्कूर्परनीत्रं च चत्वारिंशद्द्विमात्रकम् ।
अभयं प्रकोष्ठमध्ये तु भुजं[ग]वलयं न्यसेत् ॥ २६ ॥
प्रकोष्ठमध्यनाहं स्यात् सपादं तस्य दीर्घकम् ।
तत्सूत्रादुपरि स्थातं फणं भान्वङ्गुलं भवेत् ॥ २७ ॥
सप्ताङ्गुलं विशालं तु घनमेकाङ्गुलं भवेत् ।
पुरःस्थितान्समीक्षेत्तु जिह्वानीत्रं समन्वितम् ॥ २८ ॥

भुजंगवलयं ह्येवं कल्पयेत्कल्पवित्तमः ।
सूत्रात्कक्षान्तरं सव्ये पार्श्वे द्वादशमात्रकम् ॥ २९ ॥
सूत्रान्मध्योदरं वामे नवाङ्गुलमुदाहृतम् ।
नवमात्पिण्डसूत्रं तु सूत्रादष्टादशाङ्गुलम् ॥ ३० ॥
सूत्रात्कुञ्चितजान्वोस्तु अन्तरं तु दशाङ्गुलम् ।
नवाङ्गुलं चाष्टमात्रं जानुनीत्रं यथाक्रमम् ॥ ३१ ॥
भानुरुद्रदशाङ्गुल्यं नतमानं तु कल्पयेत् ।
स्थिताङ्घ्रिजानुं चोर्वामं जानुनीत्रं तदाकुलम् ॥ ३२ ॥
त्रिपञ्चमनुमात्रं वा जानुद्वयन्तं तथैव च ।
स्थिताङ्घ्रिनलकामध्याद्वामपार्ष्ण्यन्तरं बुधः ॥ ३३ ॥
सवेदचत्वारिंशच्च साङ्गुलं प्रविधीयते ।
सप्ताष्टपञ्चचत्वारिंशत्त्व(द)ङ्गुलं नतं भवेत् ॥ ३४ ॥
स्थितजान्वो(नू)द्धृतं पार्ष्ण्या चतुस्त्रिंशतिमात्रकम् ।
त्रयस्त्रिंशतिमात्रं वा जानुपार्ष्ण्यन्तरं द्विज ॥ ३५ ॥
उद्धृताङ्घ्रिस्तु जान्वो(नू)र्ध्वं नाभिसूत्रं समं भवेत् ।
कूर्परं डोलहस्तं स्यान्नालसूत्रं दशाङ्गुलम् ॥ ३६ ॥
एकादशाङ्गुलं वाऽथ कल्पे वा(ल्प्यैवं)कूर्परान्तकम् ।
तद्धस्ते मणिबन्धस्तु वामजानु तु द्वयन्तरम् ॥ ३७ ॥
दशाङ्गुलं वा कर्तव्यं नवाङ्गुलमुदाहृतम् ।
डोलहस्तं विविन्ध्यस्तदङ्गुलाग्रं विशेषतः ॥ ३८ ॥
वामपादे तु जङ्घादि द्वयन्तरं त्वङ्गुलं भवेत् ।
नवाङ्गुलान्तरं वाऽपि रुद्राङ्गुलमथापि वा ॥ ३९ ॥
डोलहस्ताद्रयान्तं तु द्वयन्तरं तु दशाङ्गुलम् ।
अन्योन्ययुक्तनीत्राणि यथासौन्दर्यमाचरेत् ॥ ४० ॥
केशान्ताद्भ्रुकपक्षं स्याच्चुङ्गन्मष्टादशाङ्गुलम् ।
सप्तदशाङ्गुलं वाऽथ षोडशाङ्गुलमेव वा ॥ ४१ ॥
तदर्धं वा त्रिपादं वा तस्य विस्तारमेव हि ।
सुविकीर्णजटाभारं पञ्च षट् सप्त नन्द वा ॥ ४२ ॥
रुद्रसंख्या तु वा विप्र उभयोः पार्श्वयोस्तथा ।
द्वात्रिंशाङ्गुलमारभ्य चैकषष्ट्यङ्गुलान्तकम् ॥ ४३ ॥

अङ्गुलाङ्गुलवृद्ध्या तु जटादीर्घमुदाहृतम् ।
अधोजटादीर्घमेवं तस्मादूर्ध्वं तु मूर्धके ॥ ४४ ॥
कनिष्ठाङ्गुलिपरीणाहं जटानाहमुदाहृतम् ।
जटान्तपुष्पमालाभिरलंकृत्य विशेषतः ॥ ४५ ॥
नागं चैवार्कपुष्पं च धत्तूरकुसुमं तथा ।
हस्तिशिरीषकं चैव करोटिरत्नबन्धनम् ॥ ४६ ॥
ऋषिं धृत्वा तु मुकुटे दक्षिणे चन्द्रशेखरम् ।
सिन्धूराकृतितोलस्तु अष्टमालाविलम्बितम् ॥ ४७ ॥
भस्मोद्धूलितसर्वाङ्गं किंचित्प्रहसिताननम् ।
यज्ञोपवीतसंयुक्तं हरसूत्रसमन्वितम् ॥ ४८ ॥
देवाङ्गनोरुदे मध्ये बाहुधामेऽग्रमिर्गतिः ।
प्रभामण्डलमाश्रित्योदरबन्धाग्रको द्विज ॥ ४९ ॥
व्याघ्रचर्माम्बरोपेत ऊर्ध्वं गतिवसानकम् ।
डोलाबाह्वोर्धृतो बन्धं व्याघ्रचर्म द्विजोत्तम ॥ ५० ॥
लम्बनं बाहुमूले तु भानुत्रयोदशाङ्गुलम् ।
तदर्धं वा त्रिपादं वा विस्तारं ल(च)क्रमण्डलम् ॥ ५१ ॥
पादौ नूपुरसंयुक्तौ सर्वाभरणभूषितौ ।
हस्तपादाङ्गुलं सर्वं रत्नहेमाङ्गुलीयुतम् ॥ ५२ ॥
मध्याङ्गुलिविवृद्ध्या तु शेषं वै मुद्रिकान्वितम् ।
दक्षिणं कुञ्चितं पादमपस्मारोपरि स्मृतम् ॥ ५३ ॥
तिर्यक्पादतलन्यासान्नृत्तं कुर्यान्महेश्वरः ।
वामपादं ततोद्धृत्य सतिर्यग्दक्षिणान्वितम् ॥ ५४ ॥
डोलहस्तमथात्यन्तमपस्मारमिहोच्यते ।
त्रिचतुष्पञ्चमात्रं वा अपस्मारस्य दीर्घकम् ॥ ५५ ॥
अष्टचत्वारिंशांशं तु अपस्मारोदयं कुरु ।
उष्णीषं चैकभागेन केशान्तं च द्विधा भवेत् ॥ ५६ ॥
हृदयं नाभिपर्यन्तं तत्समं परिकीर्तितम् ।
नाभिमेढ्रस्य मूलान्त मानं षण्मातृ(त्र)कं भवेत् ॥ ५७ ॥
सप्ताङ्गुलं चोरुदीर्घं जानुदीर्घं द्व्याङ्गुलम् ।
जङ्घादि घो(चो)रुतुल्यं स्याद्व्यन्तरं चरणोदयम् ॥ ५८ ॥

मन्वंशं तु करं हिका मध्यमाङ्गुलिसीमकम् ।
शेषं युक्त्या तु कर्तव्यं शाययेत्तु अधोमुखम् ॥ ५९ ॥
शंभोः सव्यशरीरस्थावुभौ पादौ तु कीर्तितम् ।
अपस्मारोदरोच्चं तु धर्मनन्दाष्टमात्रकम् ॥ ६० ॥
तन्मुखं तु समुद्धृत्य बाललीलासमन्वितम् ।
व्यालं वै वामहस्तेन दक्षिणे तरय चेन्द्रियम् ॥ ६१ ॥
सस्यश्यामनिभाकारमपस्मारं द्विजोत्तम ।
कलांशं पद्मपीठोच्चं विस्तारं च चतुर्गुणम् ॥ ६२ ॥
सपादं सार्धपादोनं द्विगुणं वा तदायतम् ।
ऊर्ध्वपद्ममधोपद्मं पिण्डिकां नो(चो)क्तवद्भवेत् ॥ ६३ ॥
प्रभामण्डलसंयुक्तमनेन विधिना कुरु ।
गुणाङ्गुलं समारभ्य शतमात्रावसानकम् ॥ ६४ ॥
तावदेषाङ्गुलाख्या तु कालकोनशतोदयम् ।
एकाङ्गुलं समारभ्यैकैकावयववर्धनम् ॥ ६५ ॥
पश्चात्सख्यासनं ख्याते दण्डः स्यात्प्रथमस्य तु ।
तत्तदष्टांशहीनं तु ऊर्ध्वोर्ध्वं तु क्रमात्कृशम् ॥ ६६ ॥
एकद्वित्रिचतुष्पञ्चषट्सप्तवसुमात्रकम् ।
पुनः पुनस्तथा संख्यमुपकुर्यात्प्रकल्पयेत् ॥ ६७ ॥
कर्तुरिच्छावशात्तेषु दण्डसंख्यं तु तत्कुरु ।
नानाताद(ल)लताभिश्च नानापुष्पैश्च शोभितम् ॥ ६८ ॥
तस्योपरिष्टादलिनं हस्तं वै शिखरं बुधः ।
कर्तव्यं परितो विप्र तालस्याभ्यन्तरान्वितम् ॥ ६९ ॥
भानुमण्डलं वा धीमान्प्रभामण्डलवर्तमम् ।
तस्य वामे उमा देवी प्रागुक्तविधिना कुरु ॥ ७० ॥
एतस्य प्रथमं पक्षा सर्वलोकहितावहम् ।
तदेव दक्षिणे पार्श्वे जटाग्रे च विभाजिते ॥ ७१ ॥
शम्भोर्देहान्तरं चैव षोडशाङ्गुल(संमि)तम् ।
स्त्रीमानोक्ताङ्ग[सं]युक्तं हृदयं चालिसंयुतम् ॥ ७२ ॥
एवं मानविधिं युक्तं नृत्तं युक्त्या द्वितीयकम् ।
तदेव वापपादं तु अपस्मारोपरि स्थितम् ॥ ७३ ॥

उद्धृतं दक्षिणं पादं वामपादं प्रसारितम् ।
ललाटमध्यवामे तु वामनासापुटान्तके ॥ ७४ ॥
लम्बयेद्ब्रह्मसूत्रं तु स्थितपादस्य गुल्फके ।
शेषं प्रागिव कर्तव्यं यथानृत्ततृतीयकम् ॥ ७५ ॥
अवकीर्णजटाभारजटामुकुटसंयुतम् ।
जटामण्डलसंयुक्तं विशेषप्रथनृत्तवत् ॥ ७६ ॥
चतुर्थं नृत्तमेतद्धि सर्वप्राणिहितावहम् ।
कर्णान्तमुद्धृतं सव्यपादं वामं तु कुञ्चितम् ॥ ७७ ॥
भूका(ता)ष्टकसमायुक्तमेतत्पञ्चकनृत्तकम् ।
अभयं शूलपाशं च डमरुं दक्षिणे करे ॥ ७८ ॥
कपालं चाग्निपाशं च गण्डं हस्तिकरोपमम् ।
गजहस्तोपमं हस्तं प्रसार्य दक्षिणानुकम् ॥ ७९ ॥
यद्वत्प्रथमनृत्तं स्यात्सर्वसूत्रं प्रसारयेत् ।
चित्तपञ्चमनृत्तं स्यादेवमेवेति नृत्यते ॥ ८० ॥
दोर्भिः षोडशसंयुक्तं वामे गौरीसमायुतम् ।
हस्ताभ्यामुद्धृतं स्कन्धं स्तनं तस्य प्रसारितम् ॥ ८१ ॥
अभयं शूलपाशं च खड्गं डमरुकध्वजम् ।
वेतालं सूचिहस्तं च दक्षमष्टकरं भवेत् ॥ ८२ ॥
अनलं गजहस्ताभं खेटकं विस्मयं तथा ।
घण्टां चैव कपालं च छुरिकां सूचिमेव च ॥ ८३ ॥
वामे त्वष्टभुजाख्यातं शेषं पञ्चमनृत्तवत् ।
एवं षष्ठाष्टमं ख्यातं राजराष्ट्रसुखावहम् ॥ ८४ ॥
त्रिनेत्रमष्टहस्तं च सुविकीर्णजटाधरम् ।
कुञ्चितं वामपादं तु अपस्मारोपरि स्थितम् ॥ ८५ ॥
वामपार्श्वे शिरस्थस्य विकीर्णाङ्घ्रिश्च दक्षिणे ।
उद्धृतं दक्षिणाङ्गुष्ठमग्रं संहितसङ्गमम् ॥ ८६ ॥
पूर्वसूत्रं तथाऽङ्गुष्ठनीत्रं भान्वङ्गुलं भवेत् ।
अभयं शूलपाशं च डमरुं दक्षिणे करे ॥ ८७ ॥
कपालमग्निपात्रं च तथा विस्मयहस्तकम् ।
गजहस्तोपमं वामे चतुर्थे चैवमेव हि ॥ ८८ ॥

गजहस्तोपमं सव्यं वामं व्यालसमं तु वा ।
ललाटस्य तु मध्ये तु वामे तु स्थानमध्यमे ॥ ९ ॥
वामाङ्घ्रिनलिकामध्ये लम्बयेद्ब्रह्मसूत्रकम् ।
तत्सूत्राद्वामजान्वे(न्वन्तं) नीत्रं चैव नवाङ्गुलम् ॥ ९० ॥
नतमानं दशांशं स्याद्वामे गौरीसमायुतम् ।
सप्तमं नृत्तमाख्यातं जगद्दुःखविनाशकम् ॥ ९१ ॥
तमेव षड्भुजं भेदमभयं डमरुं तथा ।
शूलं दक्षिणपार्श्वे तु कपालं विस्मयं तथा ॥ ९२ ॥
गजहस्तोपमं वामे सूत्रं प्राय(प)यदष्टकम् ।
चतुर्भुजं त्रिनेत्रं वा जटामुकुटमण्डनम् ॥ ९३ ॥
अभयं डमरुं सव्ये वामेऽग्निर्गजहस्तवत् ।
अपस्मारं विना पीठे वामाङ्घ्रिकुञ्चितं स्थितम् ॥ ९४ ॥
तत्तत्पुरस्थितं पीठे सव्यपादकनिष्ठके ।
तपादं कुञ्चितं युक्त्या सूत्रं युक्त्या तु लम्बयेत् ॥ ९५ ॥
नवमं नृत्तमाख्यातं गङ्गाधरमतः परम् ॥ ९६ ॥

इत्यंशुभद्भेदे काश्यपशिल्पे नृत्तमूर्तिलक्षणं नाम पञ्चषष्टितमः पटलः ।

॥ अथ षट्षष्टितमः पटलः ॥

गङ्गाधरमहं वक्ष्ये संक्षेपेणाधुना शृणु ।
स्वस्तिकं दक्षिणं पादं वामपादं तु कुञ्चितम् ॥ १ ॥
ललाटमध्यमात्सर्वं नीत्वा नवयवान्तकम् ।
दक्षिणे चाक्षिसीमन्ते सव्यनासापुटान्तरे ॥ २ ॥
हिक्कामध्यमनाभिस्तु सव्ये द्व्यङ्गुलकं भवेत् ।
दक्षिणे मेढ्रमूलं स्यान्मध्ये वेदाङ्गुलान्तरे ॥ ३ ॥
पार्ष्ण्योश्च मध्यमे चैव हिक्कासूत्रं प्रलम्बयेत् ।
युगांशं नतमानं तु पादाङ्गुष्ठद्वयान्तरे ॥ ४ ॥
अष्टादशाङ्गुलं प्रोक्तं त्र्यंशं पार्ष्णिकान्तरम् ।
वसिष्ठस्य जटाबन्धं वामे त्वीषन्नताननम् ॥ ५ ॥
दक्षिणे पूर्वहस्तं तु कुरु देवीस्तनाश्रितम् ।
वामेन पूर्वहस्तेन देवीमालिङ्गनं कुरु ॥ ६ ॥

दक्षिणे परहस्ते तु ज(टाजाह्नवि)संयुतम् ।
उष्णीषान्तं समुद्धृत्य वामे कृष्णयुगं ध्रुवम् ॥ ७ ॥
देवस्य वामपार्श्वे तु देवीवहितकाननम् ।
स्वस्तिकं वामपादं तु दक्षिणं कुञ्चितं भवेत् ॥ ८ ॥
समजङ्घ(ङ्घ)नतं सूभं कल्पयेत्कल्पवित्तमः ।
प्रसार्य दक्षिणं हस्तं वामहस्तं तु पुष्पकम् ॥ ९ ॥
अथवा दक्षिणे हस्ते प्रकोष्ठस्य त्रिवर्गकम् ।
श्रोणिहस्ततलं लम्ब्य स्वप्रस्थितिमिव क्रमात् ॥ १० ॥
सर्वाहंकारसंयुक्तं सर्वालंकारसंयुतम् ।
भागीरथीदक्षिणे पार्श्वे मुनिभिः पज्यतेश्वरः ॥ ११ ॥
गङ्गाधरं हरामिति .... ततो वै त्रिपुरान्तकम् ॥१२॥

इत्यंशुमद्भेदे काश्यपशिल्पे गङ्गाधरमूर्तिलक्षणं नाम षट्षष्टितमः पटलः ।

॥ अथ सप्तषष्टितमः पटलः ॥

त्रिपुरान्तकमूर्त्यास्तु लक्षणं वक्ष्यते क्रमात् ।
त्रिचतुष्पञ्चमात्रं स्यान्नतमानं यथाक्रमम् ॥ १ ॥
अभङ्गं समभङ्गं च अतिभङ्गमिति त्रिधा ।
प्रतिमोच्चनतं भागं मानमेवं हि कल्पयेत् ॥ २ ॥
पादाङ्गुष्ठद्वयोश्चैव द्वयन्तरं षोडशाङ्गुलम् ।
अभङ्गं तद्विजानीयादष्टादशाङ्गुलं समम् ॥ ३ ॥
विंशत्यङ्गुलमाख्यात[म]तिभङ्गमिति स्मृतम् ।
तन्त्रिभागैकभागं तु पाष्ण्योंस्तु द्वयन्तरं भवेत् ॥ ४ ॥
उष्णीषाद्वामपार्श्वे तु नेत्रान्ते तत्पुटान्तके ।
हनोर्वामे समालम्ब्य दक्षिणस्तनयामके ॥ ५ ॥
नाभेर्दक्षिणपार्श्वे तु वामोरुसमपार्श्वके ।
दक्षिणाङ्घ्रेस्तु पाष्ण्योंस्तु वामपार्श्वे तु लम्बयेत् ॥ ६ ॥
अभङ्गं सूत्रमाख्यातं समभङ्गमथो शृणु ।
ललाटमध्यनासाग्रे पादयोः पार्ष्णिमध्यमे ॥ ७ ॥

लम्बयेत्पूर्वसूत्रं तु द्व्यन्तरं त्वेवमूह्यताम् ।
तत्सूत्राद्वामपार्श्वे तु हिक्कासूत्रं शिवाङ्गुलम् ॥ ८ ॥
अर्धाङ्गुलं तु तत्सूत्रं वा येन्द्रथ मे मेढ्रं तु मध्यमे ।
तत्सूत्राद्दक्षिणे नाभिमेढ्रमध्यं युगाङ्गुलम् ॥ ९ ॥
[त]त्सूत्राद्वामजान्वन्तमर्धमात्रं विधीयते ।
समभङ्गमिति ख्यातमतिभङ्गमथो शृणु ॥ १० ॥
उष्णीषाद्वामपार्श्वे तु नेत्रान्ते च पुटान्तके ।
दक्षिणे स्तनमध्यान्तं तत्सूत्रं तु गुणाङ्गुलम् ॥ ११ ॥
नाभिमध्ये तु वामे तु सूत्रनीत्रं गुणाङ्गुलम् ।
तत्सूत्रं वामजान्वन्तमर्धमात्रं विधीयते ॥ १२ ॥
वामाङ्घ्रिपार्ष्णिसव्ये तु पार्श्वसूत्रं प्रलम्बयेत् ।
स्पर्शनं वेशनं नीत्रं स्म(स)पादस्थानकोर्त(क्त)वत् ॥ १३ ॥
एवं त्रिभङ्गसूत्रेषु संमिश्रं तु न कारयेत् ।
उत्तमं चातिभङ्गं स्यात्समभङ्गं तु मध्यमम् ॥ १४ ॥
अभङ्गमधमं ख्यातं त्रिपुरान्तकमूर्तितः ।
दक्षिणं स्वस्तिकं पादं वामपादं तु कुञ्चितम् ॥ १५ ॥
दक्षिणे पूर्वहस्ते तु द्वे नाभी सूत्रसन्तक(त)म् ।
सिंहकर्णं तु तद्धस्तं बाणमध्यं तु पिण्डितम् ॥ १६ ॥
बाणा[या]मं तु तत्सप्तत्र्यङ्गुलं तु विधीयते ।
कनिष्ठाङ्गुलिपरीणाहं देवेशस्य करौ स्थितौ ॥ १७ ॥
आस्यं पञ्चाङ्गुलव्यासमास्योच्चं व्याससदृशम् ।
आस्यतुङ्गं समं पूज्यं तुङ्गमन्याङ्गुलीततम् ॥ १८ ॥
वामहस्ते धनुर्धृत्वा कक्षान्तात्तत्करोर्ध्वकम् ।
एकद्वित्र्यङ्गुलं वाऽपि तस्माद्धृत्यानतं तु वा ॥ १९ ॥
शताङ्गुली (लं) तु तुङ्गं वा पञ्चसप्तनवाङ्गुलम् ।
हीनं वाऽप्यधिकं वाऽपि नवधा धनुषाऽन्वितम् ॥ २० ॥
पूर्णमुष्टि तु नाहं स्यान्मध्यमाग्रौ कृशौ कुरु ।
अग्रं मध्याङ्गुलव्यासं वृत्तवर्णे विचित्रकम् ॥ २१ ॥
बाणनाहं त्रिभागैकं रज्जुनाहं तु तन्तुना ।
धनुर्दीर्घाष्टभागे तु सप्तांशं रज्जुदीर्घकम् ॥ २२ ॥

तदीर्घस्यानुकूलं तु धनुर्वक्रमुदाहृतम् ।
त्रिवक्रं सहितं वाऽथ बालचन्द्रो भवेत्तथा ॥ २३ ॥
धनुषा(रा)कृतिरेवं स्याल्लोहजं दारुजं तु वा ।
कर्तरीपरहस्तौ द्वौ टङ्कं कृष्णमृगान्वितम् ॥ २४ ॥
टङ्कं दक्षिणहस्ते तु वामहस्ते मृगो धृतः ।
जटामुकुटसंयुक्तं सर्वाभरणभूषितम् ॥ २५ ॥
प्रवालसदृशप्रख्यं वामे गौरीसमायुतम् ।
त्रिपुरान्तकमूर्तिस्तु प्रथमं लक्षणान्वितम् ॥ २६ ॥
देवस्य वामपादं तु अपस्मारोपरि स्थितम् ।
शेषं प्रागिव कर्तव्यं द्वितीयं लक्षणं भवेत् ॥ २७ ॥
स्वस्तिकं वामपादं तु दक्षिणं कुञ्चितं भवेत् ।
शेषं प्रागिव कर्तव्यं सूत्रादितरपार्श्वकम् ॥ २८ ॥
तृतीयं लक्षणं प्रोक्तं चतुर्थं लक्षणं शृणु ।
तदेव वामपादं तु अपस्मारशिरःस्थितः ॥ २९ ॥
प्रागिवैवावशेषं तु चतुर्थं लक्षणं हितम् ।
कटौ बाणधरे हस्ते मध्यरेखाकलाङ्गुलम् ॥ ३० ॥
तुर्यांशं मनुमात्रं वा त्रयोदशाङ्गुलं तु वा ।
भानुरुद्राङ्गुलं वाऽथ द्वयन्तरं षड्विधं भवेत् ॥ ३१ ।
तत्परं कूर्परं नीत्रं श्रोणिपार्श्वं तथा भवेत् ।
कक्षाद्धनुर्धनुर्हस्ते मणिबन्धान्तरं ततः ॥ ३२ ॥
तत्करे कूर्परोद्धारं हृदयान्तमुदाहृतम् ।
एकद्वित्रिचतुष्पञ्चमात्रं तन्मानकं तु वा ॥ ३३ ॥
सर्वेषामपि सामान्यं द्वयन्तरं कथितं मतम् ।
तदेव पूर्वहस्तौ द्वौ कटकौ हृदयस्थितौ ॥ ३४ ॥
वामे दक्षिणहस्तं तु क्रमाद्द्वद्वद्वयोर्मुदा ।
बाणमूलं धृतं सव्यं वामं बाणाग्रकं धृतम् ॥ ३५ ॥
परहस्ते दक्षिणे टङ्कं धनूंषि वामहस्तके ।
सव्ये पार्श्वे भृगुर्वाऽथ वामे गौरीसमायुतम् ॥ ३६ ॥
अपस्मारं विना पादं नतसूत्रं च पार्श्वयोः ।
एवं चतुर्भुजोपेता मूर्तिः पञ्चविधा भवेत् ॥ ३७ ॥

अतिभङ्गं नतो भेदमष्टहस्तसमन्वितम् ।
बाणं च परशुं खड्गं यज्ञं वै दक्षिणे करे ॥ ३८ ॥
धनुषी विस्मयं खेटं मृगहस्तमथापि वा ।
वामहस्तामिदं ख्यातं पूर्वहस्तात्करान्तकम् ॥ ३९ ॥
यथाशोभं तथा तुङ्गं कल्पयेद्गौरिसंयुतम् ।
षष्ठमप्येवमाख्यातं सप्तमं च अथोच्यते ॥ ४० ॥
बाणं चक्रं तथा शूलं टङ्कं वज्रं च दक्षिणे ।
धनुः शङ्खं तथा सूचिं विस्मयं खेटकं तथा ॥ ४१ ॥
वामे पञ्चकरं ख्यातमतिभङ्गस्तथोपरि ।
तथैव दक्षिणं जानुं वामोपरि निधापयेत् ॥ ४२ ॥
तत्पूर्वे या(वा)मपादं तु तले न्य[स्य] रथोपरि ।
रथं तु मुकुलोपेतं मुकुलं रज्जुनाऽऽवृतम् ॥ ४३ ॥
मुकुलाभ्यन्तरे ब्रह्म चतुर्वक्त्रं चतुर्भुजम् ।
तस्य दक्षिणहस्तौ द्वौ वेणुदण्डकमण्डलुम् ॥ ४४ ॥
कुण्डिका पद्मपात्रं च वामहस्तद्वयोर्धृतम् ।
रथस्य मुकुलाधस्तादृषभं चातिवर्णकम् ॥ ४५ ॥
रथं याप(पूर्व्वे)णमार्गेण कल्पयेत्कल्पवित्तमः ।
त्रिपुरान्तकमाख्यातमष्टभेदं द्विजोत्तम ॥ ४६ ॥
प्रवालसदृशं प्रणां(ख्यं) सत्त्वराजसमुश्रु(संयु)तम् ।
सर्वाभरणसंयुक्तं मेघवक्त्रं त्रिनेत्रकम् ॥ ४७ ॥
तस्य वामे स्थिता देवी प्रागुक्तविधिना कुरु ।
सामान्यलक्षणं कार्यं त्रिपुरान्तकमूर्तिनः ॥ ४८ ॥

इत्यंशुमद्भेदे काश्यपशिल्पे त्रिपुरान्तकमूर्तिलक्षणं नाम सप्तषष्टितमः पटलः ।

॥ अथाष्टषष्टितमः पटलः ॥

अथ कल्याणमूर्तेस्तु लक्षणं वक्ष्यतेऽधुना ।
ललाटक्षमवामे तु वामनेत्रावसानके ॥ १ ॥

वामनासापुटान्ते च हिक्कामध्ये चलं भवेत् ।
दक्षिणं नाभिमध्ये तु देवहत्वा(स्ता)ङ्गुलं भवेत् ॥ २ ॥
नीत्वा स्थिताङ्घ्रिगुल्फः स्यान्मध्ये सूत्रं प्रलम्बयेत् ।
द्वयन्तरं नतमानं च समभङ्गं यथाक्रमम् ॥ ३ ॥
स्वस्तिकं वामपादं तु दक्षिणं कुञ्चितं भवेत् ।
दक्षिणं पूर्वहस्तं तु गौरीदक्षिणहस्तधृत् ॥ ४ ॥
वरदं वामहस्तं तु परहस्तद्वयोस्त(र्व)रम् ।
दक्षिणे परशुं वाऽथ वामे कृष्णमृगं तथा ॥ ५ ॥
जटामुकुटसंयुक्तं सर्वाभरणभूषितम् ।
देवं प्रवालवर्णाभं पार्श्वे तस्य विशेषतः ॥ ६ ॥
सस्यश्यामनिभा देवी प्राग्वन्मानादिसंमताम् ।
उत्पलं वामहस्ते तु धृतदक्षिणहस्तकम् ॥ ७ ॥
शंभोर्दक्षिणसंग्राह्यलज्जालम्बसमन्वितम् ।
पूर्वस्यानुगुणं शीघ्रं सर्वाभरणभूषितम् ॥ ८ ॥
हस्ताभ्यां संस्पृशेद्देवौ तौ(गौ)र्याधस्तु कटिं द्विजः ।
देवाग्रे कारयेत्कुण्डं होमकर्म प्रजापतिः ॥ ९ ॥
शंभोर्वै स्तनसीमान्तं प्रजेशस्योदयं भवेत् ।
चतुर्भुजं चतुर्वक्त्रं सर्वाभरणभूषितम् ॥ १० ॥
अजिनं चाक्षमाला च वामहस्तेऽधरे पु(प)रे ।
दक्षिणं पूर्वहस्तं तु धृतवामकरः क्रमात् ॥ ११ ॥
उत्तराभिमुखासीनः पद्मपीठे प्रजापतिः ।
प्रभाग्रौ देवीदेवेशौ देवी देवस्य दक्षिणे ॥ १२ ॥
दक्षिणाभिमुखो विष्णुर्होमस्योत्तरदिक्स्थितः ।
शंभोर्वै नासीसीमान्तं श्रेष्ठायामं स्तनान्तकम् ॥ १३ ॥
तयोर्मध्येऽष्ट वा भज्य नवधा केशवोदयम् ।
श्यामवर्णं समं भागं शङ्खचक्रं परे करे ॥ १४ ॥
हिरण्यपरकोणापा पूर्वहस्तद्वयोपरि ।
संग्राह्यं वरदे हस्ते सुतीर्थोदकपूर्वकम् ॥ १५ ॥
अनादिगोत्रसंभूतं श्रीशैवं परमेश्वरम् ।
आदिगोत्रा उमा गौरी तवैवास्मिन्ददाम्यहम् ॥ १६ ॥

इत्युक्त्वा वरदे हस्ते दद्यात्तीर्थोदकं हरिः ।
अष्ट लोकेशविद्येशसिद्धप(य)श्च गणादयः ॥ १७ ॥
ऋषयश्चैव गन्धर्वा अप्सराश्च सदैवताः ॥ १८ ॥
इत्यंशुमद्भेदे काश्यपशिल्पे कल्याणमूर्तिलक्षणं नामा-
ष्टषष्टितमः पटलः ।

॥ अथैकोनसप्ततितमः पटलः ॥

अर्धनारीशमूर्तेस्तु लक्षणं वक्ष्यते शृणु ।
चतुर्भुजं षड्भुजं च द्विभुजं परिकीर्तितम् ॥ १ ॥
सभङ्गं स्थानकस्योक्तमार्गेणैवानतोदयः ।
स्वस्तिकं दक्षिणं पादमितरं कुञ्चितं भवेत् ॥ २ ॥
वामार्धं पार्वतीरूपं दक्षिणार्धं महेश्वरम् ।
अभयं परशुं सव्ये हस्ते वह्निं शिवांशके ॥ ३ ॥
वृषभं मूर्तिकन्यस्तकूर्परं वामहस्तके ।
तदन्यद्वामहस्तं तु कटकं पुष्पसंयुतम् ॥ ४ ॥
द्विभुजे वरदं सव्ये वामहस्ते तु पुष्पधृत् ।
शिवास्य(वरयाऽऽ)भरणं सव्ये वामे श्रीभूषणाञ्चितम् ॥ ५ ॥
पुस्तकं दक्षिणे पार्श्वे वामे स्त्रीणां पयोधरम् ।
अथवा कुञ्चितं सव्यं पादं वामं तु स्वस्तिकम् ॥ ६ ॥
सव्यं शूलधरं हस्तं वामे पुष्करकं धतम् ।
वरदं दक्षिणं हरतमन्योक्षिशिरपूर्वकम् ॥ ७ ॥
कपालं दक्षिणे हस्ते वामहस्तं प्रसारितम् ।
दक्षिणे रौद्रदृष्टिः स्याद्वामे पार्श्वे तु शीतलम् ॥ ८ ॥
दुकूलं चोरुमध्यान्तं सव्यं गुल्फान्तमन्यकम् ।
एवं विरतारतः प्रोक्तमर्धनारीश्वरं परम् ॥ ९ ॥
इत्यंशुमद्भेदे काश्यपशिल्पेऽर्धनारीश्वरलक्षणं नामैकोनसप्ततितमः पटलः ।

॥ अथ सप्ततितमः पटलः ॥

अथ वक्ष्ये विशेषेण गजहामूर्तिलक्षणम् ।
ललाटमध्यनासाग्रं वामे तु स्तनमध्यमात् ॥ १ ॥

वामद्विपिण्डमध्यात्तु पूर्वसूत्रं प्रसारयेत् ।
तत्सूत्राद्दक्षिणे वामे पादपार्ष्ण्यन्तरं द्विज ॥ २ ॥
साष्टत्रिंशतिमात्रं वा षट्त्रिंशत्यङ्गुलं तु वा ।
तत्सूत्राद्वामनो(तः) सव्यपादाङ्गुष्ठान्तरं द्विज ॥ ३ ॥
एकविंशतिमात्रं वा एकोनविंशदेव वा ।
चतुर्हस्ताष्टहस्तं वा सर्वाभरणसंयुतम् ॥ ४ ॥
चतुर्भुजं चेत्पांशं च भे(ग)जचर्म च दक्षिणे ।
गजास्यं गजचर्म स्याद्वामपार्श्वकरद्वयम् ॥ ५ ॥
चतुर्दोर्भिवमाख्यातमष्टहस्तमथोच्यते ।
गजस्य मस्तकं पार्शं गजचर्म च दक्षिणे ॥ ६ ॥
गजशृङ्गं कपालं च गर्जचर्म च विस्मयम् ।
वामपार्श्वे तु चत्वारो हस्तमे(स्ता ह्ये)वं प्रकीर्तितम् ॥ ७ ॥
शंभोर्वामाङ्घ्र्यधस्तात्तु गजस्येव तु मस्तकम् ।
मुकुटस्योपरिष्टात्तु गजपुच्छं प्रकाशयेत् ॥ ८ ॥
पार्श्वयोगे जयायां तु यथा युक्त्या तु कारयेत् ।
प्रभामण्डलवच्छेषं गजचर्म प्रकल्पयेत् ॥ ९ ॥
शूलखड्गधरं चर्म गजशृङ्गं च दक्षिणे ।
कपालं खेटकं खड्गं गजचर्म च वामके ॥ १० ॥
ललाटमध्यनासाग्रं दक्षिणस्तनमध्यमात् ।
सव्यपीठस्य मध्यं तु लम्बयेद्ब्रह्मसूत्रकम् ॥ ११ ॥
स्वस्तिकं वामपादं तु गजस्य मस्तकोपरि ।
उद्धृतं दक्षिणं पादं वाममुत्कुटिकं भवेत् ॥ १२ ॥
तदङ्घ्रिपार्ष्ण्योः स्फिक्पिण्डाद्द्व्यन्तरं चतुरङ्गुलम् ।
तज्जानुवामकक्षस्य असिसूत्रं समं नयेत् ॥ १३ ॥
एवं द्विबिधनीत्वा तु गजहामूर्तिरुच्यते ।
दक्षसूत्रादुमा देवी शंभोर्वामोभयान्वितम् ॥ १४ ॥
एवं हि कल्पितं बिम्बमृ(म्बं रा)जाविजयमाप्नुयात् ॥ १५ ॥

इत्यंशुमद्भेदे काश्यपशिल्पे गजहामूर्तिलक्षणं नाम
सप्ततितमः पटलः ।

॥ अथैकसप्ततितमः पटलः ॥

अथ वक्ष्ये विशेषेण पाशुपत[स्य] लक्षणम् ।
समपत्स्थानकं प्रोक्तं चन्द्रशेखरमूर्तिवत् ॥ १ ॥
त्रिनेत्रं च चतुर्बाहुं मूर्धकेशं महाधनुम् ।
अभयं शूलहस्तं च दक्षिणे तु करद्वये ॥ २ ॥
वरदं चाक्षमाला च वामपार्श्वकरद्वये ।
प्रवालसदृशप्रख्यं सौम्यनेत्रं तु शीतलम् ॥ ३ ॥
सर्वाभरणसंयुक्तं किंचित्प्रहसिताननम् ।
नित्योत्सवस्थबिम्बार्थं स्थानकं वासनं तु वा ॥ ४ ॥
तदेवाग्निसमं वर्णं रक्ताक्षं कुटिलद्र(भ्रु)वम् ।
तीक्ष्णनेत्रस्य(त्रैश्च) संयुक्तं व्यालयज्ञोपवीतिनम् ॥ ५ ॥
ज्वालानलशिखाकारमतिरत्ननिवासधृक् ।
शूलं तथो(त्वधो)मुखं धृत्वा कपालं वरदोद्धृतम् ॥ ६ ॥
अथवाऽभयं विना शूलं मूलं धृत्वा तु तत्करे ।
शूलाग्रं वरदेनैव गव्यतिर्यग्गते ध्रुवम् ॥ ७ ॥
दक्षिणे वरदे हस्ते टङ्कं खड्गं तु वामके ।
कौतुकं पाशुपतनं बलिलिङ्गे तु पूज्यते ॥ ८ ॥
ध्यानपूजानिमित्तायामेतन्मूर्तिं वदाम्यहम् ।
एतन्मूर्तिं सकृद्ध्यायेत्सर्वशस्त्रविनाशनम् ॥ ९ ॥
एवं तु रौद्रमूर्त्यै(र्तिं) तु प्रतिमां नैव कारयेत् ॥ १० ॥

इत्यंशुमद्भेदे काश्यपशिल्पे पाशुपतमूर्तिलक्षणं नामैकसप्ततितमः पटलः ।

॥ अथ द्विसप्ततितमः पटलः ॥

अथ कंकालमूर्तेस्तु लक्षणं वक्ष्यतेऽधुना ।
पादौ तु पादुकोपेतौ भिक्षुकंकाललक्षणम् ॥ १ ॥
रक्षार्थं परिवारार्थं मोक्षार्थं तु विधीयते ।
स्थानकं गमनं ग्राह्यं द्वाविंशं तु प्रवक्ष्यते ॥ २ ॥

स्थानकं मूलबेरं च गमनं चोत्सवं भवेत् ।
दारुजा लोहजा वाऽथ सुधामृन्मयशर्करा ॥ ३ ॥
शिला च चित्रं वा कुर्यात्प्रतिमां वा यथाविधि ।
एवं च प्रतिमां कुर्यान्मानोन्मानप्रमाणवित् ॥ ४ ॥
प्रमाणमङ्गैर्वा कृत्वा मानं संग्राह्य बुद्धिमान् ।
अङ्गुलैर्यवसंयुक्तैर्हस्ततालवितस्तिभिः ॥ ५ ॥
आयादि शुभं संग्राह्यं मानं शुद्ध्यर्थकं भवेत् ।
पादावधिष्ठानमानं द्वारतुङ्गसमेऽपि वा ॥ ६ ॥
मूललिङ्गसमोत्तुङ्गं सार्धं द्वित्रियवं तु वा ।
तयोर्मध्याष्टभागं तु नवधा तुङ्गमानकम् ॥ ७ ॥
उत्सवोद्यममानेन समस्तविधिरुच्यते ।
वामपादस्थितं चैव दक्षिणं गम्य वक्ष्यते ॥ ८ ॥
पादौ पादधृतौ चैव भवेद्दक्षिणकुञ्चितम् ।
पाष्ण्र्यूर्ध्वेदृग्भवेत्पूर्वं ब्रह्मसूत्रं प्रलम्बयेत् ॥ ९ ॥
पूर्वहस्तं कृतं वाऽपि दक्षिणे कर्षके धृतम् ।
हिरण्यस्य कृतं वाऽपि तर्जन्यङ्गुष्ठस्पृक्यया ॥ १० ॥
योनिसीमावसानेन दूर्वाकार ए(इ)वापि वा ।
अथ वामकरे पात्रौ(त्रं) नाभिसीमावसानकम् ॥ ११ ॥
डमरुं पू(वा)हमस्ते तु हनुसीमावसानकम् ।
वामे शूलस्य हस्तं वा शिखिपिक्खण्डसंयुतम् ॥ १२ ॥
कङ्कालं च तदग्रे तु बन्धयेद्धृदयोपरि ।
बाहुसीमावसानेन तत्कन्याच्यविकं भवेत् ॥ १३ ॥
एकद्वित्रिचतुर्मात्रं नताधिक्यादिमेव हि ।
स्थानके पूर्वसूत्रं वा भङ्गमानमथो शृणु ॥ १४ ॥
ललाटवामपार्श्वे तु नेत्रान्ते च पुटान्तके ।
हनोर्वामे तु हिक्कायां हृदये कालकोलकम् ॥ १५ ॥
नाभेश्च दक्षिणे सूत्रं पक्षाङ्गुलमिति त्रयम् ।
योनिनीत्रं तु सूत्रं वा दक्षिणे युगमात्रकम् ॥ १६ ॥
वामपादस्थितं वाऽपि द्विपादान्तरमध्यमे ।
स्थानकं ह्येवमाख्यातं गमनेषु विधीयते ॥ १७ ॥

गमनेषु तु सूत्रं वा ललाटे वामपार्श्वके ।
वामाङ्घ्रिगुल्फमध्ये तु द्विपार्श्वैके सूत्रकं भवेत् ॥ १८ ॥
सूत्रं ललाटमध्ये च दक्षिणे तु द्व्याङ्गुलम् ।
वामे च पुटपार्श्वे तु हिक्काहृदयमध्यमे ॥ १९ ॥
नाभिवामे द्व्याङ्गुल्यं योनिवामे युगाङ्गुलम् ।
वामाङ्घ्रिगुल्फस्पृशं स्याद्गमनस्य तु सूत्रकम् ॥ २० ॥
अभङ्गस्योक्तमार्गेण नतमात्रं च बुद्धिमान् ।
गमने सूत्रकं वाऽपि हस्तयोर्नीत्रमेव वा ॥ २१ ॥
सव्यहस्ततृणं कुर्यात्सूत्राद्व्यन्तरमंशकम् ।
द्वाविंशतिद्व्यङ्गुलं वाऽपि त्रयोविंशतिरेव च ॥ २२ ॥
मणिबन्धे मध्यमां तु बाह्ये चैव तथैव हि ।
नीत्रं तन्त्रिविधं चैव पात्रे वामकरेऽपि वा ॥ २३ ॥
कलासप्तदशं चाष्टमानानौ चा(नतश्चा)पि नीत्रकम् ।
नाभिसीमावसाने तु कूर्परं तस्य नीत्रकम् ॥ २४ ॥
म(प)ञ्चाङ्गुलमथो वाऽपि तिथिषोडशमेव वा ।
दक्षिणं तृणकं हस्ते योनिसीमावसानके ॥ २५ ॥
एकद्वित्रिचतुर्मात्रं मृगसस्य(सूत्रं) प्रलम्बयेत् ।
ज्ञानमुद्रासिंहकर्णौ यथासौन्दर्यमाचरेत् ॥ २६ ॥
वामहस्ते परे शूलबाहुसीमावसानके ।
पूर्वसूत्रं तथैव स्याद् शिखाबद्धस्य नीत्रकम् ॥ २७ ॥
चत्वारिंशतिमात्रं वा शूलं तु खगु(ड्ग)तोपरि(मरे) ।
शूलाग्रो घातुको पीवा कङ्कालं बन्धयेत्सुधीः ॥ २८ ॥
दक्षिणे परहस्तेन डमरुं कटिकेऽपि वा ।
तु(क)टिदीर्घस्य विस्तारं नवांशैरितिकेऽपि वा ॥ २९ ॥
मण्डं क्षीणं गुणाङ्गुल्यं पञ्चाकारं द्विपार्श्वके ।
वलयद्वयसंयुक्तं तर्जनी ऋजुतो भवेत् ॥ ३० ॥
तर्जन्यां गृह्यमेवं हि हनुसीमावसानकम् ।
मणिबन्धस्य नीत्रं तु पूर्वसूत्रं तथैव च ॥ ३१ ॥
चत्वारिंशतिमेवाह्यमंशाधिकमथापि च ।
वामे कपालपात्रं वा भान्वंशं रसनीत्रकम् ॥ ३२ ॥

घनं मेघाङ्गुलं वाऽपि सुवृत्तंनिर्व्रणं भवेत् ।
मकरकुण्डलमेवं हि शङ्खपत्रं तु वामके ॥ ३३ ॥
जटामण्डलमेवोक्तं विकीर्णं केशमण्डलं ।
दक्षिणे तु शेखरं वा पाजन्विवर्यामकेऽपि वा ॥ ३४ ॥
करोटिमन्दबन्धं च धुत्तूरकुसुमाष्टतौ ।
यक्षयक्षं तथैवोक्तमर्कपुष्पैश्च दूर्वकैः ॥ ३५ ॥
पिका(ना)किजगबन्धं च कटौ रुद्राक्षमालिका ।
नाग कङ्कणं कोष्ठेषु नानारत्नविभूषितम् ॥ ३६ ॥
व्याघ्रचर्माम्बरधरं रुद्रवक्त्रप्रकाशितम् ।
भस्मोद्धूलितदिव्याङ्गं किंचित्प्रहसिताननम् ॥ ३७ ॥
एतत्कङ्कालनामास्ति वामस्कन्धोपरि त्यजेत् ।
अनेकभूतैर्जायाभिः सेवितं वन्दितं च तैः ॥ ३८ ॥
बलिपात्रधृतं भूतमग्रे गे(हे)यसमन्वितम् ।
दत्त्वा त्वन्नं तु तत्पात्रे निधायाकृतिजायया ॥ ३९ ॥
किंचित्प्रकाशितं योनिसंयुक्तं नत(व)वाससा ।
संभूता मनसोपेता जायाः सर्वतेने(त्रैने)कशः ॥ ४० ॥
दक्षिणे कटिपार्श्वे तु क्षुरिकाश्चैव बन्धयेत् ।
क्षुरिकाहेमसंकाशामुपबन्धसमाश्रिता ॥ ४१ ॥
उभयोः पार्श्वयोर्हस्ते नानानागैर्विभूषिताम् ।
ऋषिभिर्देवगन्धर्वैः सिद्धविद्याधरादिभिः ॥ ४२ ॥
हृदयं कलिसंयुक्तं संभ्रान्तमनसाश्रितैः ।
सर्वानित्यसदानन्दं सेविताद्यैः सुपूजितम् ॥ ४३ ॥
वीथीं संमार्जयेद्वायुः पर्जन्यो जलसेचनम् ।
पुष्पवृष्टिकृतो देवा ऋषयः स्तोत्रपाठकाः ॥ ४४ ॥
ऋग्यजुःसामाथर्वाणः स्तुतिं कुर्युः परे परे ।
चर्मबन्धं च कांसं च वीणा सुषिरमेव च ॥ ४५ ॥
शङ्खध्वनिसमायुक्तं पञ्चवाद्यं महा(समा)रभेत् ।
तुम्बुरुनारदाद्यैश्च जयवाद्यं सलक्षणम् ॥ ४६ ॥
चन्द्रादित्यादिचिद्रोजाचा(वद्राजचा)मरा दिव्यभोषितः ।
सर्वलोकोपकारार्थमिन्द्रस्य सवनादिषु ॥ ४७ ॥

वाभूतागमनादेवा योन्येवा(निसीमा)वसानकम् । (?)
पञ्चतालेन भूतं च मानोन्मानप्रमाणकम् ॥ ४८ ॥
भूते तु शिरसो(सः)पात्रं द्विहस्तं स्पर्श एव वा ।
पात्रह(वि)स्तारके वाऽपि विंशतिरङ्गुलं तु वा ॥ ४९ ॥
निम्नमानं दशाङ्गुल्यं खनमेकाङ्गुलं भवेत् ।
हिरण्यं दक्षदिग्भागे जानुसीमावसानकम् ॥ ५० ॥
मूर्धन्यादिपदान्ते च हरिणीं तुङ्गमेव च ।
देवस्य पूर्वसूत्रे तु स्पर्शमानं तथैव हि ॥ ५१ ॥
नासाग्रे लम्बयेत्सूत्रं वामाङ्गुष्ठस्य मूलके ।
जटाग्रे विंशदङ्गुल्यं त्रयोविंशदथाङ्गुलम् ॥ ५२ ॥
स्पर्शनं कुक्षिनासाग्रमङ्गुष्ठमूलं लम्बयेत् ।
सूत्रवामे तु नीत्रान्तमष्टाङ्गुल्यशराङ्गुलम् ॥ ५३ ॥
तत्सूत्राद्दक्षिणाङ्गुष्ठे नीत्रकं तु नवाङ्गुलम् ।
दशरुद्राङ्गुलं वाऽथ द्वादशाङ्गुलमेव च ॥ ५४ ॥
सूत्रस्थानं तु निम्नं वा सव्यपार्ष्ण्यन्तरेऽपि वा ।
द्वाविंशदङ्गुलं वाऽपि त्रयोविंशतिमेव वा ॥ ५५ ॥
सूत्रात्पार्श्वं तु सीमान्तं दक्षिणाङ्गुष्ठनिम्नकम् ।
एकद्वित्रिचतुष्पञ्चरसाङ्गुल्यं तु नीत्रकम् ॥ ५६ ॥
पीठे दक्षिणपार्ष्ण्यें(श्वे) तु वेदपञ्चरसाङ्गुलम् ।
पादुकायामकं वाऽपि पादतालायसीम(वसान)कम् ॥ ५७ ॥
उत्सेधेन गुणाङ्गुल्यमूर्ध्वमानं तु पद्मकम् ।
तर्जन्यङ्गुष्ठयोर्मध्ये मुकुलाकृति बन्धयेत् ॥ ५८ ॥
द्व्यङ्गुलं कुमुदोत्सेधं सुवृत्तं सुन्दरं भवेत् ।
कैलासशिखरे रम्ये श्रीगन्धे देवनायकम् ॥ ५९ ॥
ऋषीणां संगमे प्रीत्या भगवान्परमेश्वरः ।
दण्डकारण्यलीलायां मुनीनां सर्वशान्तये ॥ ६० ॥
तेषां श्रीणां च पौरन्ध्रा(न्ध्र्ये) विधाताय च लीलया ।
भिक्षास्वरूपं नग्नेन कटिसूत्रविवर्जितः ॥ ६१ ॥
इत्ययं परमेशानः कैलासं त्रैविनीयतम् ।
भिक्षां करोम्यहं विप्र कङ्कालस्य तु मोक्षणम् ॥ ६२ ॥

काश्यप उवाच—

त्वया वै वर्धितं चास्य कङ्कालस्यो(स्य) फलं कथम् ।

शिव उवाच—

इदानीं पुरतो विप्र कथ्यते तत्सविस्तरम् ॥ ६३ ॥
तदहं भुवनादीनि याचेऽभयपुरस्करः ।
कम्पितस्तु समस्तानि भुवनान्यधिवासितः ॥ ६४ ॥
प्रार्थयेद्यस्तु मां भिक्षां मासं भयनिवृत्तये ।
अण्डानां सुस्थितार्थं च सर्वलोकोपकारकम् ॥ ६५ ॥
कङ्कालमोचनान्तं तु तद्धुनैवमहं द्विज ।
भिक्षान्ते मोचयेदेतत्कङ्कालमभयं भवेत् ॥ ६६ ॥

काश्यप उवाच—

एवं कङ्कालमाख्यातं करिरथं(हरमर्धहरि) शृणु ॥ ६७ ॥

इत्यंशुमद्भेदे काश्यपशिल्पे कङ्कालमूर्तिलक्षणं नाम
द्विसप्ततितमः पटलः ।

॥ अथ त्रिसप्ततितमः पटलः ॥

अथ वक्ष्ये विशेषेण हरिर(म)र्धहरं परम् ।
आर्जवं स्वस्थि(स्ति)कं स्थानं स्थानकं समपादकम् ॥ १ ॥
दक्षिणं चाभयं वामं(मे) कटकं पूरिमाश्रितम् ।
परशुं दक्षिणे वामे (भागे) शङ्खायुधधरं परम् ॥ २ ॥
सव्ये वामे च मुकुटे जटाकिरीटमण्डितम् ।
प्रवालं श्यामरूपं तु तस्यो(च्छो)भाभरणान्वितम् ॥ ३ ॥
दक्षिणे तूग्रदृष्टिः स्याद्वामे दृष्टिः स(सु)शीतलम् (ला) ।
किंचित्प्रकाशितार्धं च दृष्ट्या तु तल्ललाटके ॥ ४ ॥
सर्वाभरणसंयुक्तं दिगम्बरसमन्वितम् ।
शिरश्चक्रसमायुक्तं तस्य लक्षणमुच्यते ॥ ५ ॥

रुद्रांशकविशालं तु तद्भागांशेन वर्धितम् ।
घनं सुवृत्तचक्रं च पद्माकृतिम(अ)थापि वा ॥ ६ ॥
शिरश्चक्रविशालं तु सप्तभागैकभागिकम् ।
शिरसश्चक्रनालस्य विस्तारं द्विजसत्तम ॥ ७ ॥
चक्रवामत्रिभागैकं चक्रदं शिरसोन्नतम् ।
अग्रे ललाटपट्टस्य शिरश्चक्रस्य नालकम् ॥ ८ ॥
चक्रं तर्जनीमालम्ब्य पुष्पमालां च मध्यमाम् ।
सर्वेषां देवदेवीनामेवमेव समाचरेत् ॥ ९ ॥

इत्यंशुमद्भेदे काश्यपशिल्पे हर्यर्धहरलक्षणं नामत्रिसप्ततितमः पटलः ।

॥ अथ चतुःसप्ततितमः पटलः ॥

अथ वक्ष्ये विशेषेण भिक्षाटनमहेश्वरम् ।
पादौ पादुकसंयुक्तौ वामपादं तु स्वस्तिकम् ॥ १ ॥
ईषदुद्धृत्य सव्यं तु पादं तुङ्गं नवोत्सवम् ।
ललाटमध्यमासव्ये नवाष्टौ वा यवान्तरे ॥ २ ॥
नासाग्रेद(त्व)धरे वामे हिक्कामध्यं तु वामके ।
हृन्मध्यनाभिसव्ये तु षोडशं तु यवान्तरम् ॥ ३ ॥
स्वस्त्याङ्घ्रिगुल्फमध्ये तु पूर्वसूत्रं प्रलम्बयेत् ।
अभङ्गं सनतं कार्यं समभङ्गमथापि वा ॥ ४ ॥
पादौ पादुकसंयुक्तौ पादुकारहितौ तु वा ।
सुविकीर्णजटाभारो जटामण्डल एव वा ॥ ५ ॥
प्रणमं च जटाभारं नग्नरूपं नताननम् ।
ललाटपट्टसंयुक्तं करोटार्धं तु शेखरम् ॥ ६ ॥
सर्वाभरणसंयुक्तं कटिसूत्रविवर्जितम् ।
शुद्धश्वेतनिभं प्रोक्तं मानं नागविभूषितम् ॥ ७ ॥
दक्षिणे पूर्वहस्तं तु मृगस्याऽऽसन्नकं भवेत् ।
वामे तु पूर्वहस्तं तु वरदं स्यात्कपालधृत् ॥ ८ ॥

दक्षिणे परहस्ते तु डमरुं च धरेद्द्विज ।
वामे तु शिखिपिञ्छं च कर्तव्यं शीतलं घृतम् ॥ ९ ॥
सितवस्त्रोत्तरीयं तु नागेन कटिवेष्टितम् ।
श्वेतयज्ञोपवीतं तु नीलवर्णत्रिपुण्ड्रधृत् ॥ १० ॥
पद्मपीठोपरिष्टात्तु शेषं कङ्कालमूर्तिवत् ॥ ११ ॥

इत्यंशुमद्भेदे काश्यपशिल्पे भिक्षाटनमूर्तिलक्षणं नाम
चतुःसप्ततितमः पटलः ।

॥ अथ पञ्चसप्ततितमः पटलः ॥

अथ वक्ष्ये विशेषेण चण्डेशानुग्रहं परम् ।
उमासहितवत्सर्वं वामे किंचिन्नताननम् ॥ १ ॥
दक्षिणे त्वभयं वर्ज्य तथा त्वाभरणं भवेत् ।
मत्वा(तद्वा)मे कटकं न्यस्य अधस्ताच्चण्डमूर्तिनाम् ॥ २ ॥
हृदयाञ्जलिसंयुक्तौ हस्तौ तदभिसंयुतम् ।
आसनादिसुखासीनं चण्डेशं वर्णसंनिभम् ॥ ३ ॥
देवीदेवेश्वरौ मध्ये स्कन्दमूर्तिं विना बुधः ।
चण्डेशानुग्रहं ख्यातं दक्षिणं कीर्तितं परम् ॥ ४ ॥

इत्यंशुमद्भेदे काश्यपशिल्पे चण्डेशानुग्रहो नाम
पञ्चसप्ततितमः पटलः ।

॥ अथ षट्सप्ततितमः पटलः ॥

अथ वक्ष्ये विशेषेण दक्षिणामूर्तिलक्षणम् ।
लम्बयेद्दक्षिणं पादं वामाङ्घ्रिनल[का]ग्रकम् ॥ १ ॥
सव्योर्वग्रं निधातव्यं वामपादं तु शाययेत् ।
ललाटदक्षिणे सव्ये नेत्रान्तं तत्पुटान्तके ॥ २ ॥
यवत्रयान्तरं नीत्वा लम्ब्य नाभेस्तु मध्यमे ।
मेढ्रमूलं तु मध्ये स्यात्पूर्वसूत्रं प्रलम्बयेत् ॥ ३ ॥

नतमत्यर्थमात्रं स्याच्चतुर्भुजसमन्वितम् ।
दक्षिणे पूर्वहस्ते तु अक्षमालाधरं परम् ॥ ४ ॥
वरदं पूर्वहस्त स्यादष्टहस्तमथापि वा ।
वामजानूपरिष्टाच्च वरदे तलपृष्ठकम् ॥ ५ ॥
वामजानूपरिष्टात्तु दण्डके कूर्परान्न्यसेत् ।
वामे चापरहस्तं तु वह्निर्वा व्यालमेव वा ॥ ६ ॥
अर्धेन्दुवक्त्रं सर्वाङ्गं मम दास्यति कोपकम् । (?)
विकीर्णमूर्धजं वाऽपि जटामण्डलमेव वा ॥ ७ ॥
वामे धत्तूरनागौ च दक्षिणे चन्द्रशेखरम् ।
हसितं वक्त्रसंयुक्तं सर्वाभरणभूषितम् ॥ ८ ॥
सितवस्त्रोत्तरीयं च सितयज्ञोपवीतिनम् ।
त्रिनेत्रं धवलं वामे सव्ये मकरकुण्डलम् ॥ ९ ॥
कर्णौ तु पत्रशङ्खं स्यात्कुण्डलैर्वाऽथमण्डितम् ।
रुद्राक्षे(क्षैः) कण्ठमालाभा हृ(भिर्हृ)न्मालां च
विभू(लाभिश्च भू)षितम् ॥ १० ॥
व्याघ्रचर्माम्बरोपेतं सर्वक्लेशविवर्जितम् ।
नारदो जमदग्निश्च वसिष्ठो भृगु दक्षिणे ॥ ११ ॥
भरद्वाजश्च शुनकश्चागस्त्यो वामपार्श्वके ।
वन्दितं किन्नराद्या(द्यै)स्तु वटवृक्षसमाश्रिताः(तैः) ॥ १२ ॥
अपस्मारोपरिष्टात्तु लम्बपादतलं न्यसेत् ।
सूत्रं तत्पादपार्ष्ण्यं तु वेदं स्यान्मनुमात्रकम् ॥ १३ ॥
सूत्रं तत्पादजान्वोस्तु द्व्यन्तरं भानुमात्रकम् ।
श्यामवर्णमपस्मारं नागलीलासमन्वितम् ॥ १४ ॥
धर्मेव्याख्यानमित्येवं कल्ययेत्कल्पवित्तमः ।
तदेव वामपादेनकुटि[क्कुटा]सनसंयुतम् ॥ १५ ॥
पूर्वहस्तद्वयोर्वीणाधृतं युक्त्या द्विजोत्तम ।
शेषं प्रागिव कर्तव्यमेतद्वीणाधरं परम् ॥ १६ ॥
तदेव वीणाहीनं तु ज्ञानमुद्राभयान्वितम् ।
वामं प्रसारितं हस्तं वामजान्वोर्ध्वको(कू)र्परम् ॥ १७ ॥
दक्षिणे तु परे चाक्षमालां वामेऽब्जमुत्पलम् ।
शुद्धश्वेतनिभं वर्णं शेषं पूर्ववदाचरेत् ॥ १८ ॥

ज्ञानमूर्तिरिति ख्यातं सर्वालंकारसंयुतम् ।
अन्योन्याङ्घ्रितलं विप्र स्पिक्पिण्डाथ (धः) प्रकल्पयेत् ॥ १९ ॥
ज्ञानमुद्रा हि(ह्)दिस्थारे(ने) त्वभ्यन्तरधृतं करम् ।
वरदं वामहस्ते तु मेढ्रपीठोपरि न्यसेत् ॥ २० ॥
दक्षिणे चाब्जमालां(वा) मालाऽब्जं वामहस्तके ।
नासाग्रं तु समीक्ष्याक्षावार्जवं सूत्रभेदकाः ॥ २१ ॥
अपरे तु जटालम्बमृषिभिः सेवितं परम् ।
योगमूर्तिरिति ख्यातं ध्याने दुःखनिवृत्तिदम् ॥ २२ ॥
लम्बयेद्दक्षिणं पादं वाममुत्कुटिकासनम् ।
योगपट्टं तथा बद्ध्वा देहं चोत्कुटिकाङ्घ्रिके ॥ २३ ॥
प्रसार्य वामहस्तं तु वामजानूपरि द्विज ।
प्रागिवैव कृतं शेषं तदपि योगमूर्तिवै(वत्) ॥ २४ ॥
ऊरू मूर्ध्नि समायुक्तौ अन्योन्यं पादपार्ष्णिकौ ।
योगपट्टिकयोपेतं जङ्घामध्यं द्विजोत्तम ॥ २५ ॥
प्रसार्य पूर्वहस्तौ तु जानूपरि निधापितौ ।
अपरे दक्षिणे चाक्षौ वामद्वा(क्षमाला वा)मे कमण्डपः(लुः) ॥२६॥
जटामण्डलसंयुक्तं करोध्या(ट्या) चन्द्रशेखरम् ।
नीलग्रीवासमायुक्तं शङ्खकुन्देन्दुसंनिभम् ॥ २७ ॥
अपरे चार्पयेद्वृक्षः नानासर्पविभूषितः ।
हृन्मालाकर्णमालाद्यादूर्वावक्षोविरोजितम् ॥ २८ ॥
वटवृक्षं समाश्रित्य ऋषिभिः सेवितं पदम् ।
योगमूर्तिरिति ख्यातं सर्वपापहरं परम् ॥ २९ ॥
एवं [चा]नेकभेदेन दक्षिणामूर्तिलक्षणम् ॥ ३० ॥

इत्यंशुमद्भेदे काश्यपशिल्पे दक्षिणामूर्तिलक्षणं
नाम षट्सप्ततितमः पटलः ।

॥ अथ सप्तसप्ततितमः पटलः ॥

अथ वक्ष्ये विशेषेण कालहामूर्तिलक्षणम् ।
वसुनन्दं तु देशांशं वान(भाग)मानं द्विजोत्तम ॥ १ ॥

सूत्रं भान्वङ्गुलं वाऽथ नेत्रसूत्रं मयोच्यते ।
ललाटदक्षिणे सव्ये तन्त्रमध्ये तथैव च ॥ २ ॥
हिक्कासूत्रं च वामे तु वामस्तनाक्षं दक्षिणे ।
नाभिमध्ये तु वामे तु सूत्रान्तरं यवाष्टकम् ॥ ३ ॥
मेढ्रमूलस्य मध्ये तु वामे षडङ्गुलं न्यसेत् ।
स्थिताङ्घ्रिगुल्फमध्ये तु पूर्वसूत्रं प्रलम्बयेत् ॥ ४ ॥
देवस्य दक्षिणं पादं पद्मपद्मोपरि स्थितम् ।
प्रथमं नृत्तमूर्तिस्तु दक्षिणे स्थितपादवत् ॥ ५ ॥
वामपादं धृतोधृत्य कुञ्चितं तलमुद्धृतम् ।
अङ्गुष्ठमुद्धृतं चाग्रे कालस्य हृदयं न्यसेत् ॥ ६ ॥
सुदृष्टिः स्यात्त्रिनेत्रं च जटामुकुटमण्डितम् ।
चतुर्भुजसमायुक्तमष्टहस्तमथापि वा ॥ ७ ॥
दक्षिणे पूर्वहस्तं तु शूलं खट्वाङ्गमुद्धृतम् ।
दक्षिणे परहस्तं तु परशुं वरदं तथा ॥ ८ ॥
वामे पूर्वकरं नाभिसीमान्तं सूच्यतो(धो)गतम् ।
सूच्यग्रं पूर्वसूत्रान्तं कलाम(प)श्चागुलं तु वा ॥ ९ ॥
कर्णशूलधरे हस्ते मणिबन्धान्तरं बुधः ।
वामे तु परहस्तं तु विस्मयं परिकल्पयेत् ॥ १० ॥
हिक्कासूत्रं समं टङ्काकरद्वयान्तरं मुखम् ।
उष्णीषान्तं समुद्धृत्य विस्मयोऽनामिकाग्रकम् ॥ ११ ॥
कण्ठान्तं मणिबन्धान्तं शूलहस्ते समान्तरम् ।
चतुर्देवे(र्हस्ता)ख्यमाख्यातमष्टहस्तमथ शृणु ॥ १२ ॥
शूलं परशुवज्रं च खड्गं दक्षिणहस्तके ।
द्विभुजं वा द्विपादं वा सुदंष्ट्रं पादपाणिकम् ॥ १३ ॥
करण्डमुकुटोपेतं मसूर्यारास्यानिर्गमम् ।
महाभव्यसमायुक्तं सपाशं हृदयं चलम् ॥ १४ ॥
विकीर्णकेशकं दृष्ट्वा शाययेदूर्ध्ववक्त्रकम् ।
कालहामूर्तिमेवं हि प्रोक्तं लिङ्गोद्भवे तथा ॥ १५ ॥

इत्यंशुमद्भेदे काश्यपशिल्पे कालहामूर्तिलक्षणं नाम
सप्तसप्ततितमः पटलः ।

॥ अथाष्टसप्ततितमः पटलः ॥

अथ वक्ष्ये विशेषेण लिङ्गोद्भवमिदं शृणु ।
लिङ्गाकारस्य मध्ये तु चन्द्रशेखरमूर्तिवत् ॥ १ ॥
नलका पाद(काऽङ्घ्रि)तलाविप्र लिङ्गगूढसमन्वितम् ।
पितामहसरूपेण ऊर्ध्वाङ्गं वामपार्श्वके ॥ २ ॥
विष्णुवाहनरुपेण दक्षिणांशं तथागतम् ।
विष्णुर्दक्षिणपार्श्वे तु वामपार्श्वे पितामहः ॥ ३ ॥
हृदयाञ्जलिसंयुक्तौ स्थितौ तु लिङ्गमुच्यते ।
रक्तश्यामहिरण्याभं लिङ्गविष्णुपितामहम् ॥ ४ ॥
एवं लिङ्गोद्भवं ख्यातं वृक्षसंग्रहणं शृणु ॥ ५ ॥

इत्यंशुमद्भेदे काश्यपशिल्पे लिङ्गोद्भवलक्षणं नामाष्टसप्ततितमः पटलः ।

॥ अथैकोनाशीतितमः पटलः ॥

अथ वक्ष्ये विशेषेण वृक्षसंग्रहणं परम् ।
देवानां चैव देवीनां शूलार्थं वृक्षमुच्यते ॥ १ ॥
स्त्रीपुंनपुंसकं चेति वृक्षभेदं त्रिधा भवेत् ।
सुषिरं स्निग्धभूमौ वाऽऽवर्जनीयं दृढं खत(न)म् ॥ २ ॥
अल्पगन्धसमायुक्तं फलं पुष्पं दृढं घनम् ।
शीतलोष्णं च संमिश्रं ल(म)नोहरसमन्वितम् ॥ ३ ॥
एतत्पुल्लिङ्गमाख्यातं देवानां तदिहोच्यते ।
स्निग्धे स्निग्धं च भूमौ वा त्वार्जयित्वाऽतिमार्दुलम् ॥ ४ ॥
मूलादग्रात्क्रमात्क्षीणं पुष्पं चैव प्रलम्बनम् ।
अतिमार्दवसंयुक्तमतिशीतलसंयुतम् ॥ ५ ॥
अतिस्नेहसमायुक्तं रसश्चैव समारभेत् ।
एतत्स्त्रीवृक्षमाख्यातं देवीनां शूलयोग्यकम् ॥ ६ ॥

क्षीणमूलं समाख्यातं फलपुष्पं तथैव च ।
अतिदुर्बलमाख्यातं यत्तत्षण्ड(ण्ढ)मुदाहृतम् ॥ ७ ॥
चन्दनं चम्पकं चैव रक्तचन्दनमेव च ।
चालं च खादिरं चैव सोमशीर्षदिदुक्तकम् ॥ ८ ॥
अर्धनारीशिवं चैव राजातं च मयूरकम् ।
पद्मकं कुटजं चैव सप्तपर्णं च सत्वकम् ॥ ९ ॥
शूलयोग्यं क्रमात्ख्यातं तेष्वन्तस्थदृढं ग्रहेत् ।
जीर्णपर्णान्तश्रित्यावाऽशिरशून्यात्रिशिखिना ॥ १० ॥
स्वयं पतितवृक्षं च स्वयमेव तु शोषितम् ।
कठकाठरसंयुक्तं व्यालपक्ष(क्षि)समाश्रितम् ॥ ११ ॥
नृपमन्दिरमाश्रित्य कर्मकारालयान्वितम् ।
अग्निदग्धाश्च वृक्षाश्च कर्मान्तरनियोजिताः ॥ १२ ॥
वर्जयेत्तु प्रयत्नेन गृहीते कर्मनाशनम् ।
तस्मात्सर्वप्रयत्नेन दोषाढ्यान्परिवर्जयेत् ॥ १३ ॥
शस्तपक्षार्क्षवारेषु शस्तवृक्षांश्च संग्रहेत् ।
आचार्यः शिल्पकर्ता च वृक्षस्थानं तु संव्रजेत् ॥ १४ ॥
वृक्षादधस्तारु(त्तृ)णादि व्यपोह्य लेपनं कुरु ।
एतन्मन्त्रं समुच्चार्य अष्टदिक्षु बलिं क्षिपेत् ॥ १५ ॥
एतद्वृक्षाश्रिता देवा दानवाश्च पिशाचकाः ।
नागा गरुडगन्धर्वाः सिद्धविद्याधराश्च ये ॥ १६ ॥
अयं बिम्बार्थवृक्षस्तु गच्छध्वं र(स्व)हिताय वै ।
इत्यु(क्त्वा) च बलिं दद्याद्ध्यर्जात(ध्योदनं) सपुष्पकम् ॥ १७ ॥
रक्तचन्दनसंयुक्तं गन्धतोयसमन्वितम् ।
वृक्षस्यैशानदिग्भागे पिता(कर्ता) होमं समाचरेत् ॥ १८ ॥
स्थण्डिलं सैकतं कुर्याद्धस्तमात्रप्रमाणकम् ।
अग्न्याधानादिकं सर्वमग्निकार्योक्तमाचरेत् ॥ १९ ॥
समिदाज्यचरुभिस्तु होमं कृत्वा शिवं द्विजः ।
समिधो हृदयेनैव मूलेनाज्यं च होमयेत् ॥ २० ॥

अघोरेण चरुं हुत्वा प्रत्येकाष्टशताहुतीः ।
जयादिरभ्यातानैश्च राष्ट्रभ्यश्चैव(भृद्भिश्च) होमयेत् ॥ २१ ॥
ततस्त्वग्निं समुद्वास्य वृक्षं प्रोक्ष्य शिवाम्भसा ।
शिवात्मकेतिमन्त्रं तु जपाद्व(पन्द्व)क्षं स्पृशेद्बुधः ॥ २२ ॥
वृक्षस्य पूर्वभागे तु मुखं पृष्ठं तु पश्चिमे ।
दक्षिणं सव्यपार्श्वं स्याद्वामपार्श्वं तथोत्तरम् ॥ २३ ॥
ज्ञात्वैवाऽऽलक्षयित्वा तु तस्य च्छेदनमाचरेत् ।
अस्त्रमन्त्रं जपेद्युग्मं मूलं त्रिश्छेद्यलक्षयेत् ॥ २४ ॥
क्षीरतोयदुप(म)श्रेष्टसुक्स्रुवार्थे तु शोभनम् ।
अस्त्रस्रुवेण मन्त्रेण शक्तिहोमं समाचरेत् ॥ २५ ॥
वृक्षमूलं तु शेषं तु स्थपतिर्जपयेत्क्रमात् ।
पूर्वे चोत्तरदेशे तु वृक्षस्यातप(स्य पत)नं शुभम् ॥ २६ ॥
अन्यदिक्पतितं वृक्षं वर्जयेत्तु प्रयत्नतः ।
स्कन्द(न्ध)च्छेदं ततः कुर्यादब्जवन्नान्तरं कुरु ॥ २७ ॥
गव्यैर्गन्धोदकैः स्नाप्य गन्धमाल्यैरलंकृतम् ।
नववस्त्रेण संछाद्य दर्भाभिः(णां) सूक्ष्मरज्जुना ॥ २८ ॥
स्यन्दने शिबिकां रोप्य स्कन्धे धृत्वाऽथवा बुधौ(धः) ।
धृत्वा शशब्दं दत्त्वा कर्ममण्डपमादिशेत् ॥ २९ ॥ (?)
मण्डपमार्जनं कृत्वा गोमयालेपनं कुरु ।
गव्यैर्गन्धोदकैः प्रा(स्ना)प्यगन्धमाल्यैरलंकृतम् ॥ ३० ॥
द्विष(पिष्ट)चूर्णैरलंकृत्वा तन्मध्ये पूर्णवा बुधः ।
स्थण्डिलं कारयेद्विद्वान्शूलदीर्घसमायतम् ॥ ३१ ॥
विस्तारार्धं तदर्धं वा चतुरङ्गुलमुत्तमम् ।
प्रागग्रैः शा(ग्रं स्था)मयेत्तस्मिन्स्थू(ऊ)लवृक्षस्य(म)धोमुखम् ३२
आशुष्के रक्षयेद्विद्वान् समं पक्षमथापि वा ।
पक्षादुक्तं तु कर्तव्यं त्वरितं तु न कारयेत् ॥ ३३ ॥

इत्यंशुमद्भेदे काश्यपशिल्पे वृक्षसंग्रहणं नामै-
कोनाशीतितमः पटलः ।

———

॥ अथाशीतितमः पटलः ॥

अथ वक्ष्ये विशेषेण शूललक्षणमुत्तमम् ।
शुद्धकायश(स)मं वेश्म दण्डदीर्घमुदाहृतम् ॥ १ ॥
मध्योदरं विशालं स्याच्चतुर्भागैकविस्तरम् ।
मूलादष्टांशहीने तु तस्याग्रस्य समं भवेत् ॥ २ ॥
नाभ्यन्तं चतुरश्रं तु हिक्कान्तं वसुकोणकम् ।
तदूर्ध्वे वृत्तमाख्यातं शेषं वृत्तं तथैव च ॥ ३ ॥
द्वात्रिंशदङ्गुलायामं वैकदण्डायतं भवेत् ।
विस्तारं सार्धषण्मात्रं सार्धसप्ताङ्गुलं तु वा ॥ ४ ॥
विस्तरार्धं घनं ख्यातं पक्षदण्डान्तमुच्यते ।
अग्रं युगाङ्गुलं ख्यातं मध्यादग्रं क्रमात्कृशम् ॥ ५ ॥
पक्षदण्डस्य मध्ये तु च्छिद्रं वाऽर्धं गुणाङ्गुलम् ।
हिक्कासूत्रोदयस्यार्धं यावद्वेद्य(द)दशाङ्गुलम् ॥ ६ ॥
पक्षदण्डोर्ध्वसीमा स्याद्वयंशदण्डे तु योजयेत् ।
षोडशाङ्गुलमायामं कटिदण्डस्य देशिकः ॥ ७ ॥
वस्वङ्गुलं तु तत्तारं घनं वेदाङ्गुलं भवेत् ।
मध्ये युगाङ्गुलं छिद्रं तारं पञ्चाङ्गुलोदयः ॥ ८ ॥
कटिदण्डोर्ध्वसीमाद्वा द्वयंशदण्डे तु योजयेत् ।
पक्षदण्डाद(श्र)यो विप्र कटिदण्डाश्रयोऽपि वा ॥ ९ ॥
यथावत्कांशकं कुर्यादनेन विधिना कुरु ।
एकद्वित्रिचतुष्पञ्चषट्सप्ताष्टकरं तु वा ॥ १० ॥
द्विमुखोऽपि तु करिं यन्तु संख्या वकिशिरान्वितम् । (?)
द्वयङ्गुलं तु शिखायाममस्तं संख्योचितस्तु तम् ॥ ११ ॥
पक्षदण्डं विशालं तु हस्तसंख्या तु भाजिते ।
शिलाव्यासं तदेवांशं मालाग्रे तु क्रमात्कृशम् ॥ १२ ॥
कटिदण्डाश्रयं द्वयेकं शिखायामं गुणाङ्गुलम् ।
सार्धाङ्गुलं तु तत्तारं वृत्तं तत्समतद्घनम् ॥ १३ ॥

स्थानकं सकलं चेत्तु मा(ऊ)रुदीर्घपरिद्विज ।
अष्टाङ्गुलं समारोप्य ऊरुशूलायतं भवेत् ॥ १४ ॥
सुशीतं सकले चोरु दीर्घादूर्ध्वाष्टमातृ(त्र)कम् ।
ऊरुशूलसुषिं कृत्वा कटिदण्डाग्रयोर्बुधः ॥ १५ ॥
शिखायां तु समायोज्य यावद्धल(ना)न्तरं यथा ।
जानुमात्रं द्विधा कृत्वा ऊरुजङ्घान(न्त)योरपि ॥ १६ ॥
आरोहयेच्छिखामानं तस्मादारोपयेद्बुधः ।
गुणाङ्गुलं शिखामानं जङ्घादीर्घोरुपर्युतम् ॥ १७ ॥
मध्यबिन्दुसमायुक्तमूर्ध्वाग्रं तु शिखान्वितम् ।
जङ्घानागैकताभ्यासं.....उदाहृतम् ॥ १८ ॥
ऊर्ध्वाश्रयोजस्निग्धासाग्रहस्थ(स्त)शिखरं बुधः ।
गुणाङ्गुलं शिखामानं जानुसंधिछिन्नावधा(ध्युच्छ्रितावधि ॥१९॥
संधिभिन्नाश्रशूलं तु एक एव विधीयते ।
जङ्घादीर्घोपरिष्टात्तु तले मानं तु रोपयेत् ॥ २० ॥
ऊरुमध्ये त्रिभागैकमूरुदण्डस्य विस्तृतम् ।
तस्याग्रं तु त्रिपादं स्याज्जङ्घामूलं च तत्समम् ॥ २१ ॥
ङ्घामूलत्रिभागैकं हीनं जङ्घाग्रविस्तृतम् ।
क्रियापादतलायामं कृत्वा भागं च वाऽऽयतम् ॥ २२ ॥
तलाग्रविस्तृतं द्वित्रिद्व्यशं (तु) विस्तृतान्वितम् ।
एतत्पादतलव्यास उद्ध्यायतापरोस्थितम् ॥ २३ ॥
कर्तव्यं सुषिरं तत्तु जङ्घाग्रास्थू(त्स्तू)पिकायुतम् ।
योज्य स्निग्धं दृढं कृत्वा यद्विशूलमथोच्यते ॥ २४ ॥
बाहुमूलविशालं तु गुणाङ्गुलमुदाहृतम् ।
अग्रद्वयाङ्गुलं व्यासं प्रोष्ठमूलं च तत्समम् ॥ २५ ॥
सार्धद्वयाङ्गुलं वाऽथ प्रोष्ठमूलविशालकम् ।
तन्मूलविस्तृतार्धं(र्धं) स्यात्प्रकोष्ठाग्रविशालकम् ॥ २६ ॥
बाहुप्रकोष्ठयोश्चैव कूर्परौ जानुवद्भवेत् ।
द्व्यङ्गुलं तु शिखामानं योजयेत्तद्दृढं यथा ॥ २७ ॥
पार्श्वयोर्वर्धनं चैव चांसदण्डे तु योजयेत् ।
अतिपक्षान्तरं दीर्घं तदव्यासं त गुणाङ्गुलम ॥ २८ ॥

वंशदण्डसमानम्र ऊर्ध्वकायस्तवान्वितम् ।
अग्रे तु पक्षदण्डे तु मूलदण्डे तु योजयेत् ॥ २९ ॥
स्वाग्रमूले तदा तस्य पार्श्ववंशे द्वयोपरि ।
हस्तपादतलाग्रेऽत्र ताम्रपात्रेण योजयेत् ॥ ३० ॥
आर्जवेद्वस्त्रबिम्बे वा शूलश्चैवावदं कुरु ।
देवानां शूलमेवं स्यादम्बराणां तु वक्ष्यते ॥ ३१ ॥
मध्योदरं त्रिभाज्यैव एकांशं वंशविस्तरम् ।
अष्टांशं हीनमग्रं स्याद्विशालं तस्य सूत्रकम् ॥ ३२ ॥
बाहुपर्यन्तविस्तारं वा तन्य(रया)र्थमिवार्जितम् ।
पक्षदण्डायतं शेषं तस्यार्धं विस्तृतं भवेत् ॥ ३३ ॥
तदर्धं बाहुदं ख्यातं कटिदण्डमथोच्यते ।
कटितारेण भूतांशं युगांशेनान्तदीर्घकम् ॥ ३४ ॥
शेषं प्रागिवकर्तव्यं कश्चद्वेषमथ शृणु ।
आसने वंशदण्डं तु वस्वङ्गुलं तु रेखयेत् ॥ ३५ ॥
युगांशं पृष्ठमानं तु शेषं कर्तशुपोशनम् ।
जङ्घादण्डान्त वि(ष)ष्कम्भं देवयेत्स्थानके बुधः ॥ ३६ ॥
गर्भाग्रं तु प्रवेधं तु ततोऽधस्थं तु तद्भवेत् ।
शूलमेवं समाख्यातमुपशूलमथोच्यते ॥ ३७ ॥
भित्तिमध्यं समारभ्य पक्षदण्डकरान्तकम् ।
उपशूलायतं प्रोक्तमष्टाङ्गुलं नतं भवेत् ॥ ३८ ॥
वेदाङ्गुलं तु तन्नीव्रं शूलयोग्यं समे बुधः ।
शूलव्याससमं वध्याच्छिद्रं तद्द्विंशदान्वितम् ॥ ३९ ॥
भित्तिमध्यं तु मूलं स्यान्मूलं बध्वा दृढं बुधः ।
पक्षदण्डं कटीदण्डं धृत्वा शूलाख्यशूलकम् ॥ ४० ॥
छिद्रे दृढतरं बद्ध्वा तत्परे कीलबन्धितम् ।
उपशूलविधानं च पक्षदण्डपुरं समम् ॥ ४१ ॥
उपशूलबिलायां तु वंशाग्रे सुषिरं कुरु ।
लोहजं दारुजं वाऽथ कीलकं योजयेद्दृढम् ॥ ४२ ॥

बिम्बार्थं शूलमाख्यातं तस्मादुक्तं समाचरेत् ।
शूललक्षणमाख्यातं शूलस्थापनमुच्यते ॥ ४३ ॥

इत्यंशुमद्भेदे काश्यपशिल्पे शूललक्षणं नामा-
शीतितमः पटलः ।

॥ अथैकाशीतितमः पटलः ॥

अथ वक्ष्ये विशेषेण शूलस्थापनमुत्तमम् ।
कर्षणा[शुदि]ते मासे रि(ऋ)क्षे वारे सुलग्नके ॥ १ ॥
निश्चित्य स्थापनं तस्य पुरः कृत्वाऽङ्कुरार्पणम् ।
प्रासादस्याग्रतो देशे मण्डपं चतुरश्रकम् ॥ २ ॥
पञ्चसप्तकरं वाऽथ पदत्रयसमायुतम् ।
षोडशस्तम्भ[सं]युक्तं द्वादशस्तम्भसंयुतम् ॥ ३ ॥
तलमष्टाङ्गुलोत्सेधं प(भि)त्तिव्यासवितुङ्गकम् ।
यथालाभं परीणाहं वामकं नीव्रणं दृढम् ॥ ४ ॥
वलयं वंशनासाढ्यं नालिकेरफलादिभिः ।
शा(स्था)पयेत्तु विधानेन मुक्ताग्रं दर्भमालिका ॥ ५ ॥
तरङ्गवेष्टनोपेतं वरतोरणसंयुतम् ।
चतुर्द्वारसमायुक्तं स्तम्भवेष्टनसंयुतम् ॥ ६ ॥
चतुर्द्वारं विनाऽन्यत्र निश्छिद्रं जालकं तु वा ।
मण्डपस्य त्रिभागैकं वेदिकोदयमुच्यते ॥ ७ ॥
गुणाङ्गुलं विशालोश्च(च्चं) मध्यायोद्धतपेटिका ।
दर्पणोदरसंकाशं कृत्वा रूपं दृढं लिखेत् ॥ ८ ॥
परितश्चाग्निकुण्डानि अनेन विधिना कुरु ।
चतुरश्रं धनुर्वृत्तं पद्मपूर्वादिदिक्षु च ॥ ९ ॥
च(श)क्रशंकरयोर्मध्ये वृत्तकुण्डं प्रकल्पयेत् ।
कुण्डमेवं समाख्यातं केवलानां विशेषतः ॥ १० ॥
गौरीसहितबिम्बं चेत्तत्कोणेष्वर्धपत्रवत् ।
कुण्डानि कल्पयेच्छेषं प्रागिवैव प्रकल्पयेत् ॥ ११ ॥

कुण्डलक्षणवत्कुर्यात्सर्वकुण्डानि देशिकः ।
गोमयालेपनं कृत्वा पिष्टचूर्णैरलंकृतम् ॥ १२ ॥
ब्राह्मणान्भोजयेत्तस्मिन्पुण्याहं वाचयेत्ततः ।
महेन्द्रस्तु पदं यावद्धोमं कृत्वा विधानतः ॥ १३ ॥
वेदिकां (चा)श्चाग्निकुण्डं च पर्यग्निकरणं कुरु ।
निर्दिष्टादिवसात्पूर्वं रात्रौ (त)दधिवासनम् ॥ १४ ॥
स्थण्डिलं वेदिकायां तु अष्टद्रो(णै)श्च शालिभिः ।
कर्तव्यं नालिकेरस्य साष्टपत्रं सकीर्ण(कर्णि)कम् ॥ १५ ॥
तण्डुलैस्तिलदर्भैश्च रा(ला)जपुष्पैरलंकृतम् ।
शयनं चाहतेनैव वस्त्रेणैव प्रकल्पयेत् ॥ १६ ॥
धूपदीपैः समायुक्तं पुष्पगन्धैः समर्चयेत् ।
मण्डपं चो(स्यो)त्तरे पार्श्वे स्नानशुभ्रं प्रकल्पयेत् ॥ १७ ॥
तन्मध्ये दारुपीठं तु न्यस्या(स्येत्त)स्योपरि द्विजः ।
प्राङ्मुखं स्थापयेच्छूलं पञ्चगव्याभिषेचितम् ॥ १८ ॥
शुचि हव्योति मन्त्रेण कृत्वा गन्धोदकै(र्ह)दः ।
स्थापयेद्देवं देवीं च गन्धपुष्पैः समर्चयेत् ॥ १९ ॥
कौतुकं बन्धयेद्देवांस्ततो दक्षिणहस्तयोः ।
स्वर्णकार्पाससूत्रैर्वा कवचैरेव बन्धयेत् ॥ २० ॥
लम्बकूर्चसमायुक्तं वाद्यध्वनिसमायुतम् ।
शयनं शा(स्था)पयेच्छूलं प्राक्छिरश्चोर्ध्ववक्त्रकम् ॥ २१ ॥
तस्य वामे ह्युमादेवी शूलं वै शाययेत्सुधीः ।
तयोः शिरोऽग्निके देशे स्थापयेत्तु पटद्वयम् ॥ २२ ॥
सूत्रं सर्वाभिधानं च सकूर्चं वस्त्रवेष्टनम् ।
द्रोणकुम्भाम्बुसंपूर्णं शिवकुम्भं तदुच्यते ॥ २३ ॥
तस्यार्धं तोयसंपूर्णं प्राग्वत्सूत्रादिभिर्युतम् ।
गौरीबीजसमायुक्तं गोत्र(गौरी)कुम्भमिदं परम् ॥ २४ ॥
तन्मूलमध्यमे कुम्भं न्यस्य कुम्भा(गन्धा)दिभिर्यजेत् ।
गौरीकुम्भे तु तस्यास्तु मन्त्रं न्यस्य विशेषतः ॥ २५ ॥
परितोऽष्टघटान्न्यस्य सूत्राद्यैश्च समन्वितान् ।
विघ्नेशान्मूलमन्त्रैश्च स्थाप्य गन्धादिभिर्यजेत् ॥ २६ ॥

वास्तुहोमादिकुण्डे तु अग्निं संस्थाप्य देशिकः ।
अग्न्याधानादिकं सर्वमग्निकार्योक्तमाचरेत् ॥ २७ ॥
अग्न्यर्थं पूर्वकुण्डे तु वह्निमाग्नेयगोचरे ।
याम्ये चौदुम्बरं ख्यातं खदिरं नै(ऋ)र्तिं द्विज ॥ २८ ॥
बिम्बं पश्चिमभागे तु मयूरं वायुगोचरे ।
पटं वै सौम्यकुण्डे तु खदिरं वास्तु देशिकः ॥ २९ ॥
प्रधाने ब्रह्मवृक्षः स्यात्समिद्वौरि(द्वौरी)समन्वितम् ।
विद्याकुण्डेषु कुण्डानि गौरीहीनानि कारयेत् ॥ ३० ॥
समिदो हृदयेनैव पुरुषेण घृताऽऽहुतीः ।
अघोरेण चरुं हुत्वा दा(त्वा)द्यां वामे तु होमयेत् ॥ ३१ ॥
चरुस्मिन्शाण(मीशान)मन्त्रेण तिलं वै शिरसाहुतिः ।
सर्षपं कवचेनैव शिखामङ्गलमुच्यते ॥ ३२ ॥
गलमस्त्रेण मन्त्रेण प्रत्यहं जुहुयाच्छतम् ।
उच्यते व्याहृतिं हुत्वा देवदेव्युचितं समम् ॥ ३३ ॥
जयादिभि(द्यै)रभ्यातानैश्च राष्ट्रभृच्चैव(द्भिश्च) होमयेत् ।
दिशास्वध्यायतं वेदांस्तोत्रैस्तु[हि]शिखामुखैः ॥ ३४ ॥
अध्यानं कृततोदग्रमुपांशुं होममाचरेत् ।
देवदेवीशयोर्मूलमन्त्रैरष्टादशाऽऽहुतीः ॥ ३५ ॥
घृताहुतीस्तु कर्तव्यं भस्मस्नानमतः परम् ।
शुक्लवस्त्रोत्तरीयं च शुक्लयज्ञोपवीतधृत् ॥ ३६ ॥
शुक्लमालानुलेपाद्यैस्त्रिषु पञ्चाङ्गभूषणैः ।
पवित्रपाणिनोपेतः सकलीकृतविग्रहः ॥ ३७ ॥
आचार्यः सुप्रसन्नायुः (स्यः) शिवद्विजकुलोत्तमः ।
प्रविश्य गर्भगेहं तु एकाशीतिपदं कुरु ॥ ३८ ॥
मण्डूकाख्यपदं वाऽथ सप्तसप्तांश एव वा ।
गर्भगेहे तु कर्तव्यं ज्ञात्वा ब्रह्मोदयं परम् ॥ ३९ ॥
स्थानकं देविकांशे तु आसनं मानुषे पदे ।
गर्भगेहपरे भागे स्थापयेद्देशिकोत्तमः ॥ ४० ॥
आसनं भद्रपीठेन स्थानकं वेदिकोपरि ।
प्राग्युक्तविधिना पीठव्यासायागो(मो)दयादयः ॥ ४१ ॥

कर्तव्यं सुन्दरं तस्मिन्नाधाराख्यशिलां न्यसेत् ।
पीठग्राह्यत्रिपादं तु आसा(धा)राख्यशिलातलम् ॥ ४२ ॥
समग्रमायतं वाऽपि तदर्धं तद्धनं भवेत् ।
स्थानकं सकलं चेत्तु पादाधस्ताद्द्विजोत्तम ॥ ४३ ॥
आधाराख्यशिलायां तु रत्नाङ्गुल्यं प्रकल्पयेत् ।
निम्नं षडङ्गुलं ख्यातं कर्तव्यं सगुणाङ्गुलम् ॥ ४४ ॥
मूले तु नवरत्नं वा होमपात्रं विनिक्षिपेत् ।
शूलपादतलाधस्तात् षण्मात्रं वाऽऽयतान्वितम् ॥ ४५ ॥
प्रागेव कल्पयेद्धीमान्स्थापनार्थं बलान्वितम् ।
प्रवेशेग(विशेद्र)र्भगेहे(हं) तु मूलमन्त्रं समुच्चरन् ॥ ४६ ॥
स्थापयेत्तु पदे शूलं मूलमन्त्रं दृढं तथा ।
अष्टबन्धं दृढं कृत्वा सुधया च विशेषतः ॥ ४७ ॥
तस्य वामे तथा स्थाप्यं गौरीशूलं विशेषतः ।
आधाराख्यशिलायां च गर्भभाजनमाग(य)तम् ॥ ४८ ॥
पञ्चषट्सप्तमात्रं वा गर्तव्यासं तथा तस(सम)म् ।
गर्भन्यासं तु तत्रैव गर्भभाजनसंयुतम् ॥ ४९ ॥
प्रागुक्तविधिना सम्यक्गन्धपुष्पादिभिर्यजेत् ।
स्थापयेत्पूर्ववच्छूलं मूलं वै द(ग)र्भभाजनम् ॥ ५० ॥
अथाशेषं तु यत्कर्म शिल्पिभिस्तु विशेषतः ।
कर्तव्यं लक्षणोपेतं स्थपतिः शिल्पिरुच्यते ॥ ५१ ॥
स्थपतिः शिल्पकर्मा च योग्या त्व(ग्यस्त्व)न्यस्तु कारयेत् ।
कृतं चेदन्यथा विप्र कर्तुरिच्छा भविष्यति ॥ ५२ ॥
आचार्यः पूजयेत्तत्र पञ्चनिष्कं हिरण्मयम् ।
शूलस्थापनमाख्यातं रज्जुबन्धमथ शृणु ॥ ५३ ॥

इत्यंशुमद्भेदे काश्यपशिल्पे शूलपाणिलक्षणं नामै-
काशीतितमः पटलः ।

॥ अथ द्व्यशीतितमः पटलः ॥

अथ वक्ष्ये विशेषेण रज्जुबन्धं सविस्तरम् ।
सर्वशूलस्य बन्धस्तु ताम्रपत्रैः सुवेष्टयेत् ॥ १ ॥
शूलेऽष्टबन्धमालिप्य रज्जुबन्धं ततः कुरु ।
श्रीवेष्टकं दुरुष्कं च गुग्गुलं च गुडं तथा ॥ २ ॥
सर्जकं गैरिकं चैव घृततैलेऽष्टबन्धनम् ।
श्रीवेष्टकं चतुर्भागं कुन्दुरुष्कं गुणांशकम् ॥ ३ ॥
गुग्गुलं पञ्चभागं स्यादेकांशं गुलमुच्यते ।
सर्जकः स तु वस्वंशं गैरिकं तु गुणाङ्गलम् ॥ ४ ॥
षडेते सूक्ष्मचूर्णं तु कृत्वाऽऽज्यतैलमिश्रताः ।
मृत्पात्रे तु विनिक्षिप्य पचेत्क्षौद्रादिकं वरम् ॥ ५ ॥
तथैव शूलमालिप्य रज्जुबन्धं ततः कुरु ।
रज्जुबन्धस्तु नाहे तु मध्यं स्यादूर्ध्वगं त्रिधा ॥ ६ ॥
सुषुम्ना मध्यमा ख्याता पिङ्गला तस्य दक्षिणा ।
इडा वै तस्य वामस्था प्रधानेनार्ध्वयास्तिमे(नोर्ध्वगास्त्विमाः)॥७॥
द्व्यङ्गुलं तु परीणाहं युक्तास्ता वै त्रिवर्तिकाः ।
तेषां नाडीत्रयाणां तु मूलमेद्रावसानकम् ॥ ८ ॥
तेनास्थिमूलवद्भिन्ना राडीयो(नाडयो)ऽष्टादशस्तथा ।
विमला घोषिणी प्रायसचाहहसितेजसा ॥ ९ ॥ (?)
वायविर्गतती चैव मर्दिनी घोषिणी तथा ।
रसवती मृदङ्गी च स्तिसनी च तथैव च ॥ १० ॥
शब्दस्पर्शादिपूर्णा च सुसिंही वारिधारिणी ।
वाहिनीति समाख्याता त्रिषट्संख्या विधानतः ॥ ११ ॥
प्रत्येकं त्रियवव्यासा त्रित्रिवर्तिर्द्विवर्तिका ।
तेष्वादौ रसनाडी तु सर्वपादोरुमूलकम् ॥ १२ ॥
ऊरुमूलैः क्रमाद्वृत्त्या परितो नलिकान्तकम् ।
लम्बितास्ते समाख्याताः सा वै पिङ्गलमूलकम् ॥ १३ ॥
शब्दादीनि [तु] षट्संख्या इडामूले समुद्भवा ।
एषां वै रसनाडीनां वामपादे तु सन्त्यवत् ॥ १४ ॥
नलकाग्रैवमावृत्त्या षण्णामग्रैकवर्तिता ।
सुषुम्ना मूलगाः शेषा वंशपार्श्वाङ्गरोहिताः ॥ १५ ॥

पक्षदण्डोपरिष्टं तु(ष्टात्तु) तिर्यग्बाहुगतास्त्विमे ।
गगनी मर्दनी चैव रोहिणी दक्षिणे करे ॥ १६ ॥
रसावादि(वर्ती)मृदङ्गी च सूक्ष्मिसना(सिंसनी) वामबाहुका ।
बाहुमूले समावृत्य त्रिष्वग्रं चैव(क)वद्धवेत् ॥ १७ ॥
तस्याग्रे द(अ)ष्टशाखासु दक्षिणे दक्षिणे तथा ।
बाहुमूलं तथान्तं तु नाडयोऽष्टौ प्रसारिते ॥ १८ ॥
तेषामग्रैकविप्राणिबन्धैकप्रणवावृतम् ।
एवं वामे तु दृष्टं स्याद्धस्तं प्रणवमाचरेत् ॥ १९ ॥
एवं हि प्रतिमानं तु नाडीनामष्टविंशतिः ।
प्रधाना नाडयस्त्वेवं कल्पयेत्तन्त्रवित्तमः ॥ २० ॥
तेषु भिन्नास्तथा विप्र अष्टाष्टौ नाडयस्तथा ।
तस्मात्तदेकनं नाडी सर्वाङ्गं तु समावृतम् ॥ २१ ॥
चतुःसप्तसहस्राणि नाडयः परिकीर्तिताः ।
नाडिहस्तावृताः शूला जीर्णकः शूलपात्रवत् ॥ २२ ॥
नालिकेलफलैः पक्वैः घृतकल्पलयान्वितम् ।
चर्मासारं गृहीत्वा तु सारादन्यास्रवाहता ॥ २३ ॥
नाडयः स्वा हि संकल्प्य पश्चादावृतनाडिकाः ।
षडग्रवं तु परीणाहं रज्जुमापातयेद्दृढम् ॥ २४ ॥
पश्चात्तु रज्जुरज्जुभ्यां बन्धयेद्दक्षिणावृतम् ।
हृत्पद्मसाष्टपत्रं तु रज्जुना बन्धयेद्बुधः ॥ २५ ॥
तस्य नालं तु नाभ्यन्तं सुषुम्णा(म्ना) सह साधितम् ।
जीवस्थानं तु तत्पद्ममित्युक्तं हि मयाऽधुना ॥ २६ ॥
मूलमन्त्रमनुस्मृत्य रज्जुबन्धं ततः कुरु ।
रज्जुबन्धमिति ख्यातं मृत्संस्कारमतः परम् ॥ २७ ॥

इत्यंशुमद्भेदे काश्यपशिल्पे रज्जुबन्धलक्षणं
नाम द्व्यशीतितमः पटलः ।

॥ अथ त्र्यशीतितमः पटलः ॥

मृत्संस्कारमहं वक्ष्ये संक्षेप्याशू(प्य शृ)णु सुव्रत ।
जाङ्घलं जानुरूपं च संमिश्रं मृत्त्रिधा भवेत् ॥ १ ॥

अंशत्वेन खनेत्पार्कं सुत्रीडिजाङ्गलं भवेत् ।
तनुवालुकसंयुक्तं तनुक्लेशात्खनक्षमम् ॥ २ ॥
त्रिहस्तं मनोरमं सन्तु(त्तु) दृष्टं वत्सानुरूपकम् ।
तयोर्मिश्रविमा(मिवा)कारं मिश्रलं तदुदाहृतम् ॥ ३ ॥
तेषु शेष्या जवोपेता शुद्धभूमौ मनोरमे ।
नदीतीरे तटाके वा श्वेतासृक्पीतकृष्ण वा(ला) ॥ ४ ॥
पङ्कं संग्राह्य पात्रेषु जलमास्रावयेत्तु वा ।
पात्रस्थं शोषयेत्पङ्कं यावदल्पदृढान्वितम् ॥ ५ ॥
तावद्रक्ष्या च बालाक्षिताम्भसं विप्र मर्दयेत् ।
ईषद्द्रवसमायुक्तं पिण्डं कृत्वा तु तन्मृदा ॥ ६ ॥
पिण्डहस्ते नले रेखा दृशे पिष्टं तथा कुरु ।
यवताराष्टकेनैताः कल्प्यमानं तलेन तु ॥ ७ ॥
रुद्राङ्गुलीपरीणाहं प्रस्तं(स्थं) मुक्तमुदाहृतम् ।
सिक्तं च शिलापूर्णं सदृशं कल्पयेद्बुधः ॥ ८ ॥
मृत्तं वैकं तु(त)देकांशं योजयेत्तु मुदा स हि ।
फलं भोगिसमं दद्याद्दशाहे वाऽष्टसप्तके ॥ ९ ॥
यवगोत्रममाक्षं च तत्त्वसीचूर्णसंयुतम् ।
मृदेऽष्टांशं समायोज्यं नालिकेलफलोदकैः ॥ १० ॥
पात्रे वा मर्दयेद्भस्म देशहातृकमे ततः ।
श्र(श्री)वेष्टं गुग्गुलं चैव कुन्दुरुष्कं तथैव च ॥ ११ ॥
तथा सर्जरसाचूर्णं मृत्कालांशं शिवांशकम् ।
पात्रे मृदा समायोज्यं दधिना मर्दयेत्सुधीः ॥ १२ ॥
चूर्णी च पिप्पली चैव मरीची रसनी तथा ।
समचूर्णं तु कर्तव्यं उद्देशांशैः सुसंयुतम् ॥ १३ ॥
मधुक्षीरघृतेनैव मृदं पात्रेण मर्दयेत् ।
कपित्थबिल्वनिर्यासचूर्णौ द्वौ समतां कुरु ॥ १४ ॥
मृदे पञ्चदशांशे वा तैलचूर्णसमायुतम् ।
मर्दयेत्क्रमसाम्यार्क(र्थं) कुष्ठगैरिकतालकम् ॥ १५ ॥

चन्दनागरुकर्पूरगोशु गोरोचनं समम् ।
ग्राह्यं चूर्णं तु कर्तव्यं मुक्ता(क्तां)शांशसमन्वितम् ॥ १६ ॥
अतसीस्नेहसंयुक्तं मर्दयेद्वेशिकोत्तमः ।
सुपर्णराजिताचूर्णं चापल्ये गुलिकावहे ॥ १७ ॥
दिग्दिगञ्चादि सस्यादि सागरे च हलस्तले ।
गजदन्ते वृषशृङ्गे गोमृगैश्च विशेषतः ॥ १८ ॥
यथालाभं तु कर्तव्यं नानागन्धसमन्वितम् ।
कपित्थं चैव निर्यासं मधु वा मर्दयेद्बुधः ॥ १९ ॥
पञ्चरात्रमितीकृत्य नारिकेलफलं तथा ।
त्वक्सारं तु परीगृह्य एकसारं द्व्याङ्गुलम् ॥ २० ॥
सार्धद्व्याङ्गुलं वाऽथ मानेन च्छेदयेद्बुधः ।
मृच्चतुर्थसमायुक्तं मध्यमे वा'त(स)मारभेत् ॥ २१ ॥
राज्यं धेनुमृदं लिप्य ततोऽपि ऋजुवेष्टनम् ।
तदुरुज्जुं नरं विप्र एकद्वित्र्यङ्गुलं तु वा ॥ २२ ॥
ततो वै मृत्समालिप्य यावच्छोषणकं द्विज ।
तावन्निरीक्ष्य कर्तव्यं मृल्लेपं तु शनैः शनैः ॥ २३ ॥
शूलब्राह्मागतव्यासचतुर्भङ्गविभाजिते ।
एकांशावधिकं लिप्य अनुरूपमुदाहृतम् ॥ २४ ॥
द्व्यंशाक्शतमिश्रं स्याद्भागेन त्वनलावधि ।
तत्तद्देशमृदेनैव तत्तद्योग्यं समालिपेत् ॥ २५ ॥
शेषं कालेन संपूर्य वेदं शेषं सवल्कलम् ।
शेषं कार्पासतन्त्वादि युक्तं कल्के तु कल्पयेत् ॥ २६ ॥
मृत्संस्कारमिदं ख्यातं कल्कसंस्कारमुच्यते ॥ २७ ॥

इत्यंशुमद्भेदे काश्यपशिल्पे मृत्संस्कारलक्षणं नाम
त्र्यशीतितमः पटलः ।

॥ अथ चतुरशीतितमः पटलः ॥

अथ कल्कविधानं तु वक्ष्ये संक्षेपतः क्रमात् ।
नद्यां वाऽपि तटाके वा दीर्घिकायामथापि वा ॥ १ ॥
सस्यक्षेत्रेऽथवा विप्र प्राणिरूपे जले भवेत् ।
सुदृढा शुद्धजलजा स्थूलवालुकमुद्रिता ॥ २ ॥
सैग्राह्या शर्करा ह्येषा तस्याः प्रक्षालनं कुरु ।
शर्कराशोषणं कृत्वा सूक्ष्मचूर्णं तु तत्कुरु ॥ ३ ॥
तिलोदकसमं पिण्डं कृत्वा तच्छोषयेत्क्रमात् ।
अबन्धनिर्यासजलं त्रिविधं प्रोक्ष्यते द्विज ॥ ४ ॥
पञ्चगुणं तु निर्यासं सपद्वेतु षड्गुणम् ।
स्वश्रुतं स्वाचलं चैव सैकतं च क्रमोदितम् ॥ ५ ॥
स्वश्च सेकजले पिण्डं वेष्टयेत्तु यथाक्रमात् ।
कार्पासतन्तवश्चापि मृदं कृत्वा सुपोषयेत् ॥ ६ ॥
त्रियवं कल्कभित्ते तु कदलीभिस्तदर्थवत् ।
एतत्कल्कं यथायोग्यं कल्य एव हि निर्यसा ॥ ७ ॥
त्रिगुणं मध्यमं चात्र कन्यसं तु चतुर्गुणम् ।
बन्धबद्धं जलं ह्येवं त्रिविधं परिपठ्यते ॥ ८ ॥
तेष्वादौ गुडजलेन मर्दयेत्तु पुनः पुनः ।
क्रमेण लेपयेत्कल्कं व्यवक्रिया यवं घनम् ॥ ९ ॥
शनैः शनैर्लेपनं कृत्वा भिन्नच्छिद्रविवर्जितम् ।
यममासं त्रिसमासं वा मासं वा शोषयेत्पुनः ॥ १० ॥
कुश्वन्नव्यान्नको विप्र पेषितो पोषयेत्क्रमात् ।
ततः स्वच्छं जलेकं च प्रमाणं तं तु लेपयेत् ॥ ११ ॥
बाहुकूर्चप्रमाणं तु शोध्यमानसमं नयेत् ।
अङ्गोपाङ्गं च प्रत्यङ्गं कल्पयेल्लक्षणान्वितम् ॥ १२ ॥
करचरणोदग्रादग्रि अङ्गमित्यभिधीयते ।
उपाङ्गं भूषणं ख्यातं प्रत्यङ्गं चाह नार्हणा ॥ १३ ॥
कपित्थनिर्यासरसं सार्धत्रिगुणांशकम् ।
वनच्छादं चतुर्भागं कल्कमालेपयेत्ततः ॥ १४ ॥
तत्तत्कल्कं तु पष्ठ्यंशाह्लादपरस्ततम् ।
योस्स(यः स)न्ततो च(तश्च) कूर्चेन प्रोक्ष्यं तु पोषयेत् ॥ १५ ॥

मस्तानान्वितमिन्द्रं यवस्थयेलक्षण ... . ।
.... ॥ १६ ॥
इत्येते कल्कसंस्काराः प्रोच्यते(क्ताश्च) सकलस्य तु ॥ १७ ॥

इत्यंशुमद्भेदे काश्यपशिल्पे कल्कसंस्कारलक्षणं नाम
चतुरशीतितमः पटलः ।

॥ अथ पञ्चाशीतितमः पटलः ॥

अथ वक्ष्ये विशेषेण वर्णसंस्कारलक्षणम् ।
शिवात्परमसद्भावं द्रव्यकाच्छशिसंभवम् ॥ १ ॥
शिवाच्छक्तिः समुत्पन्ना तस्या नादः समुत्थितः ।
तस्मात्सर्वं समुत्पन्नं तस्मादनिलसंभवः ॥ २ ॥
अनिलादापः संभूतं तस्माद्वै क्षिति संभवम् ।
श्वेतं रक्तं तथा पीतं कृष्णं चेतिचतुर्विधम् ॥ ३ ॥
जले सच्छ्वेतमग्नौ च रक्तं निभवेद्भवम् । (?)
भुवने पीतवर्णश्च नीले कृष्णस(स्य) संभवः ।
विष्णुर्महेश्वरो गौरी रुद्रो वर्णाधिपाः क्रमात् ।
विप्रक्षत्रियविट्शूद्राः सितवर्णादयः क्रमात् ॥ ५ ॥
श्वेतं रक्तं च पीतं च कृष्णं चैव चतुर्विधम् ।
श्वेतं चैव तु शुक्लं च धवलं च विनात्तकम् ॥ ६ ॥
मुक्ताभं चेषुवर्णाभं श्वेतवर्णमिदं सितम् ।
शङ्खवर्णसमं शुक्लं प(व)र्णमित्युतमा(त्तमं)मया(तम्) ॥ ७ ॥
रजताभं च गोक्षीरसदृशं धवलं भवेत् ।
तारकासमवर्णं तु अतारकमुदाग्रतः ॥ ८ ॥
अरुणं रक्तशोणं च अग्निएदं(रेवं) चतुर्विधम् ।
अरुणं शोकनाभं तु पद्मपुष्पाभरत्नकम् ॥ ९ ॥
शोणकं शुकपुष्पाभं राक्षसानां तु पाटलम् ।
स्वर्णपिङ्गं च पीतं च हरितालं चतुर्विधम् ॥ १० ॥
स्वर्णवर्णवपुं पुण्ड्रं विसङ्कजनिसारवत् ।
हरितालं च पीतस्य हरितं रज्जुमत्त्रवत् ॥ ११ ॥

नीलं श्यामं च कालं च कृष्णं चैव चतुर्विधम् ।
मेघवर्णसमं नीलं श्यामं वै नलया समम् ॥ १२ ॥
शिखिवर्णसमं कालं कृष्णं च भृगुपत्रवत् ।
एवं षोडशभेदं तु वर्णभेदं स्वजन्त्रकम् ॥ १३ ॥
धरणीजसमुच्छिष्टं रक्तं त्रासाग्रसंभवम् ।
अथवा जातिलिङ्गं तु रक्तभासं द्विधा स्मृतम् ॥ १४ ॥
गौदावर्या तु संस्कृतं हलालवमुदाहृतम् ।
अतसीपुष्पसंकाशं रजायत्ताश्वमुच्यते ॥ १५ ॥
श्यामपाषाणसारं तु श्याममित्यभिधीयते ।
दिवेप्तत्तरजोत्पू(दीपोत्पन्नरजोव)र्णं कृष्णवर्णमुदाहृतम् ॥ १६ ॥
एवमादिकलावर्णास्तस्मिंस्तस्मिन्ननेकधा ।
मिच्छेत लक्षसारं च दिवोद्भूतरजस्तथा ॥ १७ ॥
ऊरुं चापिमिनीलाघयां तुरन्यांभिधीयते ।
एवं स्वतः प्रयाणं तु वर्णबिम्बानकामतम् ॥ १८ ॥

इति काश्यपे वर्णसंस्कारलक्षणम् ।

यंलाकामाहकं वर्णा वक्ष्ये संक्षेपतः क्रमात् ।
पीताभ्यासं तु पीतं स्यात्तादृशं पूर्णवत्कृतम् ॥ १९ ॥
नारिकेलोदकैर्मिश्रं दहेरक्तनिभं भवेत् ।
तत्सुधाकर्मरक्तस्य शवे दीर्घसिता भवेत् ॥ २० ॥
राजावर्तं च श्यामं च पाषाणौ द्वौ च पूजितौ ।
जनासनं वशस्ताः स्युः सुधाकर्मसु सुव्रत ॥ २१ ॥
अथःसंस्कारवर्णं तु वक्ष्यते द्विजसत्तम ।
सितं रक्तं समं मिश्रं गौरं च विरुदाहृतम् ॥ २२ ॥
सितं पीतं समं मिश्रं यत्तत्पूरकं भवेत् ।
सितवत्कं कृष्णसंमिश्रं समावर्णनिभं भवेत् ॥ २३ ॥
श्वेतं कृष्णं च पीतं च समभागं तु मिश्रितम् ।
धारं च विरिदं ख्यातं वर्णकर्मसु चो(त्कट)कृतम् ॥ २४ ॥

श्वेतं रक्तं च पीतं च संमिश्रकमुदाहृतम् ।
रक्तं पीतं समं मिश्रं बकुलस्य फलाकृति ॥ २५ ॥
ज्वलनच्छविरि(नाभमि)दं ख्यातमग्निवर्णमिदं परम् ।
पीतस्य द्विगुणं रक्तं मिश्रं तत्त्वतिरक्तकम् ॥ २६ ॥
उभयात्सममन्येन द्वयर्णमित्युच्यते तु वामया ।
रक्तस्य द्विगुणं विषमिश्रितं गुल()वर्णकम् ॥ २७ ॥
पीतस्य च तदर्धं तु मिश्रितं कपिलं भवेत् ।
सितवेदांशरक्ताढ्यं खर्परस्य समं भवेत् ॥ २८ ॥
तदेवानिलमाधिक्यधान्याङ्कुरमुदाहृतम् ।
श्यामस्यारितलाढ्यं च कुङ्कुष्टा(मा)रितलार्धकम् ॥ २९ ॥
मिश्रितं स्यात्सस्यमस्याः कृष्णालाक्षं च संमितम् ।
जम्बूफलसमं त्वेतद्वर्णमित्युच्यतेऽथवा ॥ ३० ॥
जातीफलं समं लाक्षासारं लोहितमुच्यते ।
कृष्णं नीलं समं मिश्रं केशवर्णमुदाहृतम् ॥ ३१ ॥
सस्यश्यामं च रक्तं च मिश्रं मञ्जिष्ठवर्णकम् ।
कृष्णं पीतं समं मिश्रं मधुवर्णमुदाहृतम् ॥ ३२ ॥
कृष्णस्य द्विगुणं पीतं मानुषं वर्णमुच्यते ।
मानुषं रक्तमाधिक्यं हरितं ममताभशाम् ॥ ३३ ॥
निहोपेतदातृवर्णमुदाहृतम् .... ।
तेषु यन्नस्यमल्पेन बाहुमानसमन्वितम् ॥ ३४ ॥
बाहुसामेति तत्ख्यातं द्रव्याल्पादिच मानितम् ।
अल्पसारमिदं ख्यातं सलेपाकल्पितं विदुः ॥ ३५ ॥
वर्णानामानुकूलस्य सममेव समाश्रितम् ॥ ३६ ॥

इत्यंशुमद्भेदे काश्यपशिल्पे वर्णसंस्कारलक्षणं
नाम पञ्चाशीतितमः पटलः ।

॥ अथ षडशीतितमः पटलः ॥

अथ वक्ष्ये विशेषेण वर्णलेपनमुत्तमम् ।
शैलकासपिष्टकार्हा नि(त्रि)धा वै वर्णलेपनम् ॥ १ ॥

शैलजे वर्णपेक्षा चेदङ्गोपाङ्गनिलामधि ।
उपरिष्टाच्चाद्यतः स्यात्मशकला प्लावयेत् ॥ २ ॥
श्वेतवद्यस्तु तदूर्ध्वे चित्यणं लिप्यश्वेतश्वेतवर्णादमस्तु (?) ।
बिम्बोचिरलिप्रतिष्ठासम्यगागाचरेत् ॥ ३ ॥(?)
अथवा शैलजे बिम्बे पटाच्छदं विनोर्ध्वतः ।
यवमानं तु लिप्याचित् ....नमः ॥ ४ ॥
श्वेतं च बिम्बवर्णं च क्रमेणोचितं लिपेत् ।
शिलागर्भमिदं ख्यातं पर्णहीनाममेव वा ॥ ५ ॥
शूलस्थापनकर्मादि दारुगर्भं तु पूर्ववत् ।
चित्रं वाऽप्यर्धचित्रं वा पक्षेष्टकस्मयान्वितः ॥ ६ ॥
अङ्गं समं कर्णकं कृत्वा पठमं छादयेत्ततः ।
चर्वाष्ठानि च सर्वाणि शैलजे तु यथा तथा ॥ ७ ॥
कर्तव्यमिष्टगर्भं तु दारुमित्रं तु तन्तु वा ।
एवं त्रिविधनित्य तु वर्णलेपमुदाहृतम् ॥ ८ ॥
आदौ श्वेतनिभं लिप्य सबास्यस्यजमेव वा ।
क्रमेण श्वेतवर्णं तु त्रिभक्त्या वा तु लेपयेत् ॥ ९ ॥
तदूर्ध्वे पाजवर्णं तु लेपयेद्द्विजसत्तमः ।
सितबिम्बनिभं चैव समं मिश्रं तु वाक्य(स्तु)वत् ॥ १० ॥
सितं वर्णेन बिम्बानां मधुवर्णनिभं भवेत् ।
रक्ष्यादीनिभास्यानां पाण्डुवर्णं प्रकल्पयेत् ॥ ११ ॥
बद्धसंचं च मेवं च एवं [तत्तु] त्रिधा भवेत् ।
कपित्थनिर्यासेनैव त्रिसंध्यं तु प्रकल्पयेत् ॥ १२ ॥
स्वच्छतो लेपमाख्यातं मध्यमं मधुसदृशम् ।
तरुणं दधिसादृश्यं स्निग्धं द्रोणदरं भवेत् ॥ १३ ।
मेदुरेण भवेच्छिष्टं [त्वेवं] संधानमाचरेत् ।
कल्पमर्दनकार्यं तु कारयेन्द्रव्यसारिणा ॥ १४ ॥
कल्पवत्स्वच्छजलेनैव पेषणं तु समाचरेत् ।
सुधाकर्मजलोपेते महापेमेषचर्मयोः ॥ १५ ॥

पर्यासारं तु बद्धं स्याज्जलपात्रैकं भवेत् ।
जलपत्तिविना यत्र तत्र कापित्थज द्विजः ॥ १६ ॥
निर्यासजलसंबन्धमुक्तमन्यन्न कारयेत् ।
कल्कं षोडशधा भज्य षट्पञ्चचतुरं तु वा ॥ १७ ॥
कपित्थनिर्यासेनैव स्वच्छं नैव जलं भवेत् ।
सकृच्चिक्कणलेपं तु कारयेद्द्विजसत्तमः ॥ १८ ॥
चिक्कणं कल्कसारं च द्विविधं चिक्कणं भवेत् ।
जलपात्रं सुधाकुम्भे चिक्कणं शर्करद्रवम् ॥ १९ ॥
चिक्कणं द्विविधं चैव कल्पयेत्तु यथोचितम् ।
चिक्कणं कल्कबन्धं तु दशभागविभाजिते ॥ २० ॥
एकांशरहितं बद्धं शिलोपवनं तु (लालेपन)योग्यकम् ।
चिक्कणे बन्धतुल्यं वा सितलेपनकर्माणि ॥ २१ ॥
सितबन्धसमं वाऽथ तद्दशांशं विहीनकम् ।
पास्थांवर्णस्य बद्धस्य स्त्री(त्रिः)कृत्वा पांमु(सु)लेपनम् ॥ २२ ॥
षड्वर्णं तु ततो लेप्यं यथाक्रमेण देशिकः ।
बिम्बसर्वतवर्णं तु षट्कृत्वः सालिपेत्तथा ॥ २३ ॥
पामुवार्णं तु विंशांशे त्वंसहीनं तु वर्जयेत् ।
षट्पषादिकवर्णस्य बन्धमित्युच्यते मया ॥ २४ ॥
तदानीं वर्णबन्धं तु विंशांशेंऽशविहीनकम् ।
द्वितीयं वर्णबन्धं स्यात्तन्वत()द्बन्धनं ततः ॥ २५ ॥
षण्णामपि सवर्णाद्या बन्धमेवं क्रमोन्नतम् ।
प्रथमेत्युच्यते बन्धे षड्विधं च लिपेत्क्रमात् ॥ २६ ॥
पत्रं बन्धं च मन्वन्तं न तथा . . .. ।
प्रवर्तय षडेतानि वर्णलेपक्रमं विदुः ॥ २७ ॥
दीर्घपत्रमिति ख्यातं ततोऽन्यच्च द्विभाजितम् ।
स्वर्णचूर्णसमायुक्तं वर्णलेपप्रवर्तकम् ॥ २८ ॥
षड्वर्णक्रममेवं हि लेपयेत्तु परस्परम् ॥ २९ ॥

इत्यंशुमद्भेदे काश्यपशिल्पे वर्णलेपनं नाम
षडशीतितमः पटलः ।

॥ अथ सप्ताशीतितमः पटलः ॥

अथ वक्ष्ये विशेषेण भक्तानां लक्षणं परम् ।
सर्वेषामपि भक्तानां पदं चतुर्विधं भवेत् ॥ १ ॥
सालोक्यं चैव सामीप्यं सायुज्यं च तथैव च ।
सारूप्यं च वि(प)दं विप्र चतुर्भेदमुदाहृतम् ॥ २ ॥
पुरुषो वा स्त्रियो वाऽथ तेषु यत्पादमाश्रितम् ।
तत्तत्पादानुकूल्यं वा सालोक्यपदमाश्रितम् ॥ ३ ॥
तदा सामीप्यदेशश्च मम(रु)चिराकृतिस्तु वा ।
ममचिरादिभिः कुर्याच्छेषाद्वे पादमाश्रिताः ॥ ४ ॥
बालश्च यौवना वृद्धस्त्रिविधस्य प्रिया ता(था) ।
त्रिविषादाकलाशब्दं तपसाचालसज्जिता ॥ ५ ॥
तस्मात्सप्ततिवर्षं वा या सा यौवनान्विता ।
तदूर्ध्ववयसोपेतं वृद्धा तु निन्द्रबन्धनम् ॥ ६ ॥
बालास्तु पञ्चतालेन शेषा वसुमयेन वै ।
स्थानकं चासनं चैव यानमृत्तन एव च ॥ ७ ॥
चतुर्भेदेन कर्तव्यं भक्तानां मानुषाद्बुधः ।
अभङ्गं समभङ्गं वा अतिभङ्गमथापि वा ॥ ८ ॥
सव्यं वामस्य पादं तु कुञ्चितं त्वितरस्थितम् ।
द्वौ स्वजानुचितां धृत्वा हृदयेऽब्जलिखेऽथ वा ॥ ९ ॥
लम्ब्यं दक्षिणपादं तु हस्तं पूर्ववदेव हि ।
आसनं पञ्चसप्तं वा नवमं तु शिखोपरि ॥ १० ॥
त्रयोदशपरिवाथ प्रकीर्णकं तु ततो भवेत् ।
महेन्द्रगृहरक्षेते पुष्पदन्ते तथैव च ॥ ११ ॥
भल्लाटक्यां शवे बाधाप्रवेशं परिकल्पयेत् ।
प्राङ्मुखानामपीन्द्रः स्यादुदगग्रं तथैव च ॥ १२ ॥
मनुपक्षकला वाऽथ सत्पादशपथं तु वा ।
नन्द्यावर्तमिदं पञ्चभेदमत्र विधीयते ॥ १३ ॥

महेन्द्रदिग्वंशकेष्वेव प्रवेशस्तु प्रकीर्णवत् ।
प्राङ्मुखं रसवीथी स्यादुदग्वक्त्रेव विंशतिः ॥ १४ ॥
अष्टाविंशतिकाया वा तावदेव विवर्धनात् ।
एवमष्टाविधं ख्यातं श्रीपतिं तललक्षितम् ॥ १५ ॥
एतद्द्वाराष्टकोपेतमुपद्वाराष्टकं भवेत् ।
अर्थवा वेदवेदांशं वारईशं तु प्रागिव ॥ १६ ॥
दण्डकं न्यस्तवस्तूनां भेदमेकमनेकधा ।
ग्रामादीनां तु विस्तारं भानुजन्माष्टसप्तधा ॥ १७ ॥
भूतवेदांशकं भूत्वा नन्दसप्तगुणांशकम् ।
भूतवेदाग्निभागं तु ग्रामे वप्रवि(वी)थी भवेत् ॥ १८ ॥
मानसूत्राद्बहिर्वप्रादन्तरं षड्विधं भवेत् ।
एकद्वित्रिचतुष्पञ्चहस्तं वा वप्रविस्तरम् ॥ १९ ॥
त्रिपञ्चसप्तहस्तं वा नवरुद्रकरं तु वा ।
त्रयोदशकरं वाऽथ वप्रतुङ्गमुदाहृतम् ॥ २० ॥
त्रिचतुष्पञ्चषट्सप्तवस्वंशं वा विशेषतः ।
वप्रमूलतलं कृत्वा एकांशेनाग्रविस्तरम् ॥ २१ ॥
शिलाभिर्वेष्टकाभिर्वा मृदा वा परिकल्पयेत् ।
छत्रदण्डाम्बुदाभं वा कुण्डलासपराकृतिः ॥ २२ ॥
इहास्यपरिवद्वाऽथ वप्रविषपमाचरेत् ।
करालमुद्गगुल्मासकल्कचिक्कणकर्मवाम् ॥ २३ ॥
लाक्षां समालिपेदूर्ध्वे पिष्टकाश्ममयूरपि ।
मनुयो दारुभिः पत्रैश्छादयेत्तु तृणादिभिः ॥ २४ ॥
तद्बाह्येऽभ्यन्तरे चैव खलु रचेष्ट मानतः ।
वासार्थं स(श)कटादीनां तक्षकाणां विशेषतः ॥ २५ ॥
तद्बाह्येऽभ्यष्टमानेन पञ्चभूम्याः परं भवेत् ।
तद्बाह्येऽभ्यष्टमानेन परिखां परिकल्पयेत् ॥ २६ ॥
वप्रस्याभ्यन्तरे विप्र देवतास्थापनं भवेत् ।
शिवहर्म्ये च मातृणां सद्मबाह्ये तु वा भवेत् ॥ २७ ॥
परिखस्य तु बाह्ये वा तौ संकल्प्य द्विजोत्तमः ।
आदित्यांशे तु भानोश्च आग्नेय्यां कालिकोष्ठकम् ॥ २८ ॥

भृशांशे विष्णुगृहं स्याद्याम्ये षण्मुखमन्दिरम् ।
शास्तुर्गृहं अगांशे तु नैर्ऋत्यां केशवालयम् ॥ २९ ॥
सुग्रीवांशे गणाध्यक्षं पुष्पदन्तपदेऽथवा ।
वारुण्यां विष्णुगेहं स्यात्सुग्रीवांशे हलालयम् ॥ ३० ॥
भृङ्गराजांशके पाशयक्ष्मे चैव विनाशकौ ।
मदिरालयं तु वायव्ये मुख्ये तु यमभूयकम् ॥ ३१ ॥
मातृणामालयं सौम्ये वायव्यां करणेऽपि वा ।
ईशाने शिवहर्म्यं स्यादीशानानन्तरेषु वा ॥ ३२ ॥
पर्जन्यांशे जयांशे वा हेन्द्रावाग्भोगमे वा ।
मारुतं केतुना विप्र कर्तव्यं तु शिवालयम् ॥ ३३ ॥
शिवालयं मातृकोष्ठं कर्तव्यं तु बहिर्मुखम् ।
अभ्यन्तरमुखं विष्णुं विवस्वान्पश्चिमाननम् ॥ ३४ ॥
शेषाः पूर्वमुखाः सर्वे कारयेद्विधिपूर्वकम् ।
सूत्रसंन्धौ चतुष्के तु शूले चैवाष्टकेऽपि वा ॥ ३५ ॥
षट्के चैव तु वीथ्यग्रे देवालयं द(हि)कारयेत् ।
वापीकूपतटाकादीन्सर्वत्र परिकल्पयेत् ॥ ३६ ॥
ब्रह्मांशे शेषभस्थानं वारुणे हरिमन्दिरम् ।
बाह्ये चैव कुलालानां नापितानां तु संकरे ॥ ३७ ॥
दक्षिणे शेदसीनां तु कारुणां चैव तत्र वै ।
मत्स्योबहिर्हितानां तु पश्चिमे वासमुच्यते ॥ ३८ ॥
उत्तरे चैव किकाणां अपरे तत्समीपके ।
तद्बाह्ये त्वबाह्ये वा कर्मकारा तथानले ॥ ३९ ॥
बाह्ये त्वल्पदूरे तु रजकानां गृहं भवेत् ।
तद्बाह्ये कोशमात्रे च चण्डालावासमुच्यते ॥ ४० ॥
शंकरे परिखा तग्र(द्व)च्छतदण्डे श्मशानकम् ।
वायव्यां च श्मशानं तु प्रागुक्तेन विशेषतः ॥ ४१ ॥
अपरं मानसूत्रं तु बाह्ये सालान्तरे भवेत् ।
महेन्द्रत्य(न्द्राद)ग्निभागान्तं भोजनं च विधीयते ॥ ४२ ॥
दण्डदक्षिणपार्श्वे तु पश्चिमे कुसुमिकालयम् ।
वस्त्रेणापि कचेदण्डुदण्डलङ्कान्यकंकटम् ॥ ४३ ॥

उत्तरे लवणं चैव तैलगन्धं तु पुष्पकम् ।
होमं रक्तादयश्चैव सर्वत्रैकाहकं भवेत् ॥ ४४ ॥
ग्रामादिलक्षणं प्रोक्तं गृहविन्यासलक्षणम् ॥ ४५ ॥

इत्यंशुमद्भेदे काश्यपशिल्पे ग्रामादिलक्षणं नाम
सप्ताशीतितमः पटलः ।

॥ अथाष्टाशीतितमः पटलः ॥

अथ वक्ष्ये विशेषेण गृहविन्यासलक्षणम् ।
शूले सूत्रे च सत्वे च चतुष्के चाष्टके तथा ॥ १ ॥
आलयाग्रे सभाग्रे च चैत्यवृक्षसमीपके ।
श्मशाने पर्वताग्रे च क्षारभूमौ तथैव च ॥ २ ॥
भुजङ्गनिलये चैवरुमन्यावाक्षं न कारयेत् ।
वास्तुमध्ये स्तवं मन्तु पुरीषस्य हृदिर्भवेत् ॥ ३ ॥
चतुष्कर्णगताः सूत्राः सिरा इत्यभिधीयते ।
मातर्मुखस्य सूत्राणि स्थानसंज्ञा प्रकीर्तिता ॥ ४ ॥
गुणस्य सूत्रयोगं तु संधिरित्यभिधीयते ।
तदेव सूत्रयोगं यत्तच्चतुष्कमुदाहृतम् ॥ ५ ॥
रससूत्रप्रयोगं यत्तदष्टकमुदाहृतम् ।
चतुष्कौ सिरयोगश्च चुलमित्यभिधीयते ॥ ६ ॥
केवलं सहजं चैव जगृहक्ष्मविधिर्भवेत् ।
समन्त्रं केवलं ख्यातं बाह्ये त्वावृतवीथिकम् ॥ ७ ॥
तद्बाह्ये त्वावृद्धीमान्दासीदासनिवासका ।
विधिनावेशनीत्रं सतिकाकारवद्भवेत् ॥ ८ ॥
आस्यावृतग्रहादीनि ग्रामवास्तुवदाचरेत् ।
आलयावृतवीथ्यादि हीनाकीलबलं गृहम् ॥ ९ ॥
यत्तद्गृहववास्तु स्यात्कूर्करिष्ठयानुकूलकम् ।
केवलं तु गृहक्षेत्रे वाऽऽरामादिषु वा कृते ॥ १० ॥

नन्दांशं वर्जयेत्क्षेत्रे सिरसूत्रसमन्वितम् ।
अजांशमध्यमे वर्ज्यं पुष्पादिऋक्षभागतः ॥ ११ ॥
राशयस्त्विति विख्याताः प्राग्वद्दाक्षिण्यमेव च ।
तेषु कर्कधनुर्मीनं मिथुनं चैव वर्जयेत् ॥ १२ ॥
शेषेष्विष्टं गृहं कर्म भानुकूलान्वितं गृहम् ।
ग्रामादिगृहश्रेणीषु राजा च सहजं भवेत् ॥ १३ ॥
भूपरीक्षामायसर्वं प्रागिवैव समाचरेत् ।
कर्षणे ह्या(ह्यु)दितं ऋक्षं तिथिवारस्तदुक्तकम् ॥ १४ ॥
दर्शनं चोभयं सर्वं शुभयुक्तं परिग्रहेत् ।
गृहारम्भं तु कर्तव्यं गर्भन्यासपुरःसरम् ॥ १५ ॥
गर्भन्यासं प्रकर्तव्यं प्रागुक्तविधिना बुधैः ।
भल्लाटांशे महेन्द्रांशे गृहक्षतपदे तथा ॥ १६ ॥
पुष्पदन्तपदे चैव पूषादिषु चतुर्ग्रहे ।
द्वारस्य दक्षिणे वाङ्घ्रियोगमूले तथा बुधः ॥ १७ ॥
गर्भन्यासं प्रकर्तव्यं तस्योर्ध्वे प्रथमेष्टका ।
गृहदेवमिति ख्यातं देहगर्भमिति स्मृतम् ॥ १८ ॥
सगर्भं सर्वसंपत्स्यादगर्भं सर्वनाशनम् ।
षट्कौशिके जीवयुक्ता विधेया गर्भिणी भवेत् ॥ १९ ॥
गृहिणी गर्भिणी चेत्तु गर्भनाशं न कारयेत् ।
गर्भस्योपरि गर्भः स्यात्कर्तव्यांशं विनश्यति ॥ २० ॥
जीर्णे गृहे पुनर्वाऽपि गर्भं पूर्ववदाचरेत् ।
विजयं त्वि(त्व)तिकान्तं च सुकान्तं वर्धमानकम् ॥ २१ ॥
शृ(श्री)कांतं वसुकान्तं वा वर्धमानावधा(सा)नकम् ।
श्रीकरं चातिभद्रं च गृहभेदं तु षड्विधम् ॥ २२ ॥
विमन्वे(विजयं त्वे)कव(शा)ला स्याद्द्विशाला त्वितिकान्तकम् ।
त्रिशाला वसुकाख्या(न्तं) वा अथवा(वर्धमा)नं चतुःस्स्यततुर्गृह)म्
श्रीकरं सप्तशाला स्याद्दशशालाऽतिभद्रकम् ।
त्रिचतुर्हस्तमारभ्य द्विद्विहस्तविवर्धनात् ॥ २४ ॥
नन्दकर्मकरान्तं तु युग्मयुग्मं चतुश्चतुः ।
अष्टधा विजयप्रास्म(यं प्रोक्तं) द्विशाला विक्षि(त्वति)कान्तकम् ॥

त्विति कान्तमथोच्येत द्विद्विहस्तविवर्धनात् ।
नन्दकर्मकरारभ्य द्विद्विहस्तविवर्धनात् ॥ २६ ॥
सप्तसप्ताष्टषष्ठ्यन्तं वर्धमानं तु षड्विधम् ।
तेष्वादौ मनुभेदौ तौ सप्रताकणकं ग्रहम् ॥ २७ ॥
दशषड्वात्रिंशद्भेदाविवृत्तकणकान्वितम् ।
वर्धमानतमं व्यासायामयुक्तं सपत्तिकम् ॥ २८ ॥
दक्षिणे दक्षिणे वाऽपि वर्धमानस्य पार्श्वके ।
सुकान्तसहितं यत्तच्छ्रीकरं त्विति विद्यते ॥ २९ ॥
पार्श्वयोर्वर्धमानस्य शुकान्तौ तौ विराजितौ ।
अतिभद्राविति ख्यातौ मूलगेहान्तरक्षितौ ॥ ३० ॥
विस्तारसदृशः कायः सद्विहस्तं च भाति(जि)तौ ।
विस्तारसदृशाद्वेदहस्तं चौन्नवतं भवेत् ॥ ३१ ॥
प्रकल्पं षट्कराधिक्यं माशाभासाष्टकारधीः ।
कुञ्जादीन्हस्तमानाख्यं पङ्क्तिमानमथ शृणु ॥ ३२ ॥
विस्तारसदृशं याति च्छन्दं भागद्वयाधिकम् ।
चतुर्भागाधिकायश्च चिदमेवं द्विधा भवेत् ॥ ३३ ॥
देवद्विजमहीनाथो जि(चित)ञ्ज्यात्यायमायतम् ।
राजारसनयुक्तं नाभिंचतुर्जातिगृहं शुभम् ॥ ३४ ॥
शेषाणामपि सर्वेषां चित्तादीनि सुखावहम् ।
सर्वं पूर्वोदितानां तु योग्यमृद्धिकरं भवेत् ॥ ३५ ॥
विजयादिगृहाणां तु जाद्या(त्या)यामं समं भवेत् ।
हस्तमानेन या(जा)त्यादिभागं चैव समाचरेत् ॥ ३६ ॥
न कुर्यात्संकरं तेषु संकरं तत्तु नाशनम् ।
आच्यद्विहस्तमानं तु व्यासपङ्क्तिसमं तु वा ॥ ३७ ॥
पदत्रयं स्वस्तिकं तु व्यसदायतुनहिश्चेत् । (१)
पदहीनं न कर्तव्यं सर्वसंपद्विनाशनम् ॥ ३८ ॥
एकबन्धं त्रिबन्धं वा अथवाऽनेकबन्धनम् ।
कल्पिते मानसूत्रात्तु नीत्रं पारात्तु वा भवेत् ॥ ३९ ॥
सर्वेषां विजयादीनां विन्यासं तु वदामि ते ।
देवभागं तु विस्तारे आयामे तु रसांशकम् ॥ ४० ॥

पक्षांशं ग्रीवविस्तारं मेखलेन्द्रं च तत्समम् ।
गुणांशं ग्रहदीर्घं तु खुरदीर्घं तु तत्समम् ॥ ४१ ॥
परितः कुड्यसंयुक्तं द्वारनेत्रादिके द्विज ।
कल्पितं तु ग्रहं ख्यातं रङ्गं पादोत्तरान्वितम् ॥ ४२ ॥
दक्षिणे तु ग्रहं तच्छ्रीरङ्गमायुष्करं भवेत् ।
सौख्यं तु दक्षिणे गेहं रङ्गपुत्रविवर्धनम् ॥ ४३ ॥
ग्रहं व्यासे गुणांशे तु अंगणं एकभागया ।
द्विभागं ग्रहविस्तारं आयामं पूर्ववद्भवेत् ॥ ४४ ॥
ग्रहायामे तु नन्दांशे इन्द्रांशं दक्षिणे त्यजेत् ।
गुणांशं वामपार्श्वे च विशेद्वेश्म तदन्तरे ॥ ४५ ॥
षडंशे च विशाले तु आयामे दशभाजिते ।
द्विभागं ग्रहविस्तारं च क्रमेण द्विभागया ॥ ४६ ॥
मुखद्वारविभागेन कल्पयेत्तु यथाक्रमम् ।
पार्श्वयोस्तु गुणांशेन गृहायामं विधीयते ॥ ४७ ॥
तयोर्मध्ये गृहांशे तु गमपादोत्तरान्वितम् ।
हरेग्रहाग्रंशे तु नवांशैंऽशद्वयं त्रिभिः ॥ ४८ ॥
युगांशैः पुरतोऽलिन्दे क्रमेणैव प्रकल्पयेत् ।
आयामार्धं ग्रहारामं कृतं मध्येकभित्तिकम् ॥ ४९ ॥
भूतादि नन्दरुद्रांशं चरणव्यासभाजिते ।
अनलादितिमध्ये तु सव्येनैव क्रमान्वितम् ॥ ५० ॥
यथाक्रमेण नित्यां तु स्थापयेन्मध्यमङ्घ्रिमान् ।
गृहाङ्घ्रिमध्यभित्तेस्तु चतुष्कं गृहमध्यगम् ॥ ५१ ॥
हस्तरामग्न्यगुपेतवत्क्रपादुक एव वा ।
विदुवातिग्रहाणां तु सामान्यं कुड्यविस्तृतम् ॥ ५२ ॥
अथवाऽङ्घ्रिविशालेन त्रिचतुष्पञ्च एव वा ।
एवं मध्यविशालं तु षड्विधं परिकीर्तितम् ॥ ५३ ॥
अधिष्ठानादिवशतः प्रासादवदलक्षितम् ।
विजयाख्यस्य नेत्रे द्वे उभयोः पार्श्वयोः कुरु ॥ ५४ ॥
महानासिमिवाकारं नेत्रद्वयं प्रकल्पयेत् ।
पुरे पुरे चाल्पनाड्यं त्रिवस्त्रयसमन्वितम् ॥ ५५ ॥

कल्प्यैव गोपुराकारं विजयाख्यगृहं भवेत् ।
सभारशिरोवापि लुनिराहाशिषं भवेत् ॥ ५६ ॥
पार्श्वयोश्चैकभागेन मालिनं च समावृतम् ।
पुरतो भद्रयुक्तं वा चतुर्वंशायतस्ततम् ॥ ५७ ॥
विजयं त्वेवमाख्यातमतिकान्तमथोच्यते ।
नेत्रंत्रयसमायुक्तमितिकान्तं प्रकल्पयेत् ॥ ५८ ॥
देवभूसुरभूपानां योग्यं नैवान्यवर्गिणाम् ।
कतिधाकृतिवंशाग्रं चतुर्नेत्रयुतं तु वा ॥ ५९ ॥
एकानेकतलं वाऽथ प्रासादवदलंकृतम् ।
कर्तुरिच्छानुसारेण स्थानविन्यासमाचरेत् ॥ ६० ॥
विस्तारं धर्मभागं च धर्मभागविवर्जिते ।
बाह्ये वारं शिखांशेन पक्षांशग्रहविस्मृ(स्तृ)तम् ॥ ६१ ॥
गृहाग्रे वारमेकांशं कर्णतुङ्गं युगांशकम् ।
शेषभागं खलूरिः स्यात्परितः कुड्यसंयुतम् ॥ ६२ ॥
एतदेवाङ्कणं विप्र मण्डपं परिवाच्यते ।
तदावृतांशवाथ स्यात्पक्षांशेन खलूरिका ॥ ६३ ॥
शेषं पूर्ववदुद्दिष्टं साङ्गोपाङ्गं द्विजोत्तम ।
अथवा मण्डपं वर्ज्य प्रागिवैव प्रकल्पयेत् ॥ ६४ ॥
मध्यरङ्गसमायुक्तं मुख्यलोहं द्विवासकम् ।
शालाविरहितस्थाने कुड्यद्वारं प्रयोजयेत् ॥ ६५ ॥
जात्यादाभासपर्यन्तमेवमेवाङ्कणाद्बहिः ।
शेषांशमङ्कणं ख्यातं बाह्यालिन्दं विना तु वा ॥ ६६ ॥
महेन्द्रे ग्रहक्षते चैव पुष्पदन्ते तथैव च ।
भल्लाटभ्यां शके चैव सर्वेषां द्वि(द्वा)रमुच्यते ॥ ६७ ॥
द्वारं चैवोपद्वारं च तेष्वेकांशेषु कल्पयेत् ।
जयन्ते जलनिष्ठान्तं मुख्यांशे वा विशेषतः ॥ ६८ ॥
द्वारस्य वामयोगस्य जलनिस्सं च दक्षिणे ।
पश्चिमे उत्तरे चैव जलमार्गं न कारयेत् ॥ ६९ ॥
यदि होमेन कर्तव्यं कर्तुर्मरणमादिशेत् ।
प्रागुदग्भागवत्प्रत्यगुदग्वाहन्तिकान्तिके ॥ ७० ॥

अश्रि(ति)कान्तमिति ख्यातं इतरं सौम्यमुच्यते ।
अतिकान्तमिति ख्यातं सुकान्तमथ वक्ष्यते ॥ ७१ ॥
गृहयामे षडंशे तु द्विभागं ग्रहविस्तृतम् ।
वेदांशे नाङ्कणं विद्यात्द्वयंशेनैव खलूरिका ॥ ७२ ॥
चतुर्णेत्रसमायुक्तं बाह्ये वारयुतं तु वा ।
षडष्टांशे तदायामे द्विभागं ग्रहविस्तृतम् ॥ ७३ ॥
मुख्यगेहस्य चाग्रे तु अलिन्द्रं च शिवांशकम् ।
षडंशं चाङ्कणं ख्यातं द्वयंशाग्रे तु खलूरिका ॥ ७४ ॥
रसधर्माशके तारे चायामे च प्रकल्पयेत् ।
द्विभागं ग्रहविस्तारं मुखालिन्द्रं द्विभागया ॥ ७५ ॥
अष्टांशे नाङ्कणं ख्यातं शेषांशे तु खलूरिका ।
रसभागे कृते व्यासे भान्वंशे वा तदायमे ॥ ७६ ॥
द्विभागं ग्रहविस्तारं द्विद्वयंशं चाङ्कणं भवेत् ।
अलिन्द्रं तु शिवांशेन दशांशं त्वङ्कणं भवेत् ॥ ७७ ॥
प्रागिवैव खलूरिः स्यात्सर्वेषां बाह्यवारकम् ।
मानसूत्राद्बहिस्त्वेवं गृहमानं सदा भवेत् ॥ ७८ ॥
वस्वंशे तु तदायामे पक्षांशं ग्रहविस्मृ(स्तृ)तम् ।
गेहानामग्रतोऽलिन्द्रं एकांशेन विधीयते ॥ ७९ ॥
वेदांशेनाङ्कणं कुर्याद्वस्वंशेन खलूरिका ।
परितोऽवहितं कालं शंचांगणं भवेत् ॥ ८० ॥
वसुधर्मततायामे द्विभागं ग्रहविस्मृ(स्तृ)तम् ।
अङ्कणं च शिवांशेन मुख्याग्रेऽशं तु वारकम् ॥ ८१ ॥
पार्श्वयोस्तु तथावारं वस्वंशं त्वङ्कणं भवेत् ।
द्वयंशेनैव खलूरिः स्यात्पार्श्वाग्रं द्वारहीनकम् ॥ ८२ ॥
अङ्कणं विंशदंशेन कल्पयेत्कल्पवित्तमः ।
वस्वेकांशे तदायामे अष्टाविंशतिमङ्कणम् ॥ ८३ ॥
शेषं पूर्ववदुद्दिष्टं खलूरिं चैव पूर्ववत् ।
वसुमन्वंशतारायै द्विभागं ग्रहविस्तृतम् ॥ ८४ ॥
अङ्कणं च द्विभागेन द्वारं तत्समुच्यते ।
मुख्यगेहाग्रहस्तस्य वारं चकमणं भवेत् ॥ ८५ ॥

चतुर्विंशतिभागेन अङ्गुलं परिकल्पयेत् ।
द्व्यंशेनैव खल्लारिः स्यादायामे तु कलांशके ॥ ८६ ॥
मुख्यगेहाग्रतो वारं गुणांशेनैव कल्पयेत् ।
अष्टाविंशतिभागेन अङ्कणं तु प्रकल्पयेत् ॥ ८७ ॥
शेषं पूर्ववदुद्दिष्टं युक्त्या सर्वांशसंयुतम् ।
कर्मभिः पार्श्वयोः कल्प्यं द्वारं कुर्याममुच्यते ॥ ८८ ॥
परितः कुड्यसंयुक्तं प्रागुदग्द्वाराजलोद्गमम् ।
रसभागे तु विस्तारे दशभागे तदायते ॥ ८९ ॥
वस्वंशेनाङ्कणं विद्यात्तदायामो द्व्यांगुलम् ।
अनालयस्य चाग्रे तु द्वारं येनांशकेन तु ॥ ९० ॥
शेषं पूर्ववदुद्दिष्टं बाह्यवारं च प्रागिव ।
गेहस्य सेतुवस्वंशे छायामे तु तदंशके ॥ ९१ ॥
ब्रह्माङ्कणं युगांशेन वारं तस्य वृतांशकम् ।
द्विभागं ग्रहविस्तारं मुख्यं चेद्वंशभित्तिकम् ॥ ९२ ॥
कुड्याभद्वारसंयुक्तं परितः कुड्यसंयुतम् ।
विस्तरे वसुभागे तु दशभागे तदायते ॥ ९३ ॥
चक्राणां तु विभागेन शेषं पूर्ववदाचरेत् ।
अथवा चूर्कणं वर्ज्य वस्वंशेनाङ्कणं भवेत् ॥ ९४ ॥
गृहव्यासे तु वस्वंशे भान्वंशे तु तदायते ।
पूर्वे वा ग्रहचक्रे च द्व्यंशं चंक्रमणं भवेत् ॥ ९५ ॥
पुरस्तान्मुख्यगेहस्य द्वारं व्योमांशमुच्यते ।
अङ्कणं चाष्टविंशांशं कल्पयेत्कल्पवित्तमः ॥ ९६ ॥
मुख्यगेहस्य मध्ये तु रङ्ग योः पार्श्वयोर्गृहम् ।
नेत्रं कुड्यसमीपे तु गेहे वेशदुदावृतम् ॥ ९७ ॥
वसुमन्वंशके व्यासे चाऽऽयामे च कर्मकृते ।
अङ्कणं वेदवस्वंशं पुरा चेग्रे तु वारकम् ॥ ९८ ॥
अथवा पार्श्ववासाग्रे वारं चङ्क्रांशमानतः ।
द्विभक्तिविसृताष्टांशदीर्घं चैवाङ्कणं भवेत् ॥ ९९ ॥
अथवा वांपराष्टांशं पक्षवारांशवांशकम् ।
अङ्कणं भानुभागेन विस्तारं यद्द्वयं रसम् ॥ १०० ॥

षोडशांशे गृहायामे विस्तरे वसुभागके ।
द्विभागं गृहविस्तारं कलांशं चाङ्कणं भवेत् ॥ १०१ ॥
अङ्कणावृतवारं तु शून्यांशेन प्रकल्पयेत् ।
पुरे पुरेऽग्रहारे तु शिवांशं चाङ्कणं भवेत् ॥ १०२ ॥
इतराध्वग्रहाणां तु बाह्यं वासवकारकम् ।
नरांशे विस्तृतायामे युगांशं त्वङ्कणं भवेत् ॥ १०३ ॥
परितोऽलिन्द्रमेकांशं द्विभागं ग्रहविस्तृतम् ।
बाह्येऽलिन्द्रं शिवांशेन चतुर्दिग्भद्रसंयुतम् ॥ १०४ ॥
चतुर्विभक्तिविस्तारं नीव्रस्य भद्रमस्तकम् ।
मुखभद्रं कर्णं लिप्य सोपानं भद्रपार्श्वयोः ॥ १०५ ॥
पुरतो भद्रपोपेतं मण्डपोपेतविनतः ।
सर्वेषामपि सामान्यं मध्यभद्रं च मण्डपम् ॥ १०६ ॥
मन्वंशे तु तदायामे त्वंशं त्वंचाङ्कणं भवेत् ।
शेषं पूर्ववदुद्दिष्टं षोडशान्ते तदायते ॥ १०७ ॥
चकमाणं द्विभागेन कल्यंशे तु प्रागिवा ।
अषड्भागे तदायामे प्रमुखे वारकद्वयम् ॥ १०८ ॥
शेषं पूर्ववदुद्दिष्टमेकानेकतलान्वितम् ।
भानुभागे च मन्वंशे कलांशेऽष्टादशांशके ॥ १०९ ॥
विंशं द्वाविंशदंशे च गृहव्यासविभाजिते ।
जात्याद्या भासपर्यन्ता यामेष्वष्टसु यामनम् ॥ ११० ॥
बाह्यब्रह्मांकणादीनि परितः क(प)रिकल्पयेत् ।
एकं वा द्वित्रिभागं वा बाह्यवारं प्रकल्पयेत् ॥ १११ ॥
गृहव्यासं द्विभागेन तथा च चङ्कणावृतम् ।
शेषांशमङ्कणं स्यातं छिदिदं वांबुपाननम् ॥ ११२ ॥
इष्टदीर्घहरङ्गं च कल्प्यं कुड्यं तथा भवेत् ।
एकानेकतलं वाऽथ प्रासादवदलंकृतम् ॥ ११३ ॥
उत्तरं वाजनं साब्जक्षेपणं क्षुद्रवाजनम् ।
इष्टकाच्छादनं चैव कल्पास्तरणं तथा ॥ ११४ ॥
मृतगुल्मासकल्कं च प्रस्तरे सकलं प्रति ।
शङ्खावन्तं तु सोपानं कर्णारध्वजमेव वा ॥ ११५ ॥

विजयादिग्रहाणां तु अङ्गयुक्त्या त्वनेन वै।
विस्तारसदृशं तुङ्गमेकभूमौ विधीयते ॥ ११६ ॥
तस्माद्विभज्यदीर्घं तु .... रोहितोन्नतम्।
त्रितलस्थं तु भागं तु पञ्चभूमौ रसांशकम् ॥ ११७ ॥
अष्टभागांशकं व्यासात्पञ्चभूमोदयं भवेत्।
दशांशे नवभूमौ च मन्वंशं सप्तभूमिके ॥ ११८ ॥
सप्तभूमोपरिष्टात्तु मर्त्यानामालयं नहि।
एकाद्वित्रि च भूमौ वा शूद्राणां तु विधीयते ॥ ११९ ॥
वैश्यानां पञ्चभूम्यन्तं चतुर्भूम्यन्तमेव वा।
भूपानां च सुराणां च सप्तभ्यूम्यन्तरं परम् ॥ १२० ॥
एकभूमोदयं चाष्टभागोच्चं तु धरातलम्।
द्विभागं चरणोच्चं तु प्रस्तरोच्चं शिवांशकम् ॥ १२१ ॥
सार्धांशं तु गलोत्सेधं शिखरोच्चं द्विभागया।
आर्धांशं तु शिखामानं क्रमेणैव तु योजयेत् ॥ १२२ ॥
शिखाविमानं चरणे प्रस्तरे शिखरे तु वा।
गलवर्गे तु वा योज्यं त्रिष्वङ्गेषु समं तु वा ॥ १२३ ॥
रुद्रांशे द्वितलोच्चं तु व्योमांशं तु धरातलम्।
पक्षांक्षं चरणायामं शेषं पूर्ववदाचरेत् ॥ १२४ ॥
मन्वंशे त्रितलोच्चं तु अधिष्ठानं शिवांशकम्।
अक्षांशमङ्घ्रितुङ्गं तु शेषं पूर्ववदाचरेत् ॥ १२५ ॥
सप्ताधिकं शिवांशं तु चतुर्भूमोदये कृते।
पक्षजन्यंशके स्तम्भतलं शेषं तु पूर्ववत् ॥ १२६ ॥
पञ्चभूमौ तु विंशांशे शिवांशं तलमानकम्।
अश्विन्यंशं तु पादोच्चं शेषं प्रागिव कल्पयेत् ॥ १२७ ॥
त्रयोविंशांशके त्वंशतलं पादन्तु तद्द्वयम्।
शेषं पूर्ववदुद्दिष्टं सप्तभूमोदयं ततः ॥ १२८ ॥
षड्विंशांशे विपक्षांशे धरायां चरणं क्रमात्।
सप्तभूमं समाख्यातं अथवा विस्तमानसः ॥ १२९ ॥
सप्तहस्तं तु स्तूप्युच्चं तद्द्वयं शिखरोदयम्।
द्विहस्ताङ्गुलमानं च मञ्चं स्थूपिसमं भवेत् ॥ १३० ॥

शीर्षे च समपादस्थं स्थलं पञ्चसमं भवेत् ।
उपानोच्चं तु षण्मात्रमेवमेव तलं विदुः ॥ १३१ ॥
एतद्वै बाहुभूमौ तु ऊर्ध्वं भूमिरुदाहृता ।
ऊर्ध्वभूचरणोच्चं तु अधर्मं नष्टवा भवेत् ॥ १३२ ॥
एकांशाधिकमानं तु द्वितीयस्थलपादकम् ।
अथ द्विभूमिभागं तु कृत्वैकाधिकं तु तत् ॥ १३३ ॥
तृतीयभूमिपादौ च तथा कुर्यात्तलं प्रति ।
एकभूमौ स्थलोच्चं तु मञ्चोच्चं द्वितलस्य तु ॥ १३४ ॥
स्तम्भवामे हितांशं तु मञ्चमानतिलं प्रति ।
भवभूम्येऽसितुङ्गार्धश्चरातालोदयं भवेत् ॥ १३५ ॥
सर्वेषामपि सामान्यं प्रागुक्तपादुकोन्नतम् ।
सप्ताष्टनन्दधर्मांशरुद्रांशं वाङ्घ्रिकोदयम् ॥ १३६ ॥
कृते मूलपादस्य तकं ... .
स्तम्भानां भूषणं विप्र प्रागुक्तविधिना कुरु ॥ १३७ ॥
पादबन्धतलं तेषां अङ्गं तेषु तलं भवेत् ।
अनपेक्षमनङ्गेषु सापेक्षाङ्गेषु योजयेत् ॥ १३८ ॥
गृहोच्छेदकच्छेदवृध्यहा ... वा भवेत् ।
संपूज्य जगरग्राह्ययुग्महस्त .... सङ्ग्रहेत् ॥ १३९ ॥
ओजार्थपूरणार्थं च यन्मानं योजितं मतम् ।
अधिष्ठानादिवर्गेषु संमिश्रकर्षयत्कृते ॥ १४० ॥
पुरोक्तमानेनैव भवेत्मानं नान्यं विभावयेत् ।
बाह्यतो जालकं कुर्यान्तर्विवृतपादुकम् ॥ १४१ ॥
जालकं च कवाटं च इष्टस्थाने प्रकल्पयेत् ।
पादोपरि भवेत्पादं कुड्यं कुड्योपरि स्मृतम् ॥ १४२ ॥
विपरीतंविपद्येव तस्मादुक्तं समाचरेत् ।
अकरीवंशशालाग्र अष्टांशं वा चतुर्मुखम् ॥ १४३ ॥
कुण्डं वा शीर्षकं विप्र मण्डपं मण्डपाकृतिः ।
यथारुचि यथाशोभं तथा कुर्यादगृहं बुधः ॥ १४४ ॥
दक्षिणे मूलगेहार्थं मण्डमत्युन्नतोन्नतम् ।
स्वाम्रावासं तु वा विद्यादिष्टभूमौ तु वासकम् ॥ १४५ ॥

तस्योत्तरे त्रिधावासं नैर्ऋत्यां सूतिकालयम् ।
उत्तरे भोजनस्थानं शांकरे पाचनालयम् ॥ १४६ ॥
किंचिल्लक्षणयाऽऽवासा ... ... वरे ।
जलद्रोणिघटं चैव पर्जन्ये वा जयन्तके ॥ १४७ ॥
ऐन्द्रे वा भोजनस्थानं पश्चिमे वा विशेषतः ॥
श्रीकरं प्राङ्मुखं भित्तिरायुष्यं दक्षिणाननम् ॥ १४८ ॥
पश्चिमाभिमुखं ऋद्धिरुत्तराग्रं क्षयं भवेत् ।
प्राक्पुरःशयनं संपद्दक्षिणादायुवर्धनम् ॥ १४९ ॥
पश्चिमे शक्तिसंतापमुत्तरे व्याधिपीडनम् ।
वंशस्यानुगतद्वारं शयनं चाग्रमृत्युदम् ॥ १५० ॥
तस्माच्छिवायामे चैव शनासत्यातौ हितौ ।
पापयक्ष्मांशके व्याधिः कर्तव्यं पचनालयम् ॥ १५१ ॥
गृहाज्जेष्ठकनिष्ठान्तं दक्षिणादुत्तरान्तकम् ।
पत्योस्तुन्निपूर्वं तेषां हि सदनानि वै ॥ १५२ ॥
श्रेणीष्वेवं समाख्यातं .... ।
शेषाणां परितो वाऽपि कर्तव्यं येन युक्तितः ॥ १५३ ॥
अग्रे वाह्ये पुरस्तात्तु गोशाले दक्षिणेऽपि वा ।
हयेनावासतद्वत्स्यादुदरङ्गं तथैव च ॥ १५४ ॥
वापीकूपतटाकादि सर्वत्रैवाविरोधितम् ।
पश्चिमे वै स्त्रियाश्चाथ पुत्राणामुत्तरे गृहम् ॥ १५५ ॥
अनुजानां च तत्रैवं मर्त्यानां पुरतो हितम् ।
कर्तुरिच्छानुसारेण अनुक्तं तु समाचरेत् ॥ १५६ ॥
हस्तस्तम्भं लुपादीनि उभमेव परिग्रहेत् ।
व्यासहस्तगुणप्राप्यनागहारे तु योनिकम् ॥ १५७ ॥
कुटिनस्त्वायहस्तवस्तुब्रह्मपक्षयन्तने ।
.... जक्षामात्रं तु यथादीर्घं नागं नवगुणैः ॥ १५८ ॥
दशभूतनमृणमिदं नाहं दतद्यजनि .... ।
नेत्रगन्धे तु हरिणं पक्षणमिदं गृह ॥ १५९ ॥
ग्रमणामुदिशं वादशादयादि कल्पितम् ।
ग्रहाणां पुरे पुरे वाऽपि दक्षिणे दक्षिणेऽपि वा ॥ १६० ॥

शंकरे वा विधानेन कूटं कुर्यात्सुसुन्दरम् ।
गृहव्यसान्तरा नित्यं द्विगुणं त्रिगुणं तु वा ॥ १६१ ॥
चतुष्पञ्चगुणव्यासं द्वयन्तरं गृहकूटयोः ।
वायोरेवमेवं तु परे बाह्यं च तच्छृणु ॥ १६२ ॥
गृहायामसमं वाऽथ द्विगुणं त्रिगुणं तु वा ।
चतुष्पञ्च वाऽथ गृहकूटान्तरं भवेत् ॥ १६३ ॥
ग्रहस्य सकशदीर्घं च गृहं वा पार्श्वयोः पुरे ।
पुरे कल्पं च कूटं चेदिष्टदीर्घायतनं ग्रहेत् ॥ १६४ ॥
ग्रहव्यासानुगुणं कूटं कल्पयेतियुग्मना ।
पञ्चहस्तं समारभ्य द्विद्विहस्तविवर्धनात् ॥ १६५ ॥
एकविंशतिहस्तान्तं नवधा कूटविस्तृतम् ।
विस्तारसदृशोत्सेधहस्तं वाऽष्टकारकम् ॥ १६६ ॥
अष्टहस्तं तु वाऽधिक्यकूटायामं प्रकल्पयेत् ।
विस्तारद्विगुणं मध्ये कूटायामं प्रकल्पयेत् ॥ १६७ ॥
कूटानां भागमानेन जात्यादिनियमं कुरु ।
हस्तमानेन कूटानां जात्यादिनियमं विना ॥ १६८ ॥
चतुर्भित्तिविशालं तु यथामञ्चं तथा भवेत् ॥ १६९ ॥

इत्यंशुमद्भेदे काश्यपशिल्पे ग्रामलक्षणं नामाष्टाशीतितमः पटलः ।
